शारदा-गौरव-ग्रन्थ-माला ... ५१

श्रीतुलसी-मानस-नलिनम्

(श्रीरामचरितमानस-भावानुवादः)

प्रथम-खण्डः

नलिनी साधले (पराडकर)

मूल्यम् ४० रूप्यकाः

प्रकाशक:
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

।। श्रीशृङ्गेरी-जगद्गुरु-संस्थानम् ।।

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-इत्यादि-बिरुदावली-समलंकृत-

श्रीजगद्गुरु-शृंगेरी-श्रीमदभिनवविद्यातीर्थस्वामिभिः

श्रीमत्याः **नलिनी साधले** (पराडकर)-विषये नारायण-स्मरण-पूर्वकं विरचिता आशिषः समुल्लसन्तु । भगवतः श्रीरामचन्द्रस्य पवित्रं चरित्रं सर्वेषां लोकानाम् अतितराम् आदरणीयमास्ते । महर्षिणा वाल्मीकिना तच्चरितं काव्यरूपेण श्रीमद्-रामायणम् इति नाम्ना देववाण्यां व्यरचि । तदनु गच्छता कालेन श्रीरामकथा-वर्णनेन स्वां वाणीं पावयितुमिच्छद्भिः नैकैः कविभिः नैके ग्रन्थाः श्रीरामचरित्रावगमकाः नैकासु भाषासु व्यरच्यन्त । तेषु श्रीतुलसीदासकविना विरचितं श्रीरामचरित-मानस-नामकं काव्यम् अन्यतमम् आस्ते । अस्मिन् ग्रन्थे श्रीमद्रामायणापेक्षया बहवो नूतना विषयाः सन्ति येषां मननेन महान् आनन्दः उत्पद्यते । परन्तु व्रजभाषया विरचितम् इदं काव्यं न सर्वैरप्यवगन्तुं शक्यम् इति भवत्या अस्य काव्यस्य संस्कृतानुवादो व्यधायि । अनूदितं ग्रन्थं तत्र तत्र वयमवालोकयाम । कविता मनोहारिणी चेतः प्रसादयति । संस्कृत-प्रचारण-बद्ध-दीक्षः श्रीमान् **वसन्त अनन्त गाडगीळ** महोदयः स्वीय-पत्रिकायां शारदायाम इमम् अनुवादं प्रकटयन्नास्ते । अधुना समग्रस्य बालकाण्डस्य प्रकाशनं संपद्यत इति विदित्वा नितरां मोदामहे । अग्रिमा अपि भागाः नचिरादेव प्रकाशपदवीमियासुरित्याशास्महे ।

शृङ्गगिरिः | इति नारायण-स्मरणम्

कालयुक्ति-पौष-शुक्ल-प्रथमा | **श्रीः**

स्थिरवासरः, ३०-१२-१९७८

SHREE DWARAKA SHARADA PEETH
DWARAKA (Gujarat)

Camp — BANGLORE फाल्गुन कृ. ३, १९००

शत-कोटि-प्रविस्तरां रामायण-गङ्गां कवि-कोकिल: श्रीवाल्मीकि: कलि-कलमष-विध्वंसनाय दिव्याम् अक्षर-सृष्टिं समानीय जगतीतलम् उपाकरोत् ।

संस्कृत-भाषानभिज्ञानां कृते श्रीतुलसी 'भाषा-निबद्धमतिसुन्दरमातनोति' इति प्रतिजानीते । तदपि न परेषां मनोरञ्जनाय परं 'स्वान्त:सुखाय... ।'

हिन्दी - भाषा - गतस्य तुलसी- मानसस्य पुनरपि संस्कृत-भाषायां भावानुवादकरणं महत्-कठिनं कष्ट-साध्यं च। परं लीलया तद् अङ्गीकुर्वाणा कवयित्री सौ. नलिनी त्रेतायुगीनं वाल्मीकि-कोकिलं स्मारयन्ती नूनं धन्या 'कवि-कोकिला' इति शुभाशीराशिभि: तां संयोज्य तस्या: प्रातिभं नलिनं नव - नव - निर्माण - क्षमं विकासयन्तु श्रीशारदाम्बा श्रीद्वारकाधीश-श्रीचन्द्रमौलीश्वरौ च इति शुभम् आशास्महे ।

श्री:

शारदा-गौरव-ग्रन्थमाला—५१

तुलसी-मानस-नलिनम्-१

(बालकाण्डम्)

कवयित्री – प्रा. सौ. नलिनी साधले पराडकर

मूल्यम् ४० रूप्यका:

॥ समर्पणम् ॥

" श्रीराम-परमभक्तं, तुलसीकाव्यानुरागिणं सन्तम् ।
रामायण-रस-लुब्धं, भिषग्-वरं, मे हितैषिणं वन्दे ॥
तुलसी-काव्य-कलाया यत्-प्रेरणया कृतं मयाभ्यसनम् ।
श्रीशंकरचरणाभ्यां ताभ्यामेतत् समर्पितं काव्यम् ॥ "

॥ प्रास्ताविकम् ॥

ध्यात्वा रामपदाब्जं नत्वा चैवादिमं कविं ज्येष्ठम् ।
धृत्वा शिरसि ततोऽहं भक्त्या श्रीशारदा-पदाब्ज-रजः ॥

स्मृत्वा सद्गुरु-वृन्दं कृत्वा सज्जन-सभाजनं भूयः ।
तुलसीदासं वन्दे याचे सर्वान् शुभाशिषश्चाहम् ॥

श्रीरामचन्द्र-गाथा गीता गीर्वाणभाषया पूर्वैः ।
लौकिक-भाषा-बद्धा तुलसीदासेन तत्-कृपाशीर्भिः ॥

तामेव पुण्यगाथां गैर्वाण्या वर्णनाय मे यत्नः ।
तुलसीदास-कृपेयं, सिध्यति यदि, नात्र कोऽपि संदेहः ॥

संस्कृत-मूला चैषा रामकथा संस्कृतं हि याति पुनः ।
सागरजलमिव नित्यं सागरमेवाभिवर्तते भूयः ॥

श्रीरामचरितमानसकीर्तिं श्रुत्वा कुतूहलाकृष्टा ।
पश्यन्ती विस्तारं तीरे तिष्ठामि विस्मयापन्ना ॥

यावच्च धर्षयेऽहं गन्तुं तत्सन्निधौ कथंचिद्वा ।
पातुं जललवमस्मात् क्लेदयितुं वापि तत्र करपादम् ॥

प्रतिसंहृत्यात्मानं तावत् स्वस्याविनीततां बुद्ध्वा ।
विरमामि व्यवसायाद् गभीरता-दर्शनेन जातभया ॥

आशीर्वादैस्तु ततः सर्वेषां प्रेरिता पुनश्चाहम् ।
प्रयते गतभयशङ्का स्वात्मानं मानसे विशोधयितुम् ॥

— नलिनी साधले (पराडकर)

श्रीः

श्रीगणेशाय नमः ।

श्रीजानकीवल्लभो विजयते ।

॥ श्रीतुलसी-मानस-नलिनम् ॥

(श्रीरामचरितमानस-भावानुवादः)

प्रथम सोपानः बालकाण्डम्

मङ्गलम्

वर्णानामर्थसंघानां रसानां छन्दसामपि ।
मङ्गलानां च कर्तारौ वन्दे वाणी-विनायकौ ॥ १

भवानी-शङ्करौ वन्दे श्रद्धा-विश्वास-रूपिणौ ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम् ॥ २

वन्दे बोधमयं नित्यं गुरुं शंकररूपिणम् ।
यमाश्रितो हि वक्रोऽपि चन्द्रः सर्वत्र वन्द्यते ॥ ३

सीताराम-गुण-ग्राम-पुण्यारण्य-विहारिणौ ।
वन्दे विशुद्ध-विज्ञानौ कवीश्वर-कपीश्वरौ ॥ ४

उद्भव-स्थिति-संहार-कारिणीं क्लेश-हारिणीम् ।
सर्वश्रेयस्करीं सीतां नतोऽहं राम-वल्लभाम् ॥ ५

यन्मायावशवर्त्ति विश्वमखिलं ब्रह्मादिदेवासुरा
यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाहेर्भ्रमः ।
यत्पादप्लवमेकमेव हि भवाम्भोधेस्तितीर्षावताम्
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥ ६

नानापुराणनिगमागमसंमतं यद्
रामायणे निगदितं क्वचिदन्यतोऽपि ।
स्वान्तःसुखाय तुलसी रघुनाथगाथा-
भाषानिबन्धमतिमञ्जुलमातनोति ॥ ७

श्रीतुलसी-मानस-नलिनम्

तरङ्गः १

जो सुमिरत सिधि होइ गननायक करिबर बदन ।
करउ अनुग्रह सोइ बुद्धि रासि सुभ गुन सदन ॥

कल्पते स्मरणं सिद्ध्यै यस्य बुद्धिप्रदायिनः ।
गुणराशिर्गणाध्यक्षः स मां पातु गजाननः ॥ १

मूक होइ बाचाल पंगु चढ़इ गिरिबर गहन ।
जासु कृपाँ सो दयाल द्रवउ सकल कलि मल दहन ॥

स्रवति मूकमुखादपि भारती गिरिशिखाक्रमणं विकलैरपि ।
भवति यत्कृपया स दयाघनः-कलिमलान्तकरः परिपातु माम् ॥ २

नील सरोरुह स्याम तरुन अरुन बारिज नयन ।
करउ सो मम उर धाम सदा छीरसागर सयन ॥

कुवलयासितवर्ण-मनोहरस् तरुण-लोहित-पङ्कजलोचनः ।
वसतु दुग्धसमुद्र-शयानकः सततमेव मदीय-हृदालये ॥ ३

कुंद इंदु सम देह उमा रमन करुना अयन ।
जाहि दीन पर नेह करउ कृपा मर्दन मयन ॥

धवल-कुन्द-सुधाकर-विग्रहः परम-कारुणिको गिरिजा-धवः ।
द्रवति यद्-हृदयं शरणार्थिनं मनसिजान्तकरः परिपातु माम् ॥ ४

बंदउँ गुरु पद कंज कृपा सिंधु नररूप हरि ।
महामोह तम पुंज जासु बचन रबि कर निकर ॥

निबिड-ध्वान्त-पटं मनमोहजं तिमिरमेव सहस्रकरः करैः ।
हरति यो वचनैस्तमहं गुरुं नरहरिं प्रणमामि दयाघनम् ॥ ५

बंदउँ गुरुपद पदुम परागा । सुरुचि सुबास सरस अनुरागा ॥

ज्ञानानन्द-सुगन्धाय वात्सल्य-रस-वर्षिणे ।
गुरुपाद-परागाय रुचिराय नमो नमः ॥ ६

अमिअ मूरिमय चूरन चारू । समन सकल भव रुज परिवारू ।।

सुधामूलोद्भवं नूनं विपद्-व्याधि-विनाशनम् ।
गुरु-पाद-रजश्चूर्णं ताप-त्रय-निवारणम् ।। ७

सुकृति संभु तन बिमल बिभूती । मंजुल मंगल मोदप्रसूती ।।

कल्याणं तनुते नित्यं प्रसूते मोद-मञ्जरीम् ।
विभूतिर्भूतनाथस्य पादधूलिर्गुरोरियम् ।। ८

जन मन मंजु मुकुर मल हरनी । किएँ तिलक गुन गन बस करनी ।।

मुकुरं जन-चित्तानां मल-मुक्तं करोति यद् ।
गुरोः पादरजश्चेदं तिलकः सद्गुणोदयः ।। ९

श्रीगुरु पद नख मनि गन जोती । सुमिरत दिव्य दृष्टि हियँ होती ।।

स्मृत्वैव हृत्प्रकाशो यां दिव्य-दृष्टि-प्रदो महान् ।
रत्नानाममल-ज्योतिर् गुरोः पाद-नख प्रभा ।। १०

दलन मोह तम सो सप्रकासू । बडे भाग उर आवइ जासू ।।

महामोहतमो बुद्ध्याः नाशयन् ज्ञान-भास्करः ।
विकासयति हृत्पद्मं येषां ते भाग्यशालिनः ।। ११

उघरहिं बिमल बिलोचन ही के ।
मिटहिं दोष दुख भवरजनीके ।।

भित्त्वा भव-तमिस्रं च त्रिदोषाँश्चैव नाशयन् ।
उन्मीलयति यत्तेजो ज्ञानचक्षूंषि देहिनाम् ।। १२

सूझहिं राम चरित मनि मानिक ।
गुपुत प्रगट जहँ जो जेहि खानिक ।।

यत्र तत्र विकीर्णानि तदा दृग्गोचराणि वै ।
राम-वृत्तान्त-रत्नानि व्यक्ताव्यक्तानि वा तथा ।। १३

इति श्रीतुलसी-मानस-नलिने सकलकलिकलुषविध्वंसने बालकाण्डे
श्रीमद्गुरुचरणकमलनखप्रतापवर्णनं नाम प्रथमस्तरङ्गः ।

तरङ्गः २

जथा सुअंजन अंजि दृग साधक सिद्ध सुजान ।
कौतुक देखत सैल बन भूतल भूरि निधान ।।

सिद्धाञ्जनेन परिकल्पित-लोचनाभ्याम्
दृग्गोचरः स खलु द्रव्यनिधिः समग्रः ।
शैलान्तरादपि च भूतल-काननाभ्याम्
दिव्याञ्जनं गुरु-पदाब्ज-रजस्तथेदम् ।। १

गुरु पद रज मृदु मंजुल अंजन । नयन अमिअ दृग दोष बिभंजन ।।

ललितं मृदुलं दिव्यं गुरु-पाद-रजोऽञ्जनम् ।
सुधावर्तिर्नयनयोर्नेत्र-रोगान्तकं महत् ।। २

तेहिं करि बिमल बिबेक बिलोचन । बरनउँ रामचरित भव मोचन ।।

तदञ्जन-विशुद्धेन निरीक्षे ज्ञान-चक्षुषा ।
वक्ष्ये दाशरथेर्वृत्तं भव-पाश-विमोचनम् ।। ३

बंदउँ प्रथम महीसुर रचना । मोह जनित संसय सब हरना ।।

अज्ञानमोहजं ध्वान्तं भेत्ति यो जनमानसात् ।
कृपालुं तमहं वन्दे भूसुरं ज्ञान-भास्करम् ।। ४

सुजन समाज सकल गुन खानी । करउँ प्रनाम सप्रेम सुबानी ।।

सप्रश्रयं ततो वन्दे गुण-रत्नाकरं परम् ।
तं सतां सकलं वृन्दं शुभानुग्रहमर्थयन् ।। ५

साधु चरित सुभ चरित कपासू । निरस बिसद गुनमय फल जासू ।।

निर्मलं [1]नीरसं कान्तं धवलं गुणनिर्मितम् ।
सतां सुचरितं चेदं फलं कार्पासिकं च तद् ।। ६

---

१ 'नास्ति रसो भोगास्वादने येषां सतां तेषां चरितम् ।'-
— इति सतां पक्षे ।

जो सहि दुख परछिद्र दुरावा ।
बंदनीय जेहिं जग जस पावा ॥

समाच्छादयितुं छिद्रं परेषां यतते द्वयम् ।
आक्लिश्यात्मानमत्यन्तं वन्दनीयं जनैः सदा ॥ ७

मुद मंगलमय संत समाजू । जो जग जंगम तीरथराजू ॥

निधानं परितोषस्य जङ्गमस्तीर्थराडयम् ।
आकरः शुभकार्याणां सतां वृन्दोऽयमद्भुतः ॥ ८

राम भक्ति जहँ सुरसरि धारा । सरसइ ब्रह्म बिचार प्रचारा ॥

रघुनाथे दृढा भक्तिस्तीर्थेऽस्मिन्नमरापगा ।
ब्रह्मचिन्ता च यत्रास्ते गूढ-धारा सरस्वती ॥ ९

बिधि निषेधमय कलि मल हरनी । करम कथा रबिनंदनि बरनी ॥

निषेध-विधि-वाक्यानां विमर्शः कर्म-काण्डजः ।
कलि-पापापहा यत्र यमुना रवि-नन्दिनी ॥ १०

हरि हर कथा बिराजति बेनी । सुनत सकल मुद मंगल देनी ॥

श्रीहरिश्च हरश्चैव कथाकीर्तनमेतयोः ।
त्रिवेणी यत्र संजाता मोद-माङ्गल्य-दायिनी ॥ ११

बटु बिस्वास अचल निज धरमा । तीरथराज समाज सुकरमा ॥

स्वधर्मेऽविचला श्रद्धा वटवृक्षोऽक्षयो महान् ।
सदाचाररताः सन्तस्तत्रत्यास्तीर्थवासिनः ॥ १२

सबहि सुलभ सब दिन सब देसा । सेवत सादर समन कलेसा ॥

सर्वेषां सुलभश्चायं सर्वदेशेषु सर्वदा ।
तीर्थराड् हरति क्लेशान् सेवितः श्रद्धया यदा ॥ १३

अकथ अलौकिक तीरथराऊ । देइ सद्य फल प्रगट प्रभाऊ ॥

अवर्ण्यस्तीर्थराजोऽयं सद्यःपुण्यफलप्रदः ।
लोकोत्तरप्रभावोऽस्य प्रत्यक्षो बहुशः सताम् ॥ १४

सुनि समुझहिं जन मुदित मन मज्जहिं अति अनुराग ।
लहहिं चारि फल अछत तनु साधु समाज प्रयाग ।।

श्रुत्वा तदीयमहिमानमलौकिकं तम्
भक्त्या प्रसन्नमनसामितश्रद्धया च ।
अर्थं चतुर्विधमिहैव नरा लभन्ते
कृत्वावगाहनमिदं खलु पुण्यतीर्थे ।। १५

मज्जन फल पेखिअ ततकाला ।
काक होहिं पिक बकउ मराला ।।

अवगाह्य च तीर्थेऽस्मिन् नियतं लभते क्षणात् ।
वायसः पिकरूपं तद् हंसरूपं बकस्तथा ।। १६

सुनि आचरज करै जनि कोई । सतसंगति महिमा नहिं गोई ।।

न चेदं महादाश्चर्यं न चाश्रद्धेयमेव वा ।
सत्सङ्गस्यातिमाहात्म्यं को न जानाति भूतले ।। १७

वालमीक नारद घटजोनी । निज निज मुखनि कही निज होनी ।।

वाल्मीकिर्घटयोनिश्च देवर्षिर्नारदस्तथा ।
वृत्तान्तं स्वयमाचख्युः सर्वे भूतार्थवेदिनः ।। १८

जलचर थलचर नभचर नाना । जे जड चेतन जीव जहाना ।।

ये के च भूतले भूता जले वा विचरन्ति ये ।
ये के च खेचराः सर्वे चेतनाचेतनास्तथा ।। १९

मति कीरति गति भूति भलाई । जब जेहिं जतन जहाँ जेहिं पाई ।।

येन येन च यत्नेन यत्राप्तं यैश्च यद्यथा ।
उन्नतिः कीर्तिरैश्वर्यं सद्गतिः सुमतिस्तथा ।। २०

सो जानब सतसंग प्रभाऊ । लोकहुं बेद न आन उपाऊ ।।

सर्वे ते प्रविजानन्ति सत्सङ्गस्य हि तत्फलम् ।
स्वोन्नतेरपरो मार्गो लोकेऽस्मिन्नैव विद्यते ।। २१

बिनु सत संग बिबेक न होई । राम कृपा बिनु सुलभ न सोई ॥

युक्तायुक्तविवेकोऽसौ नैव सत्सङ्गतिं विना ।
विना राम-प्रसादेन सत्सङ्गस्य कुतः कथा ॥ २२

सत संगत मुद मंगल मूला । सोइ फल सिधि सब साधन फूला ॥

मूलं मोदतरोश्चायं कन्दः कल्याण-वीरुधः ।
साधनानि च पुष्पाणि फलं सिद्धिं विदुर्बुधाः ॥ २३

सठ सुधरहिं सतसंगति पाई । पारस परस कुधात सुहाई ॥

दुर्जनाश्च हि सत्सङ्गात्तरन्ति गत-कल्मषाः ।
स्पर्शोपलस्य सङ्गेन कुधातुः काञ्चनायते ॥ २४

बिधि बस सुजन कुसंगत परहीं । फनि मनि सम निज गुन अनुसरहीं ॥

सुजनास्तु विधेर्योगाद् दुर्जनैः सह संगताः ।
स्वगुणं न जहत्येव फणिनश्च मणिं यथा ॥ २५

बिधि हरि हर कबि कोबिद बानी । कहत साधु महिमा सकुचानी ॥

ब्रह्मा विष्णुर्महेशश्च कवयः कोविदास्तथा ।
सतां माहात्म्य-कथने रुद्ध-वाचा विरेमिरे ॥ २६

सो मो सन कहि जात न कैसें । साक बनिक मनि गुन गन जैसे ॥

सोऽहं ननु कथं शक्तः सतां सद्गुण-वर्णने ।
शाकानां पाणिनः कुत्र नैपुण्यं रत्न-निर्णये ॥ २७

बंदउँ संत समान चित हित अनहित नहिं कोइ ।
अंजलिगत सुभ सुमन जिमि सम सुगंध कर दोइ ॥

पुष्पं यथाञ्जलिधृतं समपक्षबुद्धया
सौरभ्यमेव तनुते करयोर्द्वयोश्च ।
तद्वद्धिताहितद्वये समचित्तवृत्तिम्
सन्तं समाहितधियं तमहं नमामि ॥ २८

सुनि समुझहिं जन मुदित मन मज्जहिं अति अनुराग ।
लहहिं चारि फल अछत तनु साधु समाज प्रयाग ।।

श्रुत्वा तदीयमहिमानमलौकिकं तम्
भक्त्या प्रसन्नमनसामितश्रद्धया च ।
अर्थं चतुर्विधमिहैव नरा लभन्ते
कृत्वावगाहनमिदं खलु पुण्यतीर्थे ।। १५

मज्जन फल पेखिअ ततकाला ।
काक होहिं पिक बकउ मराला ।।

अवगाह्य च तीर्थेऽस्मिन् नियतं लभते क्षणात् ।
वायसः पिकरूपं तद् हंसरूपं बकस्तथा ।। १६

सुनि आचरज करै जनि कोई । सतसंगति महिमा नहिं गोई ।।

न चेदं महादाश्चर्यं न चाश्रद्धेयमेव वा ।
सत्सङ्गस्यातिमाहात्म्यं को न जानाति भूतले ।। १७

वालमीक नारद घटजोनी । निज निज मुखनि कही निज होनी ।।

वाल्मीकिर्घटयोनिश्च देवर्षिर्नारदस्तथा ।
वृत्तान्तं स्वयमाचख्युः सर्वे भूतार्थवेदिनः ।। १८

जलचर थलचर नभचर नाना । जे जडचेतन जीव जहाना ।।

ये के च भूतले भूता जले वा विचरन्ति ये ।
ये के च खेचराः सर्वे चेतनाचेतनास्तथा ।। १९

मति कीरति गति भूति भलाई । जब जेहिं जतन जहाँ जेहिं पाई ।।

येन येन च यत्नेन यत्राप्तं यैश्च यद्यथा ।
उन्नतिः कीर्तिरैश्वर्यं सद्गतिः सुमतिस्तथा ।। २०

सो जानब सतसंग प्रभाऊ । लोकहुं बेद न आन उपाऊ ।।

सर्वे ते प्रविजानन्ति सत्सङ्गस्य हि तत्फलम् ।
स्वोन्नतेरपरो मार्गो लोकेऽस्मिन्नैव विद्यते ।। २१

बिनु सत संग बिबेक न होई। राम कृपा बिनु सुलभ न सोई॥

युक्तायुक्तविवेकोऽसौ नैव सत्सङ्गतिं विना।
विना राम-प्रसादेन सत्सङ्गस्य कुतः कथा॥ २२

सत संगत मुद मंगल मूला। सोइ फल सिधि सब साधन फूला॥

मूलं मोदतरोश्चायं कन्दः कल्याण-वीरुधः।
साधनानि च पुष्पाणि फलं सिद्धिं विदुर्बुधाः॥ २३

सठ सुधरहिं सतसंगति पाई। पारस परस कुधात सुहाई॥

दुर्जनाश्च हि सत्सङ्गात्तरन्ति गत-कल्मषाः।
स्पर्शोपलस्य सङ्गेन कुधातुः काञ्चनायते॥ २४

बिधि बस सुजन कुसंगत परहीं। फनि मनि सम निज गुन अनुसरहीं॥

सुजनास्तु विधेर्योगाद् दुर्जनैः सह संगताः।
स्वगुणं न जहत्येव फणिनश्च मणिं यथा॥ २५

बिधि हरि हर कबि कोबिद बानी। कहत साधु महिमा सकुचानी॥

ब्रह्मा विष्णुर्महेशश्च कवयः कोविदास्तथा।
सतां माहात्म्य-कथने रुद्ध-वाचा विरेमिरे॥ २६

सो मो सन कहि जात न कैसें। साक बनिक मनि गुन गन जैसे॥

सोऽहं ननु कथं शक्तः सतां सद्‌गुण-वर्णने।
शाकानां पाणिनः कुत्र नैपुण्यं रत्न-निर्णये॥ २७

बंदउँ संत समान चित हित अनहित नहिं कोइ।
अंजलिगत सुभ सुमन जिमि सम सुगंध कर दोइ॥

पुष्पं यथाञ्जलिधृतं समपक्षबुद्ध्या
सौरभ्यमेव तनुते करयोर्द्वयोश्च।
तद्वद्धिताहितद्वये समचित्तवृत्तिम्
सन्तं समाहितधियं तमहं नमामि॥ २८

संत सरल चित जगत हित जानि सुभाउ सनेहु ।
बालबिनय सुनि करि कृपा राम चरन रति देहु ॥

हे सर्वलोक-हित-दक्ष-विशुद्ध-सन्तः
कारुण्य-पूरित-निरागस-मानसा हे ।
सङ्कुचितभावजमिदं शिशु-याचनं मे
मह्यं प्रसीदत हि रामरतिं प्रदातुम् ॥ २९

इति श्रीतुलसी-मानस-नलिने सकलकलिकलुषविध्वंसने बालकाण्डे
साधुगुणस्वभावलक्षण-वर्णनं नाम द्वितीयस्तरङ्गः ॥

तरङ्गः ३

बहुरि बंदि खल गन सतिभाएँ । जे बिनु काज दाहिनेहु बाएँ ।
सस्नेहं च ततो वन्दे दुर्जनान् सकलान् सदा ।
दक्षिणेऽपि च ये वामा निष्कारणदुरन्तराः ॥ १

पर हित हानि लाभ जिन्ह केरें । उजरें हरष बिषाद बसेरें ॥
क्लिष्टा ये सुस्थितं दृष्ट्वा हृष्टाश्चोध्वंसवीक्षणात् ।
महोत्सवश्च येषां वै दृष्ट्वा परहितं हतम् ॥ २

हरि हर जस राकेस राहु से । पर अकाज भट सहसबाहु से ।
ये सहस्रकरा वीरा परकार्य-विनाशने ।
शिवविष्णुयशश्चन्द्रग्रसद्दुष्टग्रहाश्च ये ॥ ३

जे परदोष लखहिं सहसाखी । पर हित घृत जिन्ह के मन माखी ॥
सहस्राक्षा हि ये सर्वे परदोषनिरीक्षणे ।
परकार्यघृतस्यैते मक्षिकाश्चातिलुब्धकाः ॥ ४

तेज कृसानु रोष महिषेसा । अघ अवगुन धन धनी धनेसा ।
उग्रत्वे वह्नयोऽह्येते कोपे तु महिषाधिपाः ।
अघावगुणरत्नानां संचये द्रविणेश्वराः ॥ ५

उदय केत सम हित सबही के। कुंभकरन सम सोवत नीके ॥

अन्येषां हितनाशे ये धूमकेतुसमोदयाः ।
निद्रायां कुम्भकर्णाश्च विराजन्ते दुरन्तराः ॥ ६

पर अकाजु लगि तनु परिहरहीं। जिमि हिम उपल कृषी दलि गरहीं।

परार्थस्य विघातार्थं स्वशरीरं त्यजन्ति ये ।
ध्वंसयित्वा यथा क्षेत्रं नश्यन्ति करकाः स्वयम् ॥ ७

बंदउँ खल जस सेष सरोषा। सहस बदन बरनइ पर दोषा ॥

ये सहस्रमुखाः सर्पा दोषाविष्करणे नृणाम् ।
नमस्तेभ्यो नृशंसेभ्यो विद्वेषिभ्यो नमो नमः ॥ ८

पुनि प्रनवउँ पृथुराज समाना। पर अघ सुनइ सहस दस काना ॥

श्रुत्वा कर्णसहस्रैर्ये प्रणवं पृथुराडिव ।
परदोषाँश्च दोषज्ञास्तृप्तिं यान्ति न सर्वथा ॥ ९

वहुरि सक्र सम बिनवउँ तेही ! संतत सुरानीक हित जेही।
बचन बज्र नेहि सदा पिआरा। सहस नयन पर दोष निहारा ॥

ये सुरावाहिनीप्रीता यथा शक्रः सुरेश्वरः ।
दुर्वीक्षणे सहस्राक्षा वाग्वज्रैर्वज्रिणश्च ये ॥ १०

उदासीन अरि मीत हित सुनत जरहिं खल रीति।
जानि पानि जुग जोरी जन बिनती करइ सप्रीति ॥

मित्रारिमध्यस्थ-हितस्य वृत्तं द्रोहाग्निमेषां ज्वलयत्यजस्रम् ।
ज्ञात्वैव विद्वेषमसज्जनानां बद्ध्वाञ्जलिं तान्प्रणमामि भूयः ॥ ११

मैं अपनी दिसि कीन्ह निहोरा। तिन्ह निज ओर न लाउब भोरा ॥
वायस पलिअहिं अति अनुरागा। होहिं निरामिष कबहुँ किकागा ॥

प्रणामकार्यं बहुशस्तदर्थं निर्वर्तितं यद्यपि निष्फलं तद् ।
संवर्धितः स्नेहरसेन सम्यक् काकः कथं मांसरुचिं विजह्यात् ॥ १२

बंदउँ संत असज्जन चरना। दुखप्रद उभय बीच कछु बरना।

सुजनाँश्च यथा वन्दे दुर्जनानप्यहं तथा ।
उभौ क्लेशकरौ ह्येतौ वक्ष्ये साधर्म्यमद्भुतम् ॥ १३

बिछुरत एक प्रान हरि लेहीं । मिलत एक दुख दारुन देहीं ।
उपजहिं एकसंग जग माहीं । जलज जोंक जिमि गुन बिलगाहीं ।।

एके वियोगेन हरन्ति प्राणान् संमेलनेनैव तथापरे च ।
जाता जले पद्मसमं जलौका गुणैर्विभिन्ना खलु सर्वथैव ।। १४

सुधा सुरा सम साधु असाधू । जनक एक जग जलधि अगाधू ।।
भल अनभल निज निज करतूती । लहत सुजस अपलोक बिभूती ।।

कन्ये समुद्रस्य सुधासुरे द्वे सहैव जातेऽपि विरुद्धशीले ।
स्वकर्मणा कीर्तिमकीर्तिमेते सन्तश्च दुष्टाश्च भजन्ति लोके ।। १५

सुधा सुधाकर सुरसरि साधू । गरल अनल कलिमल सरि ब्याधू ।

विषं सुधा वा ज्वलनः शशी वा सा कर्मनाशिन्यपि वा हि गङ्गा ।
व्याधोऽथवा साधुरसौ तथैव सहैव जातावपि भिन्नशीलौ ।। १६

गुन अवगुन जानत सब कोई । जो जेहि भाव नीक तेहि सोई ।

गुणावगुणयोर्भेदं सर्वे जानन्ति सर्वदा ।
यस्मै यद् रोचते लोके ग्राह्यं तस्य विभाति तद् ।। १७

भलो भलाइहि पै लहइ लहइ निचाइहि नीचु ।
सुधा सराहिअ अमरताँ गरल सराहिअ मीचु ।।

सद्गुणानेव सन्तस्ते भजन्ते दुर्गुणान् खलाः ।
अमृतत्वं सुधा सूते विषं मृत्युं न संशयः ।। १८

खल अघ अगुन साधु गुन गाहा । उभय अपार उदधि अवगाहा ।

अगाधः सागरः सोऽयं गुणानां सज्जना यथा ।
पापानामपरंपारस्तोयराशिस्तथा खलाः ।। १९

तेहि तें कछु गुन दोष बखाने । संग्रह त्याग न बिनु पहिचाने ।

दिङ्मात्रदर्शनं चेदं गुणावगुणवर्णनम् ।
संग्रहे वा तथा त्यागे परीक्षेरन् जनाः स्वयम् ।। २०

भलेउ पोच सब बिधि उपजाए। गनि गुन दोष बेद बिलगाए।

निर्मिता विधिनैवैते सज्जना दुर्जनास्तथा।
गणयन्त्यागमास्तेषां गुणदोषान् पृथक् पृथक्॥ २१

कहहिं बेद इतिहास पुराना। बिधि प्रपंचु गुन अवगुन साना।

सृष्टं जगदिदं स्रष्ट्रा गुणावगुणमण्डितम्।
इतिहासे पुराणे च वेदे च वर्णितं बुधैः॥ २२

दुख सुख पाप पुन्य दिन राती साधु असाधु सुजाति कुजाती।

सुखदुःखे यथा भिन्ने पापपुण्ये परस्परात्।
विख्यातश्च विभागोऽयं साध्वसाध्वोस्तथैव हि॥ २३

अहोरात्रविभागोऽयं कालस्य परिकीर्तितः।
निकृष्टोत्कृष्टकोटिभ्यां वर्णानां हि विभाजनम्॥ २४

दानव देव ऊँच अरु नीचू। अमिअ सुजीवनु माहुर मीचू।
माया ब्रह्म जीव जगदीसा। लच्छि अलच्छि रंक अवनीसा॥
कासी मग सुरसरि क्रमनाशा। मरु मारव महिदेव गवासा।
सरग नरक अनुराग बिरागा। निगमागम गुन दोष विभागा॥

देवदानवयोश्चैव विभेदो विश्रुतो यथा।
कनिष्ठ-श्रेष्ठयोस्तद्वल्लोके भेदः प्रकीर्तितः॥ २५

माया ब्रह्म च भिन्ने द्वे भेदश्चेश्वरजीवयोः।
अमृतस्य विषस्यैवं जन्ममृत्युद्वयस्य च॥ २६

द्रविणाद्रविणौ चेतौ विभिन्नौ सर्वथा यथा।
नृपयाचकयोर्भेदः काशीमगधयोस्तथा॥ २७

दुष्कर्मनाशिनीगङ्गे विभिन्ने सुतरां द्वयम्।
मालवो मरुदेशश्च विभिन्नावितरेतरात्॥ २८

द्विजादाखेटको भिन्नः स्वर्गाच्च निरयो यथा।
अनुरागविरागौ च भिन्नमूलौ हि सर्वथा॥ २९

विभागो गुणदोषाणां सर्वेषां च यथा सदा।
वर्णितो वेदशास्त्रेषु विस्तरेण मया तथा॥ ३०

जड़ चेतन गुन दोषमय बिस्व कीन्ह करतार।
संत हंस गुन गहहिं पय परिहरि बारि बिकार ॥

विनिर्मितं स्थावर-जङ्गमानां विश्वं विधात्रा गुणदोष-मिश्रम् ।
दोषोदकं तत्र सतां हि हंसाः हित्वा गुणक्षीर-मतः पिबन्ति ॥ ३१

अस बिबेक जब देइ बिधाता। तब तजि दोष गुनहिं मनु राता।

नीरक्षीरविवेकोऽयं धात्रा यस्मै प्रदीयते।
सद्गुणेषु सदा रक्तः स हि दोषानपास्यति ॥ ३२

काल सुभाउ करम बरिआईं। भलेउ प्रकृति बस चुकइ भलाईं।

कर्मणा वा स्वभावेन कालशक्त्याथवा क्वचित् ।
मायया चापि सन्मार्गः सद्भिरेव विहीयते ॥ ३३

सो सुधारि हरिजन जिमि लेहीं। दलि दुख दोष बिमल जसु देहीं।

स्खलनं तन्निराकुर्वन् दुःखदोषान् विवर्जयन् ।
यशोभागी भवत्येषो भक्तो हरिकृपायुतः ॥ ३४

खलउ करहिं भल पाइ सुसंगू। मिटइ न मलिन सुभाउ अभंगू।

दुर्जनश्च हि सत्सङ्गात् चेष्टते साधुचेष्टितम् ।
दौरात्म्येनाभिभूतस्तु प्रकृतिं पुनरेत्यसौ ॥ ३५

लखि सुवेष जग बंचक जेऊ। बेष प्रताप पूजिअहिं तेऊ।
उघरहिं अंत न होइ निबाहू। कालनेमि जिमि रावन राहू ॥

वेषेण तेषां यदि वञ्चितास्तान् चिरं न लोकास्त्वनुयान्ति नीचान् ।
राहुर्यथा रावणकालनेमी नीचा भजन्ते निजरूपमन्ते ॥ ३६

किएहुं कुवेषु साधु सनमानू। जिमि जग जामवंत हनुमानू ॥

पूजितौ च कुवेषेऽपि जाम्बुवान् हनुमाँस्तथा ।
याथार्थ्येन हि ये सन्ताः जगद्वन्द्याश्च ते सदा ॥ ३७

हानि कुसंग सुसंगति लाहू। लोकहुँ बेद बिदित सब काहू ॥

दुर्जनैः सह संपर्को विनाशायैव कल्पते।
सत्सङ्गस्तु हितायेति लोके वेदे च विश्रुतम् ॥ ३८

गगन चढइ रज पवन प्रसंगा । कीचहिं मिलइ नीच जल संगा ॥

आक्रामत्यम्बरं धूलिः पवनेन समायुता ।
जलयोगात्तलं याति दधाना कर्दमाकृतिम् ॥ ३९

साधु असाधु सदन सुक सारीं । सुमिरहिं राम देहिं गनि गारीं ॥

सत्सङ्गलाभे शुकसारिकाश्च श्रीरामनामैव जपन्ति गेहे ।
असाधुसङ्गे तु च नित्यमेताः गालिप्रदानेन नयन्ति कालम् ॥ ४०

धूम कुसंगति कारिख होई । लिखिअ पुरान मंजु मसि सोई ॥
सोइ जल अनल अनिल संघाता । होइ जलद जग जीवन दाता ॥

धूमो हि यद्वत्परिवर्ततेऽसौ कुसङ्गलाभे सति कज्जलेन ।
पुराणलेखाँस्तु लिखत्यनेकान् स एव धृत्वा मसिरूपमन्ते ॥ ४१

अनलानिलजलयोगाद् धृत्वा धूमस्तु मेघरूपं तद् ।
सुखयति सकलं विश्वं सत्सङ्गस्यैव तत्फलं नूनम् ॥ ४२

ग्रह भेषज जल पवन पट पाइ कुजोग सुजोग ।
होहिं कुबस्तु सुबस्तु जग लखहिं सुलच्छन लोग ॥

नवग्रहा वा जलभेषजे वा पटं च तद्वा पवनस्तथा वा ।
कुयोगलाभे सति वस्तु हेयं सुयोगलाभे तु तदेव रम्यम् ॥ ४३

सम प्रकास तम पाख दुहुँ नाम भेद बिधि कीन्ह ।
ससि सोषक पोषक समुझि जग जस अपजस दीन्ह ॥

नाम्नैव भिन्नौ खलु शुक्लकृष्णौ तमःप्रकाशानुभयोः समानौ ।
पुष्यन् द्युतिं चान्द्रमसीं स शुक्लः शुष्यन् तथैषश्च हि नाम कृष्णः ॥ ४४

जड़ चेतन जग जीव जत सकल राममय जानि ।
बंदउँ सब के पद कमल सदा जोरि जुग पानि ॥

सर्वं राममयं विश्वं चेतनाचेतनात्मकम् ।
बद्धाञ्जलिरतो वन्दे सर्वेषां पादपङ्कजम् ॥ ४५

देव दनुज नर नाग खग प्रेत पितर गंधर्ब ।
बंदउँ किंनर रजनिचर कृपा करहु अब सर्ब ।।

देवदैत्याँस्तथा मर्त्यान् खगनागाँस्तथैव हि ।
प्रेताँश्च पितराँश्चैव वन्दे गन्धर्वकिन्नरान् ।। ४६

वन्दे चाहं ततः सर्वान् राक्षसान् रजनीचरान् ।
अनुगृह्णन्तु सर्वे मां प्रार्थयेऽहं पुनःपुनः ।। ४७

आकर चारि लाख चौरासी । जाति जीव जल थल नभ बासी ।।
सीय राममय सब जग जानी । करउँ प्रनाम जोरि जुग पानी ।।

षोडशोनशतलक्षमितास्ते विश्वसर्गचतुराकरजाताः ।
प्राणिनः स्थलजलाम्बरगाश्च श्रीरघूत्तममयाः खलु सर्वे ।। ४८

जानि कृपाकर किंकर मोहू । सब मिलि करहु छाडि़ छल छोहू
निज बुधि बल भरोस मोहि नाहीं । तातें बिनय करउँ सब पाहीं ।।
करन चहउँ रघुपति गुन गाहा । लघु मति मोरि चरित अवगाहा ।।

किङ्करं जनमिमं गणयन्तः श्रेय एव हि च मे विदधीरन् ।
दुर्बला मम मतिर्विदितं मे प्रार्थयामि च ततः खलु सर्वान् ।। ४९

अगाधा रामगाथेयं मतिः साहसिकी च मे ।
आत्मन्यप्रत्ययं चेतः सर्वांस्तान् प्रणमाम्यतः ।। ५०

सूझ न एकउ अंग उपाऊ । मन मति रंक मनोरथ राऊ ।।
मति अति नीच ऊँचि रुचि आछी । चहिअ अमिअ जग जुरइ न छाछी ।।

जाने न वा प्रतिविधानमिहात्र किंचित्
हीनो धियापि च मनोरथ-संपदीशः ।
क्षुद्रा मतिस्तु रुचिरेव समुच्छ्रिता मे
नार्हामि तक्रमपि याचनममृतार्थे ।। ५१

छमिहहिं सज्जन मोरि ढिठाई । सुनिहहिं बालवचन मन लाई ।।
जौं बालक कह तोतरि बाता । सुनहिं मुदित मन पितु अरु माता

क्षन्तव्यं साहसं सद्भिः श्रोतव्यं शिशुजल्पनम् ।
विकलापि शिशोरुक्तिः पित्रोरानन्दमावहेत् ।। ५२

हँसिहहिं कूर कुटिल कुबिचारी । जे पर दूषन भूषनधारी ॥

कुत्सिताः कुटिलाः क्रूराः हसिष्यन्ति न संशयः ।
उपहासपरा नीचा निन्दकाश्च हसन्तु माम् ॥ ५३

निज कबित्त केहि लाग न नीका । सरस होउ अथवा अति फीका ॥

आत्मना रचितं सर्वं रुचिरं कस्य नो भवेत् ।
रसभावैर्गुणैस्तैस्तैः पूरितं हीनमेव वा ॥ ५४

जे पर भनिति सुनत हरषाहीं । ते बर पुरुष बहुत जग नाहीं ॥

दुर्लभा रसिका लोके परकाव्यप्रहर्षिणः ।
गुणग्राही स वै धन्यः प्रशंसेद्यः परां कृतिम् ॥ ५५

जग बहु नर सर सरि सम भाई । जे निज बाढ़ि बढ़हिं जल पाई ॥
सज्जन सकृत सिंधु सम कोई । देखि पूर बिधु बाढ़इ जोई ॥

सन्त्यत्र नैकानि सरित्सरांसि स्फीतानि पूरेण बहिः स्रवन्ति ।
कश्चिद्धि दृष्ट्वा शशिनं समुद्रः प्रहर्षवृद्धः परिवाहिरोधाः ॥ ५६

भाग छोट अभिलाषु बड़ करउँ एक बिस्वास ।
पैहहिं सुख सुनि सुजन सब खल करिहहिं उपहास ॥

दैवे दरिद्रो द्रविणोऽभिलाषे श्रद्धामिहैकां निदधामि चित्ते ।
हसन्ति नीचा यदि निन्दका मां श्रुत्वा तु सन्तः सुखमावहन्ति ॥ ५७

खल परिहास होइ हित मोरा । काक कहहिं कलकंठ कठोरा ॥

परिहासोऽपि नीचानां कल्पते मे हिताय वा ।
गर्हितश्च हि काकेन कलकण्ठो न किं पिकः ॥ ५८

हंसहि बक दादुर चातकही । हँसहिं मलिन खल बिमल बतकही ।

विहसन्ति बका हंसान् दर्दुराश्चैव चातकान् ।
पुण्यां रामकथां श्रुत्वा हसन्ति नियतं खलाः ॥ ५९

कबित रसिक न राम पद नेहू । तिन्ह कहँ सुखद हास रस एहू ॥

काव्यमात्रे रुचिर्येषां नास्ति रामपदे रतिः ।
सुखमास्वादयन्त्यस्मिन् काव्ये हासरसं जनाः ॥ ६०

भाषा भनिति भोरि मति मोरी । हँसिबे जोग हँसें नहिं खोरी ।।

भाषायां भाणितिश्चेयं मतिर्मुग्धा हि मे यदा ।
तदा हासास्पदं काव्यं को दोषो हसने नृणाम् ।। ६१

प्रभु पद प्रीति न सामुझि नीकी । तिन्हहि कथा सुनि लागिहि फीकी
हरि हर पद रति मति न कुतरकी । तिन्ह कहुँ मधुर कथा रघुबर की

रतिर्न येषां प्रभुपादपद्मे श्रीरामगाथा रुचये न तेषाम् ।
मतिर्न येषां कुवितर्कदुष्टा ते रामभक्ता रसमास्वदन्ते ।। ६२

राम भगति भूषित जियँ जानी । सुनिहहिं सुजन सराहि सुबानी ।।

श्रीरामभक्त्या तु विभूषितेति श्रुत्वैव प्रेम्णा परितुष्टचित्ताः ।
मन्ये महान्तः सुजनास्तु गाथामुदारवाचा खलु कीर्तयन्ति ।। ६३

कबि न होउँ नहिं बचन प्रबीनू । सकल कला सब बिद्या हीनू ।।
आखर अरथ अलंकृति नाना । छंद प्रबंध अनेक बिधाना ।।

न मे कवित्वं न च वाक्पटुत्वं नैकापि विद्या न कलापि मे सा ।
शब्दार्थवैचित्र्यमलङ्कृतिश्च छन्दप्रबन्धाश्च हि मे न सन्ति ।। ६४

भाव भेद रस भेद अपारा । कबित दोष गुन बिबिध प्रकारा ।।
कबित बिबेक एक नहिं मोरें । सत्य कहउँ लिखि कागद कोरें ।।

जानामि नाहं गुणदोषतत्त्वान् असंख्यभावान् विविधान् रसाँश्च ।
न मे विवेकः खलु काव्यशास्त्रे निवेदयेऽहं विनिवेश्य पत्रे ।। ६५

भनिति मोरि सब गुन रहित बिस्व बिदित गुन एक ।
सो बिचारि सुनिहहिं सुमति जिन्ह कें बिमल बिबेक ।।

गुणैर्विहीनापि हि साहितिर्मे विशिष्यतेऽस्मिन्विषये किलैके ।
दृष्ट्वा जगन्मान्यगुणं तमेकं शृण्वन्ति विमृश्य विवेकिनो ये ।। ६६

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानसभावानुवादे
विमलनीचानुसंधान-वर्णनं नाम तृतीयस्तरङ्गः ।।

तरङ्गः ४

एहि महँ रघुपति नाम उदारा। अति पावन पुरान श्रुति सारा ।।
मंगल भवन अमंगल हारी। उमा सहित जेहि जपत पुरारी ।।
श्रीरामनामैव विराजतेऽस्मिन् पुण्यं पुराण-श्रुति-सारमेकम्।
उमासमेतं त्रिपुरारिणा यद् ध्यातं निधानं खलु मङ्गलस्य ।। १

भनिति बिचित्र सुकबि कृत जोऊ। राम नाम बिनु सोह न सोऊ ।।
बिधुबदनी सब भाँति सँवारी। सोह न बसन बिना बर नारी ।।
अविद्यमाने सति रामनाम्नि चित्रापि नोक्तिः सुकवेर्विभाति।
चन्द्रानना भूषणमण्डिताऽपि न शोभते दिग्वसना कदापि ।। २

सब गुन रहित कुकबि कृत बानी। राम नाम जस अंकित जानी ।।
सादर कहहिं सुनहिं बुध ताही। मधुकर सरिस संत गुनग्राही ।।
विना गुणालङ्करणेन काव्यं श्रीरामनाम्नो यशसा विभाति।
शृण्वन्ति गायन्ति बुधाः सुखं तद् गुणानुरक्ता मधुपा यथैते ।। ३

जदपि कबित रस एकउ नाहीं। राम प्रताप प्रगट एहि माहीं ।।
सोइ भरोस मोरें मन आवा। केहिं न सुसंग बड़प्पनु पावा ।।
विनापि साहित्यरसैस्तदेषा मन्ये न हेया भणितिर्ममेयम्।
संकीर्तयन्ती रघुरामकीर्तिं सत्सङ्गलाभे सति के न धन्याः ।। ४

धूमउ तजइ सहज करुआई। अगरु प्रसंग सुगंध बसाई ।।
भनिति भदेस बस्तु भलि बरनी। राम कथा जग मंगल करनी ।।
हित्वा कटुत्वं सहजं हि धूमो धत्ते सुगन्धं सह चन्दनेन।
हेयं मदीयं यदि काव्यमेतद् वर्ण्या हि पुण्या रघुनाथगाथा ।। ५

मंगल करनि कलि मल हरनि तुलसी कथा रघुनाथ की।
गति कूर कबिता सरित की ज्यों सरित पावन पाथ की ।।
प्रभु सुजस संगति भनिति भलि होइहि सुजन मन भावनी।
भव अंग भूति मसान की सुमिरत सुहावनि पावनी ।।

यथा त्रिपथगा तथा रघुपतेः कथा पुण्यदा
पथा न सरलं यदि प्रसरणं तयोः सर्वथा ।
प्रभोः सुयशसा प्रसादयति मानसं सा सताम्
स्मशानभसितं शिवं शिवशरीरसङ्गाद्यथा ॥ ६

प्रिय लागिहि अति सबहि मम भनिति राम जस संग ।
दारु बिचारु कि करइ कोउ बंदिअ मलय प्रसंग ॥

रामगाथामहिम्ना मे काव्यं स्यात् सुप्रियं सताम् ।
न काष्ठं मलये काष्ठं वन्दनीयं हि चन्दनम् ॥ ७

स्याम सुरभि पय बिसद अति गुनद करहिं सब पान ।
गिरा ग्राम्य सिय राम जस गावहिं सुनहिं सुजान ॥

गास्यन्त्यसंस्कृतं काव्यं श्रीरामयशसा बुधाः ।
स्यान्नाम सुरभिः श्यामा निर्मलं सुखदं पयः ॥ ८

मनि मानिक मुकुता छबि जैसी । अहि गिरि गज सिर सोह न तैसी ।

न हीरकं शीर्षिण भुजंगमस्य माणिक्यमेवापि शिलोच्चयस्य ।
न मौक्तिकं कुञ्जर-कुम्भ-मध्ये विभ्राजते वस्तु न मूलदेशे ॥ ९

नृप किरीट तरुनी तनु पाई । लहहिं सकल सोभा अधिकाई ॥
तैसेहिं सुकबि कबित बुध कहहीं । उपजहिं अनत अनत छबि लहहीं ॥

रूपं हि वज्रं मुकुटे विधित्ते माणिक्यमुक्ते ललनाशरीरे ।
तथैव काव्यं विबुधा वदन्ति प्रचीयते तत्र न यत्र जातम् ॥ १०

भगति हेतु बिधि भवन बिहाई । सुमिरत सारद आवति धाई ॥

कवीनां भक्तिमाहात्म्यात् धरित्रीं त्वरते मुदा ।
विहाय विधिलोकं सा स्मरणेनैव शारदा ॥ ११

राम चरित सर बिनु अन्हवाएँ । सो श्रम जाइ न कोटि उपाएँ ॥

अवतारश्रमः सोऽस्याः श्रीरामाख्यानमानसे ।
विना स्नानं निराकर्तुं कोट्युपायैर्न शक्यते ॥ १२

कबि कोबिद अस हृदयँ बिचारी । गावहिं हरि जस कलि मल हारी ॥

विमृश्यैवं हि चित्तेषु कोविदाः कवयः सदा ।
गायन्ति श्रीहरेर्लीलां काव्येषु कलिपापहाम् ॥ १३

कीन्हें प्राकृत जन गुन गाना । सिर धुनि गिरा लगत पछिताना ॥

साधारणानां गुणगानमेते कुर्वन्ति काव्ये तु यदा स्वकीये ।
तदानुतप्ता तु सरस्वतीयं समौलिताडं विलपत्यवश्यम् ॥ १४

हृदय सिंधु मति सीप समाना । स्वाति सारदा कहहिं सुजाना ॥
जौं बरषइ बर बारि बिचारू । होहिं कबित मुकुतामनि चारू ॥

हृत्सागरेऽस्मिन् मतिशुक्तिकायां श्रीशारदा-स्वाति-सुयोगकाले ।
रम्यार्थरूपो जलबिन्दुरेषः सत्काव्यमुक्ताफलतां विधत्ते ॥ १५

जुगुति बेधि पुनि पोहिअहिं राम चरित बर ताग ।
पहिरहिं सज्जन बिमल-उर सोभा अति अनुराग ॥

काव्यमुक्ताफलान्येतान्युत्कीर्यात्र सकौशलम् ।
रामगाथागुणैः सम्यक् सूत्रयन्ति हि सज्जनाः ॥ १६
मुक्ताहारान् स्वकण्ठेषु निष्कलंकेषु सादरम् ।
धारयित्वा हि ते भक्त्या विराजन्ते विपश्चितः ॥ १७

जे जनमे कलिकाल कराला । करतब बायस बेष मराला ॥
चलत कुपंथ बेद मग छाँडे । कपट कलेवर कलि मल भाँड़े ॥

बकरूपा हि ये काकाः करालकलिकालजाः ।
वेदमार्गच्युताश्चैते पापागाराश्च छद्मिनः ॥ १८

बंचक भगत कहाइ राम के । किंकर कंचन कोह काम के ॥

रामभक्तब्रुवाश्चैते वञ्चकाः क्रोधनिर्जिताः ।
दाम्भिकाः कपटात्मानः काम-काञ्चन-किंकराः ॥ १९

तिन्ह महँ प्रथम रेख जग मोरी । धींग धरमध्वज धंधक धोरी ॥

अहमग्रेसरस्तेषां सर्वेषां छद्मतापसाम् ।
धर्मध्वजी शठश्चाहं धिङ्मां जाल्यं प्रतारकम् ॥ २०

जौं अपने अवगुन सब कहऊँ । बाढ़इ कथा पार नहिं लहऊँ ।।
ताते मैं अति अलप बखाने । थोरे महुँ जानिहहिं सयाने ।।

अनन्तेयं हि मे गाथा दुर्गुणानां न संशयः ।
दिङ्मात्रदर्शनं चेदं शेषं ज्ञास्यन्ति पण्डिताः ।। २१

समुझि बिबिधि बिधि बिनती मोरी । कोउ न कथा सुनि देइहि खोरी ।।
एतेहु पर करिहहिं जे असंका । मोहि ते अधिक ते जड़ मति रंका ।।

स्वदोषवर्णनं चेदं प्रार्थनायां कृतं मया ।
श्रुत्वापि गर्हते काव्यं मत्तोऽपि जडधीरसौ ।। २२

कबि न होऊँ नहिं चतुर कहावउँ । मति अनुरूप राम गुन गावउँ ।।

न मे काव्यकला कापि न मे वाक्चातुरी तथा ।
धर्षयामि यथाबुद्धि श्रीरामगुणवर्णने ।। २३

कहँ रघुपति के चरित अपारा । कहँ मति मोरि निरत संसारा ।।

अगाधानन्तपारं तद् क्व रामचरितं महत् ।
क्व चात्यल्पा हि मे बुद्धिः प्रसक्ता भवबन्धने ।। २४

जेहिं मारुत गिरि मेरु उड़ाहीं । कहहु तूल केहि लेखे माहीं ।।

प्रविचालितमेरोर्वा प्रवातस्य पुरस्तथा ।
लघिष्ठस्तूल एवाहं कथं स्थास्यामि संमुखम् ।। २५

समुझत अमित राम प्रभुताई । करत कथा मन अति कदराई ।।

प्रभुत्वं रघुनाथस्य विचिन्त्यामितमद्भुतम् ।
चिरयामि कथारम्भे भयकम्पितमानसः ।। २६

सारद सेस महेस बिधि आगम निगम पुरान ।
नेति नेति कहि जासु गुन करहिं निरंतर गान ।।

ब्रह्मा महेशश्च सरस्वती च शेषस्तथा वेदचतुष्टयं च ।
पुराणशास्त्राण्यपि रामरूपं वदन्ति नेतीति च कीर्तयन्ति ।। २७

सब जानत प्रभु प्रभुता सोई । तदपि कहें बिनु रहा न कोई ।।
तहाँ बेद अस कारन राखा । भजन प्रभाउ भाँति बहु भाषा ।।

स्तोतुं न शक्यं वचनैर्यथावत् प्रभोः प्रभुत्वं खलु वागतीतम् ।
ज्ञात्वापि चैतद् बहुधा स्तुवन्ति वेदाः विदित्वा भजनप्रभावम् ।। २८

एक अनीह अरूप अनामा । अज सच्चिदानन्द पर धामा ।।
ब्यापक बिस्वरूप भगवाना । तेहिं धरि देह चरित कृत नाना ।।

एकोऽनीहः सच्चिदानन्दरूपः श्रेयः सोऽयं नामरूपैर्विहीनः ।
विश्वव्यापी दिव्यदेहाश्रितः सन् नैकां लीलां लोकलाभे तनोति ।। २९

सो केवल भगतन हित लागी । परम कृपाल प्रनत अनुरागी ।।
जेहि जन पर ममता अति छोहू । जेहिं करुना करि कीन्ह न कोहू ।।

कृत्वा लीलां लोककल्याणरूपां प्रीतिं सूते भक्तवृन्दानुरागी ।
यस्मिन् धत्ते स्नेहभावं दयार्द्रं नोज्झत्येनं नापि क्रुद्धयत्यथास्मै ।। ३०

गई बहोर गरीब नेवाजू । सरल सबल साहिब रघुराजू ।।
बुध बरनहिं हरि जस अस जानी । करहिं पुनीत सफल निज बानी ।।

नष्टार्थं यः प्रापयत्यार्तनाथः स्वामी रामः सर्वदो ज्ञानराशिः ।
ज्ञात्वा रामं तद्यशोगानलग्नाः धन्या धीराः पावयन्ति स्ववाचम् ।। ३१

तेहिं बल मैं रघुपति गुन गाथा । कहिहउँ नाइ राम पद माथा ।।
मुनिन्ह प्रथम हरि कीरति गाई । तेहिं मग चलत सुगम मोहि भाई ।।

विश्वासो मे सैव धैर्यप्रदायी नत्वा रामं चारभे रामगाथाम् ।
गीता पूर्वैर् रामरायस्य गाथा मार्गः सोऽयं येन याता महान्तः ।। ३२

अति अपार जे सरित बर जौं नृप सेतु कराहिं ।
चढ़ि पिपीलिकउ परम लघु बिन श्रम पारहि जाहिं ।।

सेतुना जननाथेन सनाथीकृतनिम्नगाम् ।
विनायासं हि लङ्घन्ते क्षुद्रसाराः पिपीलिकाः ।। ३३

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानसभावानुवादे
निजनीचानुसंधानश्रीरामकृपावर्णनं नाम चतुर्थस्तरङ्गः ।

तरङ्गः ५

एहि प्रकार बल मनहि देखाई । करिहउँ रघुपति कथा सुहाई ।।

आश्वास्यैवं हि चित्तं मे निरूपयितुमुत्सहे ।
रघुनाथस्य वृत्तान्तं पावनं चित्तहारिणम् ।। १

ब्यास आदि कबि पुंगव नाना । जिन्ह सादर हरि सुजस बखाना ।।

श्रीरामस्य यशोगाथा व्यासादिकवि-पुङ्गवैः ।
सादरं कथिता लोके पुरा सर्वैर्महर्षिभिः ।। २

चरन कमल बंदउँ तिन्ह केरे । पुरवहुँ सकल मनोरथ मेरे ।।

मत्वाहं सादरं सर्वान् पूर्वांस्तान् कविपुङ्गवान् ।
प्रार्थयामि च सर्वे मे पूरयन्तु मनोरथान् ।। ३

कलि के कबिन्ह करउँ परनामा । जिन्ह बरने रघुपति गुन ग्रामा ।।

श्रीरामगुणग्रामो बद्धः काव्येषु यैः कलौ ।
प्रणमामि च तान् सर्वानर्वाचीनान् कवीश्वरान् ।। ४

जे प्राकृत कबि परम सयाने । भाषाँ जिन्ह हरि चरित बखाने ।।

भाषायां रचितं भक्त्या श्रीहरेश्चरितं च यैः ।
प्राकृतांस्तानहं सर्वान्नमामि कविकोविदान् ।। ५

भए जे अहहिं जे होइहहिं आगें । प्रनवउँ सबहि कपट सब त्यागें ।।

भूता ये च पुरा सर्वे सन्ति वा सांप्रतं च ये ।
भविष्यन्त्युपरिष्टाद्ये वन्दे तान् विमलात्मना ।। ६

होहु प्रसन्न देहु बरदानू । साधु समाज भनिति सनमानू ।।

वितरन्तु वरं सर्वे शुभाशीर्वचनं मुदा ।
यथा मे साहितिर्भूयात् सन्मान्या साधुसंसदि ।। ७

जो प्रबंध बुध नहिं आदरहीं । सो श्रम बादि बाल कबि करहीं ।।

यन्न संमानितं प्राज्ञैः सत्कृतं वा न सज्जनैः ।
वृथायासः स काव्येषु क्रियते बालबुद्धिभिः ।। ८

कीरति भनिति भूति भलि सोई। सुरसरि सम सब कहँ हित होई॥

तदा खलु प्रशस्यास्ताः काव्यकीर्तिसमृद्धयः।
सर्वग्राह्या यदा ह्येता कल्याणी जाह्नवी यथा॥ ९

राम सुकीरति भनिति भदेसा। असमंजस अस मोहि अँदेसा॥

श्रीरामचरितं भद्रं न श्लक्ष्णा तु मतिर्हि मे।
न चालं वर्णनायैषा चिन्तेयं मां प्रबाधते॥ १०

तुम्हरी कृपाँ सुलभ सोउ मोरे। सिअनि सुहावनि टाट पटोरे॥

सुकरं तु हि सर्वं स्याद् आलम्बो मे भवत्कृपा।
शणवासोऽपि धत्ते भां चित्रितं क्षौमतन्तुना॥ ११

सरल कबित कीरति बिमल सोइ आदरहिं सुजान।
सहज बयर बिसराइ रिपु जो सुनि करहिं बखान॥

निरवद्या च या कीर्तिः सरला कविभारती
द्वयं प्रीतिकरं लोके माननीयं सतां सदा॥ १२

श्रुत्वोज्झित्वा च यद् वैरी दृढवैरं स्वभावजम्।
श्लाघते शुचिभावेन तत्काव्यं तद्यशोऽपि सत्॥ १३

सो न होइ बिनु बिमल मति मोहि मति बल अति थोर।
करहु कृपा हरि जस कहउँ पुनि पुनि करउँ निहोर॥

तन्नैव सुकरं लोके निष्कलङ्कधिया विना।
प्रगल्भा न च मे बुद्धिर्न मे प्रत्यय आत्मनि॥ १४

अनुगृह्णन्तु मां सर्वे कवयः कोविदाश्च ये।
श्रीरामस्य यशोगाने प्रार्थयेऽहं पुनः पुनः॥ १५

कबि कोबिद रघुबर चरित मानस मंजु मराल।
बालबिनय सुनि सुरुचि लखि मो पर होहु कृपाल॥

श्रीरामगाथामृतमानसे ते हंसा मनोज्ञाः कविपण्डिता ये।
हित्वाऽत्र हेयं रुचिमात्रतुष्टाः श्रृण्वन्तु प्रीत्या शिशुयाचनं मे॥ १६

बंदउँ मुनि पद कंजु रामायन जेहिं निरमयउ ।
सखर सुकोमल मंजु दोष रहित दूषन सहित ।।

वन्दे कवीश्वरं येन निबद्धेयं प्रभोः कथा ।
सदूषणाप्यदोषा या सखरापि सुकोमला ।। १७

बंदउँ चारिउ बेद भाव बारिधि बोहित सरिस ।
जिन्हहि न सपनेहुँ खेद बरनत रघुबर बिसद जसु ।।

चतुष्टयीं ततो वन्दे भवोदधितरीमहम् ।
श्रीरामकीर्तिगानेन या न स्वप्नेऽपि खिद्यते ।। १८

बंदउँ बिधि पद रेनु भव सागर जेहिं कीन्ह जहँ ।
संत सुधा ससि धेनु प्रगटे खल बिष बारुनी ।।

वन्दे पादरजः स्रष्टुर्भवाब्धेरुद्भवो यतः ।।
यस्माज्जातं जगत्सर्वं विरुद्धगुणलक्षणम् ।। १९

एकतो हि यतो जाताः सत्सुधे सुरभिः शशी ।
अन्यतश्च खलाः सर्वे गरलं वारुणिस्तथा ।। २०

बिबुध बिप्र बुध ग्रह चरन बंदि कहउँ कर जोरि ।
होइ प्रसन्न पुरवहु सकल मंजु मनोरथ मोरि ।।

विबुधान् विप्रवर्गांश्च ग्रहान् विज्ञाँस्तथैव च ।
साञ्जलिः प्रणमाम्येतान् पूरयन्तु ममेप्सितम् ।। २१

पुनि बंदउँ सारद सुरसरिता । जुगल पुनीत मनोहर चरिता ।।

गङ्गासरस्वतीद्वन्द्वं पावनं सुमनोहरम् ।
सप्रश्रयं ततश्चाहं वन्दे संकल्पसिद्धये ।। २२

मज्जन पान पाप हर एका । कहत सुनत एक हर अबिबेका ।।

जलमज्जनपानाभ्यां मार्जयत्यघमग्रिमा ।
कीर्तनश्रवणाभ्यां च हरत्यन्या मतेर्मलम् ।। २३

गुर पितु मातु महेस भवानी । प्रनवउँ दीनबंधु दिन दानी ।।

गुरू मे दीनबन्धू च प्रदातारौ दयाघनौ ।
वन्देऽहं पितरावेतौ पार्वती-परमेश्वरौ ।। २४

सेवक स्वामि सखा सिय पी के । हित निरुपधि सब बिधि तुलसी के ।।

श्रीरामस्वामिनौ ह्येतौ सखायौ सेवकौ तथा ।
कुर्वाणौ मे हितं नित्यं रक्षकौ कारणं विना ।। २५

कलि बिलोकि जग हित हर गिरिजा । साबर मंत्र जाल जिन्ह सिरिजा ।।

कराल-कलिकालेऽस्मिन् जगद्धितचिकीर्षया ।
उभाभ्यां रचितं दिव्यं शाबरं मन्त्रजालकम् ।। २६

अनमिल आखर अरथ न जापू । प्रगट प्रभाउ महेस प्रतापू ।।

मेलार्थरहितान्येतान्यक्षराणि जपे नृणाम् ।
आवेदयन्त्यसंदिग्धं शिवसामर्थ्यमद्भुतम् ।। २७

सो उमेस मोहि पर अनुकूला । करिहिं कथा मुद मंगल मूला ।।

प्रसन्नः स हि मे शंभुः करिष्यति सुनिश्चितम् ।
मंगलार्थां कथामेतां निधानं सुखसंपदाम् ।। २८

सुमिरि सिवा सिव पाइ पसाऊ । बरनउँ राम चरित चित चाऊ ।।

स्मृत्वा गौरीहरावेवं लब्ध्वानुग्रहमेतयोः ।
श्रीरामचरितं पुण्यं वर्णयेऽहं मुदान्वितः ।। २९

भनिति मोरि सिव कृपाँ बिभाती । ससि समाज मिलि मनहुँ सुराती ।।

प्रसादाच्च शिवस्येयं भणितिर्भाति मे तथा ।
सतारागण-चन्द्रेण विभाति रजनी यथा ।। ३०

जे एहि कथहि सनेह समेता । कहिहहिं सुनिहहिं समुझि सचेता ।।

सस्नेहं सावधानं च सद्भावसहितं तथा ।
शृण्वन्तश्च पठन्तश्च श्रीरामचरितं मुदा ।। ३१

होइहहिं राम चरन अनुरागी । कलि मल रहित सुमंगल भागी ।।

हित्वा पापं कलेः सर्वं भूत्वा कल्याणभागिनः ।
धन्या यान्ति पदं श्रेष्ठं रामपादरताः सदा ।। ३२

सपनेहुँ साचेहुँ मोहि पर जौं हर गौरि पसाउ ।
तौ फुर होउ जो कहेउँ सब भाषा भनिति प्रभाउ ।।

स्वप्नेऽपि यदि मे स्यातां प्रसन्नौ गिरिजाशिवौ ।
भणित्या मे प्रभावः स्यात्प्रत्यक्षो न हि संशयः ॥ ३३

बंदउँ अवध पुरी अति पावनि । सरजू सरि कलि कलुष नसावनि
प्रणमामि पुरीं श्रेष्ठामयोध्यामतिपुण्यदाम् ।
शरयूं च तथा वन्दे कलिकल्मषहारिणीम् ॥ ३४

प्रनवउँ पुर नर नारि बहोरी । ममता जिन्ह पर प्रभुहि न थोरी ॥
नरनारी-जनान् पुण्यानयोध्यापुरवासिनः ।
रामवात्सल्यधन्याँस्तान् प्रणमामि पुनः पुनः ॥ ३५

सिय निंदक अघ ओघ नसाए । लोक बिसोक बनाइ बसाए ॥
अघौघं निंदकानां च निःशेषं नाशयन् प्रभुः ।
कृत्वा लोकं विशोकं च निजधाम ततो ययौ ॥ ३६

बंदउँ कौसल्या दिसि प्राची । कीरति जासु सकल जग माची ॥
प्रणमामि ततो देवीं कौसल्यां सर्वमङ्गलाम् ।
निष्कलङ्क-यशःशोभां तन्वानां जगतीतले ॥ ३७

प्रगटेउ जहँ रघुपति ससि चारू । बिस्व सुखद खल कमल तुसारु ॥
यस्यां जातः प्रभुः साक्षात् प्राच्यामिव निशाकरः ।
भूलोकनयनाह्लादो दुष्टपङ्कजमेलकः ॥ ३८

दसरथ राउ सहित सब रानी । सुकृत सुमंगल मूरति मानी ॥
देवीभिः सहितं चैवं वन्दे दशरथं ततः ।
पुण्यं माङ्गल्यरूपं तं स्मरामीप्सितसिद्धये ॥

करउँ प्रनाम करम मन बानी । करहु कृपा सुत सेवक जानी ॥ ३९
कर्मणा मनसा वाचा नत्वैतान्प्रार्थयाम्यहम् ।
अनुगृह्णन्तु सर्वे मां मत्वा पुत्रस्य सेवकम् ॥ ४०

जिन्हहि बिरचि बड़ भयउ बिधाता । महिमा अवधि राम पितु माता
निर्माय्यैतौ विधाता च श्रीरामपितराविह ।
प्रतिपेदे परां काष्ठां महिम्नः स्वस्य वै ध्रुवम् ॥ ४१

बंदउँ अवध भुआल सत्य प्रेम जेहि राम पद ।
बिछुरत दीनदयाल प्रिय तनु तृन इव परिहरेउ ॥

अयोध्याधिपतिं वन्दे रामपादरतं च तम् ।
रामविश्लेषदुःखाद्यस्तत्याज तृणवत्तनुम् ॥ ४२

प्रनवउँ परिजन सहित बिदेहू । जाहि राम पद गूढ़ सनेहू ॥

ससेवकं ततो वन्दे जनकं जानकीगुरुम् ।
प्रगाढं यस्य वात्सल्यं गूढं रामपदे सदा ॥ ४३

जोग भोग महँ राखेउ गोई । राम बिलोकत प्रगटेउ सोई ॥

रघुनाथरतिर्यस्य योगभोगादिसंवृता ।
दृष्टे तु रघुनाथे या व्यक्तीभूता न चान्यथा ॥ ४४

प्रनवउँ प्रथम भरत के चरना । जासु नेम ब्रत जाइ न बरना ॥

चरणौ च ततो वन्दे भरतस्य महात्मनः ।
अवर्ण्यो नियमो यस्य वागतीतं व्रतं तथा ॥ ४५

राम चरन पंकज मन जासू । लुबुध मधुप इव तजइ न पासू ॥

रक्तो रामपदाब्जे यो भृङ्गस्तामरसे यथा ।
विजहौ न कदाप्येषः श्रीरामपदसन्निधिम् ॥ ४६

बंदउँ लछिमन पद जलजाता । सीतल सुभग भगत सुख दाता ॥

शीतलं सुभगं चेदं प्रणतार्तिहरं तथा ।
सौमित्रेः सर्वमित्रस्य वन्दे पादाब्जयुग्मकम् ॥ ४७

रघुपति कीरति बिमल पताका । दंड समान भयउ जस जाका ॥

निष्कलङ्कयशःकेतोर् रघुवंशशिरोमणेः ।
उच्छ्रयार्थं यशो यस्य दण्डवच्छुशुभे सदा ॥ ४८

सेष सहस्रसीस जग कारन । जो अवतरेउ भूमि भय टारन ॥

शेषः सहस्रशीर्षो यो धारको भयहारकः ।
कृपासिन्धुः स सौमित्रिः प्रसन्नोऽस्तु च मे सदा ॥ ४९

सदा सो सानुकूल रहु मो पर । कृपासिंधु सौमित्रि गुनाकर ॥
रिपुसूदन पद कमल नमामी । सूर सुसील भरत अनुगामी ॥

सुशीलस्य ततो वन्दे शत्रुघ्नस्य पदद्वयम् ।
महावीरस्य धीरस्य भरतस्यानुगस्य च ॥ ५०

महाबीर बिनवउँ हनुमाना । राम जासु जस आप बखाना ॥

हनूमन्तं हि धीमन्तं प्रार्थयामि सुविक्रमम् ।
वर्णितं रघुनाथेन स्वयं यस्य महायशः ॥ ५१

प्रनवउँ पवनकुमार खल बन पावक ग्यानघन ।
जासु हृदय आगार बसहि राम सर चाप धर ॥

वन्दे मरुत्सुतं प्राज्ञं खलकाननपावकम् ।
धनुर्बाणधरो रामो नित्यं यस्य हृदि स्थितः ॥ ५२

कपिपति रीछ निसाचर राजा । अंगदादि जे कीस समाजा ॥

वानराग्रिमसुग्रीवं निशाचरपतिं तथा ।
जाम्बुवन्तं दृढासक्तं चाङ्गदादीन् कपींस्तथा ॥ ५३

बंदउँ सब के चरन सुहाए । अधम सरीर राम जिन्ह पाए ॥

प्रणमामि सदा सर्वान् सादरं प्रणतोत्तमान् ।
हीनजात्यामपि प्राप्तं पदं रामस्य यैः शिवम् ॥ ५४

रघुपति चरन उपासक जेते । खग मृग सुर नर असुर समेते ॥
बंदउँ पद सरोज सब केरे । जे बिनु काम राम के चेरे ॥

खगमृगसुरसंघा मानवाश्चासुरा ये
रघुपति-पदसेवाभावदत्तैकचित्ताः ।
प्रणतिततिरियं मे पादपद्माय तेषां
निरभिलषितलाभो रामरागो हि येषाम् ॥ ५५

सुक सनकादि भगत मुनि नारद । जे मुनिबर बिग्यान बिसारद ॥
प्रनवउँ सबहि धरनि धरि सीसा । करहु कृपा जन जानि मुनीसा ॥

शुक-सनक-सुरर्ष्याद्यादिमश्रेष्ठभक्ताः
मुनिवरपरमज्ञाः सर्वसंमानिता ये ।

क्षितितलहितशीर्षं तान्नमत्येष दासः ।
कुरुत मुनिवरा वः किंकरं लब्धकामम् ॥ ५६

जनकसुता जग जननि जानकी । अतिसय प्रिय करुनानिधानकी ॥
ताके जुग पद कमल मनावउँ । जासु कृपाँ निरमल मति पावउँ ॥

जनकदुहितरं तां जानकीं मातरं नः
सकरुण-रघुनाथ-प्राणवद्-वल्लभां ताम् ।
चरण-कमल-लग्नः प्रार्थयाम्यार्तिहर्त्रीम्
वितरतु मतिमेषा निष्कलङ्कां सदा मे ॥ ५७

पुनि मन बचन कर्म रघुनायक । चरन कमल बंदउँ सब लायक ॥
राजिवनयन धरें धनु सायक । भगत बिपति भंजन सुख दायक ॥

कृतिमतिभणितैरप्यर्चये नैकवारम्
चरणकमलयुग्मं सर्वशक्तं प्रभोस्तत् ।
कमलनयनरामश्चाप-नाराच-हस्तः
प्रणत-व्यसन-हन्ता शर्मदाता विधाता ॥ ५८

गिरा अरथ जल बीचि सम कहिअत भिन्न न भिन्न ।
बंदउँ सीता राम पद जिन्हहि परम प्रिय खिन्न ॥

वागर्थवज्जल-तरङ्गवदेव चैतद्
द्रष्टुं पृथङ्‌ न तु तथा परमार्थतस्तद् ।
सीतारघूत्तमद्वयं कृपणप्रियं तद्
दीनार्तयाचितमहं मनसा स्मरामि ॥ ५९

इति श्रीतुलसीमानस-नलिने श्रीरामचरितमानस-भावानुवादे मनोवचनकर्माभिनिवेश-वन्दनकृते पञ्चमस्तरङ्गः ।

तरङ्गः ६

बंदउँ नाम राम रघुबर को । हेतु कसानु भानु हिमकर को ।।
बिधि हरि हरमय बेद प्रान सो । अगुन अनूपम गुन निधान सो ।।

रवि-शशि-दहनानां बीज-तत्त्वं यदेतद्
विधि-हरि-हर-रूपं यच्छ्रुतेः प्राण-रूपम् ।
अगुणमनुपमं तद् रामनाम प्रियं मे
सकल-गुण-निधानं ध्येयमेतत् परं मे ।। १

महामंत्र जोइ जपत महेसू । कासीं मुकुति हेतु उपदेसू ।।
महिमा जासु जान गनराऊ । प्रथम पूजिअत नाम प्रभाऊ ।।

जपति यदभिधानं श्रीशिवः सर्वकालम्
फलति यदुपदेशो मोचने पुण्य-काश्याम् ।
गणपतिरपि जानन् मन्त्र-सामर्थ्यमेतद्
प्रथमपदमवाप प्रार्थना-पूजनेषु ।। २

जान आदिकबि नाम प्रतापू । भयउ सुद्ध करि उलटा जापू ।।
सहस नाम सम सुनि सिव बानी । जपि जेई पिय संग भवानी ।।
हरषे हेतु हेरि हर ही को । किय भूषन तिय भूषन ती को ।।
नाम प्रभाउ जान सिव नीको । कालकूट फलु दीन्ह अमी को ।।

जपितमपि विपर्यस्ताक्षराभ्यां पवित्रम्
मुनि-वर-विदितं तद् राम-नाम-स्वरूपम् ।
दश-शत-जप-तुल्या राम-नामोक्तिरेका
जपति शिवसमेतं बोधिता स्वामिनोमा ।। ३

भर्त्रोपदिष्टाचल-राजकन्या भर्त्रा समं नामजपं चकार ।
दृष्ट्वा शिवाया रघुराम-भक्ति शैलेन्द्र-कन्या-पतिरेष तुष्टः ।। ४
ताम् अङ्गनाभूषण-भूत-भार्या जग्राह तद्-विग्रह-भूषणार्थम् ।।
अर्धाङ्ग-रूपेण शिव-स्वरूपे लिलाय शैलेन्द्र-सुता-शरीरम् ।। ५

निगीर्णं चापि यत्कण्ठे विषमप्यमृतायितम् ।
तन्नाम-गौरवो ह्येषः सम्यक् जानाति शंकरः ।। ६

बरषा रितु रघुपति भगति तुलसी सालि सुदास ॥
राम नाम बर बरन जुग सावन भादव मास ॥

रघुपति-पद-भक्तिः सर्वदा प्रावृडेषा
चरण-निरत-भक्ताः शालयः सर्व एव ।
श्रुति-सुभगमवर्ण्यं राम-वर्ण-द्वयं तद्
निगदति कविरेषो वर्षदं मास-युग्मम् ॥ ७

आखर मधुर मनोहर दोऊ । बरन बिलोचन जन जिय जोऊ ॥
सुमिरत सुलभ सुखद सब काहू । लोक लाहु परलोक निबाहू ॥

मधु-मधुरमिदं तद् वर्ण-युग्मं सुरम्यम्
पद-रत-जन-जीवो वर्ण-मालाक्षिणीव ।
जगति हितकरं यत् प्रेत्य मुक्तिप्रदं च
स्मरण-सुलभमेतत् सर्व-सौख्य-प्रदं च ॥ ८

कहत सुनत सुमिरत सुठि नीके । राम लखन सम प्रिय तुलसी के ॥

अविभाज्ये द्व्यक्षरे ह्येते राम-लक्ष्मणवत् सदा ॥
श्रुत्वा मत्वा च निध्याय तुलसी सुखमश्नुते ॥ ९

बरनत बरन प्रीति बिलगाती । ब्रह्म जीव सम सहज सँघाती ॥

हृदिदं संप्लुतं प्रेम्णा वर्णयोर्वर्णने पृथक् ।
ययोः सहज-संघातो जीवस्य ब्रह्मणेव तु ॥ १०

नर नारायन सरिस सुभ्राता । जग पालक बिसेषि जन त्राता ॥
भगति सुतिय कल करन बिभूषन । जग हित हेतु बिमल बिधु पूषन ॥

नर-नारायणौ चैतौ पालकौ भक्त-रक्षकौ ।
भक्ति-कर्णावतंसौ तौ शशि-सूर्यौ जगद्धितौ ॥ ११

स्वाद तोष सम सुगति सुधा के । कमठ सेष सम धर बसुधा के ॥
जन मन मंजु कंज मधुकर से । जीह जसोमति हरि हलधर से ॥

कैवल्यामृत-पानवत् सुमधुरौ तौ नामवर्णौ परौ
पृथ्वी-धारण-कर्मणि प्रकुशलौ तौ शेष-कच्छौ यथा ।

किंवा मानव-हृत्-सरोज-विलसद्-भृङ्गौ मनोज्ञाविमौ
श्रीकृष्णः सहितो बलेन च यथा जिह्वा यशोदा-सुतौ ॥ १२

एकु छत्रु एकु मुकुटमनि सब बरननि पर जोउ ।
तुलसी रघुबर नाम के बरन बिराजत दोउ ॥

छत्रं रेफो वर्ण-मालावराङ्गे चूडारत्नं वर्ण-मौलौ मकारः ।
शोभा-वृद्धौ सर्व-वर्णोत्तमौ तौ ब्रूते दासो राम-नाम्नो जनोऽयम् ॥ १३

समुझत सरिस नाम अरु नामी । प्रीति परसपर प्रभु अनुगामी ॥

समानं नाम रूपेण रूपं नामानुगं सदा ।
प्रणयश्चोभयोर्नित्यं सेव्य-सेवकयोर्यथा ॥ १४

नाम रूप दुइ ईस उपाधी । अकथ अनादि सुसामुझि साधी ॥

नाम-रूप-युगं चैतद् दृश्योपाधि-द्वयं प्रभोः ।
अवर्ण्यादि-विहीनं तद् ब्रह्म-विद्भिस्तु विद्यते ॥ १५

को बड़ छोट कहत अपराधू । सुनि गुन भेदु समुझिहहिं साधू ।
देखिअहिं रूप नाम आधीना । रूप ग्यान नहिं नाम बिहीना ॥

न्यूनाधिक्यं रूप-नाम्नोरयुक्तं ज्ञातं सद्भिर्धर्म-भेदेन सम्यक् ।
नामाधीनं रूपमाभाति नित्यं रूप-ज्ञानं नैव नाम्ना विहीनम् ॥ १६

रूप बिसेष नाम बिनु जानें । करतल गत न परहिं पहिचानें ॥
सुमिरिअ नाम रूप बिनु देखें । आवत हृदयँ सनेह बिसेषें ॥

व्यपदिशति न यावन्नामधेयं यथावत्
कर-तल-गतमर्थं नैव जानाति तावत् ।
स्मृतमपि मनसेदं राम-नाम-स्वशक्त्या
प्रकटयति समस्तं राम-रूपं मनोज्ञम् ॥ १७

नाम रूप गति अकथ कहानी । समुझत सुखद न परति बखानी ॥

अतिगहनमथेदं रूप-नाम्नोः स्वरूपम्
कथयितुमपि शक्यं नैव विद्वज्जनैस्तद् ।
सुखमवधृतमेतन्नाम-रूप-स्वरूपम्
विवरणमतिकष्टं वारयत्यत्र वाचम् ॥ १८

अगुन सगुन बिच नाम सुसाखी । उभय प्रबोधक चतुर दुभाखी ॥
गुणि-निर्गुणयोः साक्षी नामेदं मध्यगं तयोः ।
बोधयत्युभयं प्राज्ञो द्विभाषा-कुशलो यथा ॥ १९

राम नाम मनिदीप धरु जीह देहरीं द्वार ।
तुलसी भीतर बाहेरहुँ जौं चाहसि उजिआर ॥
आलोकमिच्छन् बहिरन्तरे त्वं श्रीराम-नामाख्य-सुरत्न-दीपम् ।
निधेहि रे चोभय-मध्य-भागे सुदेहली त्वद्-रसना कवे सा ॥ २०

नाम जीहँ जपि जागहिं जोगी । बिरति बिरंचि प्रपंच बियोगी ॥
ब्रह्मसुखहि अनुभवहिं अनूपा । अकथ अनामय नाम न रूपा ॥
यति-पतिरपि जप्त्वा जिह्वया नाम सम्यक्
अभिलषित-विरक्ति याति धातुः प्रपञ्चात् ।
निरुपम-सुखमेति ब्रह्म-बोध-स्वरूपम्
वचन-कथन-हीनं नाम-रूपात्परं यद् ॥ २१

जाना जहहिं गूढ़ गति जेऊ । नाम जीहँ जपि जानहिं तेऊ ॥
ये के च गतिं गूढां गन्तुमिच्छन्ति देहिनः ।
प्राप्नुवन्तु पदं सर्वे जपन्तो नाम जिह्वया ॥ २२

साधक नाम जपहिं लय लाएँ । होहिं सिद्ध अनिमादिक पाएँ ॥
अणिमादिक-सिद्धीस्ताश्चाष्टसंख्या लभेत ना ।
साधकश्च भवेत् सिद्धो लीनो नाम-जपे यदा ॥ २३

जपहिं नामु जन आरत भारी । मिटहिं कुसंकट होहिं सुखारी ॥
अत्यन्तार्तजनाश्चैवं कृत्वा नाम-जपं प्रभोः ।
तरन्ति विपदं घोरां भवन्ति सुख-संयुताः ॥ २४

राम भगत जग चारि प्रकारा । सुकृती चारिउ अनघ उदारा ॥
चहू चतुर कहुँ नाम अधारा । ग्यानी प्रभुहि बिसेषि पिआरा ॥
चत्वारस्ते रामभक्ताः प्रपञ्चे पुण्यात्मानः पाप-हीना उदाराः ।
नामाधारः सर्व-साधारणोऽयं ज्ञानी त्वेषामुत्तमो राम-भक्तः ॥ २५

चहुँ जुग चहुँ श्रुति नाम प्रभाऊ । कलि बिसेषि नहिं आन उपाऊ ॥

चतुर्षु वेदेष्वपि वर्णितो यश्चतुर्युगेष्वप्युपदेशितो यः ।
नाम-प्रभावस्तु विशेषतोऽस्मिन् श्रुतः कलौ नास्त्ययनं तदन्यत् ॥ २६

सकल कामना हीन जे राम भगति रस लीन ।
नाम सुप्रेम पियूष ह्रद तिन्हहुँ किए मन मीन ॥

सर्व-काम-विहीना ये राम-भक्ति-रसे रताः ।
विरहन्ति मनोमीनास्तेषां नाम सुधा-ह्रदे ॥ २७

अगुन सगुन दुइ ब्रह्म सरूपा । अकथ अगाध अनादि अनूपा ॥
मोरें मत बड़ नामु दुहू तें । किए जेहिं जुग निज बस निज बूतें ॥
प्रौढ़ि सुजन जनि जानहिं जन की । कहउँ प्रतीति प्रीति रुचि मन की ॥

अगुण-सगुण-रूपं ब्रह्म-रूपं द्विरूपम्
द्विविधमपि यदीष्टे नाम ज्यायो मतं मे ।
जन-हृदय-रहस्यं तेऽभिजानन्ति विज्ञाः
निज-रुचिमनुभूतिं वेद्म्यहं नेतराणाम् ॥ २८

एकु दारुगत देखिअ एकू । पावक सम जुग ब्रह्म बिबेकू ॥

प्रत्यक्षश्च प्रसुप्तश्च द्विविधो ह्यत्र पावकः ।
यथैकस्तु हि विज्ञेयो ब्रह्मरूपद्वयं तथा ॥ २९

उभय अगम जुग सुगम नाम तें । कहेउँ नामु बड़ ब्रह्म राम तें ॥

दुर्बोधमेवं द्विविधं हि रूपं नामप्रभावात्सुगमं यथैतद् ।
ब्रवीमि नामैव वरं प्रभोस्तद् न निर्गुणं वा सगुणं न ब्रह्म ॥ ३०

ब्यापकु एकु ब्रह्म अबिनासी । सत चेतन घन आनँद रासी ॥
अस प्रभु हृदयँ अछत अबिकारी । सकल जीव जग दीन दुखारी ॥

सर्वव्यापि ब्रह्म नित्यं यदेमं रामः सोऽयं सच्चिदानन्दराशिः ।
यद्यप्येषः सर्वभूतान्तरात्मा संसारेऽस्मिन् दुःखदैन्यान्न मुक्तिः ॥ ३१

नाम निरूपन नाम जतन तें । सोउ प्रगटत जिमि मोल रतन तें ॥

कीर्तनाज्जपनान्नाम्नः प्रत्यक्षः परमेश्वरः ।
नामहीनस्य रत्नस्य नाभिजानन्त्यनर्घताम् ॥ ३२

निरगुन तें एहि भाँति बड़ नाम प्रभाउ अपार ।
कहउँ नामु बड़ राम तें निज बिचार अनुसार ॥

वरमेतन्निर्गुणान्नाम-प्रभावोऽयं हि वर्णितः ।
रामादपि वरं नाम वर्णयिष्ये यथामति ॥ २२

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
रामनामनिरूपणब्रह्मनिर्णयो नाम तृतीयस्तरङ्गः ॥

तरङ्गः ७

राम भगत हित नर तनु धारी । सहि संकट किए साधु सुखारी ॥

धारयन् मानवं देहं भक्तानां हितकाम्यया ।
स्वात्मानं क्लेशयित्वैव रामः प्रीणयते सतः ॥ १

नामु सप्रेम जपत अनयासा । भगत होहिं मुद मंगल बासा ॥

अनायासं तु तन्नाम प्रेम्णा भक्त्या मुखे धृतम् ।
मङ्गलायतनं चैतत्कृत्वा मोचयते नरान् ॥ २

राम एक तापस तिय तारी । नाम कोटि खल कुमति सुधारी ॥

रामस्तपस्विनीमेकां तारयामास वै सुधीः ।
शोधयत्यनिशं नाम कोटिदुर्जनदुर्मतीः ॥ ३

रिषि हित राम सुकेतुसुता की । सहित सेन सुत कीन्हि बिबाकी ॥
सहित दोष दुख दास दुरासा । दलइ नामु जिमि रबि निसि नासा ॥

हतवानृषिरक्षार्थं सुकेतोस्तनयां रणे ।
ताटकां ससुतानीकं रामो धर्मपरायणः ॥ ४

दुःखदोषादिभिः सार्धं दुराशामहनन्नृणाम् ।
तामिस्रमिव चण्डांशुर्नामसंकीर्तनं वरम् ॥ ५

भंजेउ राम आपु भव चापू । भव भय भंजन नाम प्रतापू ॥

बभञ्ज भवचापं यो रामः सत्यपराक्रमः ।
बभञ्ज भवतापं तन्नाम रामाद्वरं वरम् ॥ ६

दंडक बनु प्रभु कीन्ह सुहावन । जन मन अमित नाम किए पावन ॥

रामसञ्चारपूता सा दण्डकारण्यभूः खलु ।
नामसंकीर्तनात्पूताः सर्वदासमनोभुवः ॥ ७

निसिचर निकर दले रघुनंदन । नामु सकल कलि कलुष निकंदन ॥

निशाचरचमूहन्ता रामः शूरो न संशयः ।
नामजापस्तु तस्यैव कलिकालमलान्तकः ॥ ८

सबरी गीध सुसेवकनि सुगति दीन्हि रघुनाथ ।
नाम उधारे अमित खल बेद बिदित गुन गाथ ॥
राम सुकंठ बिभीषन दोऊ । राखे सरन जान सबु कोऊ ॥
नाम गरीब अनेक नेवाजे । लोक बेद बर बिरिद बिराजे ॥

भक्तोत्तमा हि रामेण केचिदेव समुद्धृताः ।
जटायुः शबरीत्येते नाम्ना सर्वेऽपि जापकाः ॥ ९

बिभीषणाय भक्ताय सुग्रीवाय हितैषिणे ।
ददौ यः शरणं रामः स वै वेदेषु विश्रुतः ॥ १०

सर्वानशरणान् दीनानुद्धार तु लीलया ।
नामसंकीर्तनं तस्य लोके वेदे च विश्रुतम् ॥ ११

राम भालु कपि कटकु बटोरा । सेतु हेतु श्रमु कीन्ह न थोरा ॥
नामु लेत भवसिंधु सुखाहीं । करहु बिचारु सुजन मन माहीं ॥

ऋक्षवानरसंवृत्तं सैन्यं सेतुनिबन्धनम् ।
आयासः सुमहानासीद्रामस्याब्धिविलङ्घने ॥ १२

भवाब्धिः शुष्कतां नीतः प्रभावस्तु महानयम् ।
नामसंकीर्तनस्यैव विमृशन्तु बुधाः स्वयम् ॥ १३

राम सकुल रन रावनु मारा । सीय सहित निज पुर पगु धारा ॥
राजा रामु अवध रजधानी । गावत गुन सुर मुनि बर बानी ॥
सेवक सुमिरत नामु सप्रीती । बिनु श्रम प्रबल मोह दलु जीती ॥

सकुलं हतवान् रामः संग्रामे रावणं वरम् ।
सीतया सहितः प्राप्तः पुनः पुण्यं निजं पुरम् ॥ १४

नास्ति रामसमो राजा न चायोध्यासमा पुरी ।
साधुवादपराः सर्वे दिविजा भुविजास्तथा ॥ १५

स्मरणेनैव नाम्नस्ते रामदासा विना श्रमम् ।
जितवन्तः सुखेनैव मोहसेनां महाबलाम् ॥ १६

फिरत सनेहँ मगन सुख अपनें । नाम प्रसाद सोच नहिं सपनें ॥

नामस्नेहरताः सर्वे सुखिनो विचरन्त्यमी ।
स्वप्नेऽप्येषां कुतः स्याद्वा शोकः संसारसंभवः ॥ १७

ब्रह्म राम तें नामु बड़ बर दायक बर दानि ।
रामचरित सत कोटि महँ लिय महेस जियँ जानि ॥

ब्रह्मणोऽपि वरं नाम रामादपि वरं वरम् ।
वरदानां वरश्चेदं नामसंकीर्तनं शिवम् ॥ १८

शतकोटिचरित्रेभ्यो रामेत्यक्षरयुग्मकम् ।
जग्राह स्वयमीशानः प्रजानन्नामगौरवम् ॥ १९

नाम प्रसाद संभु अबिनासी । साजु अमंगल मंगल रासी ॥
सुक सनकादि सिद्ध मुनि जोगी । नाम प्रसाद ब्रह्मसुख भोगी ॥

नाम्नः प्रसादादमरः पुरारिः शिवश्च भूत्वाऽप्यशिवानुरागी ।
शुकस्तथैते सनकादिसिद्धाः नाम्नैव ते ब्रह्मसुखाभिभाजः ॥ २०

नारद जानेउ नाम प्रतापू । जग प्रिय हरि हरि हर प्रिय आपू ॥
नामु जपत प्रभु कीन्ह प्रसादू । भगत सिरोमनि भे प्रहलादू ॥

सुरर्षिरप्येव च नामजापाद् हरेर्हरस्यापि सदा प्रियोऽभूत् ।
प्रह्लादनामापि च नामजापात् भक्तोत्तमो माधववल्लभोऽभूत् ॥ २१

ध्रुवँ सगलानि जपेउ हरि नाऊँ । पायउ अचल अनूपम ठाऊँ ॥
सुमिरि पवनसुत पावन नामू । अपने बस करि राखे रामू ॥

ध्रुवोऽपि धिक्कारगिराभिभूतः स्थानं ध्रुवं प्राप स नामजापात् ।
हृत्पावनं तत्पवनात्मजन्मा जपन्निनायात्मवशं रमेशम् ॥ २२

अपतु अजामिलु गजु गनिकाऊ । भए मुकुत हरि नाम प्रभाऊ ॥
कहौं कहाँ लगि नाम बड़ाई । रामु न सकहिं नाम गुन गाई ॥

अजामिळगजादिकाश्च गणिकापि पापाहताः
भवाब्धिभयमोचिताश्च हरिनामसंकीर्तनात् ।
न नाममहिमानमीडितुमलं मतिर्भाति मे
प्रभुर्न च तदीडितुं प्रभवतीत्यहं तर्कये ॥ २३

नामु राम को कलपतरु कलि कल्यान निवासु ।
जो सुमिरत भयो भाँग तें तुलसी तुलसीदासु ॥

कल्पवृक्षः कलौ नाम कल्याणायतनं महत् ।
तुलसी तुलसीदासो नामजापविशोधितः ॥ २४

चहुँ जुग तीनि काल तिहुँ लोका । भए नाम जपि जीव बिसोका ॥

त्रिषु लोकेषु कालेषु तथा युगचतुष्टये ।
नामसंकीर्तनादेव विशोका नामजापकाः ॥ २५

बेद पुरान संत मत एहू । सकल सुकृत फल राम सनेहू ॥

अष्टादशपुराणानि तथा वेदचतुष्टयी ।
रामनामरतिः सेयं फलमेकं विदुर्बुधाः ॥ २६

ध्यानु प्रथम जुग मखबिधि दूजें । द्वापर परितोषत प्रभु पूजें ॥

सत्ये ध्यानेन प्रीतोऽसौ त्रेतायां तु मखादिभिः ।
द्वापरे पूजनेनैव प्रसन्नः परमेश्वरः ॥ २७

कलि केवल मल मूल मलीना । पाप पयोनिधि जन मन मीना ॥

कलिकालवशाद्याता मलमूलमलीनताम् ।
जनमानसमीनास्ते मग्नाः पापपयोनिधौ ॥ २८

नाम कामतरु काल कराला । सुमिरत समन सकल जग जाला ।

करालेकलिकालेऽस्मिन्नाम कल्पतरुर्नृणाम् ।
भवपाशाद्विमुक्तास्ते स्मरन्तस्तद्भवन्त्यमी ।। २९

राम नाम कलि अभिमत दाता । हित परलोक लोक पितु माता ।।

सर्वाभिमतदं चेदं रामनाम कलौ जपन् ।
इहामुष्मिंस्तथा सर्वं जापकः सुखमश्नुते ।। ३०

नहिं कलि करम न भगति बिबेकू । राम नाम अवलंबन एकू ।।

ज्ञानेन वा नैव च कर्मणाऽपि न भक्तियोगादपि वा विमुक्तिः ।
आलम्बनं यत्कलितं कलौ नः श्रीरामनाम्नस्तु जपोऽयमेकः ।। ३१

कालनेमि कलि कपट निधानू । नाम सुमति समरथ हनुमानू ।।

निःशेषमेनं कलिकालनेमिं हन्तुं स्वयं कैतवरूपिणं वा ।
मरुत्सुतोऽयं सुमतिः समर्थः श्रीरामनामच्छलरूपधारी ।। ३२

राम नाम नरकेसरी कनककसिपु कलिकाल ।
जापक जन प्रह्लाद जिमि पालिहि दलि सुरसाल ।।

भयार्तिशमनं हि नाम नरसिंहरूपं शुभम् ।
हिरण्यकशिपुः करालकलिकालरूपः स्वयम् ।।
जनाश्च हरिनामकीर्तनपरा हि दैत्यात्मजाः ।
सुरारिमिह मर्दयत्यवति नाम रामानुगान् ।। ३३

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानसभावानुवादे
सीतापतिरामनामसर्वोपरिवर्णनं नाम सप्तमस्तरङ्गः ।

तरङ्गः ८

भायँ कुभायँ अनख आलसहूँ । नाम जपत मंगल दिसि दसहूँ ।।
सुमिरि सो नाम राम गुन गाथा । करउँ नाइ रघुनाथहि माथा ।।

मुदा गीतं प्रेम्णा जपितमपि वा कुत्सितधिया
गृहीतं वा रोषादलसमतिना क्वापि च पुनः ।
हरेर्नाम क्षेमं सततमिह दिक्षु प्रतनुते
स्मरन्नाम प्रह्वः पठति गुणगाथां कविरयम् ।। १

मोरि सुधारिहि सो सब भाँती । जासु कृपा नहिं कृपाँ अघाती ।।
राम सुस्वामि कुसेवकु मोसो । निज दिसि देखि दयानिधि पोसो ।।

यत्कृपा न क्लमं याति प्रभोर्भक्तानुरागिणः ।
सुरसां सैव मे कुर्याद्रसहीनामिमां कृतिम् ।। २
क्व रामः स्वामिनाथोऽयं क्व चाहं वै कुकिङ्करः ।
महिमा स्वामिनः सोऽयं यत्तेन परिपालितः ।। ३

लोकहुँ बेद सुसाहिब रीती । बिनय सुनत पहिचानत प्रीती ।।

नम्रभावं नृणां ज्ञात्वा स्वामिनः स्नेहनिश्चयाः ।
विश्रुतेयं सतां रीतिर्लोके वेदे सनातना ।। ४

गनी गरीब ग्रामनर नागर । पंडित मूढ़ मलीन उजागर ।।
सुकबि कुकबि निज मति अनुहारी । नृपहि सराहत सब नर नारी ।।

धनिनो निर्धनाश्चैव ग्रामिणो नागरास्तथा ।
पण्डितापण्डिताश्चैते ख्याताख्याताश्च ते पुनः ।। ५
सुकविः कुकविर्वाऽसौ यथाशक्ति यथामति ।
नरो वा यदि वा नारी सर्वे स्तुन्वन्ति भूपतिम् ।। ६

साधु सुजान सुसील नृपाला । ईस अंस भव परम कृपाला ।।
सुनि सनमानहिं सबहि सुबानी । भनिति भगति नति गति पहिचानी ।।

बुद्धिमान्नरशार्दूलः सुशीलः करुणाकरः ।
साध्वाचारः स वै भूपो भागो भगवतः स्वयम् ।। ७

श्रुत्वा वाचं नम्रभावां नराणां
ज्ञात्वाचारं भक्तिभावं हि तेषाम् ।
स्नेहाभिज्ञाः स्वामिनः स्नेहवाचा
संभाव्यैवामाद्रियन्ते हि वाचः ॥ ८

यह प्राकृत महिपाल सुभाऊ । जान सिरोमनि कोसलराऊ ॥
रीझत राम सनेह निसोतें । को जग मंद मलिनमति मोतें ॥

आचारोऽयं प्राकृतस्यापि राज्ञः
किं वक्तव्यं स्वामिनः कोसलानाम् ।
श्रुत्वा वाचं मे स हृष्यत्यवश्यम्
स्वामी योऽयं स्वामिनां रामभद्रः ॥ ९

स्नेहार्द्रचित्तः क्व च रामभद्रः
क्व चापि जन्तुर्जडधीर्जनोऽयम् ।
कृपाकुलानामपि सः कृपालुः
को मूढधीर्मूढधियां हि मादृक् ॥ १०

सठ सेवक की प्रीति रुचि रखिहहिं राम कृपालु ।
उपल किए जलजान जेहिं सचिव सुमति कपि भालु ॥

प्रीतिं तद्दासदासस्य मूढस्यापि हि मादृशः ।
स्वीकरिष्यत्यसौ मन्ये रामभद्रो न संशयः ॥ ११
ऋक्षवानरयोरासीच्चातुर्यं सचिवाविवत् ।
शिलाखण्डास्तरन्त्यब्धौ माहात्म्यं तन्महात्मनः ॥ १२

हौंहु कहावत सबु कहत राम सहत उपहास ।
साहिब सीतानाथ सो सेवक तुलसीदास ॥

मन्यन्ते मां जना दासं मूढश्च विश्वसिम्यहम् ।
तुलसीदासवद्दासं सेहेऽसौ जानकीपतिः ॥ १३

अति बड़ि मोरि ढिठाई खोरी । सुनि अघ नरकहुँ नाक सकोरी ॥

अहो धाष्टर्यमहो घोरं पातकं यन्ममेदृशम् ।
तिरस्कुर्याद्धि मां मन्ये नरकोऽपि न संशयः ॥ १४

समुझि सहम मोहि अपडर अपनें । सो सुधि राम कीन्हि नहिं सपनें ।।

आत्मन्येवाकुलः सोऽहं मनःकल्पितसाध्वसात् ।
स्वप्नेऽपि न हि रामेण चिन्तितं स्यात्कदापि तद् ।। १५

सुनि अवलोकि सुचित चख चाही । भगति मोरि मति स्वामि सराही ।।
कहत नसाइ होइ हियँ नीकी । रीझत राम जानि जन जी की ।।
रहति न प्रभु चित चूक किए की । करत सुरति सय बार हिए की ।।

युक्तं वा यदि वाऽयुक्तं शब्दाविष्करणं मम ।
ज्ञात्वा मे हृद्गतं भावं रामो हृष्यति निश्चितम् ।। १६

नायं कदापि गणयत्यपराधराशीन्
सत्सेवकैरिह कृतान्प्रभुरामभद्रः ।
स्मृत्वा पुनः पुनरसौ पदभक्तिमेषाम्
सद्यः प्रसीदति हि तेषु न संशयोऽत्र ।। १७

जेहिं अघ बधे उब्याध जिमि बाली । फिरि सुकंठ सोइ कीन्हि कुचाली ।
सोइ करतूति बिभीषन केरी । सपनेहुँ सो न राम हियँ हेरी ।।

अपराधः कृतः कश्चिद्वालिनोत्पथगामिना ।
व्याधवद् हतवान् रामस्तदा तं दण्डकर्कशः ।। १८
तस्मिन्नेव तु सुग्रीवे पुनर्वापि बिभीषणे ।
कृते स्वप्नेऽपि नैवासौ रामो दण्डं व्यचिन्तयत् ।। १९

ते भरतहि भेंटत सनमाने । राजसभाँ रघुबीर बखाने ।।

संमाननेन स्वीकृत्य प्रत्युतेतौ स्वसेवकौ ।
प्रशशंस सभामध्ये भरतस्य समागमे ।। २०

प्रभु तरु तर कपि डार पर ते किए आपु समान ।
तुलसी कहूँ न राम से साहिब सीलनिधान ।।

शाखारूढः कपिश्चासौ वृक्षाधस्तात्तु वै प्रभुः ।
स्वीचकार तु तं भक्त्या गणयन्नात्मसदृशम् ।। २१
महात्माऽसौ महाधीरः शीलसौहार्दसागरः ।
नास्ति रामसमः स्वामी तुलसी कथयत्यतः ।। २२

राम निकाइँ रावरी है सबही को नीक ।
जौं यह साँची है सदा तौ नीको तुलसीक ॥

कल्याणकृत्स भक्तानां कल्याणं तनुते सदा ।
यदि सत्यं व्रजत्येषः कल्याणं तुलसी ध्रुवम् ॥ २३

एहि बिधि निज गुन दोष कहि सबहि बहुरि सिरु नाइ ।
बरनउँ रघुबर बिसद जसु सुनि कलि कलुष नसाइ ॥

उक्त्वैवं गुणदोषान्मे नत्वा सर्वान् समारभे ।
यशोगानं यशोदातुः कलिकालमलान्तकम् ॥ २४

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
षट्शरणागत-सर्वस्तुतिवर्णनं नाम अष्टमस्तरङ्गः ।

तरङ्गः ९

जागबलिक जो कथा सुहाई । भरद्वाज मुनिबरहि सुनाई ॥
कहिहउँ सोइ संबाद बखानी । सुनहुँ सकल सज्जन सुखु मानी ॥

याज्ञवल्क्यो मुनिश्रेष्ठः श्रावयामास यां कथाम् ।
रमणीयां भरद्वाजं धीमन्तं मुनिपुङ्गवम् ॥ १
कथयामि कथामेनां मुनिसंलापरूपिणीम् ।
श्रुत्वैतां सज्जनाः सर्वे सन्तु सौख्यसमन्विताः ॥ २

संभु कीन्ह यह चरित सुहावा । बहुरि कृपा करि उमहि सुनावा ॥

रचितं चरितं दिव्यं पुरा ह्येतत्पुरारिणा ।
भवान्यै भवभूत्यर्थं कथितं च कृपावता ॥ ३

सोइ सिव कागभुसुंडिहि दीन्हा । राम भगत अधिकारी चीन्हा ॥

निवेदितं च तत्सर्वं पुनः काकभुशुण्डये ।
रामभद्रस्य भक्ताय सुयोग्यायाधिकारिणे ॥ ४

तेहि सन जागबलिक पुनि पावा । तिन्ह पुनि भरद्वाज प्रति गावा ।।

पुनर्निवेदितं तेन याज्ञवल्क्याय धीमते ।
भरद्वाजाय तेनापि गीत्वा तत्कथितं पुनः ।। ५

ते श्रोता बकता समसीला । सवँदरसी जानहिं हरिलीला ।।

समशीलवतोरेषः समदर्शनयोस्तथा ।
हरिलीलाविदोः सम्यक् वक्तृश्रोतृसमागमः ।। ६

जानहिं तीनि काल निज ग्याना । करतल गत आमलक समाना ।।

जानीतस्तावुभावेतौ त्रिकालं मुनिपुङ्गवौ ।
हस्तस्थितं हि यः कश्चिद् विद्यादामलकं यथा ।। ७

औरउ जे हरिभगत सुजाना । कहहिं सुनहिं समुझहिं बिधि नाना ।।

ज्ञानिनश्चेतरे सर्वे हरिभक्तिपरायणाः ।
शृण्वन्तः कथयन्तस्तद् रामाख्यानं हि रेमिरे ।। ८

मैं पुनि निज गुर सन सुनी कथा सो सूकरखेत ।
समुझी नहिं तसि बालपन तब अति रहेउँ अचेत ।।

वराहस्थले मे गुरोरास्यपद्मात्
श्रुतं रामवृत्तं समस्तं पुरैतद् ।
गृहीतं न हीदं मया बालभावात्
तदा सम्यगर्थं सुरम्यं चरित्रम् ।। ९

श्रोता बकता ग्याननिधि कथा राम कै गूढ़ ।
किमि समुझौं मैं जीव जड़ कलि मल ग्रसित बिमूढ़ ।।

विदग्धः समर्थः कथावर्णनाय
सुविज्ञः सुयोग्यः कथाकर्णनाय ।
क्व चैषातिपुण्या कथा गूढरम्या
क्व चाहं विमूढः कलौ जातजन्मा ।। १०

तदपि कही गुर बारहिं बारा । समुझि परी कछु मति अनुसारा ।।

श्रावं श्रावं तु तामेव गुरोर्वक्त्राम्बुजन्मनः ।
यथामति कथामेनामीषत् ज्ञातुमहं क्षमः ।। ११

भाषाबद्ध करबि मैं सोई । मोरें मन प्रबोध जेहिं होई ।।
जस कछु बुधि बिबेक बल मेरें । तस कहिहउँ हियँ हरि के प्रेरें ।।

करोमि तामेव च पुण्यगाथां भाषानिबद्धामधुनात्मतुष्टयै ।
यथा विवेकश्च यथा मतिर्मे तथा प्रभुप्रेरितधीर्वदिष्ये ।। १२

निज संदेह मोह भ्रम हरनी । करउँ कथा भव सरिता तरनी ।।

विनाशयन्तीं मम बुद्धिमोहं निरासयन्तीमिह संशयं मे ।
कथामिमां तां कथयामि भूयः संसारसिन्धोस्तरणीमिहैकाम् ।। १३

बुध बिश्राम सकल जन रंजनि । रामकथा कलि कलुष बिभंजनि ।।

विश्रामो विदुषामेषा रघुनाथकथा सदा ।
जनरञ्जनमेषैव कलिकल्मषभञ्जनम् ।। १४

रामकथा कलि पंनग भरनी । पुनि बिबेक पावक कहुँ अरनी ।।
रामकथा कलि कामद गाई । सुजन सजीवनि मूरि सुहाई ।।

विवेकवह्नेररणिः कथेयम् मन्त्रस्तथेयं कलिपन्नगस्य ।
मनोरथानां कलि-कामधेनुः संजीवनीयं खलु सज्जनानाम् ।। १५

सोइ बसुधातल सुधा तरंगिनी । भय भंजनि भ्रम भेक भुअंगिनि ।।

वसुधातल-रमणीया सुधासरित् सा कथा हि दाशरथेः ।
भव-भय-भञ्जन-मूलं भ्रम-भेकानां भुजङ्गिनी चेयम् ।। १६

असुर सेन सम नरक निकंदिनि । साधु बिबुध कुल हित गिरिनंदिनि ।।

असुरचमूमिव नरकं रामकथा सर्वथा विनाशयते ।
देवी दुर्गेव च सा साधु-विबुध-कुल-हितं सदा तनुते ।। १७

संत समाज पयोधि रमा सी । बिस्व भार भर अचल छमा सी ।।

सत्-समुदायपयोनिधि-लक्ष्मीरेषा कथा हि दाशरथेः ।
जगदाधार-धरित्री श्रीरामकथा विराजते लोके ।। १८

जम गन मुहँ मसि जग जमुना सी । जीवन मुकुति हेतु जनु कासी ।।

अन्तकदूतास्यमसी जगतीयं सत्कथा यथा यमुना ।
जीव-विमोचन-निरता रामकथा सर्वथा यथा काशी ।। १९

रामहि प्रिय पावनि तुलसी सी । तुलसिदास हित हियँ हुलसी सी ।

श्रीरघुनाथस्यैषा राम-कथा वल्लभा यथा तुलसी ।
तुलसीदास-कवेः सा प्रियतम-माता सदा यथा हुलसी ।। २०

सिवप्रिय मेकल सैल सुता सी । सकल सिद्धि सुख संपति रासी ।।

रामकथा शशि-शेखर-हृत्प्रियदा नर्मदा यथाद्रिसुता ।
सुखधनराशिरिवैषा करतलगतसिद्धयश्च रामकथा ।। २१

सदगुन सुरगन अंब अदिति सी । रघुबर भगति प्रेम परमिति सी ।।

सद्‌गुण-सुर-गण-माता रामकथा साऽदितिर्यथा परमा ।
गुणगाथा खलु सैषा रघुवरपदभक्ति-राग-परसीमा ।। २२

रामकथा मंदाकिनी चित्रकूट चित चारु ।
तुलसी सुभग सनेह बन सिय रघुबीर बिहारु ।।

मन्दाकिनीयं रघुराम-गाथा चित्तं विशुद्धं ननु चित्रकूटः ।
भक्तिः सुरम्यं ननु काननं तत् सीता-समेतं रमतेऽत्र रामः ।। २३

रामचरित चिंतामनि चारू । संत सुमति तिय सुभग सिगारू ।।

श्रीराम-चरितमेतत् सुचारु-चिन्तामणिः सदा लोके ।
सुजन-सुमति-युवतीनां रम्यविभूषैव तत्कथा मन्ये ।। २४

जग मंगल गुन ग्राम राम के । दानि मुकुति धन धरम धाम के ।।

दशरथ-सुत-गुण-वृन्दः कल्याणायैव कल्पते जगताम् ।
धन-धर्म-परमधाम-विमोचन-साधनमिहैव दासानाम् ।। २५

सदगुर ग्यान बिराग जोग के । बिबुध बैद भव भीम रोग के ।।

ज्ञान-विराग-वितरणे योग-समाराधने गुरुः सोऽयम् ।
भव-भय-तापोपशमे सुरभिषजाविव भिषग्वरश्चायम् ।। २६

जननि जनक सिय राम प्रेम के। बीज सकल व्रत धरम नेम के ।।

जनकसुता-रघुनाथौ जनक-जनन्यौ कृपार्थकस्यैतौ ।
यम-नियमानां चेदं बीजं रघुराम-जानकी-युगलम् ।। २७

समन पाप संताप सोक के। प्रिय पालक परलोक लोक के ।।

शमनमिदं रघु-युगलं पीडा-संताप-पाप-दुःखानाम् ।
इह-पर-लोकोद्धारक-पालक-युगलं प्रियं हि लोकानाम् ।। २८

सचिव सुभट भूपति बिचार के। कुंभज लोभ उदधि अपार के ।।

सुभट-सचिव-पद-भूषणमेतद् ज्ञानाधिराज-परिवारे ।
लोभ-महार्णव-पाने कुशलमिदं कुम्भजं तथा मन्ये ।। २९

काम कोह कलिमल करिगन के। केहरि सावक जन मन बन के ।।

जन-मानस-घन-वन-चर-काम-क्रोधापराध-करि-कुलहा ।
सीता-रघुपति-सङ्गो मृगपति-पोतः पराक्रमैकरसः ।। ३०

अतिथि पूज्य प्रियतम पुरारि के। कामद घन दारिद दवारि के ।।

त्रिपुररिपोरतिवल्लभ-पूज्यतमौ चातिथी तथा ह्येतौ ।
सीता-रघुकुल-नाथौ कामद-जलदौ च दैन्य-दावाग्नेः ।। ३१

मंत्र महामनि विषय ब्याल के। मेटत कठिन कुअंक भाल के ।।

विषयाशी-विष-मन्त्र-महामणि-रूपौ च जानकीरामौ ।
भाल-लिखित-विधि-दुर्लिपि-मार्जन-चतुरौ च तौ जगद्वन्द्यौ ।। ३२

हरन मोह तम दिनकर कर से। सेवक सालि पाल जलधर से ।।

मोह-तमोहर-दिनकर-कर-निकरौ जनक-नन्दिनी-रामौ ।
सेवक-शालि-विसिञ्चन-पोषण-पर-जलधरौ तथा चैतौ ।। ३३

अभिमत दानि देवतरु बर से। सेवत सुलभ सुखद हरि हर से ।।

अभिमत-वितरण-तत्परवर-कल्पतरू च दम्पती ह्येतौ ।
सुलभौ सुखदौ चैतौ सुख-सेव्यौ हरिहरौ यथार्तानाम् ।। ३४

सुकबि सरद नभ मन उडगन से । रामभगत जन जीवन धन से ।।

कविवर-शरदो मानस-गगनोड्डुगणाश्च राम-सीते ते ।
रघुवर-चरण-रतानां जीवन-धनमिह विराजते लोके ।। ३५

सकल सुकृत फल भूरि भोग से । जग हित निरुपधि साधु लोग से ।।

सकल-सुकृत-फल-रूपं सुभग-सुखास्वादनं च तद् युगलम् ।
जन-हित-साधनमेतत् सरल-हृदय-सज्जनोपमं लोके ।। ३६

सेवक मन मानस मराल से । पावन गंग तरंग माल से ।।

रघुपति-पद-रत-मानस-मराल-युग्मं द्वयं हि तल्लोके ।
गङ्गा-पुण्य-तरङ्ग-निरन्तर-मालेव राम-सीते ते ।। ३७

कुपथ कुतरक कुचालि कलि कपट दंभ पाषंड ।
दहन राम गुन ग्राम जिमि इंधन अनल प्रचंड ।।

कुमार्गं कुतर्कं कुचेष्टां कुबुद्धिं कलेर्दम्भ-पाखण्डता-कैतवादीन् ।
दहत्येष निःशेषमग्निर्यथैधः सदा सद्गुणौघो रघोरग्रणेः सः ।। ३८

रामचरित राकेस कर सरिस सुखद सब काहु ।।
सज्जन कुमुद चकोर चित हित बिसेषि बड़ लाहु ।।

श्रीरामवृत्तं सरसं सुरम्यं पूर्णेन्दुवत् सर्वजनाभिरामम् ।
सत्कौमुदी-चित्त-चकोरमेतत् संतोषयत्यत्यधिकं न चित्रम् ।। ३९

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानसभावानुवादे
रामकथामाहात्म्यवर्णनं नाम नवमस्तरङ्गः ।

तरङ्गः १०

कीन्हि प्रस्न जेहि भाँति भवानी। जेहि बिधि संकर कहा बखानी ॥
सो सब हेतु कहब मैं गाई। कथाप्रबंध बिचित्र बनाई ॥

शैलसुता-जिज्ञासां शङ्करकृत-वर्णनं सविस्तारम्।
कृत्वा मनसि समग्रं गास्यति तुलसी चरित्रमतिचित्रम् ॥ १

जेहिं यह कथा सुनी नहिं होई। जनि आचरजु करै सुनि सोई ॥
कथा अलौकिक सुनहिं जे ग्यानी। नहिं आचरजु करहिं अस जानी ॥

अश्रुतपूर्वां श्रुत्वा मा कुर्याद् विस्मयं नरः कश्चित्।
न हि चकिताः श्रुतवन्तः श्रुत्वेमामद्भुतां कथां भूयः ॥ २

रामकथा कै मिति जग नाहीं। असि प्रतीति तिन्ह के मन माहीं ॥
नाना भाँति राम अवतारा। रामायन सत कोटि अपारा ॥

बहुविध-रूपधरोऽयं शतकोटि-चरित्र-नायको रामः।
अविदित-पारा गाथा श्रीरामस्येति विश्वसन्त्यार्याः ॥ ३

कलपभेद हरिचरित सुहाए। भाँति अनेक मुनीसन्ह गाए ॥
करिअ न संसय अस उर आनी। सुनिअ कथा सादर रति मानी ॥

प्रतिकल्पं प्रभु-चरितं बहुवि -रूपं बुधैर्विनिर्बद्धम्।
तदिदं विगत-विकल्पं सर्वे शृण्वन्तु सादरं धीराः ॥ ४

राम अनंत अनंत गुन अमित कथा बिस्तार।
सुनि आचरजु न मानिहहिं जिन्ह कें बिमल बिचार ॥

अनन्तः श्रीरामो निरवधिरसौ सद्गुण-गणः
अगाधा तद्-गाथा न हि विदित-विस्तार-विभवा।
न कुर्यादाश्चर्यं लवमपि तदाकर्ण्य चरितं
सुखं श्रद्धास्यन्ते विमल-मतयः सज्जन-गणाः ॥ ५

एहि बिधि सब संसय करि दूरि। सिर धरि गुर पद पंकज धूरी ॥

सकल-विकल्प-निरासं कृत्वैवं सर्व-साधु-वृन्दानाम्।
गुरु-पद-पद्म-परागं परम-पवित्रं निधाय निटिलेऽहम् ॥ ६

पुनि सबही बिनवउँ कर जोरी । करत कथा जेहिं लाग न खोरी ॥

पुनरपि बद्धकरोऽयं न्यून-निरासार्थमर्थये चाहम् ।
रघुपति-पुण्य-कथेयं निरवद्या सर्वथा यथा भूयात् ॥ ७

सादर सिवहि नाइ अब माथा । बरनउँ बिसद राम गुन गाथा ॥

श्रीशिव-शंकर-चरणे नत्वाहं सादरं शुभारम्भे ।
रघुवर-चरण-सरोज-निवेशित-शीर्षः स्तवीमि गुणगाथाम् ॥ ८

संबत सोरह सै एकतीसा । करउँ कथा हरि पद धरि सीसा ॥
नौमी भौम बार मधु मासा । अवधपुरीं यह चरित प्रकासा ॥

षोडश-सहस्र-पूर्वे सैकत्रिंशत्तमे च वर्षेऽहम् ।
मधु-मासे शुभनवमी-मङ्गलवासर-विशेषिते सुदिने ॥ ९
रघुकुल-दीपस्येदं चरितमयोध्यापुरे पुरश्रेष्ठे ।
प्राकाशयमतिभक्त्या रघुवर-पद-पङ्कज-प्रणत-शीर्षः ॥ १०

जेहि दिन राम जनम श्रुति गावहिं । तीरथ सकल तहाँ चलि आवहिं ॥

जन्म-महोत्सव-सुदिनः कौसल्या-दशरथात्मजस्यायम् ।
वसुधातल-तीर्थानां वर-नगरे शुभ-समुच्चयश्चायम् ॥ ११

असुर नाग खग नर मुनि देवा । आइ करहिं रघुनायक सेवा ॥
जन्म महोत्सव रचहिं सुजाना । करहिं राम कल कीरति गाना ॥

सुर-नर-खग-मुनि-नागासुर-संघा यान्ति तत्र सेवायै ।
श्रीराम-यशोगानं कवि-कुल-रचितं भृशं भवति तुष्टयै ॥ १२

मज्जहिं सज्जन बृंद बहु पावन सरजू नीर ।
जपहिं राम धरि ध्यान उर सुंदर स्याम सरीर ॥

शरयू-नीरे परमपवित्रे सज्जनवृन्दा मज्जन्ति ।
श्यामसुरम्यं रामशरीरं ध्यात्वा जापं कुर्वन्ति ॥ १३

दरस परस मज्जन अरु पाना । हरइ पाप कह बेद पुराना ॥

शरयू-स्पर्शन-मज्जन-दर्शन-पान-क्रियास्वथैकाऽपि ।
हरति समग्रं दुरितं निगमा गायन्ति तत्सरिच्चरितम् ॥ १४

नदी पुनीत अमित महिमा अति । कहि न सकइ सारदा बिमलमति ।।

शुचितम-शरयू-सरितो गुण-गण-गरिमाऽगमादिभिर्गीतः ।
वर्णयितुं तं वाचा विमल-मतिः शारदा न पारयति ।। १५

राम धामदा पुरी सुहावनि । लोक समस्त बिदित अति पावनि ।।

परम-पवित्राऽयोध्या त्रिभुवन-विदिता यशःसमायुक्ता ।
जन-मानस-रमणीया नगरीयं राम-धामदा शिवदा ।। १६

चारि खानि जग जीव अपारा । अवध तजें तनु नहिं संसारा ।।

यस्यामपगतजीवा भवन्ति मुक्ताश्चतुर्विधा जीवाः ।
जनि-मृति-संसृति-चक्रं नावर्तन्ते कदाचिदपि भूयः ।। १७

सब बिधि पुरी मनोहर जानी । सकल सिद्धिप्रद मंगल खानी ।।
बिमल कथा कर कीन्ह अरंभा । सुनत नसाहिं काम मद दंभा ।।

मत्वा सद्गुण-राशिं रमणीयां सकल-सिद्धिदां शुभदाम् ।
काम-कपट-मद-हन्त्रीं नगरीमत्रारभे शुभां गाथाम् ।। १८

रामचरितमानस एहि नामा । सुनत श्रवन पाइअ बिश्रामा ।।

श्रीरामचरितमानसमित्येवं नाममङ्गलं तस्याः ।
श्रुत्वा परमपवित्रं सुखशान्तिमिहाश्नुते नरः सद्यः ।। १९

मन करि बिषय अनल बन जरई । होइ सुखी जौं एहिं सर परई ।।

विषय-दवाग्नौ मानस-मातङ्गो दह्यतेऽनिशं सोऽयम् ।
मानस-मज्जन-पूतः सुख-शान्तिं याति यातना-मुक्तः ।। २०

रामचरितमानस मुनि भावन । बिरचेउ संभु सुहावन पावन ।।
त्रिबिध दोष दुख दारिद दावन । कलि कुचालि कुलि कलुष नसावन ।।

मुनि-मानस-रमणीयं राम-चरित्रं पुरारिणा रचितम् ।
दुरित-दवानल-रूपं कलि-मल-पापापहं त्रिदोष-हरम् ।। २१

रचि महेस निज मानस राखा । पाइ सुसमउ सिवा सन भाषा ।।

निज-मानस-परिपालन-पूतं शंभुः शुभावसरलब्धः ।
प्रीतः परिकीर्तितवानात्मकलत्राय सच्चरित्रमिदम् ।। २२

तातें रामचरितमानस बर । धरेउ नाम हियँ हेरि हरषि हर ॥
कहउँ कथा सोइ सुखद सुहाई । सादर सुनहु सुजन मन लाई ॥

रामचरितमानसमिति शिव-मानस-दर्शनाच्च नामेदम् ।
सुरसं सुखदं चरितं कथये शृण्वन्तु सादरं सुजनाः ॥ २३

जस मानस जेहि बिधि भयउ जग प्रचार जेहि हेतु ।
अब सोइ कहउँ प्रसंग सब सुमिरि उमा बृषकेतु ॥

यद्विश्वमेतद्, यथा च वैतद्, यत्कारणमिह विख्यातम् ।
शैलसुता-शिव-युगलं स्मृत्वा सर्वमिदं तद्व्याख्यातम् ॥ २४

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
श्री-अयोध्या-स्वरूप-प्रभाव-वर्णनं नाम दशमस्तरङ्गः ।

तरङ्गः ११

संभु प्रसाद सुमति हियँ हुलसी । रामचरितमानस कबि तुलसी ॥

तुलसीदासः सोऽहम्, शङ्करकृपया समुल्लसितसुमतिः ।
मधुरं रघुवर-चरितं, कथयामीदं यथामतेर्विभवः ॥ १

करइ मनोहर मति अनुहारी । सुजन सुचित सुनि लेहु सुधारी ॥

कर्तुमिदं प्रयतेऽहं, सुरसं रुचिरं च दाशरथिचरितम् ।
न्यूनाधिक-निरपेक्षाः सदयं सुजनाः समादधतु सर्वे ॥ २

सुमति भूमि थल हृदय अगाधू । बेद पुरान उदधि घन साधू ॥

भूमिरियं विमलमतिः, हृदयमगाधं तथा हि गर्तमिदम् ।
वेदपुराणान्युदधिः, सुजनाः सर्वे बलाहकाः सुखदाः ॥ ३

बरषहिं राम सुजस बर बारी । मधुर मनोहर मंगलकारी ॥

श्रीराम-यशोरूपं शीतलरम्यं सुपावनं मधुरम् ।
वर्षति सुखकर-वर्षं जलधर-निवहः सदा दया-पूर्णः ॥ ४

लीला सगुन जो कहहिं बखानी । सोइ स्वच्छता करइ मल हानी ॥

सगुणनिरूपणमेतद् रामयशोजल-शुचित्वमिति बोध्यम् ।
मानस-मल-हरणं तद्, मतिशोधनकारणं परं ज्ञेयम् ॥ ५

प्रेम भगति जो बरनि न जाइ । सोई मधुरता सुसीतलताई ॥
सो जल सुकृत सालि हित होई । राम भगत जन जीवन सोई ॥

वारि-मधुरता भक्तिः शैत्यं रघुवर-रतिश्च काप्येषा ।
सुकृत-शालि-हित-करणम्, जलमिह जन-जीवनं च मन्येऽहम् ॥ ६

मेधा महि गत सो जल पावन । सकिलि श्रवन मग चलेउ सुहावन ।
भरेउ सुमानस सुथल थिराना । सुखद सीत रुचि चारु चिराना ॥

पुण्योदकमिह निचितं, श्रोत्र-पथा प्रसृतमत्र मति-भूम्याम् ।
सुस्थिर-सुखद-सुरम्यं, हृदय-ह्रदापूरणेन भवतीदम् ॥ ७

सुठि सुंदर संबाद बर बिरचे बुद्धि बिचारि ।
तेइ एहि पावन सुभग सर घाट मनोहर चारि ॥

वर-संवाद-चतुष्टयमस्मिन्, मति-मन्थन-नवनीताभम् ।
शोभन-मानस-सरसी-भूषण तीर्थ-चतुष्कं चारुतमम् ॥ ८

सप्त प्रबंध सुभग सोपाना । ग्यान नयन निरखत मन माना ॥

काण्डाः सप्तमितास्ते, कासारेऽस्मिन् सुरम्य-सोपानः ।
सन्मानस-सुखदोऽयं, ज्ञान-विलोचन-विलोकितारोहः ॥ ९

रघुपति महिमा अगुन अबाधा । बरनब सोइ बर बारि अगाधा ॥

रघुपति-महिमा चायं, गुण-गणना-पारगः स्वतःसिद्धः ।
शीतल-तोयमगाधं, रामचरितमानसे सदा ज्ञेयम् ॥ १०

राम सीय जस सलिल सुधासम । उपमा बीचि बिलास मनोरम ॥

सीताराम-यशस्तद्, कासारेऽमिन् सुधा-सलिल-रूपम् ।
वीचि-तरङ्ग-विलासः, शोभन-काव्यान्तरोपमा रुचिराः ॥ ११

पुरइनि सघन चारु चौपाई । जुगुति मंजु मनि सीप सुहाई ॥

मानस-बिसिनी चेयं, विपुल-विकसिता चतुष्पदी-रचना ।
मुक्ताफल-धृत-शुक्तिः, कासारे काव्य-कौशलोक्तिरियम् ॥ १२

छंद सोरठा सुंदर दोहा । सोइ बहुरंग कमल कुल सोहा ।।
अरथ अनूप सुभाव सुभासा । सोइ पराग मकरंद सुबासा ।।

तदितर छन्दांस्यस्मिन्, बहुरङ्गा रम्य-कमल-षण्डास्ते ।
अर्थ-पराग-सुरम्या, भाव-मरन्दाः, सदुक्ति-गन्ध-युताः ।। १३

सुकृत पुंज मंजुल अलि माला । ग्यान बिराग बिचार मराला ।।

पुण्य-पुञ्ज-मधु-गुञ्जन-मधुकर-कुलावृत्ताश्च तथा ।
ज्ञान-विराग-विचारा रामचरितमानसे मरालास्ते ।। १४

धुनि अवरेब कबित गुन जाती । मीन मनोहर ते बहुभाँती ।।

ध्वनि-वक्रोक्त्यादि-गुणाः, दृष्टाः सौन्दर्य-वर्धकाः काव्ये ।
बहुविध-मञ्जुल-मीनाः रामचरितमानसे विराजन्ते ।। १५

अरथ धरम कामादिक चारी । कहब ग्यान बिग्यान बिचारी ।।
नव रस जप तप जोग बिरागा । ते सब जलचर चारु तड़ागा ।।

ज्ञान-सहित-विज्ञानं पुरुषार्थ-चतुष्टयं च काव्यगतम् ।
नव-रस-योग-विरागास्तपोजपौ चारु-जलचरा जीवाः ।। १६

सुकृती साधु नाम गुन गाना । ते बिचित्र जलबिहग समाना ।।

रघुवर-नाम-स्तवनम्, पुण्यचरित-साधुकीर्तनं काव्ये ।
कलभाषित-जल-विहगाः, रामचरितमानसे सुशोभन्ते ।। १७

संतसभा चहुँ दिसि अवँराई । श्रद्धा रितु बसंत सम गाई ।।

मानसमभितश्चैतान्याम्रवनानीव साधु-समुदायाः ।
चूत-प्रसवकरोऽयम् मधुमासो मानसान्तरे श्रद्धा ।। १८

भगति निरूपन बिबिध बिधाना । छमा दया दम लता बिताना ।।

भक्तिनिरूपणमेवं, दया-क्षमा-शम-दमादि-गुण-संघाः ।
मानस-संनिहितास्ते, लता-वितानाः सतां सदा सुखदाः ।। १९

सम जम नियम फूल फल ग्याना । हरि पद रति रस बेद बखाना ।।

यम-नियम-कुसुम-युक्ताः ज्ञानफलावर्जिता वितानास्ते ।
हरिचरणाब्ज-रतिर्या, मधुर-रसः सैव गीयते वेदे ।। २०

औरउ कथा अनेक प्रसंगा । तेइ सुक पिक बहुबरन बिहंगा ।।

इतर-कथा-विस्ताराः, वृत्तान्ता वा कथागताः सर्वे ।
मानस-तीर-समीपे, बहुवर्णाः शुक-पिकादि-शकुनास्ते ।। २१

पुलक बाटिका बाग बन सूख सुबिहंग बिहारु ।।

प्रहर्ष-पुलकाः पुष्पवाटिकास्तथोपवन-विपिनाभास्ते ।
काव्यास्वाद-सुखं सुविहंगम-चारु-विहारः पदे पदे ।। २२

माली सुमन सनेह जल सींचत लोचन चारु ।।

निर्मल-चित्तं मालाकारः सेक-जलं सुखबाष्पमिदम् ।
लोचन-कलश-विसिञ्चन-वर्धित-लता-द्रुमं तद् रम्यवनम् ।। २३

जे गावहिं यह चरित सँभारे । तेइ एहि ताल चतुर रखवारे ।।
सदा सुनहिं सादर नर नारी । तेइ सुरबर मानस अधिकारी ।।
अति खल जे बिषई बग कागा । एहिं सर निकट न जाहिं अभागा ।।
संबुक भेक सेवार समाना । इहाँ न बिषय कथा रस नाना ।।

ये गायन्ति च सादरं सुचरितं सर्वे सरोरक्षकाः ।
ये शृण्वन्ति तथैव ते सुरवराः सर्वेऽधिकारे स्थिताः ।।
गन्तुं तन्निकटं न ते खल-बकाः कामान्ध-काकाः क्षमाः ।
सन्त्यस्मिन् न यथा कथा विषयजा शम्बूक-भेक-दृशः ।। २४

तेहि कारन आवत हियँ हारे । कामी काक बलाक बिचारे ।।
आवत एहिं सर अति कठिनाई । राम कृपा बिनु आइ न जाई ।।
कठिन कुसंग कुपंथ कराला । तिन्ह के बचन बाघ हरि ब्याला ।।

आयातुं न हि धर्षयन्ति निकटे काका बकाः कामिनः
चेष्टन्ते यदि ते बलान्न सफलाः राम-प्रसादं विना ।
दुःसङ्गः कुपथः करालकठिनः कस्तं सुखेनाक्रमेत्
व्याल-व्याघ्र-समान-दुष्ट-वचसां कः संमुखं वा व्रजेत् ।। २५

गृह कारज नाना जंजाला । ते अति दुर्गम सैल बिसाला ।।
बन बहु बिषम मोह मद माना । नदीं कुतर्क भयंकर नाना ।।

संसारे गृह-कर्म-जाल-जटिलं शैला विशाला हि ते
लोभ-क्रोधन-मोह-मत्सर-मदाः कान्तार-मार्गाश्च ते ।

नाना-तर्क-कुतर्क-संशय-भ्रम-प्रत्यूह-पूर्णा च या
रौद्रा दारुणदुस्तरातिगहना ज्ञेयात्र सिन्धुः सदा ।। २६

जे श्रद्धा संबल रहित नहिं संतन्ह कर साथ ।।
तिन्ह कहुँ मानस अगम अति जिन्हहि न प्रिय रघुनाथ ।।

श्रद्धापाथे येन विहीनाः, सह-पान्थैः सुजनैश्च विना
भक्ति-विहीना मानस-सन्निधमायातुं ते न हि शक्ताः ।। २७

जौं करि कष्ट जाइ पुनि कोई । जातहिं नींद जुड़ाई होई ।।
जड़ता जाड़ विषम उर लागा । गएहुँ न मज्जन पाव अभागा ।।

आयासैर्यदि कोऽपि सिध्यति नरः प्राप्तुं सरःसन्निधौ
सद्योऽसौ मति-मान्द्य-शैत्य-सरुजः प्राप्नोति कम्पं तनोः ।
निर्गन्तुं यदि नेहते हठबलान्निद्रा-ज्वरो बाधते
भाग्यं मानस-मज्जनस्य च कुतो गत्वापि तीरान्तिके ।। २८

करि न जाइ सर मज्जन पाना । फिरि आवइ समेत अभिमाना ।।
जौं बहोरि कोउ पूछन आवा । सर निंदा करि ताहि बुझावा ।।

स्नातुं शीतल-मानसे न च जलं पातुं ततो वा क्षमः
प्रत्यागच्छति गर्व-मान-सहितस्तस्मात्तदा मानसात् ।
पृष्ठश्चेद्यदि मानसस्य विषये केनाप्यसौ दाम्भिकः
नोक्त्वा किंचिदपि स्व-दोष-विषये निन्दत्यहो मानसम् ।। २९

सकल बिघ्न ब्यापहिं नहिं तेही । राम सुकृपाँ बिलोकहिं जेही ।।
सोइ सादर सर मज्जनु करई । महा घोर त्रयताप न जरई ।।

बाधन्ते न तु विघ्ना भक्तान् श्रीरामचन्द्र-कृपयैते ।
त्रिविधं हरति च तापं मानस-मज्जनमतः सदा तेषाम् ।। ३०

ते नर यह सर तजहिं न काऊ । जिन्ह कें राम चरन भल भाऊ ।।
जो नहाइ चह एहिं सर भाई । सो सतसंग करउ मन लाई ।।

रघुवर-चरण-रतानां नास्ति वियोगः कदाचिदपि सरसः ।
सिस्नासति सरसि च यः कुर्यात् सज्जन-समागमं सद्यः ।। ३१

अस मानस मानस चख चाही । भइ कबि बुद्धि बिमल अवगाही ।।
भयउ हृदयँ आनंद उछाहू । उमगेउ प्रेम प्रमोद प्रबाहू ।।

तुलसी-मतिरपि पूता मनसेक्षित-मानसावगाहेन ।
सुख-कल्लोल-समेतं प्रभुपद-भक्त्या मनः सपरिवाहम् ।। ३२

चली सुभग कबिता सरिता सो । राम बिमल जस जल भरिता सो ।।
सरजू नाम सुमंगल मूला । लोक बेद मत मंजुल कूला ।।

राम-यशो-जल-पूर्णा मनसः कविता-सरित्-समुद्भूता ।
शरयूर्मङ्गल-मूला मञ्जुल-कूलेति लोक-वेद-मता ।। ३३

नदी पुनीत सुमानस नंदिनि । कलिमल तृन तरु मूल निकंदिनि ।।

तुलसी-मानस-कन्या शरयुरियं पावना सदा रम्या ।
कलि-मल-तृण-तरु-मूलोत्पाटन-पटुरिति जनेषु विख्याता ।। ३४

श्रोता त्रिबिध समाज पुर ग्राम नगर दुहुँ कूल ।

विषयी मुक्तस्तथा मुमुक्षुस्त्रिविधः श्रोतृसमाजोऽयम् ।
वसति तट-द्वय-निकटे तस्याः, ग्राम-नगर-पुर-संघातः ।। ३५

संतसभा अनुपम अवध सकल सुमंगल मूल ।।

सुजन-विज्ञ-जन-रसिक-सभा सा राम-यशःश्रवणे लग्ना ।
अनुपम-रूपाऽयोध्या-नगरी सकल-सुमङ्गल-मूला या ।। ३६

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
श्रीरामचरितवर्णनं नाम एकादशस्तरङ्गः ।

तरङ्गः १२

रामभगति सुरसरितहि जाई। मिली सुकीरति सरजु सुहाई ॥
सानुज राम समर जसु पावन। मिलेउ महानदु सोन सुहावन ॥

राम-यशः शरयुरियं संमिलिता रामभक्ति-सुर-सरिता।
सानुज-राम-समर-जय-गाथा साऽयं महानदः शोणः॥ १

जुग बिच भगति देवधुनि धारा। सोहति सहित सुबिरति बिचारा ॥
त्रिबिध ताप त्रासक तिमुहानी। राम सरूप सिंधु समुहानी ॥

विरति-विचार-समेता भक्तिरियं जाह्नवी द्वयोर्मध्ये।
ताप-त्रय-हरणीयं राम-समुद्रं विशत्यहो त्रिमुखैः॥ २

मानस मूल मिली सुरसरिही। सुनत सुजन मन पावन करिही ॥
बिच बिच कथा बिचित्र बिभागा। जनु सरि तीर तीर बन बागा ॥

मानस-मूला शरयुः सुरसरिता पाविता मनःसुखदा।
इतर-कथोपकथा याः शरयू-तीरे विचित्र-वन-शोभा॥ ३

उमा महेस बिबाह बराती। ते जलचर अगनित बहुभाँती ॥
रघुबर जनम अनंद बधाई। भवँर तरंग मनोहरताई ॥

अगणित-जलचर-जीवा विविधा गौरी-शिवोपयम-गाथाः।
रघुवर-जन्म-महोत्सव-सुमधुर-गाथा नदी-तरङ्गसमा॥ ४

बालचरित चहु बंधु के बनज बिपुल बहुरंग।
नृप रानी परिजन सुकृत मधुकर बारिबिहंग ॥

विपुल-विविध-वनजानि च बालक-बन्धु-चतुष्टय-चरितानि।
नृप-महिषी-परिजन-शुभचरितान्यलिकुल-जलविहग-समानि॥ ५

सीय स्वयंबर कथा सुहाई। सरित सुहावनि सो छबि छाई ॥
नदी नाव पटु प्रस्न अनेका। केवट कुसल उत्तर सबिबेका ॥

शरयू-सुरुचिर-शोभा, गाथा सीता स्वयंवरस्यैषा।
प्रश्नावलिरिह तरणी, चातुर्योत्तर-परंपरा यन्ता॥ ६

सुनि अनुकथन परस्पर होई । पथिक समाज सोह सरि सोई ।।
घोर धार भृगुनाथ रिसानी । घाट सुबद्ध राम बर बानी ।।

श्रवणोत्तर-सुविमर्शः पथिक-समाजः समागतस्तीरे ।
प्रभुवचनैः कृततीर्था भृगुनन्दन-कोप-घोर-जल-धारा ।। ७

सानुज राम बिबाह उछाहू । सो सुभ उगम सुखद सब काहू ।।
कहत सुनत हरषहिं पुलकाहीं । ते सुकृती मन मुदित नहाहीं ।।

शुभ-परिवाहः सरितो दाशरथीनां विवाह-वचनौघः ।
सरिदवगाहन-पूताः सुख-पुलकित-काय-धन्य-जन-वृन्दाः ।। ८

राम तिलक हित मंगल साजा । परब जोग जनु जुरे समाजा ।।
काई कुमति केकई केरी । परी जासु फल बिपति घनेरी ।।

रामाभिषेक-हर्षः, पर्व-समय-संगतः पथिक-वृन्दः ।
घोर-विपत्-परिणामा, कैकेयी-कुमतिरेव शैवालः ।। ९

समन अमित उतपात सब भरतचरित जपजाग ।।
कलि अघ खल अवगुन कथन ते जलमल बग काग ।।

सकल-विपत्-प्रतिविधानमेतद् भरत-चरितमिह जप-यागौ ।
कलि-मल-दुर्जन-दुर्गुण-वर्णनमिह जल-तल-मल-काक-बकाः ।। १०

कीरति सरित छहूँ रितु रूरी । समय सुहावनि पावनि भूरी ।।
हिम हिमसैलसुता शिव ब्याहू । सिसिर सुखद प्रभु जनम उछाहू ।।

सर्वर्तु-सुन्दरैषा, कीर्ति-सरित्-सर्वसमय-सुख-सूतः ।
शिव-शैलजा-विवाहो हेमन्तो रामजन्म शिशिरोऽस्याम् ।। ११

बरनब राम बिबाह समाजू । सो मुद मंगलमय रितुराजू ।।
ग्रीषम दुसह राम बनगवनू । पंथकथा खर आतप पवनू ।।

ऋतुराजः शुभसुखदः श्रीराम-विवाह-वर्णनं चैवम् ।
ग्रीष्मर्तुर्वनगमनम् मार्गकथा तप्त-चण्ड-पवनोऽयम् ।। १२

बरषा घोर निसाचर रारी । सुरकुल सालि सुमंगलकारी ॥
राम राज सुख बिनय बड़ाई । बिसद सुखद सोइ सरद सुहाई ॥

सुर-कुल-शालि-सुमङ्गल-वर्षर्तुर्घोर-दैत्य-संग्रामः ।
राम-विजय-महिमानौ राज्य-सुखं चामलः शरत्-समयः ॥ १३

सती सिरोमनि सिय गुनगाथा । सोइ गुन अमल अनूपम पाथा ॥
भरत सुभाउ सुसीतलताई । सदा एकरस बरनि न जाई ॥

सती-शिरोमणि-सीता-गाथा शरयु-जलानुपम-शुचिता ।
अतिकथ-शाश्वत-शैत्यं भरत-चरित्रं कथाशरयु-भूषा ॥ १४

अवलोकनि बोलनि मिलनि प्रीति परसपर हास ।
भायप भलि चहु बंधु की जल माधुरी सुबास ॥

मिथः कथा सा मिथौ दर्शनं संमिलनं सुखसंवादः ।
बन्धु-चतुष्क-सुबन्धुत्वं तद् वारि-माधुरी-गंधसमम् ॥ १५

आरति बिनय दीनता मोरी । लघुता ललित सुबारि न थोरी ॥
अदभुत सलिल सुनत गुनकारी । आस पिआस मनोमल हारी ॥

ललित-लघुत्वं तोये कवि-मानस-विनय-दीनतार्ति-गुणाः ।
मानस-मल-भव-तृष्णा-हारक-जलमद्भुतं श्रवण-पेयम् ॥ १६

राम सुप्रेमहि पोषत पानी । हरत सकल कलि कलुष मलानी ॥
भव श्रम सोषक तोषक तोषा । समन दुरित दुख दारिद दोषा ॥

सलिलं कलि-मल-हरणं, रघुवर-रति-पोषणं व्यथा-शमनम् ।
भव-भय-शोषणमेतद् दोषहरं तोष-तोषणं चेदम् ॥ १७

काम कोह मद मोह नसावन । बिमल बिबेक बिराग बढ़ावन ॥
सादर मज्जन पान किए तें । मिटहिं पाप परिताप हिए तें ॥

मानस-मज्जन-पानम् मानस-परिताप-पाप-नाश-करम् ।
विरति-विचार-विवर्धनमेतत् कामादि-षड्रिपूद्दलनम् । १८

जिन्ह एहिं बारि न मानस धोए। ते कायर कलिकाल बिगोए ॥
तृषित निरखि रबि कर भव बारी। फिरिहहिं मृग जिमि जीव दुखारी ॥

स्नातुमशक्तः सलिले कलि-कैतव-जाल-बन्धन-ग्रस्तः ।
तृषितो जनि-मृति-चक्रे भ्रमत्यसौ भव-मरीचिका-लुब्धः ॥ १९

मति अनुहारि सुबारि गुन गन गनि मन अन्हवाइ ।
सुमिरि भवानी संकरहि कह कबि कथा सुहाइ ॥

मत्यनुसारं वारि-गुणौघं, ज्ञात्वा स्नात्वा सलिलेऽहम् ।
स्मृत्वा गौरी-शंकर-युगलं, कथये चरितं रमणीयम् ॥ २०

अब रघुपति पद पंकरुह हियँ धरि पाइ प्रसाद ।
कहउँ जुगल मुनिबर्य कर मिलन सुभग संबाद ॥

धृत्वा हृदि रघुपति-पद-नलिनं, लब्धवानुग्रहमेवमहम् ।
चरितारम्भमुनिद्वयमिलनं, कथये सुभगं संवादम् ॥ २१

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
मानसरूपकं नाम द्वादशस्तरङ्गः ॥

तरङ्गः १३

भरद्वाज मुनि बसहिं प्रयागा । तिन्हहि राम पद अति अनुरागा ॥
तापस सम दम दया निधाना । परमारथ पथ परम सुजाना ॥

श्रीराम-चरण-भक्तः प्रयागतीर्थे मुनिर्भरद्वाजः ।
वसति स्म परमविज्ञः शम-दम-यम-गुण-युतः सतां पूज्यः ॥ १

माघ मकरगत रबि जब होई । तीरथपतिहिं आव सब कोई ॥
देव दनुज किंनर नर श्रेनीं । सादर मज्जहिं सकल त्रिबेनीं ॥

मकरगते रविराजे माघे मासे प्रयाग-शुभतीर्थे ।
मज्जन्ति स्म च भक्त्या सुर-नर-किन्नर-निशाचराः सर्वे ॥ २

पूजहिं माधव पद जलजाता । परसि अखय बटु हरषहिं गाता ।।
भरद्वाज आश्रम अति पावन । परम रम्य मुनिबर मन भावन ।।

वेणीमाधवपूजाक्षयवटसंस्पर्शरोमहर्षाङ्गाः ।
यान्ति स्म भावयुक्ताः मुनिवर-पुण्याश्रमं ततः सर्वे ।। ३

तहाँ होइ मुनि रिषय समाजा । जाहिं जे मज्जन तीरथराजा ।।
मज्जहिं प्रात समेत उछाहा । कहहिं परसपर हरि गुन गाहा ।।

गच्छन्ति स्म च भक्ता ये ये तीर्थं प्रयागमतिपुण्यम् ।
कुर्वन्ति स्म च ते ते मुनिवर-दर्शनमवश्यमतिभक्त्या ।। ४

कृत्वा प्रातःकाले शुभमज्जनमाश्रमं मुनेः पुण्यम् ।
गच्छन्ति स्म ततस्ते हरिगुण-गाथा-मिथःकथा-निरताः ।। ५

ब्रह्म निरूपन धरम बिधि बरनहिं तत्त्व बिभाग ।
कहहिं भगति भगवंत कै संजुत ग्यान बिराग ।।

ब्रह्मचिन्तनं धर्मनिर्णयं, तत्त्वबोध-विधि-विमर्शणम् ।
भक्ति-विरक्ति-ज्ञान-विचारं, कुर्वन्ति स्म च मुनिसार्धम् ।। ६

एहि प्रकार भरि माघ नहाहीं । पुनि सब निज निज आश्रम जाहीं ।
प्रति संबत अति होइ अनंदा । मकर मज्जि गवनहिं मुनिबृंदा ।।

प्रतिवर्षं शुभतीर्थे माघं मुनयः सदा नयन्ति स्म ।
प्रतियान्ति स्म विशुद्धाः स्वाश्रममेते मुदान्विता भूयः ।। ७

एक बार भरि मकर नहाए । सब मुनीस आश्रमन्ह सिधाए ।।
जागबलिक मुनि परम बिबेकी । भरद्वाज राखे पद टेकी ।।

अथैकदा तु ययाचे संप्रेष्यान्यान् मुनीन् भरद्वाजः ।
याज्ञवल्क्य-मुनिराजं स्थातुं कतिचिद्दिनानि स्वावासे ।। ८

सादर चरन सरोज पखारे । अति पुनीत आसन बैठारे ।।
करि पूजा मुनि सुजसु बखानी । बोले अति पुनीत मृदु बानी ।।

प्रक्षाल्य चरण-युग्मं तथोपवेश्यासने शुभे चैनम् ।
मृदु-मधुर-गिरा वाक्यं जगाद तं तद्यशःस्तवनपूर्वम् ।। ९

नाथ एक संसउ बड़ मोरें । करगत बेदतत्त्व सबु तोरें ।।
कहत सो मोहि लागत भय लाजा । जौं न कहउँ बड़ होइ अकाजा ।।

गोप्तुं मनसि न युक्ता शङ्कैत्रं वीतभीतिलज्जोऽहम् ।
करतलगत-वेदार्थं नाथ त्वामर्थये निरासार्थम् ।। १०

संत कहहिं असि नीति प्रभु श्रुति पुरान मुनि गाव ।
होइ न बिमल बिबेक उर गुर सन किएँ दुराव ।।

गुरोः सकाशं चित्त-गोपनं, परिबोध-प्रतिबन्धोऽयम् ।
सन्तो वेदाः पुराणभेदाः, बुधास्तथा कथयन्त्येवम् ।। ११

अस बिचारि प्रगटउँ निज मोहू । हरहु नाथ करि जन पर छोहू ।।

तदहं मानसमोहं, पुरतः प्रकटीकरोमि ते भगवन् ।
किङ्कर-करुणा-सिन्धो, नाशय मे संशयं च निःशेषम् ।। १२

राम नाम कर अमित प्रभावा । संत पुरान उपनिषद गावा ।।
संतत जपत संभु अबिनासी । सिव भगवान ग्यान गुन रासी ।।

वेदोपनिषत्-शास्त्र-पुराणैः सह रामनाम-महिमानम् ।
गुणराशिः शशिमौली स्तुत्वा नित्यं करोति नामजपम् ।। १३

आकर चारि जीव जग अहहीं । कासीं मरत परम पद लहहीं ।।

चतुराकरजीवा ये काशीपुर-मरण-भागधेय-युताः ।
भवबन्धन-भय-मुक्ताः परमपदं यान्ति नामजपपूताः ।। १४

सोपि राम महिमा मुनिराया । सिव उपदेसु करत करि दाया ।।
रामु कवन प्रभु पूछउँ तोही । कहिअ बुझाइ कृपानिधि मोही ।।

उपदिशति च यच्छम्भुः शुभनामेदं भवार्ति-शमनार्थम् ।
कथयावितथमशेषं रामः कोऽयं तदत्र मे सदयम् ।। १५

एक राम अवधेस कुमारा । तिन्ह कर चरित बिदित संसारा ।।
नारि बिरहँ दुखु लहेउ अपारा । भयउ रोषु रन रावनु मारा ।।

दशरथतनयश्चैको नाम्ना रामेति विश्रुतो लोके ।
दारुण-दार-वियोग-क्रुद्धो यो रावणं जघान रणे ।। १६

प्रभु सोइ राम कि अपर कोउ जाहि जपत त्रिपुरारि।
सत्यधाम सर्बग्य तुम्ह कहहु बिबेकु बिचारि॥

दाशरथिः सैवासावथवान्यः कोऽपि यं शिवो भजते।
तदिदं ज्ञानविलोचन विमृश्य मे कथय सत्यधाम मुने॥ १७

जैसें मिटै मोर भ्रम भारी। कहहु सो कथा नाथ बिस्तारी॥
जागबलिक बोले मुसुकाई। तुम्हहि बिदित रघुपति प्रभुताई॥
रामभगत तुम्ह मन क्रम बानी। चतुराई तुम्हारि मैं जानी॥
चाहहु सुनै राम गुन गूढ़ा। कीन्हिहु प्रस्न मनहुँ अति मूढ़ा॥

कथय सविस्तरमेतां नाथ कथां संशयं निवारय मे।
तदुपरि सस्मितवदनो याज्ञवल्क्यमुनिवरस्तमिदमूचे॥ १८
रघुपति-महिमज्ञस्त्वं कृति-मति-भणितैश्च रामभक्तस्त्वम्।
रघुपति-गुण-जिज्ञासुश्चतुरमिदं पृच्छसीति मे विदितम्॥ १९

तात सुनहु सादर मनु लाई। कहउँ राम कै कथा सुहाई॥
महामोहु महिषेसु बिसाला। रामकथा कालिका कराला॥

सादरमिदमतिचित्रं रामचरित्रं शृणुष्व तात सुखम्।
महिषासुरमिव काली रामकथा ध्वंसते मतेर्मोहम्॥ २०

रामकथा ससि किरन समाना। संत चकोर करहिं जेहि पाना॥
ऐसेइ संसय कीन्ह भवानी। महादेव तब कहा बखानी॥

रामकथा विधुकिरणाः सज्जन-मानस-चकोर-हर्षकराः।
गौरी-संशय-हरणे कथितेयं चन्द्रमौलिनात्र पुरा॥ २१

कहउँ सो मति अनुहारि अब उमा संभु संबाद।
भयउ समय जेहि हेतु जेहि सुनु मुनि मिटिहि बिषाद॥

यदा यदर्थं संवादोऽयं, गौरीशङ्करयोर्मध्ये।
मत्यनुसारं कथये सर्वं श्रुत्वा नश्यति मोहस्ते॥ २२

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
याज्ञवल्क्य-भरद्वाज-संवादो नाम त्रयोदशस्तरङ्गः॥

तरङ्गः १४

एक बार त्रेता जुग माहीं । संभु गए कुंभज रिषि पाहीं ।।
संग सती जगजननि भवानी । पूजे रिषि अखिलेस्वर जानी ।।

त्रेतायामुपयातौ कुम्भजमुनिमथ सतीहरौ पूर्वम् ।
सकल-चराचर-पितरौ सुपूजितौ मुनिवरेण नतशीर्षम् ।। १

रामकथा मुनिबर्ज बखानी । सुनी महेस परम सुखु मानी ।।
रिषि पूछी हरिभगति सुहाई । कही संभु अधिकारी पाई ।।

श्रुत्वा मुनिवरवदनाद्रामचरित्रं शिवः सुसंहृष्टः ।
सत्पात्राय च तस्मै हरिभजनमसौ जगाद परिपृष्टः ।। २

कहत सुनत रघुपति गुन गाथा । कछु दिन तहाँ रहे गिरिनाथा ।।
मुनि सन बिदा मागि त्रिपुरारी । चले भवन सँग दच्छकुमारी ।।

रघुवर-चरितास्वादे कालमनल्पं सुखेन नीत्वा तम् ।
मुनिवरमामन्त्र्यैतौ सतीहरौ प्रस्थितौ च कैलासम् ।। ३

तेहि अवसर भंजन महिभारा । हरि रघुबंस लीन्ह अवतारा ।।
पिता बचन तजि राजु उदासी । दंडक बन बिचरत अबिनासी ।।

धरणीभारजिहीर्षुर्हरिरपि जातस्तदा रघोर्वंशे ।
त्यक्त्वा तृणमिव राज्यं पितृवचनपरश्चचार घोरवने ।। ४

हृदयँ बिचारत जात हर केहि बिधि दरसनु होइ ।
गुप्त रूप अवतरेउ प्रभु गएँ जान सबु कोइ ।।

द्रष्टव्यः कथमेषः प्रच्छन्नः श्रीहरिर्मया व्यक्तम् ।
चिन्ता-विचलित-चित्तः शंभुर्हरिदर्शनोत्सुकोऽप्येवम् ।। ५

संकर उर अति छोभु सती न जानहिं मरमु सोइ ।
तुलसी दरसन लोभु मन डरु लोचन लालची ।।

दर्शन-लोलुप-नेत्रं गोप्याविष्करणशङ्कितं शंभुम् ।
द्वैधीभावाकुलितं कान्तापि न तं क्षमा तदा वेत्तुम् ।। ६

रावन मरन मनुज कर जाचा । प्रभु बिधि बचनु कीन्ह चह साचा ।।

'मानव-कर-मरणं मे' विधिर्ददौ रावणाय वरमेवम् ।
संपूरयितुमथैनं मानवरूपं दधार परमेशः ।। ७

जौं नहिं जाऊँ रहइ पछितावा । करत बिचारु न बनत बनावा ।।

'पश्येयं यदि चैनं स्फुटति रहस्यं तदत्र निःशङ्कम् ।
नोचेदनुतप्स्येहं' संदिग्धं शंभुमानसं चैवम् ।। ८

एहि बिधि भए सोचबस ईसा । तेही समय जाइ दससीसा ।।
लीन्ह नीच मारीचहि संगा । भयउ तुरत सोइ कपटकुरंगा ।।

चिन्तयतैवं मनसा दशवदनः शंभुना तदा दृष्टः ।
कपट-कुरङ्गम-रूपो मारीचश्चापि तेन सह दृष्टः ।। ९

करि छलु मूढ़ हरी बैदेही । प्रभु प्रभाउ तस बिदित न तेही ।।

अविदितहरिमहिमासौ हरेरजानन् रहस्यरूपं तत् ।
सकपटमथ मूढोऽयं जनकसुतामपजहार लङ्केशः ।। १०

मृग बधि बंधु सहित हरि आए । आश्रमु देखि नयन जल छाए ।।

हत्वा कपटकुरङ्गं रघुपतिरपि सानुजं निवृत्यासौ ।
दृष्ट्वाश्रममतिशून्यं बाष्प-परिप्लुत-विलोचनस्तस्थौ ।। ११

बिरह बिकल नर इव रघुराई । खोजत बिपिन फिरत दोउ भाई ।।
कबहूँ जोग बियोग न जाकें । देखा प्रगट बिरह दुखु ताकें ।।

योगवियोगविमुक्तः परमेशश्चापि सानुजो विपिने ।
विचरन्नर इव विकलः सीतान्वेषणपरस्तदा ददृशे ।। १२

अति बिचित्र रघुपति चरित जानहिं परम सुजान ।
जे मतिमंद बिमोह बस हृदयँ धरहिं कछु आन ।।

अत्यद्भुतमतिचित्रं रघुकुलनायकचरित्रमतिगूढम् ।
विदितं विज्ञजनानां मन्दधियस्त्वत्र मोहिता नियतम् ।। १३

संभु समय तेहि रामहि देखा। उपजा हियँ अति हरषु बिसेषा ॥
भरि लोचन छबिसिंधु निहारी। कुसमय जानि न कीन्हि चिन्हारी ॥

दृष्ट्वा रघुकुलनाथं प्रमुदितचित्तस्तदा स गणनाथः।
लावण्याकरदर्शनतृप्तो व्यक्तं न तं समायातः ॥ १४

जय सच्चिदानंद जग पावन। अस कहि चलेउ मनोज नसावन ॥
चले जात सिव सती समेता। पुनि पुनि पुलकत कृपानिकेता ॥

जय जय त्रिभुवनपावक जय जय हे राम सच्चिदानन्द।
स्तुन्वन्नेवं हृष्टः सती-समेतं जगाम शशिमौली ॥ १५

सतीं सो दसा संभु कै देखी। उर उपजा संदेहु बिसेषी ॥
संकरु जगतबंद्य जगदीसा। सुर नर मुनि सब नावत सीसा ॥

सुरनरवन्दित-चरणं त्रिलोकनाथं शिवं जगद्वन्द्यम्।
हर्षोत्तेजितचित्तं दृष्ट्वा शङ्कितमतिः सती नूनम् ॥ १६

तिन्ह नृपसुतहि कीन्ह परनामा। कहि सच्चिदानंद परधामा ॥
भए मगन छबि तासु बिलोकी। अजहुँ प्रीति उर रहति न रोकी ॥

सच्चित्परमानन्देत्येवं स्तुत्वा गिरा नरेन्द्रसुतम्।
अपनयति न कथमीशस्तस्मादद्यापि वीक्षितं मुग्धम् ॥ १७

ब्रह्म जो ब्यापक बिरज अज अकल अनीह अभेद ॥
सो कि देह धरि होइ नर जाहि न जानत बेद ॥

अजमकलमनीहं व्यापकं ब्रह्म नित्यम्
विगतरज इतीदं कीर्तितं भेदहीनम्।
मनुज-तनु-धरं किं ब्रह्म तद्रामरूपम्
न च विदितमथैतद्गूढरूपं श्रुतीनाम् ॥ १८

बिष्नु जो सुर हित नरतनु धारी। सोउ सर्बग्य जथा त्रिपुरारी ॥
खोजइ सो कि अग्य इव नारी। ग्यानधाम श्रीपति असुरारी ॥

हर इव सर्वज्ञोऽयं विष्णुः सुरकारणान्नरो भूतः।
प्राकृतजनवद्विपिने भार्यान्वेषणपरो भ्रमत्येषः ॥ १९

संभुगिरा पुनि मृषा न होई । सिव सर्बग्य जान सबु कोई ।।
अस संसय मन भयउ अपारा । होइ न हृदयँ प्रबोध प्रचारा ।।

विदितसकलभूतार्थो न वदति मिथ्या तथापि शंभुरथम् ।
संदेहाकुलितैवं दक्षसुता न क्षमा विनिश्चेतुम् ।। २०

जद्यपि प्रगट न कहेउ भवानी । हर अंतरजामी सब जानी ।।
सुनहि सती तव नारि सुभाऊ । संसय अस न धरिअ उर काऊ ।।

अगदितमपि विदितं तन्मानसवैकल्पनं तदा शंभोः ।
स्त्रीसहजापि न कार्या भार्ये शङ्का त्वयेति तामूचे ।। २१

जासु कथा कुंभज रिषि गाई । भगति जासु मैं मुनिहि सुनाई ।।
सोइ मम इष्टदेव रघुबीरा । सेवत जाहि सदा मुनि धीरा ।।

यज्जयगाथा गीता कुम्भजमुनिना मयापि यन्निरतिः ।
सोऽयं रघुकुलनाथः सेवन्ते यत्पदे सदा धीराः ।। २२

मुनि धीर जोगी सिद्ध संतत बिमल मन जेहि ध्यावहीं ।
कहि नेति निगम पुरान आगम जासु कीरति गावहीं ।।
सोइ रामु ब्यापक ब्रह्म भुवन निकाय पति माया धनी ।
अवतरेउ अपने भगत हित निजतंत्र नित रघुकुलमनी ।।

मुनीन्द्र-धीर-योगवीर-सिद्धसेवितः सदा
पुराणभेदशास्त्रवेदवर्णितो हि नेति यः ।
जगत्प्रभुश्च यो विभुश्चरत्यसौ हि मायया
स्वतन्त्रधीरपीश्वरः स्वभक्तकार्यतत्परः ।। २३

लाग न उर उपदेसु जदपि कहेउ सिवँ बार बहु ।
बोले बिहसि महेसु हरिमाया बलु जानि जियँ ।।

श्रुत्वोपदेशं बहुवारमेवं प्रत्यायिता नैव तु दक्षकन्या ।
मायाप्रभावं प्रभुरप्यथैनं मत्वा सतीं सस्मितमेवमूचे ।। २४

जौं तुम्हरें मन अति संदेहू । तौं किन जाइ परीछा लेहू ।।
तब लगि बैठ अहउँ बटछाहीं । जब लगि तुम्ह ऐहहु मोहि पाहीं ।।

यदि न निरस्ता शङ्का परीक्षसे किं स्वयं न रघुनाथम् ।
तावद्वटतरुमूले निवर्तनं ते प्रिये प्रतीक्षेऽहम् ।। २५

जैसें जाइ मोह भ्रम भारी। करेहु सो जतनु बिबेक बिचारी॥

जाते मोहनिरासे नष्टे मतिसंभ्रमे परीक्षान्ते।
ज्ञानोद्दीपितचित्ता प्रत्यागच्छ स्वयं ममोपान्ते॥ २६

चलीं सती सिव आयसु पाई। करहिं बिचारु करौं का भाई॥

श्रुत्वेदं शिववचनं प्रययौ रघुवरपरीक्षणार्थं सा।
कर्तव्यं कथमेवं विचिन्तयन्ती सती तदा मनसा॥ २७

इहाँ संभु अस मन अनुमाना। दच्छसुता कहुँ नहिं कल्याना॥
मोरेहु कहें न संसय जाहीं। बिधि बिपरित भलाई नाहीं॥

दृष्ट्वा गच्छन्तीं तां साहसिकोपक्रमोत्सुकां भार्याम्।
गणनाथः शशिमौली विचिन्तयामास मानसे चैवम्॥ २८
हर्तुं संशयमस्याः भूत्वा नाथोऽपि यन्न शक्तोऽहम्।
बलवद्विधिलिखितं तन्मन्ये नास्याः कुतोऽपि कल्याणम्॥ २९

होइहि सोइ जो राम रचि राखा। को करि तर्क बढ़ावै साखा॥
अस कहि लगे जपन हरिनामा। गई सती जहँ प्रभु सुखधामा॥
पुनि पुनि हृदयँ बिचारु करि धरि सीता कर रूप।
आगें होइ चलि पंथ तेहिं जेहिं आवत नरभूप॥

रघुपतिवाञ्छितमेतन्न भवति मिथ्या वृथा हि चिन्तेयम्।
इति रघुपतिशुभनाम्नः शंभुस्तत्रोपचक्रमे जापम्॥ ३०
धृतजनकसुतारूपा भूयो भूयो विचार्य दक्षसुता।
यत्रासौ सुखधाम श्रीरामस्तत्र सा तदा याता॥ ३१

लछिमन दीख उमाकृत बेषा चकित भए भ्रम हृदयँ बिसेषा॥

कपटमिदं ज्ञात्वासौ रामावरजोऽपि विस्मयापन्नः।
भ्रान्तेयं शिवभार्येत्येवं मनसा व्यचिन्तयद् धीरः॥ ३२

कहि न सकत कछु अति गंभीरा। प्रभु प्रभाउ जानत मतिधीरा॥

प्रकृतिगभीरः सोऽयं सौमित्रिर्नैव किञ्चिदूचे ताम्।
बभजे मौनं धीरः सम्यग् विज्ञाय राममहिमानम्॥ ३३

सती कपटु जानेउ सुरस्वामी । सबदरसी सब अंतरजामी ।।
सुमिरत जाहि मिटइ अग्याना । सोइ सरबग्य रामु भगवाना ।।

सर्वमनोगतविज्ञः सर्वज्ञोऽज्ञानहारको रामः ।
बुबुधे विबुधस्वामी मायावेषं प्रजेशकन्यायाः ।। ३४

सती कीन्ह चह तहँहुँ दुराऊ । देखहु नारि सुभाव प्रभाऊ ।।

मायाव्यवहारोऽयं मायातीतस्य यत्पुरः सत्याः ।
तदिदं नारीचरितं निसर्गवक्रं सदा न संदेहः ।। ३५

निज माया बलु हृदयँ बखानी । बोले बिहसि रामु मृदु बानी ।।
जोरि पानि प्रभु कीन्ह प्रनामू । पिता समेत लीन्ह निज नामू ।।
कहेउ बहोरि कहाँ बृषकेतू । बिपिन अकेलि फिरहु केहि हेतू ।।

निजमायाबलविज्ञो विहस्य किञ्चित्ततः स रघुनाथः ।
बद्धाञ्जलिरिदमूचे मधुरगिरा दक्षकन्यकामेवम् ।। ३६

दशरथपुत्रो रामो वन्देऽहं वद स कुत्र वृषकेतुः ।
कथय च कथमतिघोरं विपिनमथैकाकिनी प्रविष्टा त्वम् ।। ३७

राम बचन मृदु गूढ़ सुनि उपजा अति संकोचु ।।
सती सभीत महेस पहिं चलीं हृदयँ बड़ सोचु ।।

वचनमिदं मृदुगूढं श्रुत्वा रामस्य लज्जिता भीता ।
शोकार्ता शिवभार्या स्वनाथमेतुं ततः प्रतस्थे सा ।। ३८

मैं संकर कर कहा न माना । निज अग्यानु राम पर आना ।।
जाइ उतरु अब देहउँ काहा । उर उपजा अति दारुन दाहा ।।

अवगणितं हरवचनं प्रदर्शिता मूढता प्रभोः पुरतः ।
कथनीयं कथमेतन्नाथायैवं सती व्यथा-क्रान्ता ।। ३९

जाना राम सतीं दुखु पावा । निज प्रभाउ कछु प्रगटि जनावा ।।

व्यथितं दक्षसुतायाश्चित्तं ज्ञात्वा प्रभुः प्रभावलवम् ।
सुरनरकिन्नरनाथः श्रीरामस्तामियेष दर्शयितुम् ।। ४०

सतीं दीख कौतुकु मग जाता । आगें रामु सहित श्री भ्राता ।।

गच्छन्ती च पथैषा दक्षसुता कौतुकं ददर्श तदा ।
पुरतः पुनरपि रामं सलक्ष्मणं सा व्यलोकयद्भीता ।। ४१

फिरि चितवा पाछें प्रभु देखा । सहित बंधु सिय सुंदर बेषा ।।

परिवर्तितवदनेयं पुनरपि पृष्ठे ददर्श रघुनाथम् ।
सौमित्रिं च सुवेषां चारुमुखीं जनकनन्दिनीं चैषा ।। ४२

जहँ चितवहिं तहँ प्रभु आसीना । सेवहिं सिद्ध मुनीस प्रबीना ।।

यत्रैवैषा नेत्रे विससर्ज सती ददर्श तत्रैषा ।
मुनिवरवन्दितचरणं रघुनाथं सिद्धसेवितं च सदा ।। ४३

देखे सिव बिधि बिष्नु अनेका । अमित प्रभाउ एक तें एका ।।
बंदत चरन करत प्रभु सेवा । बिबिध बेष देखे सब देवा ।।

ब्रह्मा-विष्णु-महेश-त्रितयपुरःसरसुरान् ददर्शैषा ।
विविध-सुवेष-विभूषित-सुरमण्डल-सेवितं च रघुनाथम् ।। ४४

सती बिधात्री इंदिरा देखीं अमित अनूप ।
जेहिं जेहिं बेष अजादि सुर तेहि तेहि तन अनुरूप ।।

प्रभावपूर्णान् विधिहरिशर्वान्, ददर्श देवी सुरान् यथा ।
तथा विधात्रीं सुचारुगात्रीं, सुलक्ष्मलक्ष्मीं सतीं शुभाम् ।। ४५

देखे जहँ तहँ रघुपति जेते । सक्तिन्ह सहित सकल सुर तेते ।।
जीव चराचर जो संसारा । देखे सकल अनेक प्रकारा ।।

सुरवररूपाणि च सा रघुवररूपैः सहैव दृष्टवती ।
सकलचराचरलोकं बहुविधरूपं तथा ददर्श सती ।। ४६

पूजहिं प्रभुहि देव बहु बेषा । राम रूप दूसर नहिं देखा ।।
अवलोके रघुपति बहुतेरे । सीता सहित न बेष घनेरे ।।

नानारूपैर्वेषैः सुरसंघास्तेऽभजन्त रघुनाथम् ।
रघुवररूपं त्वासीत्सीतासहितं तदेव सर्वत्र ।। ४७

सोइ रघुबर सोइ लछिमनु सीता। देखि सती अति भईं सभीता॥

रघुनाथः सैवासौ सौमित्रिः सैव सा तथा सीता।
अत्युद्भुतमिदमेषा दृष्ट्वा दाक्षायणी भयाक्रान्ता॥ ४८

हृदय कंप तन सुधि कछु नाहीं। नयन मूदि बैठीं मग माहीं॥

सोत्कम्पं तद्हृदयं लुप्तं तनुवेदनं च तन्वङ्ग्याः।
निमिमील च नयने सा सभयं भूम्यामुपाविशत्सहसा॥ ४९

बहुरि बिलोकेउ नयन उघारी। कछु न दीख तहँ दच्छकुमारी॥
पुनि पुनि नाइ राम पद सीसा। चलीं तहाँ जहँ रहे गिरीसा॥

भूयोऽन्मीलितनेत्रा ददर्श दाक्षायणी न किञ्चिदपि।
नत्वा रघुवरचरणं भूयो भूयः शिवं समायाता॥ ५०

गईं समीप महेस तब हँसि पूछी कुसलात।
लीन्हि परीछा कवन बिधि कहहु सत्य सब बात॥

याता यदा पतिसकाशमथेयमार्या
पप्रच्छ तां कुशल-पूर्वमिदं महेशः।
रामः स केन विधिना हि परीक्षितस्तत्
कान्ते सविस्तरमिदं वद मां यथार्थम्॥ ५१

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुबादे
श्रीरामलीलाद्भुतसती-मोहन-वर्णनं नाम दशमस्तरङ्गः।

तरङ्गः १५

सतीं समुझि रघुबीर प्रभाऊ। भय बस सिव सन कीन्ह दुराऊ ॥
कथयितुमथ भूतार्थं न समर्था सा सती स्वनाथाय।
रघुवरमहिमज्ञैषा निजगादेदं मृषावचो भीत्या ॥ १

कछु न परीछा लीन्हि गोसाईं। कीन्ह प्रनामु तुम्हारिहि नाईं ॥
जो तुम्ह कहा सो मृषा न होई। मोरें मन प्रतीति अति सोई ॥
भवदर्चितरघुपादौ नत्वैवाहं निरस्तसंदेहा।
अपरीक्ष्यैव परेशं प्रत्यावृत्ता न ते वचो मिथ्या ॥ २

तब संकर देखेउ धरि ध्याना। सतीं जो कीन्ह चरित सबु जाना ॥
बहुरि राममायहि सिरु नावा। प्रेरि सतिहि जेहिं झूँठ कहावा ॥
कृत्वा ध्यानं शंभुः स्वयं विदित्वा समस्तभूतार्थम्।
प्रणनाम रघोर्मायां सतीमतिर्मोहिता यया चैवम् ॥ ३

हरि इच्छा भावी बलवाना। हृदयँ बिचारत संभु सुजाना ॥
सतीं कीन्ह सीता कर बेषा। सिव उर भयउ बिषाद बिसेषा ॥
मेने मनसि च शंभुर्बलीयसी केवलं हरेरिच्छा।
तच्चित्तं तु सखेदं सीतारूपां सतीं तदा स्मृत्वा ॥ ४

जौं अब करउँ सती सन प्रीती। मिटइ भगति पथु होइ अनीती ॥
धृतपरभार्यारूपां कान्तां मे स्वीकरोमि कथमधुना ॥
भक्ति नीत्वा विलय प्रवर्धयेऽहं कथं दुराचारम् ॥ ५

परम पुनीत न जाइ तजि किएँ प्रेम बड़ पापु।
प्रगटि न कहत महेसु कछु हृदयँ अधिक संतापु ॥
हित्वा धर्मकलत्रं पापं स्वीकृत्य चापि पापमहो।
वक्तुमिदं न समर्थो व्यक्तं ऽ ऽशंकरो व्यथाक्रान्तः ॥ ६

तब संकर प्रभु पद सिरु नावा। सुमिरत रामु हृदयँ अस आवा ॥
एहिं तन सतिहि भेट मोहि नाहीं। सिव संकल्पु कीन्ह मन माहीं ॥
नत्वा रघुवरचरणौ स्मृत्वा तद्दैवतं तदा मेने।
नास्मिन् जन्मनि सङ्गः सतीसमेतं कदापि नियतं मे ॥ ७

अस बिचारि संकरु मतिधीरा । चले भवन सुमिरत रघुबीरा ॥
चलत गगन भै गिरा सुहाई । जय महेस भलि भगति दृढ़ाई ॥

चिन्तयतीदं मनसा प्रचलति शंभौ पथा रघुं स्मृत्वा ।
आकाशादश्रूयत दिव्योक्तिः शिवजयाभि ानपरा ॥ ८

अस पन तुम्ह बिनु करइ को आना । रामभगत समरथ भगवाना ॥

रघुपदभक्तिरियं ते भगवन्निःसंशयं नितान्ततमा ।
संकल्पं दृढमेवं त्वत्तोऽन्यः कः करोति लोके वा ॥ ९

सुनि नभगिरा सती उर सोचा । पूछा सिवहि समेत सकोचा ॥
कीन्ह कवन पन कहहु कृपाला । सत्यधाम प्रभु दीनदयाला ॥
जदपि सती पूछा बहु भाँती । तदपि न कहेउ त्रिपुर आराती ॥

श्रुत्वाकाशगिरं तां पप्रच्छ सती शिवं भयापन्ना ।
"किमिदं कथय रहस्यं, कः संकल्पस्त्वया कृतो नाथ ॥" १०
बहुविधमनया पृष्टोऽप्येवं सत्या स सत्यधाम तदा ।
दीनदयाघनशंभुर्नोचे किञ्चिच्चचाल चैव पथा ॥ ११

सतीं हृदयँ अनुमान किय सबु जानेउ सर्बग्य ।
कीन्ह कपटु मैं संभु सन नारि सहज जड़ अग्य ॥

'सर्वज्ञोऽयं नियतं जानीते कपटवृत्तमखिलं मे ।'
अनुमायैवं देवी स्त्रीमतिमान्द्यं निनिन्द निजहृदये ॥ १२

जलु पय सरिस बिकाइ देखहु प्रीति कि रीति भलि ।
बिलग होइ रसु जाइ कपट खटाई परत पुनि ॥

जायापतिसमभावः क्षीरोदकवद्विराजते सुरसः ।
कपटाम्लं तु समस्तं विनाविलम्बं विभेदयत्येनम् ॥ १३

हृदयँ सोचु समुझत निज करनी । चिंता अमित जाइ नहिं बरनी ॥
कृपासिंधु सिव परम अगाधा । प्रगट न कहेउ मोर अपराधा ॥

'परमदयानिधिरेषः कथयति नाथो न मे महद्दोषम् ।'
विज्ञायैवं हृदये शुशोच देवी कृतापराधा सा ॥ १४

संकर रुख अवलोकि भवानी । प्रभु मोहि तजेउ हृदयँ अकुलानी ।।
निज अघ समुझि न कछु कहि जाई । तपइ अवाँ इव उर अधिकाई ।।

पतिवदनं दृष्ट्वा सा प्रत्यादिष्टाममन्यतात्मानम् ।
ज्ञात्वालघुं स्वदोषं हृदयेऽदह्यत भृशं यथाऽपाकः ।। १५

सतिहि ससोच जानि बृषकेतू । कहीं कथा सुंदर सुख हेतू ।।
बरनत पंथ बिबिध इतिहासा । बिस्वनाथ पहुँचे कैलासा ।।

शोकाकुलितं चित्तं सत्याः संतोषयन् तदा मार्गे ।
इतिहासकथास्तास्ताः कथयन् प्राप्तः शिवोऽपि कैलासम् ।। १६

तहँ पुनि संभु समुझि पन आपन । बैठे बट तर करि कमलासन ।।
संकर सहज सरूपु सम्हारा । लागि समाधि अखंड अपारा ।।

कृतसंकल्पः शंभुर्बद्ध्वा पद्मासनं तु वटनिकटम् ।
लीनः स्वात्मनि चैवं तस्थौ निरवधिसमाधिलग्नोऽयम् ।। १७

सती बसहिं कैलास तब अधिक सोचु मन माहिं ।
मरमु न कोऊ जान कछु जुग सम दिवस सिराहिं ।।

कैलासवासिनी सा सुविशेषशुचा व्यदह्यतैव सती ।
अनयद्युगमिव दिवसं हृन्मर्माति न कोऽपि जानाति ।। १८

नित नव सोचु सती उर भारा । कब जैहउँ दुख सागर पारा ।।

" परिवहति हि हृदयाब्धिर्नित्यनवीनव्यथोर्मिमालाभिः ।
शोकमहार्णवपारं दैवहताऽहं कदा नु यास्यामि ।। १९

मैं जो कीन्ह रघुपति अपमाना । पुनि पति बचनु मृषा करि जाना ।।
सो फलु मोहि बिधाताँ दीन्हा । जो कछु उचित रहा सोइ कीन्हा ।।

अवधीरितो मया यद्रघुपतिमहिमाप्रतीत्य पतिवचनम् ।
मत्कर्मणः फलं तद् मन्ये विधिना यथोचितं दत्तम् ।। २०

अब बिधि अस बूझिअ नहिं तोही । संकर बिमुख जिआवसि मोही ।।
कहि न जाइ कछु हृदय गलानी । मन महुँ रामहि सुमिर सयानी ।।

पराङ्मुखे सति नाथे पञ्चत्वं किं न मां विधे नयसि । "
इत्यन्यशरणहीना रघुपतिचरणं गता सती शरणम् ।। २१

जौं प्रभु दीनदयालु कहावा । आरति हरन बेद जसु गावा ॥
तौ मैं बिनय करउँ कर जोरी । छूटउ बेगि देह यह मोरी ॥

बद्धाञ्जलिरिदमूचे, "दयाब्धिरिति संस्तुवन्ति वेदास्त्वाम् ।
तन्मां तनुपाशेभ्यो दीनदयालो विमोचयाशु विभो ॥ २२

जौं मोरें सिव चरन सनेहू । मन क्रम बचन सत्य ब्रतु एहू ॥
तौ सबदरसी सुनिअ प्रभु करउ सो बेगि उपाइ ।
होइ मरनु जेहिं बिनहिं श्रम दुसह बिपत्ति बिहाइ ॥

शंकर-चरण-रतिर्मे भगवन् यदि निश्चला भवेदेषा ।
आचरितं व्रतमेतद् यदि कृतिमतिभाषितैर्मया भक्त्या ॥ २३
तदियं विज्ञप्तिर्मे हतजीवितमिदमहं विनायासम् ।
त्यक्त्वा दुःखविमुक्ता यथा भवेयम् तथानुतिष्ठ त्वम्" ॥ २४

एहि बिधि दुखित प्रजेसकुमारी । अकथनीय दारुन दुखु भारी ॥
बीतें संबत सहस सतासी । तजी समाधि संभु अबिनासी ॥

विललापैवं विपुलं दारुणदुःखाकुला सती यदि सा ।
सप्ताशीतिसहस्रं शरदां शंभुस्तदा समाधिस्थः ॥ २५

राम नाम सिव सुमिरन लागे । जानेउ सतीं जगतपति जागे ॥
जाइ संभु पद बंदनु कीन्हा । सनमुख संकर आसनु दीन्हा ॥
लगे कहन हरिकथा रसाला । ... ...

श्रीरामनामजापे याते श्रवणं ततः सती बुद्ध्वा ।
मुक्तसमाधिं शंभुं गत्वा पादौ ननाम नतशीर्षा ॥ २६
दृष्ट्वा तां शशिमौली संमुखमेवासनं ददौ तस्यै ।
कथयितुमारेभेऽसौ रुचिररसा हरिकथाश्च रामायै ॥ २७

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
सती-परित्याग-वर्णनं नाम पञ्चदशस्तरङ्गः ।

तरङ्गः १६

... ... दच्छ प्रजेस भए तेहि काला ।।
देखा बिधि बिचारि सब लायक । दच्छहि कीन्ह प्रजापति नायक ।।

सर्वसमर्थं मत्वा योग्यं गुणिनं प्रजापतिं दक्षम् ।
सर्वप्रजापतीनामीशं ब्रह्मा स्वयं चकारैनम् ।। १

बड़ अधिकार दच्छ जब पावा । अति अभिमानु हृदयँ तब आवा ।।
नहिं कोउ अस जनमा जग माहीं । प्रभुता पाइ जाहि मद नाहीं ।।

अधिरुह्य स्वामित्वं मेने स्वात्मानमेष बहु दक्षः ।
प्राप्ते पदाधिकारे संसारेऽस्मिन्न कस्य मद-बाधा ।। २

—दच्छ लिए मुनि बोलि सब करन लगे बड़ जाग ।
नेवते सादर सकल सुर जे पावत मख भाग ।।

आहूय मुनीनेषः प्रजापतीशः समारभत यज्ञम् ।
आमन्त्रयत्स देवान् भजन्ति यागेषु ये हविर्भागान् ।। ३

किंनर नाग सिद्ध गंधर्बा । बधुन्ह समेत चले सुर सर्बा ।।
बिष्नु बिरंचि महेसु बिहाई । चले सकल सुर जान बनाई ।।

किन्नर-सुर-गंधर्वाः सिद्धगणाः सकलनागवृन्दोऽपि ।
विधि-शिव-विष्णु-विवर्जं भार्या-सहिताः प्रतस्थिरे यानैः ।। ४

सतीं बिलोके ब्योम बिमाना । जात चले सुंदर बिधि नाना ।।
सुर सुंदरी करहिं कल गाना । सुनत श्रवन छूटहिं मुनि ध्याना ।।

विविध-मनोहर-यानान्यपश्यदेषा सती यदाकाशे ।
सुर-सुन्दरी-सुगीतं येभ्योऽश्रूयत यतीन्द्रचित्तहरम् ।। ५

पूछेउ तब सिवँ कहेउ बखानी । पिता जग्य सुनि कछु हरषानी ।।

पप्रच्छैवं शंभुं कुतूहलाकारिता सती कान्तम् ।
"सुरवर-संघाः सर्वे कुत्रैते नाथ यान्ति कथयेदम् ।।" ६

दच्छ न कछु पूछी कुसलाता । सतिहि बिलोकि जरे सब गाता ।।
सतीं जाइ देखेउ तब जागा । कतहुँ न दीख संभु कर भागा ।।

क्रोधोद्दीपित-गात्रः पितापि पप्रच्छ नैव कुशलं ताम् ।
ददर्श न हि दुःखार्ता भर्तुर्भागं च याग-संभारे ।। २०

तब चित चढ़ेउ जो संकर कहेऊ । प्रभु अपमानु समुझि उर दहेऊ ।।

पतिवचनार्थं सम्यग् जग्राह तदा सती स्वयं मनसा ।
पति-परिभूतिमसह्यां बुद्ध्वा जज्ज्वाल दुःख-संतप्ता ।। २१

पाछिल दुखु न हृदयँ अस ब्यापा । जस यह भयउ महा परितापा ।।

भर्तुः परिभव-दुःखात् तथानुतप्ता सती ददाह हृदा ।
प्रत्यादेश-क्लेशो यथा कदर्थीकृतस्तदा तस्याः ।। २२

जद्यपि जग दारुन दुख नाना । सब तें कठिन जाति अवमाना ।।

दुःखानि सन्ति बहुशो नानाविध-दारुणानि यदि विश्वे ।
स्वजनावधीरणं तत् सुदुःसहं सर्वथा, न संदेहः ।। २३

समुझि सो सतिहि भयउ अति क्रोधा । बहु बिधि जननीं कीन्ह प्रबोधा ।

तं मान-भङ्गं प्रियभर्तुरेषा सोढुं सती नैव तदा समर्था ।
मात्रानुनीतापि पुनः पुनः सा क्रोधं नियन्तुं हृदये न शक्ता ।। २४

सिब अपमानु न जाइ सहि हृदयँ न होइ प्रबोध ।
सकल सभहि हठि हटकि तब बोलीं बचन सक्रोध ।।

सेहे निकारं नहि भर्तुरेषा न चापि जग्राह वचः स्वमातुः ।
गत्वा सभायां प्रसभं भवानी सक्रोधमेतद् वचनं जगर्ज ।। २५

सुनहु सभासद सकल मुनिंदा । कही सुनी जिन्ह संकर निंदा ।
सो फलु तुरत लहब सब काहूँ । भली भाँति पछिताब पिताहूँ ।।

श्रुतो वा कृतो वा भवस्योपलम्भो भवद्भिः, शृणुध्वं मुनीन्द्रा वचो मे ।
द्रुतं कर्मणस्तत्फलं भुङ्क्त यूयं पिताप्येष मे भोक्ष्यते कर्मदण्डम् ।। २६

संत संभु श्रीपति अपबादा । सुनिअ जहाँ तहँ असि मरजादा ॥
काटिअ तासु जीभ जो बसाई । श्रवन मूदि न त चलिअ पराई ॥

हरि-हर-सदुपालम्भे याते श्रवणं सत्वं न गतिरन्या ।
निन्दक-जिह्वा-च्छेदः कर्णावावृत्य वा बहिर्गमनम् ॥ २७

जगदातमा महेसु पुरारी । जगत जनक सब के हितकारी ॥
पिता मंदमति निंदत तेही । दच्छ सुक्र संभव यह देही ॥

सर्वेषां हितकर्ता जगदात्मा शंकरः पिता जगतः ।
निन्दति मन्दमतिस्तं पिता यदंशात् तनुर्ममोद्भूता ॥ २८

तजिहउँ तुरत देह तेहि हेतू । उर धरि चंद्रमौलि बृषकेतू ॥
अस कहि जोग अगिनि तनु जारा । भयउ सकल मख हाहाकारा ॥

त्यक्ष्ये तनुं ततस्तां धृत्वा शशिशेखरं स्वहृदयेऽहम् ।
इति दग्धा योगाग्नौ वदत्सु हाहेति सा सती मुनिषु ॥ २९

सती मरनु सुनि संभु गन लगे करन मख खीस ।
जग्य बिधंस बिलोकि भृगु रच्छा कीन्हि मुनीस ॥

श्रुत्वा सतीं विदग्धां मखविध्वंसनपराः शिवानुचराः ।
दृष्ट्वा यज्ञ-विनाशं ररक्ष भृगुरपि मुनीश्वरान् सर्वान् ॥ ३०

समाचार सब संकर पाए । बीरभद्रु करि कोप पठाए ॥

श्रुत-भार्या-वृत्तान्तः स्वकिङ्करं शंकरस्तदा क्रुद्धः ।
प्रतिकारार्थं सद्यो विसर्जयामास वीरभद्राख्यम् ॥ ३१

जग्य बिधंस जाइ तिन्ह कीन्हा । सकल सुरन्ह बिधिवत फलु दीन्हा ॥

अचिरादेव सुवीरः स वीरभद्रोऽध्वरे विध्वंसे ।
विध्यनुसारं सर्वान् सुरवर-संघांश्च दण्डयांश्चक्रे ॥ ३२

भै जगबिदित दच्छ गति सोई । जसि कछु संभु बिमुख कै होई ॥

भूत्वा वैरी शंभोरप्राज्ञो यां गतिं नरो भजते ।
सर्वजगद्विदितां तां प्रजापतीशोऽपि दुर्गतिं भेजे ॥ ३३

यह इतिहास सकल जग जानी । ताते मैं संछेप बखानी ।।

दक्षाध्वर-विध्वंसः सर्वेषामपि च सुष्ठु विज्ञातः ।
संक्षेपेण मयैकं कथितो दिङ्मात्रदर्शनोद्देशात् ।। ३४

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
सतीदहनं नाम षोडशस्तरङ्गः ।।

तरङ्गः १७

सतीं मरत हरि सन बरु मागा । जनम जनम सिव पद अनुरागा ।।

"शिव-पद-कमल-रतिर्मे जन्मनि जन्मनि च हे हरे भवतु ।"
देह-विसर्जन-पूर्वं ववार शिववल्लभा वरं चैवम् ।। १

तेहि कारन हिमगिरि गृह जाई । जनमीं पारबती तनु पाई ।।

भस्मीभूते देहे भवजाया हिमवतो जगाम गृहम् ।
श्रीपति-कृपया चैषा सती तदा पार्वती-तनुं लब्ध्वा ।। २

जब तें उमा सैल गृह जाईं । सकल सिद्धि संपति तहँ छाईं ।।
जहँ तहँ मुनिन्ह सुआश्रम कीन्हे । उचित बास हिम भूधर दीन्हे ।।

हिमनग-भवने चास्यां जातायामेव जन्मभूमिः सा ।
मुनिवर-सुनिलय-वलया बभूव विभवादिभिः सुसंपन्ना ।। ३

सदा सुमन फल सहित सब द्रुम नव नाना जाति ।
प्रगटीं सुंदर सैल पर मनि आकर बहु भाँति ।।

हिमनग-परिसर-रूढा नाना-नव-जाति-पादपाश्च सदा ।
पुष्प-फलागम-नम्राः प्रकटित-रत्नाकरा तदा च धरा ।। ४

सरिता सब पुनित जलु बहहीं । खग मृग मधुप सुखी सब रहहीं ।।
सहज बयरु सब जीवन्ह त्यागा । गिरि पर सकल करहिं अनुरागा ।।

सरितः शुचि-सलिलौघाः खग-मृग-मधुकर-कुलाश्च सानन्दाः ।
त्यक्त-निसर्गज-वैराः सत्त्वाश्च हि भूधरेऽनुरागधराः ।। ५

सोह सैल गिरिजा गृह आएँ । जिमि जनु रामभगति के पाएँ ॥
नित नूतन मंगल गृह तासू । ब्रह्मादिक गावहिं जसु जासू ॥

रघु-पद-भक्त्या भवतस्तथा दुहित्रा रराज गिरिराजः ।
सुरवर-गीत-सुकीर्तिर्नित्यं नूतन-शुभोत्सवे व्यग्रः ॥ ६

नारद समाचार सब पाए । कौतुकहीं गिरि गेह सिधाए ॥
सैलराज बड़ आदर कीन्हा । पद पखारि बर आसनु दीन्हा ॥

श्रुत्वा गिरिवर-वृत्तं सुरर्षिरपि तं जगाम जिज्ञासुः ।
प्रक्षाल्य च पद-कमले दत्त्वासनमादृतश्च हिमगिरिणा ॥ ७

नारि सहित मुनि पद सिरु नावा । चरन सलिल सबु भवनु सिचावा ॥

शैलेशः सह-पत्न्या ननाम नारद-पदे तदा दृष्टः ।
सिसिञ्च गृहमपि भक्त्या मुनिवर-पद-तीर्थ-वारिणा सर्वम् ॥ ८

निज सौभाग्य बहुत गिरि बरना । सुता बोलि मेली मुनि चरना ॥

नारद-दर्शन-भाग्यं बहुविधमद्रिश्च वर्णयांश्चक्रे ।
नारदपादौ चायं दुहितरमाहूय नामयांश्चक्रे ॥ ९

त्रिकालग्य सर्बग्य तुम्ह गति सर्बत्र तुम्हारि ॥
कहहु सुता के दोष गुन मुनिबर हृदयँ बिचारि ॥

"मुनिवर सर्वज्ञस्त्वं सर्वगतिः सर्वकालविज्ञस्त्वम् ।
निध्याय ततः स्वहृदा वद मे गुण-दोष-लक्षणान्यस्याः ॥" १०

कह मुनि बिहसि गूढ़ मृदु बानी । सुता तुम्हारि सकल गुन खानी ॥

गिरिवरपृष्ठश्चैवं विहस्य किंचित्सुरर्षिरप्यूचे ।
मृदु-गंभीर-गिरा तं सकल-गुणायतन-कन्यका-विषये ॥ ११

सुंदर सहज सुसील सयानी । नाम उमा अंबिका भवानी ॥

शीलवती ते कन्या रूपमती मतिमती, भविष्यति सा ।
उमा-भवानीत्येवं तथाम्बिकेत्याख्यया सुविख्याता ॥ १२

सब लच्छन संपन्न कुमारी । होइहि संतत पियहि पिआरी ।।
सदा अचल एहि कर अहिवाता । एहि तें जसु पैहहिं पितु माता ।।

सकल-सुलक्षण-युक्ता भर्तुरियं बहुमताद्रिराज, सुता ।
जननी-जनक-यशोदा चिरसौभाग्योपभोगिनी च तथा ।। १३

होइहि पूज्य सकल जग माहीं । एहि सेवत कछु दुर्लभ नाहीं ।।
एहि कर नामु सुमिरि संसारा । त्रिय चढ़िहहिं पतिब्रत असिधारा ।।

त्रिभुवन-वन्दित-पादा पद-सेवक-सर्वकामदा चैषा ।
असिधारा-दुःसाध्य-पतिव्रत-शक्ति-प्रदा कुलस्त्रीणाम् ।। १४

सैल सुलच्छन सुता तुम्हारी । सुनहु जे अब अवगुन दुइ चारी ।।

शुभ-गुण-संपन्नायास्तथापि द्वि-त्रीणि लक्षणान्यस्याः ।
विपरीतानि च वीक्षे वक्ष्ये शृणु सावधानमद्रिपते ।। १५

अगुन अमान मातु पितु हीना । उदासीन सब संसय छीना ।।
जोगी जटिल अकाम मन नगन अमंगल बेष ।
अस स्वामी एहि कहँ मिलिहि परि हस्त असि रेख ।।

गुण-संमान-विहीनो निरस्त-लज्जस्तथा च निःसङ्गः ।
जननी-जनक-विहीनो नग्नो योगी जटाधरोऽरूपः ।। १६

निर्गतकामोऽमङ्गलवेषश्चास्याः पतिः सुकन्यायाः ।
निर्दिशति च निःशङ्कं कर-तल-रेखाद्रिराज दुहितुस्ते ।। १७

सुनि मुनि गिरा सत्य जियँ जानी । दुख दंपतिहि उमा हरषानी ।।

'नेदं नारदवचनं कदाप्यसत्यं भविष्यती'त्येवम् ।
ज्ञात्वानन्दितचित्ता कन्या, पितरौ तु चिन्तया ग्रस्तौ ।। १८

नारदहूँ यह भेदु न जाना । दसा एक समुझब बिलगाना ।।
सकल सखीं गिरिजा गिरि मैना । पुलक सरीर भरे जल नैना ।।
होइ न मृषा देवरिषि भाषा । उमा सो बचनु हृदयँ धरि राखा ।।

सजल-विलोचनमेवं वदनं, गात्रं तथा सरोमाञ्चम् ।
भ्रान्तं मुनिवरचित्तं तदा त्रयाणां विलोक्य समरूपम् ।। १९

वाञ्छित-वर-लाभार्थं मुनिवर-वदनान्निशम्य वरमेवम् ।
सानन्दा गिरितनया निदधे हृदये रहस्यमतिकान्तम् ॥ २०

उपजेउ सिव पद कमल सनेहू । मिलन कठिन मन भा संदेहू ॥

शंकर-चरण-सरोजे जातरतिर्गिरिवरात्मजा प्रीता ।
शिवसङ्गो न हि सुकरो मत्वा त्वेषा तदाकुलित-चित्ता ॥ २१

जानि कुअवसरु प्रीति दुराई । सखी उछँग बैठी पुनि जाई ॥

मत्वा युक्तं कालं स्वप्रीति-प्रकटनाय गिरिवरजा ।
निषसाद तु सुप्रीता प्रियसख्याः कौतुकादथोत्सङ्गे ॥ २२

झूठि न होइ देवरिषि बानी । सोचहिं दंपति सखीं सयानी ॥

अवितथमिदमथ वचनं नारद-वदनात् प्रनिःसृतं चैवम् ।
मत्वा गिरिजावर्जं गिरिजायागिरिवरादयो भीताः ॥ २३

उर धरि धीर कहइ गिरिराऊ । कहहु नाथ का करिअ उपाऊ ॥

अस्थाय धैर्यं हृदये गिरीशस्तदा मुनीद्रं कथमप्युवाच ।
त्वमेव नाथ प्रणताय मह्यं निवेदयास्मिन्नुचितं विधानम् ॥ २४

कह मुनीस हिमवंत सुनु जो बिधि लिखा लिलार ।
देव दनुज नर नाग मुनि कोउ न मेटनिहार ।

श्रुत्वा वचस्तद् वदनाद् हिमाद्रेः प्रत्यब्रवीद्देवमुनिस्तमेवम् ।
सुरासुराणां मुनिमानवानां प्रमार्ष्टि कोऽप्यत्र न भाललेखम् ॥ २५

तदपि एक मैं कहउँ उपाई । होइ करै जौं दैउ सहाई ॥

शक्योपचारं तु च कृच्छ्रमेतद् शैलाधिराजात्र न संशयो मे ।
उपायमेकं कथयामि, सिध्येत् दैवं यदि त्वामनुकूलमद्रे ॥ २६

जस बरु मैं बरनेउँ तुम्ह पाहीं । मिलिहि उमहि तस संसय नाहीं ॥
जे जे बर के दोष बखाने । ते सब सिव पहिं मैं अनुमाने ॥

प्राप्स्यत्यवश्यं वरमीदृशं ते कन्या यथावर्णितमेव चाद्रे ।
दोषास्तु ये चात्र निवेदितास्ते संभूय शंभौ निवसन्ति सर्वे ॥ २७

जौं बिबाहु संकर सन होई । दोषउ गुन सम कह सबु कोई ॥

वरिता यदि कन्या ते शशिशेखरमद्रिराज, भद्रकरम् ।
शंकर-सङ्गात् सर्वे दधते दोषाश्च सद्गुणाकारम् ॥ २८

जौं अहि सेज सयन हरि करहीं । बुध कछु तिन्ह कर दोषु न धरहीं ॥
भानु कृसानु सर्ब रस खाहीं । तिन्ह कहँ मंद कहत कोउ नाहीं ॥
सुभ अरु असुभ सलिल सब बहई । सुरसरि कोउ अपुनीत न कहई ॥
समरथ कहुँ नहिं दोषु गोसाई । रबि पावक सुरसरि की नाई ॥

विषधरशयनं विष्णुं सूर्याग्नी सर्वभक्षकौ च तथा ।
निन्दन्ति न मतिमन्तः समल-बिमल-जलवतीं च सुरसरितम् ॥ २९

हरिरग्निः सवितासौ सुरसरिदपि सर्व एव सुसमर्थाः ।
न हि दोषास्पदमेते हिमवन् दोषः कुतः समर्थानाम् ॥ ३०

जौं अस हिसिषा करहिं नर जड़ विबेक अभिमान ।
परहिं कलप भरि नरक महुँ जीव कि ईस समान ॥

स्पर्धन्ते यदि मोहान्महात्मभिः सार्धमत्र जडजीवाः ।
नरकं यान्ति न शङ्का क्व समर्थाः सुरवराः क्व चापि नराः ॥ ३१

सुरसरि जल कृत बारुनि जाना । कबहुँ न संत करहिं तेहि पाना ॥
सुरसरि मिले सो पावन जैसें । ईस अनीसहि अंतरु तैसें ॥

गङ्गाम्बुमिश्रापि यथा सुरा वा न सेव्यते सद्भिरशुद्धरूपा ।
गङ्गार्पिता सैव तु तीर्थरूपा शिवस्य जीवस्य च सैव भेदः ॥ ३२

संभु सहज समरथ भगवाना । एहि बिबाहँ सब बिधि कल्याना ॥

शंभुः सहजसमर्थः सुरवरविषये न संशयः कार्यः ।
कान्तो यदि कन्यायाः कल्याणायैव कल्पते भूयः ॥ ३३

दुराराध्य पै अहहिं महेसू । आसुतोष पुनि किएँ कलेसू ॥
जौं तपु करै कुमारि तुम्हारी । भाविउ मेटि सकहिं त्रिपुरारी ॥

न हि सुलभः शशिशेखर-कृपा-प्रसादस्तु पर्वताधिपते ।
दुःसाध्य-तपःक्लेशैराराध्यस्त्वेष चाशुतोषोऽद्रे ॥ ३४

कुरुते यदि कन्या ते कठिन-तपः-साधना शिवप्राप्त्यै ।
परिवर्तयति समग्रं ललाट-लिखितं स एव कन्यायाः ॥ ३५

जद्यपि बर अनेक जग माहीं । एहि कहँ सिव तजि दूसर नाहीं ॥

परिणेतारो बहवः संसारेऽस्मिन् वसन्ति शैलपते ।
परिणेता शिववर्जं त्वदात्मजार्हो न कोऽपि संसारे ॥ ३६

बर दायक प्रनतारति भंजन । कृपासिंधु सेवक मन रंजन ॥
इच्छित फल बिनु सिव अवराधें । लहिअ न कोटि जोग जप साधें ॥

शंभुः करुणा-सिन्धुः प्रणतार्तिरिपुर्वरप्रदाताऽयम् ।
शिव-पद-राधन-वर्जं साधनमिष्टार्थसिद्धये न परम् ॥ ३७

अस कहि नारद सुमिरि हरि गिरिजहि दीन्हि असीस ।
होइहि यह कल्यान अब संसय तजहु गिरीस ॥
कहि अस ब्रह्मभवन मुनि गयऊ । आगिल चरित सुनहु जस भयऊ ॥

उक्त्वा तथा गिरिवरं मुनिपुङ्गवोऽसौ ।
स्मृत्वा हरिं व्यतर दाशिरथाद्रिजायै ॥
भद्रं सदाद्रिवर ते विसृजात्मशङ्काम् ।
आश्वास्य चाद्रिमिति देवपुरं प्रतस्थे ॥ ३८

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
सती-पुनर्जन्म-वर्णनं नाम सप्तदशस्तरङ्गः ।

तरङ्गः १८

पतिहि एकांत पाइ कह मैना । नाथ न मैं समुझे मुनि बैना ।।
जौं घरु बरु कलु होइ अनूपा । करिअ बिबाहु सुता अनुरूपा ।।

तदा शैलजाया रहस्यद्रिराजं न जानन्त्यभिप्रायमुक्त्या: सुरर्षेः ।
उवाचाय दृष्ट्वानुरूपं कुलीनं वरं मे प्रदेया सुकन्या त्वयेयम् ।। १

न त कन्या बरु रहउ कुआरी । कंत उमा मम प्रानपिआरी ।।
जौं न मिलिहि बरु गिरिजहि जोगू । गिरि जड़ सहज कहिहि सबु लोगू ।

नो चेत् सुता भवतु चामरणं कुमारी ।
प्राणप्रिया यदि ममास्ति सुचारुगात्री ।।
कन्या वरं यदि न मे लभतेऽनुरूपम् ।
जाड्यं गिरेरिति जनैरपभाष्यसे त्वम् ।। २

सोइ बिचारि पति करेहु बिबाहू । जेहिं न बहोरि होइ उर दाहू ।।
अस कहि परी चरन धरि सीसा । बोले सहित सनेह गिरीसा ।।
बरु पावक प्रगटै ससि माहीं । नारद बचनु अन्यथा नाहीं ।।

इत्थं विचिन्त्य कुरु नाथ यथोचितं तत् ।
नो चेत् सुता-परिणयो हृदयार्तिमूलम् ।।
उक्त्वाऽद्रिनाथमिति सादृढमद्रिजाया ।
पत्युः पपात पदयोरसहायिनीव ।। ३

उत्थाप्य चैनामचलाधिराजः सस्नेहमूचे वचनं स्वजायाम् ।
शीतांशुरप्यग्निमिह प्रसूते नैवानृतं देवमुनिः स वक्ति ।। ४

प्रिया सोचु परिहरहु सबु सुमिरहु श्रीभगवान ।
पारबतिहि निरमयउ जेहिं सोइ करिहि कल्यान ।।

कान्ते न चिन्तां कुरु कामपि त्वं स्मृत्वा हरिं विस्मर दुःखभारम् ।
यः श्रीहरिस्तामुदपादि भूम्यां कल्याणकृत् सैव हि ते सुतायाः ।। ५

अब जौं तुम्हहि सुता पर नेहू । तौ अस जाइ सिखावनु देहू ।।
करै सो तपु जेहिं मिलहिं महेसू । आन उपायँ न मिटहि कलेसू ।।

स्नेहः सुतायां यदि निर्भरस्ते प्रबोधयैनामधुनैव कान्ते ।
तपो महत् तत् चरितुं शिवार्थं विपन्निरासो न हि चान्यथार्ये ।। ६

नारद बचन सगर्भ सहेतू । सुंदर सब गुन निधि बृषकेतू ।।
अस बिचारि तुम्ह तजहु असंका । सबहि भाँति संकरु अकलंका ।।

जानीहि सम्यक् स्वयमन्तरे त्वं वाक्यं सुरर्षेश्च सुहेतुगर्भम् ।
'कलङ्कहीनश्च हि शंकरोऽयं' मत्वेति कान्ते भव वीतचिन्ता ।। ७

सुनि पति बचन हरषि मन माहीं । गई तुरत उठि गिरिजा पाहीं ।।
उमहि बिलोकि नयन भरे बारी । सहित सनेह गोद बैठारी ।।
बारहिं बार लेति उर लाई । गदगद कंठ न कछु कहि जाई ।।

श्रुत्वेति कान्तं वचनं स्वभर्तुर्जगाम मेना स्वसुता-समीपम् ।
विलोक्य कन्यामतिकोमलाङ्गीं तस्थे स्थिरं साश्रु-विलोचना सा ।। ८

कन्या-तपः-कल्पन-साध्वसार्ता सस्नेहमारोपयदङ्कदेशम् ।
अङ्गं समालिङ्ग्य पुनः पुनः सा शशाक वक्तुं न तु बाष्परुद्धा ।।९

जगत मातु सर्बग्य भवानी । मातु सुखद बोलीं मृदु बानी ।।

मातुः शुचं साऽप्यवगम्य सम्यक् प्रोवाच माता जगतो भवानी ।
आश्वासयन्ती सकलार्थविज्ञा स्वमातरं सूनृतवाचमेषा ।। १०

सुनहि मातु मैं दीख अस सपन सुनावउँ तोहि ।
सुंदर गौर सुबिप्रबर अस उपदेसेउ मोहि ।।

अत्यद्भुतं स्वप्नमिमं मदीयं शृणुश्व मातः कथयामि तेऽहम् ।
दृष्टो मया विप्रवरः सुगौरः स्वप्ने य एवं समुपादिशन्माम् ।। ११

करहि जाइ तपु सैलकुमारी । नारद कहा सो सत्य बिचारि ।।
मातु पितहि पुनि यह मत भावा । तपु सुखप्रद दुख दोष नसावा ।।

"सत्यं हि देवर्षिवचोऽद्रिकन्ये तपो महत् तप्तुमतोऽर्हसि त्वम् ।
पित्रोरपीदं तव संमतं तत् तपः सदा भद्रकरं सुकन्ये ।।" १२

तपबल रचइ प्रपंचु बिधाता । तपबल बिष्नु सकल जग त्राता ।।
तपबल संभु करहिं संघारा । ततबल सेषु धरइ महिभारा ।।

"सृजति विधिः संसारं त्राति हरिः संहरत्यसौ शंभुः ।
धारयति धरां शेषः सर्वमिदं तत् तपोबलाद् बाले ।। १३

तप अधार सब सृष्टि भवानी । करहि जाइ तपु अस जियँ जानी ।।

"जगदालम्बनमेकं तपः सदेदं निबोध शैलसुते ।
दृढमवगम्य हृदेदं कुरुष्व बुद्धिं तपःसमाचरणे ।।" १४

सुनत बचन बिसमित महतारी । सपन सुनायउ गिरिहि हँकारी ।।

श्रुत्वा वचः सुताया विस्मितचित्ता बभूव गिरिजाया ।
गिरिवरमाहूयेदं वृत्तं तस्मै न्यवेदयत् सर्वम् ।। १५

मातु पितहि बहुबिधि समुझाई । चलीं उमा तप हित हरषाई ।।

अयतेतां यदि पितरौ निवर्तयितुमात्मजां तपश्चरणात् ।
अश्रुत्वेव च गन्तुं प्रचक्रमे शैलजा सुसंहृष्टा ।। १६

प्रिय परिवार पिता अरु माता । भए बिकल मुख आव न बाता ।।

मातापितरावितरे शोकाकुलमानसास्तदा भूत्वा ।
वक्तुं किमपि न शक्ताः कृतसंकल्पामुमां प्रतिष्ठन्तीम् ।। १७

बेदसिरा मुनि आइ तब सबहि कहा समुझाइ ।
पारबती महिमा सुनत रहे प्रबोधहि पाइ ।।

अत्रान्तरे वेदशिरा मुनिस्तानाश्वासयामास शुचाभिभूतान् ।
जगौ जगन्मातुरसौ प्रभावं श्रुत्वा प्रबुद्धाः परितोषितास्ते ।। १८

उर धरि उमा प्रानपति चरना । जाइ बिपिन लागीं तपु करना ।।

प्राणेश्वरपदकमले निधाय हृदयेऽचलात्मजारेभे ।
विपिने दारुणकृच्छ्रं सेहे क्लेशं मुदा सुमृद्वङ्गी ।। १९

अति सुकुमार न तनु तप जोगू । पति पद सुमिरि तजेउ सबु भोगू ।।
नित नव चरन उपज अनुरागा । बिसरी देह तपहिं मनु लागा ।।

कामं न हि सुकुमारा पार्वत्यास्तनुलता तपोयोग्या ।
स्मृत्वा हृदि शिवचरणौ तत्याजैषा तु सर्वभोगसुखान् ।। २०

शिवपदकमलरतिः सा यथा भवन्नित्यनूतनानुदिनम् ।
विस्मृत-तनु-संबाधा ततस्तपस्येव सा बभूव रता ।। २१

संबत सहस मूल फल खाए । सागु खाइ सत बरष गवाँए ।।

फलमूलाशन-शीला शैलाधिप-कन्यका सहस्रसमाः ।
तदुपरि वर्षशतं सा तृणपर्णैराजिजीव गिरिवरजा । २२

कछु दिन भोजनु बारि बतासा । किए कठिन कछु दिन उपबासा ।।

अनिलाशन-जलपानं जीवन-साधनमभूत् ततस्तस्याः ।
अनशनशीला चैषा कथमपि जीवं दधार भूधरजा ।। २३

बेल पाती महि परइ सुखाई । तीनि सहस संबत सोइ खाई ।।
पुनि परिहरे सुखानेउ परना । उमहि नामु तब भयउ अपरना ।।

वर्षाणां त्रिसहस्रं स्वयंपतित-शीर्ण-बिल्व-पर्णादा ।
त्यक्त्वा तदपि ततः सा लेभेऽपर्णेति सार्थनामोमा ।। २४

देखि उमहि तप खीन सरीरा । ब्रह्मगिरा भै गगन गभीरा ।।

अवलोक्य ततश्चैनं तपःक्षपित-शैलकन्यका-कायम् ।
दिव्यामवोचदेनां गगन-गभीरां गिरं स्वयं ब्रह्मा ।। २५

भयउ मनोरथ सुफल तव सुनु गिरिराजकुमारि ।
परिहरु दुसह कलेस सब अब मिलिहहिं त्रिपुरारि ।।

"श्रृणु गिरिवरतनुजे ते सफलीभूता मनोरथाः सर्वे ।
विरम सुदारुण-देह-क्लेशेभ्यः शंकरं लभस्व वरम् ।।" २६

अस तपु काहुँ न कीन्ह भवानी । भए अनेक धीर मुनि ग्यानी ।।

"बहवः सन्ति धरायां भूधरकन्ये तपस्विनो धीराः ।
कथयामि तु भूतार्थं नभूतपूर्वं तपस्तवैवेदम् ।।" २७

अब उर धरहु ब्रह्म बर बानी । सत्य सदा संतत सुचि जानी ।।
आवै पिता बोलावन जबहीं । हठ परिहरि घर जाएहु तबहीं ।।

"ब्रह्मोक्तिर्न हि मिथ्या विद्धीदं निग्रहं त्यजस्वैनम् ।
आयास्यति जनकस्ते गृहं गमिष्यस्यनेन सह शीघ्रम् ।।" २८

मिलहिं तुम्हहि जब सप्तरिषीसा । जानेहु तब प्रमान बागीसा ।।

" सप्तर्षयो यदा ते पुरतः प्राप्स्यन्ति पर्वतेश्वरजे ।
वागीश्वरवरवाणीं धारय निर्धारपूर्वकं हृदये ।। " २९

सुनत गिरा बिधि गगन बखानी । पुलक गात गिरिजा हरषानी ।।

श्रुत्वेमां शुचि-सुखदां गगनगिरं ब्रह्मणा तदा गदिताम् ।
हर्षोत्फुल्लित-चित्ता पुलकित-काया बभूव शैलसुता ।। ३०

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
पार्वती-तपस्या-वर्णनं नाम अष्टादशस्तरङ्गः ।

तरङ्गः १९

उमा चरित सुंदर मैं गावा । सुनहु संभु कर चरित सुहावा ।।

गीतं गिरिजा-चरितं श्रुणु शिव-चरितं सुरम्य-गम्भीरम् ।
मैत्रेयीगुरुरूचे मुनिवरमेवं तदा भरद्वाजम् ।। १

जब तें सतीं जाइ तनु त्यागा । तब तें सिव मन भयउ बिरागा ।।
जपहिं सदा रघुनायक नामा । जहँ तहँ सुनहिं राम गुन ग्रामा ।।

योगानले निजतनुं व्यदहत् सती यद् ।
चित्तं बभूव विरतं तदिदं पुरारेः ।।
जापं चकार सततं प्रभुरामनाम्नः ।
शुश्राव चापि सततं रघुरामगीतम् ।। २

चिदानंद सुखधाम सिव बिगत मोह मद काम ।
बिचरहिं महि धरि हृदयँ हरि सकल लोक अभिराम ।।

सच्चित्सुखानन्दनिधानमीशो जिताभिलाषो गतमोहकामः ।
जपन् हरिं सर्वमनोभिरामम् महीतलेऽसौ विचचार धीरः ।। ३

कतहुँ मुनिन्ह उपदेसहिं ग्याना । कतहुँ राम गुन करहिं बखाना ॥
जदपि अकाम तदपि भगवाना । भगत बिरह दुख दुखित सुजाना ॥

प्रबोधयन् सिद्धगणानथैष: संकीर्तयन् रामगुणौघकीर्तिम् ।
आसीत्तु सद्भक्त-वियोगहेतोर्गताभिलाषोऽपि सुदु:खितोऽसौ ॥ ४

एहि बिधि गयउ कालु बहु बीती । नित नै होई राम पद प्रीती ॥

बहूनि यातानि दिनानि चैवं सती-वियोगे चरत: पुरारे: ।
श्रीरामपादाब्जरतिस्तु लेभे दिने दिने नूतनरूपमस्य ॥ ५

नेमु प्रेमु संकर कर देखा । अबिचल हृदयँ भगति कै रेखा ॥
प्रगटे रामु कृतग्य कृपाला । रूप सील निधि तेज बिसाला ॥

दृष्ट्वा दृढं तद्हृदयानुरागं तप:क्लमं चापि सुदारुणं तम् ।
आविर्बभूवास्य पुर: पुरारे: राम: कृपालुर्गुणरूपसिन्धु: ॥ ६

बहु प्रकार संकरहि सराहा । तुम्ह बिनु अस ब्रतु को निरबाहा ॥
बहुबिधि राम सिवहि समुझावा । पारबती कर जन्मु सुनावा ॥
अति पुनीत गिरिजा कै करनी । बिस्तर सहित कृपानिधि बरनी ॥

" कोऽन्यस्त्वयाचरितमाचरितुं समर्थ: "
स्तुत्वेति शंकरमनेकविधं स राम: ।
तस्मै तदा चरितमद्रिपते: सुताया:
सर्वं सुपावनमिदं कथयांचकार ॥ ७

अब बिनती मम सुनहु सिव जौं मो पर निज नेहु ।
जाइ बिबाहहु सैलजहि यह मोहि मागें देहु ॥

" स्नेहो यथा मयि सतीश सुनिर्भरस्ते
विज्ञापयाम्यहमिदं शृणु सावधानम् ।
पाणिं गृहाण परमेश्वर शैलजाया:
भूतेश पूरयितुमर्हसि याचनं मे ॥ " ८

कह सिव जदपि उचित अस नाहीं । नाथ बचन पुनि मेटि न जाहीं ॥

निशम्य नाथोदितमेतदीशस्तदा तमूचे वचनं विनम्रम् ।
"यद्यप्ययुक्तं प्रतिभाति मे तद् नाज्ञा गुरूणामतिवर्तनीया ॥" ९

सिर धरि आयसु करिअ तुम्हारा । परम धरमु यह नाथ हमारा ॥
मातु पिता गुर प्रभु कै बानी । बिनहिं बिचार करिअ सुभ जानी ॥

"तत्ते वचोऽहं निदधे वराङ्गे धर्मो ममैषः परमो हि नाथ ।
मातुः पितुर्वा गुरुनाथयोर्वा विना विकल्पं वचनं विधेयम् ॥" १०

तुम्ह सब भाँति परम हितकारी । अग्या सिर पर नाथ तुम्हारी ॥
प्रभु तोषेउ सुनि संकर बचना । भक्ति बिबेक धर्म जुत रचना ॥

"परम-हितकरस्त्वं दासदासोऽस्म्यहं ते
शिरसि नियतमेतद् धारयिष्ये वचस्ते ।"
सुगदितमिति धर्मप्रेमपूर्णं निशम्य
प्रमुदितमतिरीशं राघवश्चेदमूचे ॥ ११

कह प्रभु हर तुम्हार पन रहेऊ । अब उर राखेहु जो हम कहेऊ ॥
अंतरधान भए अस भाषी । संकर सोइ मूरति उर राखी ॥

"तीर्णप्रतिज्ञोऽसि हि शंकर त्वं निधेहि चित्ते वचनं मदीयम् ।"
उक्त्वेति चादर्शनमेष यातः बभूव मूर्तस्तु शिवान्तरङ्गे ॥ १२

तबहिं सप्तरिषि सिव पहिं आए । बोले प्रभु अति बचन सुहाए ॥

तदुपरि पुरारिसन्निधमीयुः सप्तर्षयो यदा सर्वे ।
सुस्वागतवचनं तान् उदाजहारात्मभूस्तदा शंभुः ॥ १३

पारबती पहिं जाइ तुम्ह प्रेम परिच्छा लेहु ।
गिरिहि प्रेरि पठएहु भवन दूरि करेहु संदेहु ॥

"गिरिवरदुहितरमेनां गत्वा सुपरीक्ष्य तन्मनोभावम् ।
छित्वा संशयमस्याः प्रेरयताद्रिं च तां गृहं नेतुम् ॥" १४

रिषिन्ह गौरि देखी तहँ कैसी । मूरतिमंत तपस्या जैसी ॥

शिवसंदेशं चैवं श्रुत्वा सप्तर्षयस्तदा जग्मुः ।
गिरिवरतनयां तूर्णं, दृष्ट्वा तां चोचिरे तपोमूर्तिम् ॥ १५

बोले मुनि सुनु सैलकुमारी । करहु कवन कारन तपु भारी ॥
केहि अवराधहु का तुम्ह चहहू । हम सन सत्य मरमु किन कहहू ॥

"शृणु शैलेश्वरकन्ये किमर्थमेतत् तपश्चरसि घोरम् ।
आराध्यते च कोऽयं, किमीप्सितं, किं रहस्यमभिधेहि ॥" १६

कहत बचन मनु अति सकुचाई । हँसिहहु सुनि हमारि जड़ताई ॥

पृष्टा मुनिभिरथैवा गिरिकन्या तानुवाच नम्रगिरा ।
'सव्रीडं मे हृदयं, जाड्यं हसिष्यथो यूयम् ॥' १७

मनु हठ परा न सुनइ सिखावा । चहत बारि पर भीति उठावा ॥
नारद कहा सत्य सोइ जाना । बिनु पंखन्ह हम चहहिं उड़ाना ॥

'निर्बन्धशीलं हृदयं ममेदं निर्मातुमिच्छामि जलेषु कुड्यम् ।
मत्वा यथार्थं वचनं सुरर्षेः पतत्रहीनोत्पतितुं समीहे ॥' १८

देखहु मुनि अबिबेकु हमारा । चाहिअ सदा सिवहि भरतारा ॥
सुनत बचन बिहसे रिषय गिरिसंभव तव देह ।
नारद कर उपदेसु सुनि कहहु बसेउ किसु गेह ॥

'विवेकशून्यं खलु मानसं मे भर्तारमिच्छामि सदैव शंभुम् ।'
श्रुत्वाद्रिकन्यावचनं तदेदं सप्तर्षयः स्मेरमुखा बभूवुः ॥ १९
तामूचिरे ते मुनयोऽद्रिकन्यां बाले यथार्थं जड-संभवा त्वम् ।
निशम्य देवर्षिवचः सुजिह्मं भद्रं न कस्यापि बभूव लोके ॥' २०

दच्छसुतन्ह उपदेसेन्हि जाई । तिन्ह फिरि भवनु न देखा आई ॥
चित्रकेतु कर घरु उन घाला । कनकसिपु कर पुनि अस हाला ॥

'श्रुत्वा नारदवचनं ददृशुर्न हि दक्षजाः पुनर्गेहम् ।
चित्रकेतुसदनं तद् हिरण्यकशिपोश्च नष्टमगकन्ये ॥' २१

नारद सिख जे सुनहिं नर नारी । अवसि होहिं तजि भवनु भिखारीं ॥

'ये नारदोपदिष्टा नरनार्यस्ते भजन्त्यकिञ्चनताम् ।
निर्वासिता भ्रमन्ति त्यक्त्वा गृह-पुत्र-दार-परिवारम् ॥' २२

मन कपटी तन सज्जन चीन्हा। आपु सरिस सबहि चह कीन्हा॥

'धृत-सज्जनवेषोऽयं धूर्तो कपटी मुनिः सदा जिह्मः।
गृहदारादिविहीनश्चिकीर्षते चात्मवत् परान् सर्वान्॥' २३

तेहि के बचन मानि बिस्वासा। तुम्ह चाहहु पति सहज उदासा॥
निर्गुन निलज कुबेष कपाली। अकुल अगेह दिगंबर ब्याली॥

'तद्वचसि त्वं गिरिजे विश्वस्येच्छसि सदाविरक्त-वरम्।
गृह-कुल-वरगुण-हीनं कपालिनं व्यालिनं कुवेषधरम्॥' २४

कहहु कवन सुखु अस बरु पाए भल भूलिहु ठग के बौराएँ॥

'लब्ध्वा दिगम्बरं तं भर्तारं किं समीहसे सौख्यम्।
धूर्त-सुरर्षि-वचोभिः प्रतारिता सर्वथासि बाले त्वम्॥' २५

पंच कहें सिवँ सती बिबाही। पुनि अवडेरि मराएन्हि ताही॥

'दक्षसुताम् उपयेमे पुरा पुरारिर्न चानुरागधरः।
परिवादोऽपि च गिरिजे स्वयं च तां घातयांचकारेति॥' २६

—अब सुख सोवत सोचु नहिं भीख मागि भव खाहिं।
सहज एकाकिन्ह के भवन कबहुँ कि नारि खटाहिं॥

'स्वपिति सुखं निःसङ्गः संप्रति भिक्षोपजीविकः शंभुः।
स्थास्यति गिरिजे नारी प्रकृति-विविक्त-प्रियस्य गेहे का॥' २७

अजहूँ मानहु कहा हमारा। हम तुम्ह कहुँ बरु नीक बिचारा॥
अति सुंदर सुचि सुखद सुसीला। गावहिं बेद जासु जस लीला॥
दूषन रहित सकल गुन रासी। श्रीपति पुर बैकुंठ निवासी॥
सत्य कहेहु गिरभक तनु एहा। हठ न छूट छूटै बरु देहा॥
कनकउ पुनि पषान तें होई। जारेहुँ सहजु न परिहर सोई॥

अद्यापि च नो वचनं कुरुष्व गिरिजे वृणुष्व वरमन्यम्।
संकल्पितस्त्वदर्थे वरः सुयोग्यः सुशील-शुचि-रूपः॥ २८

'वैकुण्ठाधिपतिं तं गीतं श्रुतिभिः श्रियः पतिं चैनम्।
निर्दोषं गुणराशिं गिरिवरजे त्वं वृणुष्व विष्णुं तम्॥' २९

श्रुत्वेदं मुनिवचनं विहस्य किञ्चित् तदाद्रिकन्या सा ।
ऊचे तान् 'ऋषयोऽहं परमार्थेनास्मि पर्वतापत्यम् ।।' ३०

'नश्यति तनुरपि चेदं निर्बन्धो मे न नश्यते नियतम् ।
विजहाति न स्वभावं यद्यपि दग्धं जडाश्मजं कनकम् ।।' ३१

नारद बचन न मैं परिहरऊँ । बसउ भवनु उजरउ नहिं डरउँ ।।
गुर कें बचन प्रतीति न जेही । सपनेहुँ सुगम न सुख सिधि तेही ।।

'वसतु गृहं वा नश्यतु न मे भयं नारदे हि मे श्रद्धा ।
स्वप्नेऽपि न सुखसिद्धिर्विश्वासो यदि न चेद् गुरोर्वचनैः ।।' ३२

महादेव अवगुन भवन बिष्नु सकल गुन धाम ।
जेहि कर मनु रम जाहि सन तेहि तेहि सन काम ।।

'कामं भवतु च विष्णुर्गुणराशिर्दुर्गुणाकरश्च हरः ।
यो यस्मिन्ननुरक्तस्तमेव कान्तं स मन्यते नान्यम् ।।' ३३

जौं तुम्ह मिलतेहुँ प्रथम मुनिसा । सुनतिउँ सिख तुम्हारि धरि सीसा ।।

'अबोधयिष्यथ यूयं विषयेऽस्मिन् जनमिमं च यदि पूर्वम् ।
अकरिष्यमहं वचनं युष्माकं मुनिवरा, न संदेहः ।।' ३४

अब मैं जन्मु संभु हित हारा । को गुन दूषन करै बिचारा ।।

'समर्पितं शिवपदयोः संप्रति मे जीवितं यदा मुनयः ।
गुणदोषाणाम् अधुना का चर्चा सर्वथा निरर्थकरा ।।' ३५

जौं तुम्हरे हठ हृदयँ बिसेषी । रहि न जाइ बिनु किएँ बरेषी ।।
तौ कौतुकिअन्ह आलसु नाहीं । बर कन्या अनेक जग माहीं ।।

'परिणयचर्चावर्जं व्यव ायो यदि न विद्यते वोऽन्यः ।
विपुलाः सन्ति धरायां वधूवरा विवदितुं निरुद्यमिनाम् ।।' ३६

जन्म कोटि लगि रगर हमारी । बरउँ संभु न त रहउँ कुआरी ।।

'विचलति निर्धारो मे, शृणुत मुनिवरा न जन्मकोटिशतम् ।
वरितास्म्यहं भवं वा कन्याभावोऽथवा वरं मेऽयम् ।।' ३७

तजउँ न नारद कर उपदेसू । आपु कहहिं सत बार महेसू ।।

‘शतशतबारं चैवं स्वयमपि यदि शंभुनोपदिष्टाऽहम् ।
नारद-वचन-निबद्धं कथमपि नैवोत्सृजामि विश्वासम् ।।’ ३८

मैं पा दरऊँ कहइ जगदंबा । तुम्ह गृह गवनहु भयउ बिलंबा ।।

‘अवसन्नेयं वेला किमिति चिरयथात्र मुनिवरा यूयम् ।
साञ्जलिरधुना याचे, संप्रति सर्वे गृहं निवर्तध्वम् ।।’ ३९

देखि प्रेमु बोले मुनि ग्यानी । जय जय जगदंबिके भवानी ।।

दृष्ट्वाऽकृतकं भावं मनसस्तस्यास्तदावदन् मुनयः ।
‘जय जय जय जगदम्बे भवानि जय जय नमोऽस्तु मातस्ते ।।’ ४०

—तुम्ह माया भगवान सिव सकल जगत पितु मातु ।
नाइ चरन सिर मुनि चले पुनि पुनि हरषत गातु ।।

‘शंभुरसौ जगदीशस्त्वं माया चाम्बिके जगत्पितरौ ।’
स्तुत्वैवं प्रणिपतिताः, पुनः पुनः पुलकिता ययुर्मुनयः ।। ४१

जाइ मुनिन्ह हिमवंतु पठाए । करि बिनती गिरजहिं गृह ल्याए ।।

संप्रेषयामासुरथाद्रिराजं तपाद्रिकन्यां प्रति ते मुनीन्द्राः ।
स चापि संप्रार्थ्य सुतां स्वकीयामुपानिनायात्मगृहं गिरीशः ।। ४२

बहुरि सप्तरिषि सिव पहिं जाई । कथा उमा कै सकल सुनाई ।।
भए मगन सिव सुनत सनेहा । हरषि सप्तरिषि गवने गेहा ।।

गत्वा पुनस्ते मुनयो महेशं निवेदयामासुरुमाचरित्रम् ।
हृष्टः शिवः शैलसुतानुरागात् सप्तर्षयश्चेयुरथात्मगेहम् ।। ४३

मनु थिर करि तब संभु सुजाना । लगे करन रघुनायक ध्याना ।।

विवेकशीलस्तु महेश्वरोऽसौ पुनः समाधावभवद् विलीनः ।
स्मरन् हृदा दैवतमात्मसंस्थं दध्यौ रघोर्नायकमेव रामम् ।। ४४

इति तुलसी-मानस-नलिने राम-चरित-मानस-भावानुवादे
पार्वतीपरीक्षा नाम एकोनविंशस्तरङ्गः ।

तरङ्गः २०

तारकु असुर भयउ तेहि काला । भुज प्रताप बल तेज बिसाला ।।
तेहिं सब लोक लोकपति जीते । भए देव सुख संपति रीते ।।

अथासुरस्तारकसंज्ञकोऽपि स्वबाहुवीर्यौजवशात् प्रमत्तः ।
निर्जित्य लोकानपि लोकपालान् चकार देवान् धनसौख्यहीनान् ।। १

अजर अमर सो जीति न जाई । हारे सुर करि बिबिध लराई ।।
तब बिरंचि सन जाइ पुकारे । देखे बिधि सब देव दुखारे ।।
—सब सन कहा बुझाइ बिधि दनुज निधन तब होइ ।
संभु सुक्र संभूत सुत एहि जीतइ रन सोइ ।।

जेयो न चासीदजरामरोऽसौ युद्धेषु चानेकविधेषु देवैः ।
पराजिताश्चासुरपीडितास्ते ब्रह्माणमीयुः शरणं वरेण्यम् ।। २
दृष्ट्वातिदुःखाकुलमानसाँस्तान् देवान् समाश्वास्य जगाद ब्रह्मा ।
'पुत्रादथैनं शिवशुक्रजातान्नान्यः समर्थो दनुजं निहन्तुम् ।।' ३

मोर कहा सुनि करहु उपाई । होइहि ईस्वर करिहि सहाई ।।
'त्यक्त्वा शुचं मद्वचनाद् भवन्तः कूटप्रबन्धं कुरुतात्र चैकम् ।
भविष्यतीशो भवतां सहायः फलिष्यतीहा भवतां न शङ्का ।।' ४

सतीं जो तजी दच्छ मख देहा । जनमी जाइ हिमाचल गेहा ।।
तेहिं तपु कीन्ह संभु पति लागी । सिव समाधि बैठे सबु त्यागी ।।
'दक्षाध्वरे त्यक्त-तनुः सती सा लेभे जनिश्चापि हिमाद्रिगेहे ।
तेपे तपः शंकरमाप्तुमेषा शंभुर्विरक्तस्तु समाधिलग्नः ।।' ५

जदपि अहइ असमंजस भारी । तदपि बात एक सुनहु हमारी ।।
पठवहु कामु जाइ सिव पाहीं । करै छोभु संकर मन माहीं ।।
'असंमतो यद्यपि सज्जनानाम् उपायमेकं शृणुतात्र धूर्तम् ।
संप्रेषयध्वं मदनं शिवं यः संक्षोभयिष्यत्यभवस्य चित्तम् ।।' ६

तब हम जाइ सिवहि सिर नाई । करवाउब बिबाहु बरिआई ।।

'संक्षुब्धचित्तं शशिशेखरं तं तदानुसृत्येप्सित-पूरणार्थम् ।
तत्पादयुग्मं प्रणिपत्य भूयः विवाहयध्वं गिरिजामथैनम् ।।' ७

एहिं बिधि भलेहिं देवहित होई । मत अति नीक कहइ सबु कोई ।।

'श्रेयस्कारय भवतामुपायः श्रुत्वेति ब्रह्मोक्तिमतीवतुष्टाः ।
सुरास्तदोचुः सुसमाहितास्तं 'युक्तं हि चैतद्वचनं तवे'ति ।। ८

अस्तुति सुरन्ह कीन्हि अति हेतू । प्रगटेउ बिषमबान झषकेतू ।।

संप्रार्थयामासुरथामरास्ते प्रीत्या स्मरन्तः स्मरमन्तरङ्गे ।
प्रीतिस्तदा पञ्चशरोऽपि तूर्णं ददर्श चात्मानमथामराग्रे ।। ९

—सुरन्ह कही निज बिपति सब सुनि मन कीन्ह बिचार ।
संभु बिरोध न कुसल मोहि बिहसि कहेउ अस मार ।।

तदपि करब मैं काजु तुम्हारा । श्रुति कह परम धरम उपकारा ।।
पर हित लागि तजइ जो देही । संतत संत प्रसंसहिं तेही ।।

श्रुत्वा विपद्वृत्तमथामराणां चिन्ताकुलश्चित्तभवोऽपि जातः ।
ततः स कामः स्मितपूर्वमेवं सुराँस्तदोचे वचनं मनोज्ञम् ।। १०

'कल्याणकृन्मे न हि शंभुवैरं तथापि चाहं भवतां सहायः ।
आत्मार्पणं लोकहिताय नूनं स्तुतं सदा सद्भिरथागमैश्च ।।' ११

अस कहि चलेऊ सबहि सिरु नाई । सुमन धनुष कर सहित सहाई ।।
चलत मार अस हृदयँ बिचारा । सिव बिरोध ध्रुव मरनु हमारा ।।

उक्त्वेति देवान् सकलान् प्रणम्य ययौ सहायैः सह पुष्पधन्वा ।
विचिन्तयामास तु वर्त्मना यद् 'मृत्युर्ध्रुवो मे शिववैरमेतद् ।।' १२

तब आपन प्रभाउ । बिस्तारा निज बस कीन्ह सकल संसारा ।।
कोपउ जबहिं बारिचरकेतू । छन महुँ मिटे सकल श्रुति सेतू ।।

सर्वत्र-विस्तारित-वैभवोऽसौ सृष्टिं निनायात्मवशं समस्ताम् ।
यन्मीनकेतुः कृतनिश्चयोऽसौ क्षणाल्लयं गच्छति वेदसेतुः ।। १३

ब्रह्मचर्ज ब्रत संजम नाना । धीरज धरम ग्यान बिग्याना ।।

ब्रह्मचर्यं व्रतं चैवं यमः संयमनं तथा ।
धर्मो धीरस्तथा शास्त्रं ज्ञानं विज्ञानमेव च ।। १४

सदाचार जप जोग बिरागा । सभय बिबेक कटकु सबु भागा ।।

सदाचारो जपो ध्यानं विरागो योग एव च ।
सैन्यं सर्वं विवेकस्य कामभीत्या पलायितम् ।। १५

–भागेउ बिबेकु सहाय सहित सो सुभट संजुग महि मुरे ।।

सहायसहिते चैवं विवेके प्रपलायिते ।
सुभटाश्च हि तस्यासन् भयाद् रणपराङ्मुखाः ।। १६

सदग्रंथ पर्बत कंदरन्हि महुँ जाइ तेहि अवसर दुरे ।।

ग्रन्थाद्रिकन्दरेष्वेते तस्थुश्च निभृतं भयात् ।
विप्लवश्चाभवद् घोरः सर्वस्मिन् जगतीतले ।। १७

होनिहार का करतार को रखवार जग खरभरु परा ।
दुइ माथ केहि रतिनाथ जेहि कहुँ कोपि कर धनु सरु धरा ।।

'कथं जीवामहे संप्रत्यहो का भवितव्यता ।
परित्राता च कोऽस्माकम् ? ब्रूहि ब्रह्मन् ! दयानिधे ।। १८
कोऽसौ महाबली जातो द्विशिरस्को महीतले ।
रतिनाथः स्वयं क्रुद्धश्चापहस्तो हि यत्कृते ।। ' १९
एवं मन्मथ-संत्रस्त-प्रजा-कोलाहलो महान् ।
समुद्भूतस्तदा घोरः सहसा वसुधातले ।। २०

–जे सजीव जग अचर चर नारि पुरुष अस नाम ।
ते निज निज मरजाद तजि भए सकल बस काम ।।

स्त्रीपुमांसस्तदा सर्वे चराश्चाप्यचरास्तथा ।
समुल्लङ्घ्य तदा सीमाः बभूवुः कामपीडिताः ।। २१

सब के हृदयँ मदन अभिलाषा । लता निहारि नवहिं तरु साखा ।।

स्मरभावस्तदोद्भूतः सर्वेषामपि मानसे ।
दृष्ट्वा हि वीरुधश्चासन्नतशाखा द्रुमास्तदा ।। २२

नदी उमगि अंबुधि कहुँ धाई । संगम करहिं तलाव तलाईं ।।

नद्यः प्रदुद्रुवुश्चाब्धीन् सवेगं फेनगर्जिताः ।
तडागाश्च सरस्यश्च बभूवुः संगमोत्सुकाः ।। २३

जहँ असि दसा जड़न्ह कै बरनी । को कहि सकइ सचेतन करनी ।।

अवस्थैषा यदा ह्यासीज्जडानामपि भूतले ।
अजडानामवस्थां तां को हि वर्णयितुं क्षमः ।। २४

पसु पच्छी नभ जल थलचारी । भए कामबस समय बिसारी ।।

पशवः पक्षिणः सर्वे जल-स्थल-नभश्चराः ।
अकालेऽपि बभूवुस्ते सकामाः स्मरपीडिताः ।। २५

मदन अंध ब्याकुल सब लोका । निसि दिनु नहिं अवलोकहिं कोका ।।

कामान्धाश्च तदा लोका बभूवुर्व्याकुलास्तथा ।
कालसंवेदनातीताः कोकाश्चापि स्मराहताः ।। २६

देव दनुज नर किंनर ब्याला । प्रेत पिसाच भूत बेताला ।।

सुरासुरास्तथा नागा गंधर्वा नरकिन्नराः ।
भूतप्रेताः पिशाचाश्च वेतालाश्च महीतले ।। २७

इन्ह कै दसा न कहेउँ बखानी । सदा काम के चेरे जानी ।।

प्रकृत्यैव सदा सर्वे सन्त्येते स्मर-किंकराः ।
अनौचित्य-भयात् तेषां वर्णिता न मया दशा ।। २८

सिद्ध बिरक्त महामुनि जोगी । तेपि कामबस भए बियोगी ।।

सिद्धा विरक्ता मुनयो योगिनश्चापि तापसाः ।
प्रकृतिं स्वां समुत्सृज्य बभूवुः काम-मोहिताः ।। २९

– भए कामबस जोगीस तापस पावँरन्हि की को कहै ।

स्मरार्तेषु तथैतेषु तापसेष्वपि योगिषु ।
पामराणामथैतेषां दुर्बलानां हि का कथा ।। ३०

देखहिं चराचर नारिमय जे ब्रह्ममय देखत रहे ।।

दद‍ृशुश्च हि ये पूर्वं सर्वं ब्रह्ममयं जगत् ।
त एवैतेऽधुना सर्वं ददृशुः स्त्रीमयं हि तत् ।। ३१

अबला बिलोकहिं पुरुषमय जगु पुरुष सब अबलामयँ ।

नराणां हि तदा चासीत् नारीमयमिदं जगत् ।
नारीणां तु तदेवासीत् सर्वं नरमयं जगत् ।। ३२

दुइ दंड भरि ब्रह्मांड भीतर कामकृत कौतुक अय ।।

चिक्रीड मन्मथः स्वैरं मुहूर्तं जगतीतले ।
ब्रह्माण्डगोलकः सर्वं ददर्श स्मरकौतुकम् ।। ३३

–धरी न काहूँ धीर सब के मन मनसिज हरे ।
जे राखे रघुबीर ते उबरे तेहि काल महुँ ।।

शशाक न तदा कोऽपि धैर्यमास्थातुमन्तरे ।
रघुनाथरक्षितस्त्वेषु एक एव सुरक्षितः ।। ३४

उभय घरी अस कौतुक भयऊ । जौ लगि कामु संभु पहिं गयऊ ।।

यावत्प्रववृते लीला सर्वत्र घटिकाद्वयम् ।
तावत्स मदनः प्राप्तः समाधिस्थं त्रिलोचनम् ।। ३५

सिवहि बिलोकि ससंकेउ मारू । भयउ जथाथिति सबु संसारू ।।

भीतभीतो यदा कामः शिवं दृष्ट्वा तपःस्थितम् ।
प्रकृतिं पुनरायातं यथापूर्वं जगत् तदा ।। ३६

भए तुरत सब जीव सुखारे । जिमि मद उतरि गएँ मतवारे ।।

लयं याते सुरोन्मादे यथा मत्तः स्थिरो भवेत् ।
स्थिरीभूतास्तथैवैते सर्वे संसारिणस्तरा ।। ३७

रुद्रहि देखि मदन भय माना । दुराधरष दुर्गम भगवाना ।।

दुर्गमं च हि दुर्धर्षं दृष्ट्वा रुद्रं त्रिलोचनम् ।
भयार्तः स तदा कामश्चिन्ताकुलित-मानसः ।। ३८

फिरत लाज कछु करि नहिं जाई । मरनु ठानि मन रचेसि उपाई ॥

'निवृत्ते महती लज्जा प्रवृत्ते तु पराजयः ।'
उपायं चिन्तयामास मरणे कृतनिश्चयः ॥ ३९

प्रगटेसि तुरत रुचिर रितुराजा । कुसुमित नव तरु राजि बिराजा ॥

आविर्बभूव तत्काले वसन्तः सुमनोहरः ।
पुष्पभारानताः सर्वाः रेजिरे तरुराजयः ॥ ४०

बन उपबन बापिका तड़ागा । परम सुभग सब दिसा बिभागा ॥

तडागे वापिकायां च उद्याने कानने तथा ।
बभूवुः सुभगाः सर्वे विभागा रम्यदर्शनाः ॥ ४१

जहँ तहँ जनु उमगत अनुरागा । देखि मुएहुँ मन मनसिज जागा ॥

अनुरागमयं सर्वं बभूवेदं चराचरम् ।
स्मरभावस्तदोद्भूतश्चित्तेऽपि गतचेतसाम् ॥ ४२

–जागइ मनोभव मुएहुँ मन बन सुभगता न परै कही ।
सीतल सुगंध सुमंद मारुत मदन अनल सखा सही ॥

मधौ मनोहराण्यरण्य-मण्डलानि रेजिरे
दधुर्गतासवोऽप्यथात्र कामभावमन्तरे ।
सुशीतलः सुगन्धयुक्त-मन्दमारुतस्तदा
सखाऽभवत्सहायकः स्मरानलस्य सर्वथा ॥ ४३

बिकसे सरन्हि बहु कंज गुंजत पुंज मंजुल मधुकरा ।
कलहंस पिक सुक सरस रव करि गान नाचहिं अपछरा ॥

सरोवरेषु फुल्लपत्रपङ्कजानि रेजिरे
जुगुञ्जुरेषु भृङ्गपुञ्जकाः सुमञ्जु मञ्जुलम् ।
शुकाः पिका मरालकाः सुराग-गायने रताः
सुगीत-नृत्य-तत्पराः सुरालयाङ्गनास्तदा ॥ ४४

–सकल कला करि कोटि बिधि हारेउ सेन समेत ।
चली न अचल समाधि सिव कोपेउ हृदयनिकेत ॥

कृत्वा कोटिमिताः क्रीडाः सेनया सह मन्मथः ।
दृष्ट्वाऽविचलितं शंभुं बभूव क्षुब्ध-मानसः ॥ ४५

देखि रसाल बिटप बर साखा । तेहि पर चढ़ेउ मदनु मन माखा ॥
सुमन चाप निज सर संधाने । अति रिस ताकि श्रवन लगि ताने ॥

आरुह्य चूत-विटपं मदनो मन्यु-मानसः ।
संधायेबूनथाकर्णं ततान ज्यां शरासने ॥ ४६

छाड़े बिषम बिसिख उर लागे । छूटि समाधि संभु तब जागे ॥

सममेव शरान् पञ्च विससर्ज शिवोपरि ।
जाते समाधिभङ्गे च जजागर महेश्वरः ॥ ४७

भयउ ईस मन छोभु बिसेषी । नयन उघारि सकल दिसि देखी ॥

सविशेषं स संक्षुब्धो हृदि विद्धस्त्रिलोचनः ।
सर्वदिक्षु विरूपाक्षः प्राहिणोदक्षिणी तदा ॥ ४८

सौरभ पल्लव मदनु बिलोका । भयउ कोपु कंपेउ त्रैलोका ॥

पञ्चबाणं विलोक्यासौ प्रच्छन्नं चूतपल्लवैः ।
तथा चुक्रोध संहर्ता त्रैलोक्यं कम्पितं यथा ॥ ४९

तब सिवँ तीसर नयन उघारा । चितवत कामु भयउ जरि छारा ॥

यावद् ददर्श मदनं भालनेत्रेण शंकरः ।
तावदेव मनोजोऽसौ भस्मीभूतस्तदग्निना ॥ ५०

हाहाकार भयउ जग भारी । डरपे सुर भए असुर सुखारी ॥

समुद्बभूव संसारे तदा कोलाहलो महान् ।
भयार्ताश्च सुराः सर्वे प्रहृष्टा दनुजास्तु ते ॥ ५१

समुझि कामसुखु सोचहिं भोगी । भए अकंटक साधक जोगी ॥

चिन्ताक्रान्तास्तदा चासन् स्मृत्वा कामस्य भोगिनः ।
योगिनां साधकानां तु मार्गो निष्कण्टकस्तदा ॥ ५२

—जोगी अकंटक भए पति गति सुनत रति मुरुछित भई।
रोदति बदति बहु भाँति करुना करति संकर पहिं गई॥
अति प्रेम करि बिनती बिबिध बिधि जोरि कर सन्मुख रही।

श्रुत्वैनं पतिवृत्तान्तं मूर्छिता मदनप्रिया।
रुदती विलपन्ती च वदन्ती बहुधा तथा॥ ५३
याचमाना कृपां चैषा शिवसंनिहितं ययौ।
बद्धाञ्जलिर्ननामैनं भूयो भूयश्च शंकरम्॥ ५४

प्रभु आसुतोष कृपाल सिव अबला निरखि बोले सही॥

अबलां दुःखितां पश्यन्नाशुतोषो दयानिधिः।
आश्वासयन् तदा चैनाम् ऊचे वचनमीश्वरः॥ ५५

अब तें रति तव नाथ कर होइहि नामु अनंगु।
बिनु बपु ब्यापिहि सबहि पुनि सुनु निज मिलन प्रसंगु॥

'अद्यारभ्य रते यास्यत्यनङ्गाख्यां पतिस्तव।
दग्धेऽपि पार्थिवे देहे जेताऽसौ जगतः सदा॥' ५६
'समागमं च युवयोः कदा कुत्र कथं रते।
श्रावयिष्यामि ते सर्वं शृणुष्व च पतिव्रते॥' ५७

जब जदुबंस कृष्न अवतारा। होइहि हरन महा महिभारा॥

'महीभारं प्रभुर् हर्तुं श्रीकृष्णो मदनप्रिये।
यदुवंशे यदा देहं धारयिष्यति भूतले॥' ५८

कृष्न तनय होइहि पति तोरा। बचनु अन्यथा होइ न मोरा॥

'पतिस्ते तनयो भूत्वा यदुनाथस्य धीमतः।
पुनरायाति लोकेऽस्मिन् न मे वचनमनृतम्॥' ५९

रति गवनी सुनि संकर बानी। कथा अपर अब कहउँ बखानी॥

श्रुत्वेदं वचनं शंभोः स्मरभार्या निववृते।
कथयामि कथामन्यां संप्रत्यत्र सविस्तरम्॥ ६०

इति तुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
मदनदहनं नाम विंशस्तरङ्गः।

तरङ्गः २१

देवन्ह समाचार सब पाए । ब्रह्मादिक बैकुंठ सिधाए ॥

ब्रह्मादयः सुराश्चेदं श्रुत्वा वृत्तं सविस्तरम् ।
वैकुण्ठं प्रययुः सर्वे लक्ष्मीकान्त-निकेतनम् ॥ १

सब सुर बिष्नु बिरंचि समेता । गए जहाँ सिव कृपानिकेता ॥
पृथक पृथक तिन्ह कीन्हि प्रसंसा । भए प्रसन्न चंद्र अवतंसा ॥
बोले कृपासिंधु बृषकेतू । कहहु अमर आए केहि हेतू ॥

ब्रह्म-विष्णु-समेतं ते समुपागत्य शंकरम् ।
पृथक् पृथक् सुराः सर्वे तुष्टुवुस्तं दयाकरम् ॥ २
भालचन्द्रस्तदा प्रीतस्तानुवाच समुत्सुकान् ।
श्रावयध्वं सुमनसो 'किमागमनकारणम् ॥' ३

कह बिधि तुम्ह प्रभु अंतरजामी । तदपि भगति बस बिनवउँ स्वामी ॥

तच्छ्रुत्वा तमुवाचेदं ब्रह्मा वाक्यं सविस्तरम् ।
त्वं वसन् हृदये सर्वं स्वयं जानासि शंकर ॥ ४
भक्त्याऽहं तु पुनर्वाचा कथयामि मनोगतम् ।
यथा चैते समायाताः सुराः सर्वे त्वदन्तिके ॥ ५

–सकल सुरन्ह के हृदयँ अस संकर परम उछाहु ।
निज नयनन्हि देखा चहहिं नाथ तुम्हार बिबाहु ॥
यह उत्सव देखिअ भरि लोचन । सोइ कछु करहु मदन मद मोचन ॥

दिदृक्षवस्ते भगवन् विवाहं समुत्सुकान्तःकरणाः समेताः ।
सर्वे वयं संप्रति पूरयैनं मनोरथं नः स्मरगर्वहारिन् ॥ ६

कामु जारि रति कहुँ बरु दीन्हा । कृपासिंधु यह अति भल कीन्हा ॥
सासति करि पुनि करहिं पसाऊ । नाथ प्रभुन्ह कर सहज सुभाऊ ॥

दग्धः स्मरो यद् भगवन् त्वयादौ दत्तो वरो वा रतये तदूर्ध्वम् ।
सम्यक् कृतं नाथ यथा प्रभूणां क्रोधानुबन्धी नियतं प्रसादः ॥ ७

पारबतीं तपु कीन्ह अपारा । करहु तासु अब अंगीकारा ।।
सुनि बिधि बिनय समुझि प्रभु बानी । ऐसेइ होउ कहा सुखु मानी ।।
तब देवन्ह दुंदुभीं बजाईं । बरषि सुमन जय जय सुर साईं ।।

कृतं कृच्छ्रं घोरं गिरितनयया यत्तव कृते
गृहाणैनां भार्यां निजपदरतां तत्पशुपते ।
विधेरेनां श्रुत्वा विनतिमथ सस्मार सहसा
स्मरारिः सर्वं तद् रघुपतिवचः पूर्वमुदितम् ।। ८
प्रीतः पुरारिर्वचनं तदोचे तथेति संतोषकरं सुराणाम् ।
जयोऽस्तु नाथेति जगर्जुरेते सपुष्पवृष्टि पटहस्वनान्ते ।। ९

अवसरु जानि सप्तरिषि आए । तुरतहिं बिधि गिरिभवन पठाए ।।

मत्वोचितं तं समयं च सद्यः समाययुः सप्तमुनीश्वरास्तम् ।
संप्रेषयामास च शीघ्रमेनान् विरिञ्चिरप्यद्रिपतेः सकाशम् ।। १०

प्रथम गए जहँ रहीं भवानी । बोले मधुर बचन छल सानी ।।

सप्तर्षयश्चापि ततः सहर्षं पूर्वं ययुः पर्वतराजकन्याम् ।
ऊचुर्वचस्ते मधुरं मनोज्ञं शैलेन्द्रकन्यां परिहासगर्भम् ।। ११

कहा हमार न सुनेहु तब नारद कें उपदेस ।
अब भा झूठ तुम्हार पन जारेउ कामु महेस ।।

गिरिपतिसुते यन्नो वाक्यं पुरा समुपेक्षितम्
सुरमुनिवचः संमानेन त्वया न हि तद् हितम् ।
रतिपतिरसौ दग्धः संप्रत्यहो त्रिपुरारिणा
परिणयपणो मोघीभूतः स तेऽत्र न संशयः ।। १२

सुनि बोलीं मुसुकाइ भवानी । उचित कहेहु मुनिबर बिग्यानी ।।
तुम्हरें जान कामु अब जारा । अब लगि संभु रहे सबिकारा ।।

हितवदुदितं श्रुत्वा तेषामिदं गिरिकन्यका
स्मितयुतमिदं प्रत्यूचे तान् वचश्चतुराशयम् ।
"अयि मुनिवरा विज्ञा यूयं यदद्य हतं स्मरम्
गणयथ च तं कामासक्तं पुरा त्रिपुरान्तकम् ।। १३

हमरें जान सदा सिव जोगी । अज अनवद्य अकाम अभोगी ।।
जौं में सिव सेये अस जानी । प्रीति समेत कर्म मन बानी ।।

अपण्डिताहं तु सदैव शंभुं जानाम्यजं भोगविकारशून्यम् ।
मत्वानवद्यं हि च योगिनं तं सेवे सदाऽहं खलु वाङमनोभ्याम् ।। १४

तौ हमार पन सुनहु मुनीसा । करिहहिं सत्य कृपानिधि ईसा ।।
तुम्ह जो कहा हर जारेउ मारा । सोइ अति बड़ अबिबेकु तुम्हारा ।।

करिष्यते सार्थमसौ पणं मे कृपानिधानं नियतं मुनीन्द्राः ।
ददाह शंभुर्मदनं मनुध्वे विवेकशून्यं प्रतिभाति तन्मे ।। १५

तात अनल कर सहज सुभाऊ । हिम तेहि निकट जाइ नहिं काऊ ।।
गएँ समीप सो अवसि नसाई । असि मन्मथ महेस की नाई ।।

औष्ण्यं हि यत् सा प्रकृतिः कृशानोर्हिमं न गच्छेन्निकटं कदाचित् ।
गत्वा समीपं नियतं प्रणश्येत् न्यायेन तेनैव च कामनाशः ।। " १६

–हियँ हरषे मुनि बचन सुनि देखि प्रीति बिस्वास ।
चले भवानिहि नाइ सिर गए हिमाचल पास ।।

श्रुत्वा वचस्तद् गिरिराजपुत्र्याः संतोषिता सप्तमुनीश्वरास्ते ।
प्रीतिं च तां वीक्ष्य तथा महेशे प्रणम्य चोमां प्रययुर्नगेन्द्रम् ।। १७

सबु प्रसंगु गिरिपतिहि सुनावा । मदन दहन सुनि अति दुखु पावा ।।
बहुरि कहेउ रति कर बरदाना । सुनि हिमवंत बहुत सुखु माना ।।

श्रुत्वा च तेभ्यः स्मरवृत्तमद्रिः सुदुःखितान्तःकरणो बभूव ।
श्रुत्वा रतिं प्राप्तवरप्रदानां बभूव दुःखप्रशमोऽपि चास्य ।। १८

हृदयँ बिचारि संभु प्रभुताई । सादर मुनिबर लिए बोलाई ।।
सुदिनु सुनखतु सुघरी सोचाई । बेगि बेदबिधि लगन धराई ।।

विज्ञाय शंभोर्महिमानमद्रिः पुरोहितानाजुहुवेऽति भक्त्या ।
विमृश्य नक्षत्रमुहूर्तवारान् वेदानुसारं चक्लृपे विवाहम् ।। १९

पत्री सप्तरिषिन्ह सोइ दीन्ही । गहि पद बिनय हिमाचल कीन्ही ॥

सप्तर्षिवर्गाय विवाहपत्रं दत्त्वा पदेषु प्रणिपत्य भूयः ।
विज्ञापयामास च तान् मुनीन्द्रान् दातुं ततस्तद् विधयेऽपि पत्रम् ॥२०

जाइ बिधिहि तिन्ह दीन्हि सो पाती । बाचत प्रीति न हृदयँ समाती ॥

सप्तर्षयश्चापि ददुस्ततस्तद् विरिञ्चये पर्वतराजपत्रम् ।
अर्थं विधिश्चाप्यधिगम्य पत्राद् हर्षं न धर्तुं प्रबभूव चित्ते ॥ २१

लगन बाचि अज सबहि सुनाई । हरषे मुनि सब सुर समुदाई ॥

विरिञ्चिरुच्चैरनुवाच्य पत्रं तत् श्रावयामास पुरश्च शंभोः ।
श्रुत्वा सुहृष्टा मुनिदेववृन्दाः विवाहवृत्तं चिरवाञ्छितार्थम् ॥ २२

सुमन बृष्टि नभ बाजन बाजे । मंगल कलस दसहुँ दिसि साजे ॥

बभूव वृष्टिर्गगनात् सुमानां भेरी-स्वनश्चाधिरुरोह नाकम् ।
विरेजिरे सर्वदिशश्च कुम्भैः सुमङ्गलैः सुष्ठु परिष्कृतैश्च ॥ २३

लगे सँवारन सकल सुर बाहन बिबिध बिमान ।
होहिं सगुन मंगल सुभद करहिं अपछरा गान ॥

विमानयानानि च देववृन्दैर्विचित्ररूपाणि परिष्कृतानि ।
दृष्टानि सर्वत्र सुलक्षणानि प्रवर्तितं नर्तनमप्सरोभिः ॥ २४

सिवहि संभु गन करहिं सिंगारा । जटा मुकुट अहि मौरु सँवारा ॥
कुंडल कंकन पहिरे ब्याला । तन बिभूति पट केहरि छाला ॥

जटा-मुकुट-मण्डनं भुजग-भोग-संपादितम्
कृतं च करकङ्कणं श्रवण-भूषणं भोगिभिः ।
विलेपनमभूद्विभूतिरथ सिंहचर्माम्बरम्
वरस्य शुभमण्डनं शिवगणैः सुसंपादितम् ॥ २५

ससि ललाट सुंदर सिर गंगा । नयन तीनि उपवीत भुजंगा ॥
गरल कंठ उर नर सिर माला । असिव बेष सिवधाम कृपाला ॥

शशी निटिलभूषणं सुरनदी धृता मस्तके
सुपूतमुपवीतमप्युरसि कल्पितं पन्नगैः ।

गले गरलनीलिमा नरकपालमालोरसि
त्रिलोचनधरोऽशिवोऽपि शिवधाम चैवं शिवः ॥ २६

कर त्रिसूल अरु डमरु बिराजा । चले बसहँ चढ़ि बाजहिं बाजा ॥

करे डमरुरेकतः स शुशुभे त्रिशूलोऽपरे
वृषेश्वरमथाधिरुह्य च पथा प्रतस्थे शिवः ।
ननाद सुषिरादि-वाद्य-तुमुलः सभेरीस्वनम्
बभूव च महोत्सवः शिव-विवाह-यात्रा-युतः ॥ २७

देखि सिवहि सुरत्रिय मुसुकाहीं । बर लायक दुलहिनि जग नाहीं ॥

विलक्षणं वीक्ष्य वरस्य रूपं देवाङ्गनाः स्मेरमुखास्तदोचुः ।
अन्विष्यमाणापि महीतलेऽस्मिन् वरानुरूपा न वधूः सुलभ्या ॥ २८

बिष्नु बिरंचि आदि सुरब्राता । चढ़ि चढ़ि बाहन चले बराता ॥
सुर समाज सब भाँति अनूपा । नहिं बरात दूलह अनुरूपा ॥

ब्रह्मारमेशादि च देवसंघाः यानानि चारुह्य तदानुजग्मुः ।
कामं सुराः सर्वविधं प्रशस्याः वरानुरूपा न तु यात्रिणस्ते ॥ २९

बिष्नु कहा अस बिहसि तब बोलि सकल दिसिराज ।
बिलग बिलग होइ चलहु सब निज निज सहित समाज ॥
बर अनुहारि बरात न भाई । हँसी करैहहु पर पुर जाई ॥

विहस्यैवं विष्णुः स्वयमभिदधे वाक्यमितरान्
"पृथक्भूत्वा यात स्वसमुदयसार्धं सुरवराः ।
विचित्रेयं यात्रा वरसमुचिता भाति न च मे
गमिष्यामः सर्वेऽप्युपहसनमेवं परपुरे ॥" ३०

बिष्नु बचन सुनि सुर मुसुकाने । निज निज सेन सहित बिलगाने ॥

साकूतमेतद्वचनं च विष्णोराकर्ण्य देवाः कृतमन्दहासाः ।
प्रस्तावमादृत्य हरेः ससेनं यात्राविलग्नाः प्रययुस्तदूर्ध्वम् ॥ ३१

मनहीं मन महेसु मुसुकाहीं । हरि के बिंग्य बचन नहिं जाहीं ॥

श्रुत्वातिवक्रं हरिवाक्यमेतत् सिस्माय शंभुर्न च किञ्चिदूचे ।
विचिन्तयामास तु मानसेऽसौ जिह्मस्वभावः खलु विष्णुरेषः ॥ ३२

अति प्रिय बचन सुनत प्रिय केरे। भृंगिहि प्रेरि सकल गन टेरे॥

मत्वा प्रियं तत्-परिहासवाक्यं संप्रेष्य भृत्यं स गणान् महेशः।
आहूय सर्वान् सपदि स्वकीयान् नियोजयामास विवाहयात्राम्॥ ३३

सिव अनुसासन सुनि सब आए। प्रभु पद जलज सीस तिन्ह नाए॥

धृत्वा शिरोभिरथ शंभुगणास्तदाज्ञाम्
आजग्मुरीशमतिनन्दित-मानसास्ते।
नत्वा च नाथ-पद-पद्म-युगं शिरोभि-
र्यात्रानुगाः सपदि नाथमथानुजग्मुः॥ ३४

नाना बाहन नाना बेषा। बिहसे सिव समाज निज देखा॥

नानानि यानानि समाधिरूढान् विचित्ररूपाभरणाँस्तथा तान्।
आज्ञाकरान् वीक्ष्य गणान् स्वकीयान् स्वयं महेशोऽपि जहास किंचित्।

कोउ मुखहीन बिपुल मुख काहू। बिनु पद कर कोउ बहु पद बाहू॥

बहूनि केषांचिदहो मुखानि नासीदथैकं च तथापराणाम्।
केचिच्च तेषां बहुपादवन्तः यात्रानुगानामथ केऽप्यपादाः॥ ३६

बिपुल नयन कोउ नयन बिहीना। रिष्टपुष्ट कौउ अति तनखीना॥

बहूनि चासन्नयनानि केषां केषांचिदासीन्न च चक्षुरेकम्।
एके गणानामथ पीवराङ्गाः केचित्तु तेषामतिकार्शिताङ्गाः॥ ३७

—तन खीन कोउ अति पीन पावन कोउ अपावन गति धरें।
भूषन कराल कपाल कर सब सद्य सोनित तन भरें।

स्थूलाः केचित् क्षीणाः केचिद् बह्वाकाराः शंभुगणाः।
मङ्गलवेषा केचित्तेषामन्येऽमङ्गल-वेषधराः॥ ३८
कराल-भूषण-भूषित-कायाः कपालहस्तास्तथापरे।
सद्यःशोणित-लिप्त-शरीराः घोराकाराः सर्वे ते॥ ३९

खर स्वान सुअर सृकाल मुख गन वेष अगनित को गनै।
बहु जिनस प्रेत पिसाच जोगि जमात बरनत नहिं बनै॥

गर्दभ-वदनाः श्वान-मुखा वा शृगाल-शूकर-तुण्ड-धराः।
नाना-वेष-विरूपित-रूपान्नालं कश्चिद्वर्णयितुम्॥ ४०

भूताः प्रेताः बहुविधभेदाः मायायोगयुताः केचित् ।
विचित्रवेषान् जातिविभेदान्नालं वाणी वर्णयितुम् ॥ ४१

–नाचहिं गावहिं गीत परम तरंगी भूत सब ।
देखत अति बिपरीत बोलहिं बचन बिचित्र बिधि ॥
जस दूलहु तसि बनी बराता । कौतुक बिबिध होहिं मग जाता ॥

कश्चिद् गायन् कश्चिन्नृत्यन् स्वैरं विहरन्तः सर्वे ।
विचित्र-विस्वर-भाषोच्चारा विपरीता सा गणयात्रा ॥ ४२
स्वच्छन्देनागच्छन्तस्ते नानालीलाः कुर्वन्तः ।
चित्रविचित्रा शिवगणयात्रा रराज नूनं वरोचिता ॥ ४३

इति तुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
शिवविवाहयात्रा नाम एकविंशस्तरङ्गः ।

तरङ्गः २२

इहाँ हिमाचल रचेउ बिताना । अति बिचित्र नहिं जाइ बखाना ॥

शैलेशः कल्पयामास मण्डपं सुमनोहरम् ।
न हि वर्णयितुं चालं सौन्दर्यं यस्य भारती ॥ १

सैल सकल जहँ लगि जग माहीं । लघु बिसाल नहिं बरनि सिराहीं ॥
बन सागर सब नदीं तलावा । हिमगिरि सब कहुँ नेवत पठावा ॥

महान्तश्चामहान्तश्च समाहूतास्तदाद्रयः ।
समुद्राश्च तडागाश्च नद्यः सर्वा वनानि च ॥ २

कामरूप सुंदर तन धारी । सहित समाज सहित बर नारी ॥

समागताश्च ते सर्वे कामरूपाः सुदर्शनाः ।
नारीभिः सुन्दरीभिश्च सेवकैः सहितं तथा ॥ ३

गए सकल तुहिनाचल गेहा । गावहिं मंगल सहित सनेहा ।।

संप्राप्ताः सादरं सर्वे शैलराज-निकेतनम् ।
जगुः सर्वेऽपि सस्नेहं शुभगीतं मुदान्विताः ।। ४

प्रथमहिं गिरि बहु गृह सँवराए । जथाजोगु तहँ तहँ सब छाए ।।

निवासा बहवश्चासन् पूर्वमेव प्रकल्पिताः ।
तेषु तेषु तदा ते ते योग्या योग्येषु चावसन् ।। ५

पुर सोभा अवलोकि सुहाई । लागइ लघु बिरंचि निपुनाई ।।

नगेन्द्रनगरं चासीत्तथा सर्वं सुशोभितम् ।
कदर्थतां यथा यातं ब्रह्म-निर्माण-कौशलम् ।। ६

—लघु लाग बिधि की निपुनता अवलोकि पुर सोभा सही ।
बन बाग कूप तड़ाग सरिता सुभग सब सक को कही ।।

विरिञ्चिरचनापटुत्वमपि यत्-कदर्थीकृतम्
तथा हिमनगेन तत्-पटुतया पुरं मण्डितम् ।
तडागसरितस्तथा सुमनवाटिकाः दीर्घिका-
स्तथा शुशुभिरे पुरे कथयितुं न शक्यं यथा ।। ७

मंगल बिपुल तोरन पताका केतु गृह गृह सोहहीं ।
बनिता पुरुष सुंदर चतुर छबि देखि मुनि मन मोहहीं ।।
—जगदंबा जहँ अवतरी सो पुरु बरनि कि जाइ ।
रिद्धि सिद्धि संपत्ति सुख नित नूतन अधिकाइ ।।

गृहाणि सुविभूषितानि शुभतोरणैः केतुभिः
नराश्च वनितास्तथा मुनिमनोहराः सुन्दराः ।
चकार जननस्थलं स्वयमहो जगज्जन्मदा
समृद्धिसुखसंयुतं तदिदमद्रिगेहं सदा ।। ८

नगर निकट बरात सुनि आई । पुर खरभरु सोभा अधिकाई ।।

श्रुत्वा नगपुरनिकटं संप्राप्तां ताम् अपूर्ववरयात्राम् ।
प्रोत्साहिता पुरी सा रराज सविशेषमेव संभ्रान्ता ।। ९

करि बनाव सजि बाहन नाना । चले लेन सादर अगवाना ॥

सुपरिष्कृतसुखयाना नानालंकरणभूषिताः पौराः ।
हिमनगवचनात् केचित् प्रत्युज्जग्मुस्तदा वरं प्रीत्या ॥ १०

हियँ हरषे सुर सेन निहारी । हरिहि देखि अति भए सुखारी ॥

सुरवरपरिवारं तं दृष्ट्वापूर्वं पुरोगताः पौराः ।
श्रीहरिमपि सुरमध्ये सविशेषानन्दपुलकिताः जाताः ॥ ११

सिव समाज जब देखन लागे । बिडरि चले बाहन सब भागे ॥

अदृष्टपूर्वं च भयप्रदं च दृष्ट्वा तु शंभोर्गणमेलकं तम् ।
चतुष्पदाश्चाप्यवधीर्य यन्तॄन् इतस्ततो दद्रुविरे भयार्ताः ॥ १२

धरि धीरजु तहँ रहे सयाने । बालक सब लै जीव पराने ॥

केचित्तु पौराः सविशेषधीराः तस्थुः कथंचित्पुरतः पुरारेः ।
पुरोगताः प्राणभयेन सर्वे बालाः सपद्येव पलायितास्ते ॥ १३

गएँ भवन पूछहिं पितु माता । कहहिं बचन भय कंपित गाता ॥
कहिअ काह कहि जाइ न बाता । जम कर धार किधौं बरिआता ॥
बरु बौराह बसहँ असवारा । ब्याल कपाल बिभूषन छारा ॥

मातापितृभ्यां परिप्रश्नितास्ते कथंचिदूचुर्भयकम्पिताङ्गाः ।
"यद् दृष्टमस्माभिरलोकपूर्वं न तद् वयं वर्णयितुं समर्थाः ॥ १४
विवाहयात्रा नु कृतान्तसेना निर्णेतुमेतन्न वयं समर्थाः ।
भ्रान्तो वरो भाति वृषाधिरूढो व्यालैः कपालैश्च विभूषिताङ्गः ॥ १५

—तन छार ब्याल कपाल भूषन नगन जटिल भयंकरा ।
सँग भूत प्रेत पिसाच जोगिनि बिकट मुख रजनीचरा ॥

भसित-निचित-तनु-वसन-रहित-
जटिल-भुजग-नद-रुण्ड-विभूषण-भीषणः ।
विकट-वदन-दनुज-निवह-बहुविध-
भय-जनन-पिशाच-निशाचर-संगतः ॥ १६

जो जिअत रहिहि बरात देखत पुन्य बड़ तेहि कर सही ।
देखिहि सो उमा बिबाहु घर घर बात असि लरिकन्ह कही ॥

शिव-परिणय-गण-नयन-विषय-
करण-पर-मनुज-जीवनमेव च पुण्यतः ।
हिमनग-दुहितृ-परिणय-विधि-
नयन-विषय-करण-भाग्यमिहास्ति च पुण्यतः ॥" १७

—समुझि महेस समाज सब जननि जनक मुसुकाहिं ।
बाल बुझाए बिबिध बिधि निडर होहु डरु नाहिं ॥

जहसुरथ विदित-शिव-गण-चरित-
गृह-गत-गुरुजनास्तु विश्रुत्य वचस्तदा ।
भय-चकित-निज-शिशु-जन-भय-
हरण-विविध-विधि-समाश्वसनं च हि चक्रिरे ॥ १८

लै अगवान बरातहि आए । दिए सबहि जनवास सुहाए ॥

ये तु धीराः पुरोयाता व्याहर्तुं स्वागतं तदा ।
सर्वे ते यात्रया सार्धं प्रत्याववृतिरे पुरम् ॥ १९
तेषु तेषु च वासेषु सुखसज्जीकृतेषु च ।
ते ते विश्रामिताः सद्यः सादरं वरयात्रिणः ॥ २०

मैनाँ सुभ आरती सँवारी । संग सुमंगल गावहिं नारी ॥
कंचन थार सोह बर पानी । परिछन चली हरहि हरषानी ॥

मङ्गलार्तिक्यमादाय मणिकाञ्चनभाजने ।
प्रतस्थे वरसंकाशं मेना मोदसमायुता ॥ २१
सौभाग्यालंकृताः सर्वा युवत्योऽपि प्रतस्थिरे ।
गायन्त्यो मङ्गलं गानं सहर्षं सह मेनया ॥ २२

बिकट बेष रुद्रहि जब देखा । अबलन्ह उर भय भयउ बिसेषा ॥

आलोक्य विकटं वेषं विरूपाक्षस्य संमुखम् ।
साध्वसोपहताः सर्वाः भ्रान्ता भीताश्चकम्पिरे ॥ २३

भागि भवन पैठीं अति त्रासा । गए महेसु जहाँ जनवासा ॥

देशकालं तथात्मानं विस्मृत्य भयसंकुलाः ।
उपचक्रमिरे सर्वाः प्रधावितुमितस्ततः ॥ २४

यानि यानि च वेश्मानि ददृशुः संनिधं तदा ।
तानि तानि च ताः सर्वाः विविशुश्चात्मरक्षणे ॥ २५

यातास्वदर्शनं तासु मुक्तसङ्गो महेश्वरः ।
उदासीनः प्रतस्थेऽसौ स्वावासं स्थितधीस्तदा ॥ २६

मैना हृदयँ भयउ दुखु भारी । लीन्ही बोलि गिरीसकुमारी ॥
अधिक सनेहँ गोद बैठारी । स्याम सरोज नयन भरे बारी ॥

आहूय तदा कन्यामुपवेश्याङ्के सुदुःखिता मेना ।
नीलोत्पलदलनयना सबाष्पमूचे वचः सवात्सल्यम् ॥ ७२

जेहिं बिधि तुम्हहि रूपु अस दीन्हा । तेहिं जड़ बरु बाउर कस कीन्हा ॥

"रुचिरमिदं यो रूपं ददौ विधाता सुलक्षणे तुभ्यम् ।
कथय कथं मतिमूढं सैव विधाता चकार ते कान्तम् ॥ २८

–कस कीन्ह बरु बौराह बिधि जेहिं तुम्हहि सुंदरता दई ।
जो फलु चहिअ सुरतरुहिं सो बरबस बबूरहिं लागई ॥

सुरतरुसमुचितरूपं सुरसमनोज्ञं फलं सुदिव्यमिदम् ।
बर्बुरतरुणा सार्धं संयोजयितुं कथं बलात् शक्यम् ॥ २९

तुम्ह सहित गिरि तें गिरौं पावक जरौं जलनिधि महुँ परौं ।

गिरिजे गिरिवरशिखरात्प्रपातयेऽहं त्वया सहात्मानम् ।
प्रविशाम्यथवा ज्वलनं प्रक्षुब्धाब्धौ निमज्जये वाऽहम् ॥ ३०

घरु जाउ अपजसु होउ जग जीवत बिबाहु न हौं करौं ॥

नश्यतु गृहमपि सर्वं भ्रश्यतु कीर्तिः कुलस्य वास्माकम् ।
नहि नहि नहि दास्येऽहं यावज्जीवं शिवाय वत्से त्वाम् ॥" ३१

—भई बिकल अबला सकल दुखित देखि गिरिनारि ।
करि बिलापु रोदति बदति सुता सनेहु सँभारि ।।

शोचन्तीमिति मेनां दृष्ट्वा दुःखाकुलः सखीवृन्दः ।
विललाप च सा विवशा रुदती तासां पुरः सुता-स्नेहात् ।। ३२

नारद कर मैं काह बिगारा । भवनु मोर जिन्ह बसत उजारा ।।

"कथयत बत मे नूनं किमप्रियं सुरमुनेर्मयाचरितम् ।
यन्मे सुखमयगेहं प्रध्वस्तं तेन कारणेन विना ।। ३३

अस उपदेसु उमहि जिन्ह दीन्हा । बौरे बरहि लागि तपु कीन्हा ।।

ईदृग्वरलाभार्थं तप्तुं वा तत्तपस्तथा घोरम् ।
सुकुमारा मम कन्या कथमुपदिष्टा च तेन कथयध्वम् ।। ३४

साचेहुँ उन्ह कें मोह न माया । उदासीन धनु धामु न जाया ।।

नूनं सुरमुनिरेषो मायामोहादिबन्धनिर्मुक्तः ।
गृहदारापरिवारं न चास्य, विचरति यथैष निःसंगम् ।। ३५

पर घर घालक लाज न भीरा । बाँझ कि जान प्रसव कै पीरा ।।

न हि भयलेशश्चित्ते न चास्य लज्जालवोऽपि देवर्षेः ।
नाशयतः परगेहं, वन्ध्या जानाति न प्रसूतिरुजम् ।।" ३६

जननिहि बिकल बिलोकि भवानी । बोली जुत बिबेक मृदु बानी ।।

दृष्ट्वैवं विलपन्तीं बहु विकलां वत्सलां तदा जननीम् ।
सविवेकं मृदुमन्दं स्वयमूचे ताम् उमा समाश्वास्य ।। ३७

अस बिचारि सोचहि मति माता । सो न टरइ जो रचइ बिधाता ।।

"मातर् मा शुच मैवम् भवत्यवश्यं यदीहते दैवम् ।।
विद्धीदं विधिलिखितं प्रोज्झितुमेतद् बलं कुतोऽस्माकम् ।। ३८

करम लिखा जौं बाउर नाहू । तौ कत दोसु लगाइअ काहू ।।

एतादृशवरलाभो नूनं मत्पूर्वकर्मणः फलितम् ।
व्यर्था सुरमुनिनिन्दा परदोषान्वेषणेन किं कार्यम् ।। ३९

तुम्ह सन मिटहिं कि बिधि के अंका । मातु ब्यर्थ जनि लेहु कलंका ।।

धर्षयसे किं मातर् ललाटलेखं प्रमार्ष्टुमत्रैवम् ।
अविचारितकृतमेतद् जनयति ते व्यर्थमेव परिवादम् ।। ४०

–जनि लेहु मातु कलंकु करुना परिहरहु अवसर नहीं ।
दुखु सुखु जो लिखा लिलार हमरें जाब जहँ पाउब तहीं ।।

अनवसरोऽयं मातर् विषीदितुं संनिरोधयाश्रुरयम् ।
अनुबध्नाति सदेदं सुखदुःखं मत्पदं पुरादिष्टम् ।।" ४१

सुनि उमा बचन बिनीत कोमल सकल अबला सोचहीं ।
बहु भाँति बिधिहि लगाइ दूषन नयन बारि बिमोचहीं ।।

श्रुत्वेदं सुविनीतं गिरिजावचनं सुकोमलं धीरम् ।
बाष्पपरिप्लुतनयनाः जर्गाहिरे चाङ्गना विधातारम् ।। ४२

–तेहि अवसर नारद सहित अरु रिषि सप्त समेत ।
समाचार सुनि तुहिनगिरि गवने तुरत निकेत ।।

आकर्ण्य वृत्तं निखिलं तदेदं बभूव चिन्ताकुलितोऽचलेन्द्रः ।
सनारदः सप्तमुनीन्द्रसार्धं जगाम शीघ्रं गृहमद्रिराजः ।। ४३

तब नारद सबही समुझावा । पूरुब कथाप्रसंगु सुनावा ।।
मयना सत्य सुनहु मम बानी । जगजंबा तव सुता भवानी ।।
अजा अनादि सक्ति अबिनासिनि । सदा संभु अरधंग निवासिनि ।।

सर्वाः समाश्वास्य तदा सुरर्षिः प्राकीर्तयत्प्राक्तनजन्मवृत्तम् ।
प्रबोधनार्थं विबुधर्षिरूपे मेनां मनोहारि वचस्तदेवम् ।। ४४

"जानीहि कन्यां परमार्थतस्ते साक्षाज्जगन्मातरमद्रिजाये ।
जन्मादिहीनां अविनाशिरूपां शंभोः सदार्धाङ्गनिवासिनीं ताम् ।। ४५

जग संभव पालन लय कारिनि । निज इच्छा लीला बपु धारिनि ।।

जगत्प्रसूतिस्थितिनाशहेतुं सुतां त्वदीयामवगच्छ भद्रे ।
स्वेच्छानुरूपं दधतीमिहैनां लीलाशरीरं खलु विद्धि मेने ।। ४६

जनमीं प्रथम दच्छ गृह जाई । नामु सती सुंदर तनु पाई ।।
तहँहुँ सती संकरहि बिबाहीं । कथा प्रसिद्ध सकल जग माहीं ।।

जाता सुता प्राक्तनजन्मनीयं गेहे प्रजेशस्य सतीति नाम्ना ।
तन्वी शिवस्यैव तदापि भार्या के वा न जानन्ति कथामपूर्वाम् ।। ४७

एक बार आवत सिव संगा । देखेउ रघुकुल कमल पतंगा ।।
भयउ मोहु सिव कहा न कीन्हा । भ्रम बस बेषु सीय कर लीन्हा ।।

अथैकदैषा सभवा भवानी ददर्श मार्गे रघुवंशसूर्यम् ।
मोहादनादृत्य शिवोपदेशं दधार वेषं जनकात्मजायाः ।। ४८

–सिय बेषु सतीं जो कीन्ह तेहिं अपराध संकर परिहरीं ।
हर बिरहँ जाइ बहोरि पितु कें जग्य जोगानल जरीं ।।

त्यक्तापराधादथ शंभुनैषा जगाम गेहं स्वपितुः सती सा ।
मखप्रसङ्गे शिवमानभङ्गात् तत्याज देहं निजयोगशक्त्या ।। ४९

अब जनमि तुम्हरे भवन निज पति लागि दारुन तपु किया ।
अस जानि संसय तजहु गिरिजा सर्बदा संकर प्रिया ।।

जाता ततः सा युवयोरगारे तेपे तपः प्राप्तुमथात्मनाथम् ।
ज्ञात्वेतिहासं त्यज संशयं ते शिवप्रियां विद्धि सदा स्वकन्याम् ।। "५०

–सुनि नारद के बचन तब सब कर मिटा बिषाद ।
छन महुँ ब्यापेउ सकल पुर घर घर यह संबाद ।।

आकर्ण्य सर्वाः मुनिभाषितं तद् मनोविषादं विजहुः स्त्रियस्ताः ।
क्षणात् पुरे तत् प्रससार-वृत्तं गृहे गृहे सैव कथाप्रसंगः ।। ५१

तब मयना हिमवंतु अनंदे । पुनि पुनि पारबती पद बंदे ।।

आनन्दवृत्तश्रवणेन हृष्टं हिमाद्रि-मेना-युगलं च सद्यः ।
पुनः पुनस्तत्प्रणनाम पूज्यं रोमाञ्चिताङ्गं दुहितुः पदाब्जम् ।। ५२

इति तुलसी-मानस-नलिने राम-चरित-मानस-भावानुवादे
मेनासमाश्वासनं नाम द्वाविंशस्तरङ्गः ।

तरङ्गः २३

नारि पुरुष सिसु जुबा सयाने । नगर लोग सब अति हरषाने ।।
लगे होन पुर मंगलगाना । सजें सबहिं हाटक घट नाना ।।

स्त्री-पुरुष-बाल-वृद्धाः पौराः सर्वे समुल्लसितचित्ताः ।
मङ्गल-गायन-नर्तन-शुभकाञ्चनघटनियोजनासक्ताः ।। १

भाँति अनेक भई जेवनारा । सूपसास्त्र जस कछु ब्यवहारा ।।

नानाविधरुचिराणि षड्रसयुक्तानि खाद्यपेयानि ।
सिद्धीकृतानि चासन् परिणयपर्वणि सुशास्त्रविहितानि ।। २

सो जेवनार कि जाइ बखानी । बसहिं भवन जेहिं मातु भवानी ।।

कस्तां प्रभवति नूनं सर्वां मिष्टान्नसिद्धिमाख्यातुम् ।
निवसति यस्मिन् गेहे सदान्नपूर्णा स्वयं जगन्माता ।। ३

सादर बोले सकल बराती । बिष्नु बिरंचि देव सब जाती ।।

सादरमाहूयैनं विष्णुविरिञ्च्यादिदेवसमुदायम् ।
भोजनपङ्क्ति-महोत्सवमचलेशः संविधापयामास ।। ४

बिबिध पाँति बैठी जेवनारा । लागे परुसन निपुन सुआरा ।।

पटुतमपरिवेष्टारः सुरवरसंघान् उपाचरन्निपुणम् ।
सुचतुरमद्रिकुलेशश्चकार संभोजनोत्सवं दिव्यम् ।। ५

नारिबृंद सुर जेवँत जानी । लगीं देन गारीं मृदु बानी ।।

सुरसंभोजनसमये स्त्रियः समारेभिरे सुसौम्यगिरा ।
परिहासोक्तिविदग्धाः सुरवरकृतकोपलम्भपरिवादम् ।। ६

–गारीं मधुर स्वर देहिं सुन्दरि बिंग्य बचन सुनावहीं ।।
भोजनु करहिं सुर अति बिलंबु बिनोदु सुनि सचु पावहीं ।।

ऊचुर्वचनं वक्रं भाषणचतुराः स्त्रियः सपरिहासम् ।
श्रुत्वा सुराः सुदीर्घं मिष्टान्नास्वादने रताश्चासन् ।। ७

जेवँत जो बढ़्यो अनंदु सो मुख कोटिहूँ न परै कह्यो ।
अचवाँइ दीन्हे पान गवने बास जहँ जाको रह्यो ।।

कोटिमुखान्यपि नालं वर्णयितुं भोजनोत्सवानन्दम् ।
आचम्य ततः सर्वे भुक्त्वा ताम्बूलमीयुरावासम् ।। ८

–बहुरि मुनिन्ह हिमवंत कहुँ लगन सुनाई आइ ।
समय बिलोकि बिबाह कर पठए देव बोलाइ ।।

गत्वा मुनयो भूयः शुभलग्नं हिमवते समाचख्युः ।
परिणयसुमुहूर्तं तं ज्ञात्वा सुरमण्डलाँश्च संदिदिशुः ।। ९

बोलि सकल सुर सादर लीन्हे । सबहि जथोचित आसन दीन्हे ।।

सस्नेहादरमेते सुरवरसंघास्तदा समाहूताः ।
विज्ञापिताश्च सर्वे यथोचितासनपरिग्रहं कर्तुम् ।। १०

बेदी बेद बिधान सँवारी । सुभग सुमंगल गावहिं नारी ।।

सुशोभिता शुभवेदी वेदविधानानुरूपमतिनिपुणम् ।
सुभगसुमङ्गलगानं सुवासिनीभिस्तदा समारब्धम् ।। ११

सिंघासनु अति दिब्य सुहावा । जाइ न बरनि बिरंचि बनावा ।।
बैठे सिव बिप्रन्ह सिरु नाई । हृदयँ सुमिरि निज प्रभु रघुराई ।।

सिंहासनमथ वेद्यां विरिञ्चि-रचितं व्यराजताप्रतिमम् ।
स्मृत्वा हृदि रघुनाथं नत्वा विप्रान् अलंचकार शिवः ।। १२

बहुरि मुनीसन्ह उमा बोलाई । करि सिंगारु सखीं लै आई ।।
देखत रूपु सकल सुर मोहे । बरनै छबि अस जग कबि को है ।।

द्विजेन्द्रवचनानुसारमथ सा तदा प्रापिता
सखीभिरचलात्मजाभरणमण्डिता मण्डपम् ।
सुरूपमवलोक्य यत्सुरवराश्च संमोहिताः
निरूपयितुमत्र तन्न सकलं गिरालं कविः ।। १३

जगदंबिका जानि भव भामा । सुरन्ह मनहिं मन कीन्ह प्रनामा ।।
सुंदरता मरजाद भवानी । जाइ न कोटिहुँ बदन बखानी ।।

ननाम मनसा तदा सुरगणः सतीं सादरम्
समुल्लसितमानसः शिववधूं जगन्मातरम् ।
सुरम्यतमचारुभावचरमावधिः शैलजा
न वर्णयितुमत्र कोटिवदनान्यलं रम्यताम् ।। १४

—कोटिहुँ बदन नहिं बनै बरनत जग जननि सोभा महा ।
सकुचहिं कहत श्रुति सेष सारद मंदमति तुलसी कहा ।।

श्रुतिर्न च सरस्वती कथयितुं गिरा पारयेत्
न पारयति वा सहस्त्ररसनोऽपि शेषः स्वयम् ।
निरूपयितुमद्रिजारुचिररूपमत्रापि मे
न किञ्चिदपि विद्यते जडमतेऽस्तु वाग्वैभवम् ।। १५

छबिखानि मातु भवानि गवनीं मध्य मंडप सिव जहाँ ।
अवलोकि सकहिं न सकुच पति पद कमल मनु मधुकरु तहाँ ।।

सुरूप-खनिरद्रिजा भववधूर्जगज्जन्मदा
जगाम शिवसंनिधौ च पटमण्डपे ह्रीयुता ।
विवृत्तवदना पतेश्चरणपङ्कजादानता
मनोमधुकरस्तु पद्ममधुपानलग्नस्तदा ।। १६

—मुनि अनुसासन गनपतिहि पूजेउ संभु भवानि ।
कोउ सुनि संसय करै जनि सुर अनादि जियँ जानि ।।

उमाभवयुगं चकार गणनाथपूजाविधिम्
पुरोहितवरैस्तथा समुपदिष्टमारम्भणे ।
न चाद्भुतमिहास्ति किंचिदपि संशयो मास्तु वः
जरा-जनन-मुक्तमत्र चरितं सुराणां सदा ।। १७

जसि बिबाह कै बिधि श्रुति गाई । महामुनिन्ह सो सब करवाई ।।
गहि गिरीस कुस कन्या पानी । भवहि समरपीं जानि भवानी ।।

पुरोहितपुरोगमैः सकलशास्त्रपारंगतैः
यथाश्रुति तदा विवाहविधिरेष निर्वर्तितः ।

हिमाद्रिरपि चैव दक्षिणकरे गृहीत्वा कुशं
ददौ दुहितरं भवाय गतजन्मभार्यामुमाम् ॥ १८

पानिग्रहन जब कीन्ह महेसा । हियँ हरषे तब सकल सुरेसा ॥
बेदमंत्र मुनिबर उच्चरहीं । जय जय जय संकर सुर करहीं ॥

जग्राह शंभुरचलेश्वरजा-कराब्जम्
मोदाकुलं सकलदेवकुलं हि येन ।
चक्रुस्तदा मुनिवराः श्रुतिमन्त्रघोषं
शंभोर्जगर्जुरमरा जयशब्दमुच्चैः ॥ १९

बाजहिं बाजन बिबिध बिधाना । सुमनबृष्टी नभ भै बिधि नाना ॥
हर गिरिजा कर भयउ बिबाहू । सकल भुवन भरि रहा उछाहू ॥

भुवन-विवर-पूरं प्रोत्थितः सर्वदिक्षु
प्रहत-पटह-नादः शंख-वादित्र-घोषः ।
विविध-कुसुम-वृष्टिं स्वर्गलोको ववर्ष
तुहिन-गिरि-कुमारी-शंकरोद्वाह-हृष्टः ॥ २०

दासीं दास तुरग रथ नागा । धेनु बसन मनि बस्तु बिभागा ॥
अन्न कनकभाजन भरि जाना । दाइज दीन्ह न जाइ बखाना ॥

गजाश्व-रथ-धेनवः कनक-रूप्य-पात्राणि च
महार्घ-मणि-भूषणानि वसनानि दिव्यानि च ।
विनीत-परिचारिकाः परिचराश्च नैके तथा
ददौ विपुल-यौतकं गिरिपतिः सुतायै तदा ॥ २१

—दाइज दियो बहु भाँति पुनि कर जोरि हिमभूधर कह्यो ।
का देउँ पूरनकाम संकर चरन पंकज गहि रह्यो ॥
सिवँ कृपासागर ससुर कर संतोषु सब भाँतिहिं कियो ।

"न दातुमलमस्मि किंचिदपि पूर्णकामाय ते ।"
हिमाद्रिरिति शंकरं सविनयं तदोक्त्वा वचः ।
पुरारि-पद-पङ्कज-प्रणत-मस्तकस्तस्थिवान्
दयानिधिरसौ शिवोऽपि च गिरिं समाश्वासयत् ॥ २२

पुनि गहे पद पाथोज मयनाँ प्रेम परिपूरन हियो ।।
—नाथ उमा मम प्रान सम गृहकिंकरी करेहु ।
छमेहु सकल अपराध अब होइ प्रसन्न बरु देहु ।।

ततः शिवपदाब्जसंनतमुवाच मेनाऽपि तम्
"सुता प्रियतमा सदा मम बहिश्चरप्राणवत् ।
करोतु गृहकिंकरीं सुखमिमां स्वगेहे प्रभुः
तितिक्षतु दयानिधिस्तदपराधकोटीशतम् ।।" २३

बहु बिधि संभु सासु समुझाई । गवनी भवन चरन सिरु नाई ।।

अतिकरुणमथैवं याचमानां च मेनां
विविधविधमनल्पं बोधयामास शंभुः ।
शिवचरणसरोजे पातयित्वोत्तमाङ्गं
भुवनमचलजाया स्वस्थचित्ता प्रतस्थे ।। २४

जननीं उमा बोलि तब लीन्ही । लै उछंग सुंदर सिख दीन्ही ।।
करेहु सदा संकर पद पूजा । नारिधरमु पति देउ न दूजा ।।

गता भुवनमद्रिनाथवनिता जुहावात्मजां
सवत्सलमुपादिदेश बहुधाङ्कमारोपिताम् ।
"उमे स्वपतिपादपद्मरतिरस्तु ते निर्भरा
विना पतिमिहास्ति नैव परमेश्वरो योषिताम् ।।" २५

बचन कहत भरे लोचन बारी । बहुरि लाइ उर लीन्हि कुमारी ।।
कत बिधि सृजीं नारि जग माहीं । पराधीन सपनेहुँ सुखु नाहीं ।।

उवाच निजकन्यकामिति वचः सबाष्पं तदा
पुनश्च परिषस्वजे दुहितरं दृढं जन्मदा ।
'किमर्थमथ निर्मितो हि विधिनात्र नारीजनः
सदा परवशाः कुतः सुखमिहाप्नुवन्ति स्त्रियः ।।' २६

भै अति प्रेम बिकल महतारी । धीरजु कीन्ह कुसमय बिचारी ।।
पुनि पुनि मिलति परति गहि चरना । परम प्रेमु कछु जाइ न बरना ।।

बभूव बहुदुःखिता यदि विचिन्तयन्तीति सा
प्रकाशमवदन्न तत्किमपि कालविज्ञा तदा ।
पपात जगदम्बिकाचरणयोर्जनी संयता
सुताविरहजं शुचं कविवचोऽपि किं वर्णयेत् ।। २७

सब नारिन्ह मिलि भेटि भवानी । जाइ जननि उर पुनि लपटानी ।।
–जननिहि बहुरि मिलि चली उचित असीस सब काहूँ दई ।।

प्रसह्य विनिगृह्य शोकमचलात्मजा मानसे
कृतप्रणतिरालिलिङ्ग सकलाः स्त्रियः सादरम् ।
निरन्तरमथालिलिङ्ग पुनरप्यथो मातरं
ददौ समुचिताशिषं च सकलः स नारीगणः ।। २८

फिरि फिरि बिलोकति मातु तन तब सखीं लै सिव पहिं गईं ।।
जाचक सकल संतोषि संकरु उमा सहित भवन चले ।
सब अमर हरषे सुमन बरषि निसान नभ बाजे भले ।।

पुनः पुनरपि प्रतीपवदना सखीभिस्तदा
कथं कथमपि प्रभोर्निकटमद्रिजा प्रापिता ।
शिवोऽपि परितोषिताखिलजनः प्रतस्थे तया
ववर्षुरमराः सुमानि नभसः सभेरीस्वनम् ।। २९

–चले संग हिमवंतु तब पहुँचावन अति हेतु ।
बिबिध भाँति परितोषु करि बिदा कीन्ह बृषकेतु ।।
तुरत भवन आए गिरिराई । सकल सैल सर लिए बोलाई ।।
आदर दान बिनय बहुमाना । सब कर बिदा कीन्ह हिमवाना ।।

जगाम तुहिनाचलः सहितमोदकान्तं तदा
शिवोऽपि विससर्ज तं बहु विबोध्य गेहं ततः ।
पुनर्गृहमुपागतः सकलबन्धुवर्गं गिरिः
स्वयं च विससर्ज दानपरितोषितं सादरम् ।। ३०

जबहिं संभु कैलासहिं आए । सुर सब निज निज लोक सिधाए ।
जगत मातु पितु संभु भवानी । तेहिं सिंगारु न कहउँ बखानी ।।

गते सुखमथाद्रिजाशिवयुगे स्वगेहं तदा
गताः सुखितमानसाः सुमनसोऽपि लोकान्निजान् ।
जगज्जनक-जन्मदा-मिथुन-जीवनं पावनं
तदत्र न हि वर्णयाम्यनुचितं च तत् सत्कवेः ।। ३१

करहिं बिबिध बिधि भोग बिलासा । गनन्ह समेत बसहिं कैलासा ।।
हर गिरिजा बिहार नित नयऊ । एहि बिधि बिपुल काल चलि गयऊ ।।

यथासुखमथोषतुः स्वगणसंगतौ तावुभौ
हिमाद्रितनया-शिवौ स्वनिलये विलासे रतौ ।
सदा नवनवीन-सौख्य-सुरतोपभोगास्तयोर्
न काव्यविषयः सताम् उपशमोऽत्र वाचां वरम् ।। ३२

तब जनमेउ षटबदन कुमारा । तारकु असुरु समर जेहिं मारा ।।
आगम निगम प्रसिद्ध पुराना । षन्मुख जन्मु सकल जग जाना ।।

बभूव तनयस्तयोर्बलपराक्रमाभूषणः
षडाननकुमारको दनुजनायकस्यान्तकः ।
कुमारचरितं पुराणनिगमागमैर्वर्णितं
कथा शिवकुमार-जन्म-विषया च सर्वश्रुता ।। ३३

—जगु जान षन्मुख जन्मु कर्मु प्रतापु पुरुषारथु महा ।
तेहिं हेतु मैं बृषकेतु सुत कर चरित संछेपहिं कहा ।।
यह उमा संभु बिबाहु जे नर नारि कहहिं जे गावहीं ।
कल्यान काज बिबाह मंगल सर्बदा सुखु पावहीं ।।

जगद्-विदितमस्य जन्मकृतिविक्रमाख्यानकम्
ततो न बहुविस्तरेण कथितं मया तत्पुनः ।
उमाशिवविवाहवर्णनमिदं सतां पुण्यदं
भजन्ति शुभमत्र तच्छ्रवणगायनाभ्यां नराः ।। ३४

–चरित सिंधु गिरिजा रमन बेद न पावहिं पारु ।
बरनै तुलसीदासु किमि अति मतिमंद गवाँरु ।।

हिमाचलसुतापतेश्चरितमेतदत्यद्भुतं
जलाशयवदस्य वेत्ति निगमो न पारं परम् ।
अहो कथमिमां कथां कथयितुं कविः पारयेत्
यदल्पमतिवैभवं विदितमत्र विद्वन्नराम् ।। ३५

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
शिवपरिणयो नाम त्रयोविंशस्तरङ्गः ।।

तरङ्गः २४

संभु चरित सुनि सरस सुहावा । भरद्वाज मुनि अति सुखु पावा ।।

श्रुत्वा तत् सुरसं रम्यं शम्भोश्चरितमद्भुतम् ।
याज्ञवल्क्यमुखाद् हृष्टो भरद्वाजो मुनिस्तदा ।। १

बहु लालसा कथा पर बाढ़ी । नयनन्हि नीरु रोमावलि ठाढ़ी ।।
प्रेम बिबस मुख आव न बानी । दसा देखि हरषे मुनि ग्यानी ।।
अहो धन्य तव जन्मु मुनीसा । तुम्हहि प्रान सम प्रिय गौरीसा ।।

गात्रं रोमाञ्चितं सर्वं नेत्रे हर्षाश्रु-पूरिते
रुद्धा वाणी रसोत्कर्षात् श्रोत्रे श्रवण-लालसे ।। २
तदवस्थं भरद्वाजं याज्ञवल्क्यस्तदाब्रवीत्
प्राणप्रियो हि ते शम्भुर्धन्योऽसि मुनिपुङ्गव ।। ३

सिव पद कमल जिन्हहि रति नाहीं । रामहि ते सपनेहुँ न सोहाहीं ।।

शम्भोः पादाब्जयोर्येषां नास्ति भक्तिरनुत्तमा ।
रघुनाथकृपालाभस्तेषां स्वप्नेऽप्यसंभवः ।। ४

बिनु छल बिस्वनाथ पद नेहू । राम भगत कर लाच्छन एहू ।।

दृढबद्धं तु यच्चित्तं विश्वनाथ-पदाब्जयोः ।
यस्य भक्तिः स्थिरा शम्भौ रामभक्तोत्तमो हि सः ।। ५

सिव सम को रघुपति ब्रतधारी । बिनु अघ तजी सती असि नारी ।।

नास्ति शम्भुसमो भक्तो नास्ति शम्भुसमो व्रती ।
रामभक्तोत्तमः श्रेष्ठो नास्त्यन्योऽस्मिश्चराचरे ।। ६
पतिव्रतां प्रियां कान्तां राममाहात्म्यशङ्किनीम् ।
तत्याज तृणवद्योऽसौ न तु रामपदे रतिम् ।। ७

पनु करि रघुपति भगति देखाई । को सिव सम रामहि प्रिय भाई ।।

रामभक्तिपराकाष्ठां दर्शयामास शङ्कर ।
ततस्तस्मान्न रामस्य भक्तः प्रियतरोऽपरः ।। ८

—प्रथमहिं मैं कहि सिव चरित बूझा मरमु तुम्हार ।

शम्भोर्वृत्तं मया ख्यातं पूर्वं बुद्धचा हि ते मुने ।
ज्ञातुं तेऽविचलां श्रद्धां शम्भुपादाम्बुजन्मनोः ।। ९

सुचि सेवक तुम्ह राम के रहित समस्त बिकार ।।

स्वयंसिद्धा हि ते तस्माद् रामपादयुगे रतिः ।
सेवकस्त्वं शुचितमो रामस्य न हि संशयः ।। १०

मैं जाना तुम्हार गुन सीला । कहउँ सुनहु अब रघुपति लीला ।।

निर्दोषो निर्विकारस्त्वं शीलवान् गुणवान् शुचिः ।
कथयामि ततस्तेऽहं रामलीलाम् अशेषतः ।। ११

सुनु मुनि आजु समागम तोरें । कहि न जाइ जस सुखु मन मोरें ।।

कियान् हर्षो हि मे चित्ते समेत्य त्वां महामुने ।
न हि वर्णयितुं शक्यं संकेतसीमिताक्षरैः ।। १२

राम चरित अति अमित मुनीसा । कहि न सकहिं सत कोटि अहीसा ।।

श्रीरामचरितस्यास्य परः पारो न विद्यते ।
कोटिशेषाश्च तत्सर्वं निरूपयितुमक्षमाः ।। १३

तदपि जथाश्रुत कहउँ बखानी । सुमिरि गिरापति प्रभु धनुपानी ।।

तथापि तन्मुने तुभ्यं कथयामि यथाश्रुतम् ।
स्मृत्वा वाचः पतिं चित्ते रामं कोदण्डधारिणम् ।। १४

सारद दारुनारि सम स्वामी । रामु सूत्रधर अंतरजामी ।।

स्वामी सूत्रधरः सोऽयं रघुनाथो महामतिः ।
सरस्वती करे यस्य दारुनारीव राजते ।। १५

जेहि पर कृपा करहिं जनु जानी । कबि उर अजिर नचावहिं बानी ।।

यः कविर्वल्लभोभक्तस्तस्यैव मानसाजिरे ।
रामो नर्तयते चैनां शारदां काष्ठपुत्रिकाम् ।। १६

प्रनवउँ सोइ कृपाल रघुनाथा । बरनउँ बिसद तासु गुन गाथा ।।

प्रणम्य शिरसा नाथं कृपालुं रघुनायकम् ।
कथयामि कथाम् एनां निर्मलाम् अतिपुण्यदाम्" ।। १७

परम रम्य गिरिबरु कैलासू । सदा जहाँ सिव उमा निवासू ।।

परमसुरम्यो दिव्यः कैलासो गिरिवरः शुचिस्थानम् ।
गिरिजाशङ्करयुगलं निवसति यस्मिन् सदा जगद्वन्द्यम् ।। १८

–सिद्ध तपोधन जोगिजन सुर किंनर मुनिबृंद ।
बसहिं तहाँ सुकृती सकल सेवहिं सिव सुखकंद ।।

किन्नर-सुर-मुनिवृन्दास्तपस्विनः सिद्ध-योगिजनसंघाः ।
सेवन्ते सुखकन्दं शिवपदमत्रैव पुण्यसंस्मरणाः ।। १९

हरि हर बिमुख धर्म रति नाहीं । ते नर तहँ सपनेहुँ नहिं जाहीं ।।

हरिहरपदभक्तिर्वा धर्मरतिर्वा न विद्यते यस्य ।
स्वप्नेऽपि शुचिस्थानं गन्तुं तत्पामरो न पारयते ।। २०

तेहि गिरि पर बट बिटप बिसाला । नित नूतन सुंदर सब काला ।।

वटतरुरेकश्चास्मिन् गिरिवरशिखरे विराजते भव्यः ।
सर्वर्तुनयनरम्यो नूतनपल्लवसमावृतश्च सदा ।। २१

त्रिबिध समीर सुसीतलि छाया । सिव बिश्राम बिटप श्रुति गाया ।।

शिवविश्रामः सोऽयं वटविटपो वर्णितश्चतुर्वेदैः ।
शीतल-मन्द-सुगन्धित-समीरणो यत्र शीतला छाया ।। २२

एक बार तेहि तर प्रभु गयऊ । तरु बिलोकि उर अति सुखु भयऊ ॥
निज कर डासि नागरिपु छाला । बैठे सहजहिं संभु कृपाला ॥

अथैकदा तरुमूलं यातः शम्भुस्तुतोष दृष्ट्वा तम् ।
स्वकरास्तृतहरिचर्मणि निषसादासौ ततो दयासिन्धुः ॥ २३

कुंद इंदु दर गौर सरीरा । भुज प्रलंब परिधन मुनिचीरा ॥
तरुन अरुन अंबुज सम चरना । नख दुति भगत हृदय तम हरना ॥
भुजग भूति भूषन त्रिपुरारी । आननु सरद चंद छबि हारी ॥

कुन्देन्दुशङ्खगौरो वल्कलधारी शिवः प्रलम्बभुजः ।
कररुह-निर्गत-रश्मि-प्रध्वंसित-भक्त-हृदय-तिमिरौघः ॥ २४

चरणद्वयमपि धत्ते तरुणारुण-नलिन-नूतन-च्छायाम् ।
शरदिन्दु-रम्य-वदनो भस्म-भुजङ्गम-विभूषितश्चैषः ॥ २५

–जटा मुकुट सुरसरित सिर लोचन नलिन बिसाल ।
नीलकंठ लावन्यनिधि सोह बालबिधु भाल ॥

जटा-मुकुट-सुरसरिता-शोभित-शीर्णो विशालनलिनाक्षः ।
बालेन्दुशेखरोऽसौ शुशुभे रमणीय-नीलकण्ठश्च ॥ २६

बैठे सोह कामरिपु कैसें । धरें सरीरु सांतरसु जैसें ॥
पारबती भल अवसरु जानी । गईं संभु पहिं मातु भवानी ॥

शान्तरसो ननु मूर्तः शुशुभे कामारिरासनस्थोऽसौ ।
उचितं मत्वा समयं समागता तं तदा जगन्माता ॥ २७

जानि प्रिया आदरु अति कीन्हा । बाम भाग आसनु हर दीन्हा ॥
बैठीं सिव समीप हरषाई । पूरुब जन्म कथा चित आई ॥

संमानिता स्वकान्ता शिवेन चारोपिता स्ववामाङ्कम् ।
प्रीता प्राक्तनवृत्तं सस्मार च सा सती तदा सर्वम् ॥ २८

पति हियँ हेतु अधिक अनुमानी । बिहसि उमा बोलीं प्रिय बानीं ॥

आप्यायितमनुरागं मत्वा नाथस्य चात्मनि प्रीता ।
सस्मितमूचे वचनं मधुरगिरा गिरिवरात्मजा कान्तम् ॥ २९
'वाञ्छितमर्थं मह्यं मुदा प्रयच्छत्यवश्यमधुनैषः ।'
मत्वैवं भवजननी पप्रच्छैनं तदा पुरावृत्तम् ॥ ३०

कथा जो सकल लोक हितकारी । सोइ पूछन चह सैलकुमारी ॥

प्रसारितुं रघुकीर्ति चिकीर्षुरेषा च लोककल्याणम् ।
रघुनाथकथावृत्तं श्रोतुं पुनरपि तदा ववाञ्छ सती ॥ ३१

बिस्वनाथ मम नाथ पुरारी । त्रिभुवन महिमा बिदित तुम्हारी ॥
चर अरु अचर नाग नर देवा । सकल करहिं पद पंकज सेवा ॥

" हे विश्वनाथ मम नाथ पुरत्रयारे
त्रैलोक्यविश्रुत महाबल सर्वशक्ते ।
नागाः सुरा नरवराश्च चराचरास्ते
सर्वेऽपि ते चरणपङ्कजमाश्रयन्ते ॥ ३२

—प्रभु समरथ सर्बग्य सिव सकल कला गुन धाम ।
जोग ग्यान बैराग्य निधि प्रनत कलपतरु नाम ॥

कल्याणरूप भगवन् सकलार्थविज्ञ
स्वामिन् समर्थ गुणधाम कलानिधानम् ।
वैराग्य-योग-परिबोधनिधे दयालो
तन्नाम कल्पविटपः प्रणताय नूनम् ॥ ३३

जौं मो पर प्रसन्न सुखरासी । जानिअ सत्य मोहि निज दासी ॥
तौ प्रभु हरहु मोर अग्याना । कहि रघुनाथ कथा बिधि नाना ॥

जानासि मां स्वपददास्यरतां यदि त्वं
नाथ प्रसीद हर मे मनसोऽन्धकारम् ।
नानाविधं रघुकुलोद्वहवृत्तमग्र्यम्
मह्यं निरूपय हर भ्रममन्तरङ्गात् ॥ ३४

जासु भवनु सुरतरु तर होई । सहि कि दरिद्र जनित दुखु सोई ॥
ससिभूषन अस हृदयँ बिचारी । हरहु नाथ मम मति भ्रम भारी ॥

यस्यास्ति गेहमिह देवतरोरधस्तात्
दुःखं सहेत किमसौ नु दरिद्रतायाः ।
एवं विचार्य शशिभूषण मे प्रसीद
प्रध्वंसयाखिलमिदं हृदयान्धकारम् ॥ ३५

प्रभु जे मुनि परमारथबादी । कहहिं राम कहुँ ब्रह्म अनादी ।।
सेस सारदा बेद पुराना । सकल करहिं रघुपति गुन गाना ।।

ये वर्णयन्ति रघुनाथमनाद्यनन्तम्
ब्रह्मेति ये मुनिवराः परमार्थविज्ञाः ।
शेषः श्रुति-स्मृति-पुरोग-पुराणसंघाः
सर्वे स्तुवन्ति रघुनाथगुणौघवृत्तम् ।। ३६

तुम्ह पुनि राम राम दिन राती । सादर जपहु अनँग आराती ।।
रामु सो अवध नृपति सुत सोई । की अज अगुन अलखगति कोई ।।

त्वं चापि मन्मथरिपोऽत्र दिवानिशं तं
जापं करोषि सततं प्रभुरामनाम्नः ।
रामः स किं दशरथस्य सुतो हि नूनम्
अन्योऽथवा तदितरो गुणरूपहीनः ।। ३७

–जौं नृप तनय त ब्रह्म किमि नारि बिरहँ मति भोरि ।
देखि चरित महिमा सुनत भ्रमति बुद्धि अति मोरि ।।

पुत्रो नृपस्य यदि चैष हि नाथ रामः
ब्रह्मेति वर्णनमसांप्रतिकं तदैतद् ।
ब्रह्मैव वा यदि भवेद् भगवन् स रामः
नारीवियोगजनितः कथमस्य मोहः ।। ३८

दृष्ट्वा चरित्रमतिचित्रमिदं बिचित्रम्
श्रुत्वाद्वितीयमहिमानमथान्यतस्तम् ।
नैवास्म्यलं किमपि वेदितुमत्र सत्यम्
मुग्धा मतिर्भ्रमति संशय-जाल-मार्गे ।। ३९

जौं अनीह ब्यापक बिभु कोऊ । कहहु बुझाइ नाथ मोहि सोऊ ।।
अग्य जानि रिस उर जनि धरहू । जेहि बिधि मोह मिटै सोइ करहू ।।

ब्रह्मेति यत्कथितमत्र विकारहीनम्
आद्यन्तहीनमखिलं विभु विश्वरूपम् ।
यद्यन्यदेव किमपि प्रतिबोधयैतद्
नाथ प्रसीद मतिमोहमिमं हर त्वम् ।। ४०

मत्वातिमूढमतिमेव च मां पुरारे
कारुण्यसागर दयां कुरुमा क्रुधस्त्वम् ।
उच्छिद्यते हि मम मोहतमो यथैतत्
कार्यं तथैव भगवन्ननु सर्वथात्र ।। ४१

मैं बन दीखि राम प्रभुताई । अति भय बिकल न तुम्हहि सुनाई ।।
तदपि मलिन मन बोधु न आवा । सो फलु भली भाँति हम पावा ।।

रामप्रभुत्वमपि पूर्वजनौ ममासीत्-
प्रत्यक्षमेव निखिलं खलु कानने तद् ।
नाख्यातमेतदयि नाथ भयेन तुभ्यं
नष्टा न धी-मलिनता फलमप्यवाप्तम् ।। ४२

अजहूँ कछु संसउ मन मोरें । करहु कृपा बिनवउँ कर जोरें ।।
प्रभु तब मोहि बहु भाँति प्रबोधा । नाथ सो समुझि करहु जनि क्रोधा ।।

अद्यापि संशयितमेव मनो मदीयं
छेत्तुं भ्रमं हि कुरु नाथ कृपाम् उदाराम् ।
हे शेषमण्डन सुरेश्वर सर्वशक्ते
रामस्य मे शुभकरं कथयस्व वृत्तम् ।। ४३

तब कर अस बिमोह अब नाहीं । रामकथा पर रुचि मन माहीं ।।
कहहु पुनीत राम गुन गाथा । भुजगराज भूषन सुरनाथा ।।

नास्त्यद्य नाथ हृदये मम पूर्वमोहः
रामेतिहासरुचिरद्य समुत्थिता मे ।
आख्याहि मे शुभकरं प्रभुरामवृत्तं
हे शेषमण्डन सुरेश्वर सर्वशक्ते ।। ४४

-बंदउँ पद धरि धरनि सिरु बिनय करउँ कर जोरि ।
बरनहु रघुबर बिसद जसु श्रुति सिद्धांत निचोरि ।।

भूमौ निपत्य नत-पाद-सरोज-युग्मं
बद्धाञ्जलिः पुनरहं खलु नाथ याचे ।
श्रीरामवृत्तमखिलं विशदं गुणाढ्यम्
मह्यं निरूपय विभो श्रुतिसाररूपम् ।। ४५

जदपि जोषिता नहिं अधिकारी । दासी मन क्रम बचन तुम्हारी ।।

यद्यप्यहं न हि भवाम्यधिकारिणीति
ब्रह्मार्थबोधनमयुक्तमिवात्र भाति ।
जात्याङ्गनामपि महेश्वर मां सुदीनां
जानीहि वाक्कृतिमनोभिरिह स्वदासीम् ।। ४६

गूढ़उ तत्त्व न साधु दुरावहिं । आरत अधिकारी जहँ पावहिं ।।

प्राप्याधिकारिणमिहार्तमतीव सन्तः
कारुण्यपूरितहृदो न विचारयन्ति ।
गूढातिगूढमपि तत्त्वमिमे च तस्मात्
दीनार्तिहारक विभो न हि गोपयन्ति ।। ४७

अति आरति पूछउँ सुरराया । रघुपति कथा कहहु करि दाया ।।
प्रथम सो कारन कहहु बिचारी । निर्गुन ब्रह्म सगुन बपु धारी ।।

अभ्यर्थये सुरवरेश पुनः सुदीनम् ।
आख्याहि मे रघुपतेः सदयं कथां ताम् ।
पूर्वं तु मे कथय नाथ विचार्य सम्यक्
कस्मात् धृतं सगुणरूपमथागुणेन ।। ४८

पुनि प्रभु कहहु राम अवतारा । बालचरित पुनि कहहु उदारा ।।
कहहु जथा जानकी बिबाहीं । राज तजा सो दूषन काहीं ।।

रामावतारमपि वर्णय मे तदूर्ध्वम्
आख्याहि बालचरितं च ततः सुरम्यम् ।
सीताविवाहकथनोत्तरमार्यपुत्र
राज्यं यदत्यजत तद् वद विस्तरेण ।। ४९

बन बसि कीन्हे चरित अपारा । कहहु नाथ जिमि रावन मारा ।।
राज बैठि कीन्हीं बहु लीला । सकल कहहु संकर सुखसीला ।।

विक्रान्तकर्मपरिपाटिमपि प्रकीर्णाम्
सम्यङ्निरूप्य वद रावणनाशवृत्तम् ।
सिंहासस्थरघुनाथचरित्रमग्र्यम्
पश्चात् प्रभो कथय मे सुखशीलसर्वम् ।। ५०

—बहुरि कहहु करुनायतन कीन्ह जो अचरज राम ।
प्रजा सहित रघुबंसमनि किमि गवने निज धाम ।।

भूयोऽपि मे कथय विस्मयकारि वृत्तम्
तद्राघवस्य निखिलं करुणा-निधानम् ।
यातः कथं स निजधाम स प्रजाभि-
स्तन्मेऽतिचित्रमपि वर्णय नाथ सर्वम् ।। ५१

पुनि प्रभु कहहु सो तत्त्व बखानी । जेहिं बिग्यान मगन मुनि ग्यानी ।।
भगति ग्यान बिग्यान बिरागा । पुनि सब बरनहु सहित बिभागा ।।

गत्वान्ततः कथय मे परमार्थतत्त्वं
यच्चिन्तने मुनिजनाः सततं रमन्ते ।
विज्ञानमद्य कथयस्व च नाथ मह्यं
ज्ञानं च भक्तिमपि सर्वविभागसार्धम् ।। ५२

औरउ राम रहस्य अनेका । कहहु नाथ अति बिमल बिबेका ।।
जो प्रभु मैं पूछा नहिं होई । सोउ दयाल राखहु जनि गोई ।।

यद् गूढमत्र चरितेऽस्ति च वा रहस्यं
यद्यप्यपृष्टमयि तत्कथयस्व मह्यम् ।
सर्वे स्तुवन्ति निरवद्यमतिं तवैनां
तन्मात्र गोपय महेश्वर मद्-ऋतार्थम् ।। ५३

तुम्ह त्रिभुवन गुर बेद बखाना । आन जीव पाँवर का जाना ।।
प्रस्न उमा कै सहज सुहाई । छल बिहिन सुनि सिव मन भाई ।।

वेदा गुरुं त्रिभुवनस्य वदन्ति यद् त्वां
त्वत्तो न कोऽपि भुवने गुरुरत्र लभ्यः ।
एवं विचार्य कुरु नाथ कृपाम् उदाराम्"
ऊचे तदैवमतिनम्रमुमा महेशम् ।। ५४

इति तुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
उमापुनःप्रश्नवर्णनं नाम चतुर्विंशस्तरङ्गः ।

प्रस्न उमा कै सहज सुहाई । छल बिहीन सुनि सिव मन भाई ॥

आकर्ण्य तच्छलविहीनमतीव रम्यं
वाक्यं गिरीश-तनया-गदितं मनोज्ञम् ।
प्रीतः प्रभुः शशि-विभूषित-भालपट्टः
भेजे क्षणं प्रमुदितः स तु मौनभावम् ॥ १

हर हियँ रामचरित सब आए । प्रेम पुलक लोचन जल छाए ॥
श्रीरघुनाथ रूप उर आवा । परमानंद अमित सुख पावा ॥

ध्यायन् ददर्श हृदये स निमीलिताक्षः
श्रीरामचन्द्रचरितं सकलं महेशः ।
तद्वीक्ष्य रूपमपि दाशरथे दाशरथेस्तथास्य
गात्रं तदा पुलकितं नयनेऽश्रुपूर्णे ॥ २

—मगन ध्यानरस दंड जुग पुनि मन बाहेर कीन्ह ।
रघुपति चरित महेस तब हरषित बरनै लीन्ह ॥

तस्थौ क्षणं स युतहस्तयुगः समाधौ
शम्भुः सुखैकरसमग्न इवान्तरङ्गे ।
आकृष्य चित्तमथ चैष बहिः समाधेः
प्राकीर्तयद् रघुपतेश्चरितं समग्रम् ॥ ३

झूठेउ सत्य जाहि बिनु जानें । जिमि भुजंग बिनु रजु पहिचानें ॥

"अज्ञातरामचरितो मनुजोऽत्र जाये
गृह्णात्यसत्यमपि सत्यमिवार्थजातम् ।
आभाति रज्जुरपि सर्पनिभा तदास्य
भ्रान्तो न पश्यति यथार्थतयार्थजातम् ॥ ४

जेहि जानें जग जाइ हेराई । जागें जथा सपन भ्रम जाई ॥

ज्ञातं तु येन गिरिजे रघुनाथवृत्तं
सर्वं जगद् भवति तस्य नरस्य मिथ्या ।
स्वप्नं न पश्यति कदापि यथा प्रबुद्ध-
स्तद्वज्जगद् विलयमेति समग्रमस्य ॥ ५

बंदउँ बालरूप सोइ रामू । सब सिधि सुलभ जपत जिसु नामू ॥
मंगल भवन अमंगल हारी । द्रवउ सो दसरथ अजिर बिहारी ॥

तद् बालरूपमिह दाशरथेर्भजेऽहं
सर्वार्थसिद्धिरपि यच्छुभनामजापात् ।
कल्याणधाम सकलाशिवहारकं तद्
वन्दे पुनर्दशरथाजिरकेलिमग्नम् ॥" ६

करि प्रनाम रामहि त्रिपुरारी । हरषि सुधा सम गिरा उचारी ॥

एवं प्रणम्य हृदये शिशुरूपरामं
देवेश्वरस्त्रिपुरनाशकरो महेशः ।
अत्यन्यनन्दितमतिर्गिरिराजपुत्रीम्
ऊचे सुधा-मधुरया गिरया तदैवम् ॥ ७

धन्य धन्य गिरिराजकुमारी । तुम्ह समान नहिं कोउ उपकारी ॥
पूँछेहु रघुपति कथा प्रसंगा । सकल लोक जग पावनि गंगा ॥
तुम्ह रघुबीर चरन अनुरागी । कीन्हिहु प्रस्न जगत हित लागी ॥
–राम कृपा तें पारबति सपनेहुँ तव मन माहिं ।
सोक मोह संदेह भ्रम मम बिचार कछु नाहिं ॥
तदपि असंका कीन्हिहु सोई । कहत सुनत सब कर हित होई ॥

धन्यासि शैलतनये तुलना कुतस्ते
श्रोतुं यदिच्छसि रघूद्वहवृत्तमेतद् ।
पुण्या कथा रघुपतेः सुरदीर्घिकैव
पृष्टा त्वया नियतमत्र जगद्धिताय ॥ ८

श्रीरामपादरतमानसमद्य कान्ते
जानामि सम्यगचलेश्वरकन्यके ते ।
नित्यं हि ते प्रभुकृपा, न हि ते कदापि
स्वप्नेऽपि संभवति संशयमोहलेशः ॥ ९

पृष्टा तथापि गिरिजे यदि पूर्वशङ्का
नूनं चिकीर्षसि हितं सकलप्रजानाम् ।
श्रुत्वाथवा प्रभुकथामिह कीर्तयित्वा
सर्वे जनाः सुखमवाप्नुवते विशेषम् ॥ १०

जिन्ह हरिकथा सुनी नहिं काना । श्रवन रंध्र अहिभवन समाना ।।
नयनन्हि संत दरस नहिं देखा । लोचन मोरपंख कर लेखा ।।

याभ्यां श्रुतं न रघुवीरचरित्रमग्र्यं
कर्णेन्द्रियौ गिरिसुते ननु सर्परन्ध्रे ।
याभ्यां कृतं सुजन-दर्शनमत्र नार्ये
नेत्रे नरस्य गिरिजे खलु मेचकौ ते ।। ११

ते सिर कटु तुंबरि समतूला । जे न नमत हरि गुर पद मूला ।।
जिन्ह हरिभगति हृदयँ नहिं आनी । जीवत सव समान तेइ प्रानी ।।

आलाबुना समुतलं ननु मस्तकं तद्
नम्रं न यद् गुरुपदाब्जयुगे कदापि ।
भक्तिर्न यस्य हृदये हरिपादयोर्वा
जीवन्मृतः स गिरिजे मनुजोऽवगम्यः ।। १२

जो नहिं करइ राम गुन गाना । जीह सो दादुर जीह समाना ।।
कुलिस कठोर निठुर सोइ छाती । सुनि हरिचरित न जो हरषाती ।।

जानाति या न रसना रघुरामगानं
निःशङ्कमेव गिरिजे ननु भेकजिह्वा ।
आकर्ण्य रामचरितं यदि न प्रहृष्टं
तद् वज्रकर्कशमुमे हृदयं नरस्य ।। १३

गिरिजा सुनहु राम कै लीला । सुर हित दनुज बिमोहनसीला ।।

कल्याणमावहति यत्सकलामराणाम्
मोहं तनोति हृदयेषु तु दानवानाम् ।
तत्पुण्यपावनमिदं सुखसारमेकं
श्रीरामचन्द्रचरितं गिरिजे शृणु त्वम् ।। १४

—रामकथा सुरधेनु सम सेवत सब सुख दानि ।
सतसमाज सुरलोक सब को न सुनै अस जानि ।।

सा कामधेनुरिह रामकथा नराणां
यत्सेवया सुखमिहाश्नुवते जनौघाः ।
वृन्दः सतां सुरजनोऽत्र सदाऽवगम्यः
कस्मै प्रियं न रघुवीरचरित्रगानम् ।। १५

रामकथा सुंदर कर तारी। संसय बिहग उड़ावनिहारी ॥
रामकथा कलि बिटप कुठारी। सादर सुनु गिरिराजकुमारी ॥

श्रीरामचन्द्रचरितं करतालशब्दः
श्रुत्वापयान्ति ननु संशयपक्षिणो यम् ।
श्रीरामचन्द्रचरितं कलिवृक्ष टङ्क-
स्तत् सादरं गिरिसुते सकलं शृणु त्वम् ॥ १६

राम नाम गुन चरित सुहाए। जनम करम अगनित श्रुति गाए ॥
जथा अनंत राम भगवाना। तथा कथा कीरति गुन नाना ॥

श्रीरामनामगुणजन्मचरित्रकार्यं
सर्वं हि शैलतनये परमाद्भुतं तद् ।
आद्यन्तहीनमिह तत्खलु रामरूपं
जानीहि कीर्तिमपि तद्गुणमप्यगाधम् ॥ १७

तदपि जथा श्रुत जसि मति मोरी। कहिहउँ देखि प्रीति अति तोरी ॥

ज्ञात्वा तु रामरतिमेव तवाद्रिकन्ये
वृत्तं यताश्रुतमिदं कथये तथा ते ।
यावद्यथा च मतिवैभवमद्रिजे मे
तावत्तथा च कथये चरितं प्रभोस्ते ॥ १८

उमा प्रस्न तव सहज सुहाई। सुखद संतसंमत मोहि भाई ॥
एक बात नहिं मोहि सोहानी। जदपि मोह बस कहेहु भवानी ॥
तुम्ह जो कहा राम कोउ आना। जेहि श्रुति गाव धरहिं मुनि ध्याना ॥

प्रश्नः स तेऽतिसहजः सुखदस्तथा मे
सत्संमतश्च मम चाभिमतोऽस्ति कान्ते ।
एकं तु नात्र रुचये मम शैलकन्ये
पृष्टं त्वया प्रियतमे यदि मूढबुद्धया ॥ १९

"ध्यातः सदा मुनिजनैः श्रुतिभिश्च गीतः
सोऽन्यो हि कोऽपि किमसौ ननु रामचन्द्रः ।
प्रश्नोऽयमद्रितनये न हि रोचते मे
नासौ तथा समुचितस्तव भाति कान्ते ॥ २०

—कहहिं सुनहिं अस अधम नर ग्रसे जे मोह पिसाच ।
पाषंडी हरि पद बिमुख जानहिं झूठ न साच ।।

ग्रस्ता हि येऽधमजना ननु मोहभूतैः
पाषण्डिनो हरिपदाब्ज-पराङ्मुखास्ते ।
गृह्णन्त्यसत्यमपि सत्यमिवार्थजातं
रामस्वरूपविषयेऽत्र विशङ्किताास्ते ।। २१

अग्य अकोबिद अंध अभागी । काई बिषय मुकुर मन लागी ।।
लंपट कपटी कुटिल बिसेषी । सपनेहुँ संतसभा नहिं देखी ।।

अन्धाश्च मूढमतयश्च हि भाग्यहीनाः
मोहेन वा मलिनितान्तरदर्पणा ये ।
नूनं त एव कुटिलाः सुजनैर्वियुक्ताः
रामस्वरूपविषयेऽपि वितर्कयन्ते ।। २२

कहहिं ते बेद असंमत बानी । जिन्ह कें सूझ लाभु नहिं हानी ।।
मुकुर मलिन अरु नयन बिहीना । राम रूप देखहिं किमि दीना ।।

ते दुर्जनाः श्रुतिविरोधिवचो वदन्ते
जानन्ति नैव निजलाभमलाभमेते ।
मोहान्धकारित-मनोमुकुरास्तथान्धाः
द्रष्टुं स्वरूपमिह तस्य न पारयन्ते ।। २३

जिन्ह कें अगुन न सगुन बिबेका । जल्पहिं कल्पित बचन अनेका ।।
हरिमाया बस जगत भ्रमाहीं । तिन्हहि कहत कछु अघटित नाहीं ।।

जानन्ति ये सगुणनिर्गुणयोर्न भेदं
जल्पन्ति कल्पितवचश्च हि येऽत्र नित्यम् ।
मायावशा जगति ये च परिभ्रमन्ति
ते दुर्जनाः किमपि वक्तुमिहोत्सहन्ते ।। २४

रामकथा सुंदर कर तारी। संसय बिहग उड़ावनिहारी॥
रामकथा कलि बिटप कुठारी। सादर सुनु गिरिराजकुमारी॥

श्रीरामचन्द्रचरितं करतालशब्दः
श्रुत्वापयान्ति ननु संशयपक्षिणो यम्।
श्रीरामचन्द्रचरितं कलिवृक्षटङ्क-
स्तत् सादरं गिरिसुते सकलं शृणु त्वम्॥ १६

राम नाम गुन चरित सुहाए। जनम करम अगनित श्रुति गाए॥
जथा अनंत राम भगवाना। तथा कथा कीरति गुन नाना॥

श्रीरामनामगुणजन्मचरित्रकार्यं
सर्वं हि शैलतनये परमाद्भुतं तद्।
आद्यन्तहीनमिह तत्खलु रामरूपं
जानीहि कीर्तिमपि तद्गुणमप्यगाधम्॥ १७

तदपि जथा श्रुत जसि मति मोरी। कहिहउँ देखि प्रीति अति तोरी॥

ज्ञात्वा तु रामरतिमेव तवाद्रिकन्ये
वृत्तं यथाश्रुतमिदं कथये तथा ते।
यावद्यथा च मतिवैभवमद्रिजे मे
तावत्तथा च कथये चरितं प्रभोस्ते॥ १८

उमा प्रस्न तव सहज सुहाई। सुखद संतसंमत मोहि भाई॥
एक बात नहिं मोहि सोहानी। जदपि मोह बस कहेहु भवानी॥
तुम्ह जो कहा राम कोउ आना। जेहि श्रुति गाव धरहिं मुनि ध्याना॥

प्रश्नः स तेऽतिसहजः सुखदस्तथा मे
सत्संमतश्च मम चाभिमतोऽस्ति कान्ते।
एकं तु नात्र रुचये मम शैलकन्ये
पृष्टं त्वया प्रियतमे यदि मूढबुद्ध्या॥ १९

"ध्यातः सदा मुनिजनैः श्रुतिभिश्च गीतः
सोऽन्यो हि कोऽपि किमसौ ननु रामचन्द्रः।
प्रश्नोऽयमद्रितनये न हि रोचते मे
नासौ तथा समुचितस्तव भाति कान्ते॥ २०

-कहहिं सुनहिं अस अधम नर ग्रसे जे मोह पिसाच ।
पाषंडी हरि पद बिमुख जानहिं झूठ न साच ।।

ग्रस्ता हि येऽधमजना ननु मोहभूतैः
पाषण्डिनो हरिपदाब्ज-पराङमुखास्ते ।
गृह्णन्त्यसत्यमपि सत्यमिवार्थजातं
रामस्वरूपविषयेऽत्र विशङ्कितास्ते ।। २१

अग्य अकोबिद अंध अभागी । काई बिषय मुकुर मन लागी ।।
लंपट कपटी कुटिल बिसेषी । सपनेहुँ संतसभा नहिं देखी ।।

अन्धाश्च मूढमतयश्च हि भाग्यहीनाः
मोहेन वा मलिनितान्तरदर्पणा ये ।
नूनं त एव कुटिलाः सुजनैर्वियुक्ताः
रामस्वरूपविषयेऽपि वितर्कयन्ते ।। २२

कहहिं ते बेद असंमत बानी । जिन्ह कें सूझ लाभु नहिं हानी ।।
मुकुर मलिन अरु नयन बिहीना । राम रूप देखहिं किमि दीना ।।

ते दुर्जनाः श्रुतिविरोधिवचो वदन्ते
जानन्ति नैव निजलाभमलाभमेते ।
मोहान्धकारित-मनोमुकुरास्तथान्धाः
द्रष्टुं स्वरूपमिह तस्य न पारयन्ते ।। २३

जिन्ह कें अगुन न सगुन बिबेका । जल्पहिं कल्पित बचन अनेका ।।
हरिमाया बस जगत भ्रमाहीं । तिन्हहि कहत कछु अघटित नाहीं ।।

जानन्ति ये सगुणनिर्गुणयोर्न भेदं
जल्पन्ति कल्पितवचश्च हि येऽत्र नित्यम् ।
मायावशा जगति ये च परिभ्रमन्ति
ते दुर्जनाः किमपि वक्तुमिहोत्सहन्ते ।। २४

बातुल भूत बिबस मतवारे । ते नहिं बोलहिं बचन बिचारे ।।
जिन्ह कृत महामोह मद पाना । तिन्ह कर कहा करिअ नहिं काना ।।

ये वायुरोगमदभूतवशाश्च लोके
सम्यग् विचार्य वचनं न वदन्ति ये ते ।
जल्पन्ति मोह-मदिरा-मद-मत्तलोका
स्तन्नैव किञ्चिदपि शैलसुते निशम्यम् ।। २५

—अस निज हृदयँ बिचारि तजु संसय भजु राम पद ।
सुनु गिरिराज कुमारि भ्रम तम रबि कर बचन मम ।।

एवं विचार्य हृदये हिमशैलकन्ये
निःशङ्कमत्र भज राम-पदाब्ज-युग्मम् ।
मोहान्धकारपटलं प्रविभेत्तुमार्ये
सम्यक् शृणुष्व रविरश्मिसमं वचो मे ।। २६

सगुनहि अगुनहि नहिं कछु भेदा । गावहिं मुनि पुरान बुध बेदा ।।
अगुन अरूप अलख अज जोई । भगत प्रेम बस सगुन सो होई ।।

नास्त्यन्तरं सगुणनिर्गुणयोश्च किञ्चित्
सर्वे पुराणनिगमा मुनयो वदन्ति ।
यन्नामरूपरहितं यदगोचरं च
भक्तानुरागवशमेति च तद् गुणत्वम् ।। २७

जो गुन रहित सगुन सोइ कैसें । जलु हिम उपल बिलग नहिं जैसें ।।
जासु नाम भ्रम तिमिर पतंगा । तेहि किमि कहिअ बिमोह प्रसंगा ।।

यन्निर्गुणं गिरिसुते सगुणं तदेव
तोयं हिमाद्रितनये न हिमाद् विभिन्नम् ।
मोहान्धकार-रविरित्यभिधीयते यद्
मोहस्य तत्र गिरिपुत्रि कुतोऽस्ति वार्ता ।। २८

राम सच्चिदानंद दिनेसा । नहिं तहँ मोह निसा लवलेसा ।।
सहज प्रकासरूप भगवाना । नहिं तहँ पुनि बिग्यान बिहाना ।।

सच्चित्सुखद्युतिरसौ रघुरामसूर्यः
नामापि नात्र गिरिजे मतिमोहरात्र्याः ।

तेजःस्वभावमिदमस्ति हि रामरूपं
विज्ञानकल्पमपि तत्र कुतोऽस्ति मुग्धे ।। २९

हरष बिषाद ग्यान अग्याना । जीव धर्म अहमिति अभिमाना ।।
राम ब्रह्म ब्यापक जग जाना । परमानंद परेस पुराना ।।

ज्ञानादयश्च हि तथा सुखदुःखभोगाः
सर्वे हि शैलतनये खलु जीवधर्माः ।
ब्रह्मस्वरूपमवगच्छति रामभद्रं
सर्वं जगद् विभुमिमं पुरुषं पुराणम् ।। ३०

–पुरुष प्रसिद्ध प्रकास निधि प्रगट परावर नाथ ।
रघुकुलमनि मम स्वामि सोइ कहि सिवँ नायउ माथ ।।

आलोकधाम परमः पुरुषः पुराणः
स्वामी समग्रजगतो रघुवंशकेतुः ।
रामः स चैव गिरिजे मम चापि नाथः''
उक्त्वैवमात्मनि ननाम शिवः स्वनाथम् ।। ३१

निज भ्रम नहि समुझहिं अग्यानी । प्रभु पर मोह धरहिं जड़प्रानी ।।
जथा गगन घन पटल निहारी । झाँपेउ भानु कहहिं कुबिचारी ।।

''अज्ञस्तु चात्मगतमोहतमः परेशे
सच्चिन्निधानपरमात्मनि कल्पतेऽसौ ।
दृष्ट्वा यथाभ्रपटलं गगने विमूढः
प्रच्छादितं हि मनुते सवितारमभ्रैः ।। ३२

चितव जो लोचन अंगुलि लाएँ । प्रगट जुगल ससि तेहि के भाएँ ।।
उमा राम बिषइक अस मोहा । नभ तम धूम धूरि जिमि सोहा ।।

पश्यत्यहो निजकराङ्गुलिपीडिताक्षः
चन्द्रद्वयं नियतमेव यथान्तरिक्षे ।
एवं हि रामविषयेऽपि धियो विमोहः
धूमान्धकाररजसां नभसीव भासः ।। ३३

बिषय करन सुर जीव समेता । सकल एक तें एक सचेता ।।
सब कर परम प्रकासक जोई । राम अनादि अवधपति सोई ।।

पञ्चेन्द्रियाणि विषयानवभासयन्ति
पञ्चेन्द्रियाधिमतयश्च तथेन्द्रियाणि ।
जीवः प्रकाशयति चाप्यधिदेवतास्ताः
सर्वान् प्रकाशयति यः स हि रामभद्रः ।। ३४

जगत प्रकास्य प्रकासक रामू । मयाधीस ग्यान गुन धामू ।।
जासु सत्यता तें जड़ माया । भास सत्य इव मोह सहाया ।।

द्योत्यं जगद्द्युतिकरश्च हि रामभद्रः
मायापतिः स गुणधाम विभुः परेशः ।
सत्त्वेन सत्यमिव भात्यनृतापि यस्य
माया जडाप्यजडवन्ननु मोहयुक्ता ।। ३५

—रजत सीप महुँ भास जिमि जथा भानु कर बारि ।
जदपि मृषा तिहुँ काल सोइ भ्रम न सकइ कोउ टारि ।।

यावद् विभाति रविभा मृगतृष्णिकेव
शुक्तौ यथा रजतधीर्भ्रममूलकैव ।
मिथ्यापि सन्नवगमः स चिरंतनोऽयम्
कस्तं निरस्तुमिह शैलसुते समर्थः ।। ३६

एहि बिधि जग हरि आश्रित रहई । जदपि असत्य देत दुख अहई ।।
जौं सपनें सिर काटै कोई । बिनु जागें न दूरि दुख होई ।।

रामाश्रयं जगदिदं च तथैव सर्वम्
यद्यप्यसत्यमतिदुःखकरं सदा तद् ।
स्वप्नप्रहारजनिता शिरसो रुजा वा
यावत्प्रबोधनमुमे न हि याति नाशम् ।। ३७

जासु कृपाँ अस भ्रम मिटि जाई । गिरिजा सोइ कृपाल रघुराई ।।
आदि अंत कोउ जासु न पावा । मति अनुमानि निगम अस गावा ।।

श्रीरामचन्द्रकृपयैति मतिभ्रमोऽन्तं
नाथः स शैलतनये करुणासमुद्रः ।

आद्यन्तहीनविभुरेष सनातनोऽयम्
वेदैश्चतुर्भिरपि केवलतर्कगम्यः ॥ ३८

बिनु पद चलइ सुनइ बिनु काना । कर बिनु करम करइ बिधि नाना ॥
आनन रहित सकल रस भोगी । बिनु बानी बकता बड़ जोगी ॥
तन बिनु परस नयन बिनु देखा । ग्रहइ घ्रान बिनु बास असेषा ॥
असि सब भाँति अलौकिक करनी । महिमा जासु जाइ नहिं बरनी ॥

धावत्यसौ रघुवरो रहितः पदाभ्याम्
आकर्णयत्यपि विना श्रवणेन रामः ।
भूत्वाकरोऽपि कुरुते बहुकार्यमेषः
सर्वान् रसाननुभवत्यमुखोऽपि सैषः ॥ ३९
वक्ता महान् स हि गिरा रहितोऽपि रामः
स्पर्शप्रतीतिरपि चास्य तनुं विनैव ।
अघ्राण एव हि स जिघ्रति गन्धजातम्
पश्यत्यचक्षुरपि सर्वमसौ प्रपञ्चम् ॥ ४०
एवं गृणन्ति रघुनाथमथागमास्ते
ब्रह्मस्वरूपचरिते गिरिजेऽतिचित्रे ।
दिङ्मात्रदर्शनमिदं खलु शैलकन्ये
कोऽलं हि वर्णयितुमस्य गुणान् समग्रान् ॥ ४१

—जेहि इमि गावहिं बेद बुध जाहि धरहिं मुनि ध्यान ॥
सोइ दसरथ सुत भगत हित कोसलपति भगवान ॥

गायन्ति यं बुधजनाः श्रुतयश्च सर्वाः
ध्यायन्ति यं मुनिवराः सततं मनस्सु ।
भक्तप्रियः स गिरिजे प्रभुरामभद्रः
सैवैष दाशरथिरप्यचलेशकन्ये ॥ ४२

कासीं मरत जंतु अवलोकी । जासु नाम बल करउँ बिसोकी ॥
सोइ प्रभु मोर चराचर स्वामी । रघुबर सब उर अंतरजामी ॥

काशीपुरेऽपि मरणोन्मुखमार्तजीवं
तन्नामगौरवबलाद्धि करोम्यशोकम् ।

स्वामी स मे स्थिरचराधिपतिः सदासौ
सर्वान्तरङ्गविलसद् रघुवंशकेतुः ॥ ४३

बिबसहुँ जासु नाम नर कहहीं । जनम अनेक रचित अघ दहहीं ॥
सादर सुमिरन जे नर करहीं । भव बारिधि गोपद इव तरहीं ॥

श्रीरामनाम विवशोऽपि जपन्नरोऽत्र
भस्मीकरोति शतजन्मकृतापराधान् ।
भक्त्या जपन् पुनरिदं भवसिन्धुमेनम्
अत्येति गोष्पदमिवात्र हि शैलकन्ये ॥ ४४

राम सो परमातमा भवानी । तहँ भ्रम अति अबिहित तव बानी ॥
अस संसय आनत उर माहीं । ग्यान बिराग सकल गुन जाहीं ॥

रामः स शैलतनये परमेश्वरोऽसौ
तस्मिन् कुतो गिरिसुते भ्रमसंशयौ ते ।
ज्ञानं विरक्तिमथवा कृतपुण्यजालम्
सर्वं हि याति विलयम् भ्रमसंशयाभ्याम् ॥" ४५

सुनि सिव के भ्रम भंजन बचना । मिटि गै सब कुतरक कै रचना ॥
भइ रघुपति पद प्रीति प्रतीती । दारुन असंभावना बीती ॥

शम्भोस्तदा भ्रमनिरासकरं वचस्तद्
शृत्वागलत् गिरिसुतामतिमोहजालम् ।
श्रीरामपादरतिरप्यभवत् प्रगाढा
मिथ्याविकल्पनमगाद् विलयं समग्रम् ॥ ४६

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
उमा-तर्क-निरसनं नाम पञ्चविंशस्तरङ्गः ।

—पुनि पुनि प्रभु पद कमल गहि जोरि पंकरुह पानि ।
बोलीं गिरिजा बचन बर मनहुँ प्रेम रस सानि ।।

स्पृष्ट्वा पुनः पुनरपि प्रभुपादपद्मे
बद्ध्वा कराब्जयुगलाञ्जलिरद्रिकन्या ।
भक्त्यैकभावरसपूरितमानसा तम्
प्रीताऽब्रवीत् प्रभुवरं वरवाक्यमेतद् ।। १

ससि कर सम सुनि गिरा तुम्हारी । मिटा मोह सरदातप भारी ।।
तुम्ह कृपाल सबु संसउ हरेऊ । राम स्वरूप जानि मोहि परेऊ ।।

"श्रुत्वा वचः शशिमयूखसुरम्यशीतम्
मन्मानसातिखरशारदतापमोहः ।
यातः क्षयं, विगलितं च वितर्कजालं
श्रीरामरूपमपि तद्विदितं धिया मे ।। २

नाथ कृपाँ अब गयउ बिषादा । सुखी भयउँ प्रभु चरन प्रसादा ।।
अब मोहि आपनि किंकरि जानी । जदपि सहज जड़ नारि अयानी ।।

नाथ त्वदीयदययापहृतो विषादः
त्वत्पादपद्मकृपया सुखितास्मि सद्यः ।
अज्ञान-मोह-विवशा ललनामतिर्मे
यद्यप्यवेहि खलु मां तव पाददासीम् ।। ३

प्रथम जो मैं पूछा सोइ कहहू । जौं मो पर प्रसन्न प्रभु अहहू ।।
राम ब्रह्म चिनमय अबिनासी । सर्ब रहित सब उर पुर बासी ।।

प्रीतोऽसि संप्रति महेश यदि स्वदास्यां
तन्मे निरूपय सुरेश्वर पूर्वपृष्टम् ।
ब्रह्मैव चिन्मयमनामगुणं स रामः
सर्वान्तरङ्गपुरवासि न संशयो मे ।। ४

नाथ धरेउ नरतनु केहि हेतू । मोहि समुझाइ कहहु बृषकेतू ।।
उमा बचन सुनि परम बिनीता । रामकथा पर प्रीति पुनीता ।।

आविर्बभूव तदिदं कथमत्र नाथ
धृत्वा मनुष्यतनुरूपमिदं वद त्वम् ।"
श्रुत्वा विनीतवचनं तदिदं स्वपत्न्याः
श्रीरामचन्द्रशुचिवृत्तकुतूहलिन्याः ।। ५

–हियँ हरषे कामारि तब संकर सहज सुजान ।
बहु बिधि उमहि प्रसंसि पुनि बोले कृपानिधान ।।

तुष्टो हृदि स्मररिपुः स निसर्गसुज्ञः
शम्भुः पुनः पुनरुमां प्रशशंस पूर्वम् ।
पश्चादुवाच सुवचः स कृपानिधानम्
शैलाधिराजतनयामिदमात्मजायाम् ।। ६

–सुनु सुभ कथा भवानि रामचरितमानस बिमल ।
कहा भुसुंडि बखानि सुना बिहग नायक गरुड़ ।।

"पुण्यं भवानि चरितं रघुवंशकेतो-
राकर्णयाद्य सकलं कथयामि तेऽहम् ।
प्राकीर्तयत् प्रथममेतदुमे भुशुण्डिः
पूर्वं द्विजाधिपतये गरुडाय सर्वम् ।। ७

सो संबाद उदार जेहि बिधि भा आगें कहब ।
सुनहु राम अवतार चरित परम सुंदर अनघ ।।

अग्रे समग्रमगजे कथयामि तेऽहम्
संभाषणं तदुभयोरतिपुण्यशीलम् ।
पूर्वं शृणुष्व गिरिजे भवतापहारम्
रामावतारचरितं परमं पवित्रम् ।। ८

हरि गुन नाम अपार कथा रूप अगनित अमित ।
मैं निज मति अनुसार कहउँ उमा सादर सुनहु ।।

अन्तो न चास्ति तु हिमाद्रिसुते कथायास्
तन्नामरूपगुणसंघपरंपरायाः ।

शक्तिम् मतेरनुसरन् कथयामि तेऽहम्
त्वं चापि सादरमिमामवधारयोमे ॥ ९

सुनु गिरिजा हरिचरित सुहाए । बिपुल बिसद निगमागम गाए ॥
हरि अवतार हेतु जेहि होई । इदमित्थं कहि जाइ न सोई ॥

रम्यं सुविस्तृतमिदं विशदं चरित्रम्
आकर्णयाचलसुते श्रुतिभिः प्रगीतम् ।
यद्‌हेतुनावतरते गिरिजे हरिस्तद्
को वेत्ति सम्यगिदमित्थमिति ध्रुवार्थम् ॥ १०

राम अतर्क्य बुद्धि मन बानी । मत हमार अस सुनहि सयानी ॥
तदपि संत मुनि बेद पुराना । जस कछु कहहिं स्वमति अनुमाना ॥
तस मैं सुमुखि सुनावउँ तोही । समुझि परइ जस कारन मोही ॥

रामस्तु नात्र मनसा गिरया धिया वा
शक्योऽवगन्तुमिति मे मतिरद्रिकन्ये ।
सन्तः पुराणनिगमा मुनयस्तथैते
यावद् यथा च कथयन्ति तथाभिधास्ये ॥ ११

जानन्ति रामचरितं सकला हि लोके
स्वेयत्तया परिमितं गिरिराजकन्ये ।
यावन्मयापि विदितं कथयामि तावत्
चन्द्रानने शृणु ततो रघुवीरवृत्तम् ॥ १२

जब जब होइ धरम कै हानी । बाढ़हिं असुर अधम अभिमानी ॥
करहिं अनीति जाइ नहिं बरनी । सीदहिं बिप्र धेनु सुर धरनी ॥

धर्मो यदा ह्रसति भूमितलेऽद्रिकन्ये
दृप्ताधमाश्च बलिनो दनुजा यदा ते ।
अत्राचरन्त्यविनयं गिरिजे यथेष्टम्
सीदन्ति धेनु-धरणी-सुजनाः सुराश्च ॥ १३

तब तब प्रभु धरि बिबिध सरीरा । हरहिं कृपानिधि सज्जन पीरा ।।

आविर्भवत्यचलपुत्रि तदा तदासौ
धृत्वा हरिः सगुणरूपमिह प्रपञ्चे ।
कारुण्यहृत्स हि सताम् अपहर्तुमार्तिम्
रूपाणि धारयति नैकविधानि रामः ।। १४

–असुर मारि थापहिं सुरन्ह राखहिं निज श्रुति सेतु ।
जग बिस्तारहिं बिसद जस राम जन्म कर हेतु ।।

कृत्वाऽद्रिजे दनुजदण्डनमेष रामः
प्रस्थाप्य शासनमिहात्र पुनः सुराणाम् ।
तन्वन् यशः सुविमलं श्रुतिरक्षकोऽसौ
भारं भुवोऽपनयतीह युगे युगेऽपि ।। १५

सोइ जस गाइ भगत भव तरहीं । कृपासिंधु जन हित तनु धरहीं ।।

श्रीरामनामशुभसंस्तवनेन भक्ताः
सर्वे तरन्ति भवसागरमद्रिकन्ये ।
आविर्भवत्यखिललोकहितार्थमेवम्
रामो दयानिधिरसौ भुवि शैलकन्ये ।। १६

राम जनम के हेतु अनेका । परम बिचित्र एक तें एका ।।
जनम एक दुइ कहउँ बखानी । सावधान सुनु सुमति भवानी ।।

रामः परावरगुरुर्धरणीतलेऽस्मिन्
प्राप्नोति नश्वरतनुं बहुहेतुभिश्च ।
ज्ञातुं न कोऽप्यलमिहाखिलचित्रहेतून्
एक-द्वि-जन्मचरिते कथये शृणु त्वम् ।। १७

द्वारपाल हरि के प्रिय दोऊ । जय अरु बिजय जान सब कोऊ ।।
बिप्र श्राप तें दूनउ भाई । तामस असुर देह तिन्ह पाई ।।

दौवारिकौ बहुमतौ गिरिजे हरेर्द्वौ
एको जयेत्यभिहितो विजयेति चान्यः ।
शप्तौ द्विजेन दनुजाधमयोनिजातौ
द्वौ चात्र तामसतनू सति लब्धवन्तौ ।। १८

कनककसिपु अरु हाटकलोचन । जगत बिदित सुरपति मद मोचन ॥
बिजई समर बीर बिख्याता । धरि बराह बपु एक निपाता ॥
होइ नरहरि दूसर पुनि मारा । जन प्रहलाद सुजस बिस्तारा ॥

नाम्ना हिरण्यकशिपुश्च तयोरथैकः
शैलात्मजे तदितरश्च हिरण्यनेत्रः ।
ख्यातौ सुराधिपतिमानविमोचकावि-
त्येतौ सदा विजयिनौ समरे प्रवीरौ ॥ १९

एको हिरण्यनयनो निहतोऽद्रिकन्ये
धृत्वा वराहतनुमत्र सुरेश्वरेण ।
हत्वापरं धृतनृसिंहवपुः स देवः
प्रह्लादकीर्तिममलां विततान लोके ॥ २०

—भए निसाचर जाइ तेइ महाबीर बलवान ।
कुंभकरन रावन सुभट सुर बिजई जग जान ॥

व्यापादितौ सुररिपू दनुजौ प्रवीरौ
जातौ पुनर्विदितविक्रम-दैत्य-योनौ ।
एकस्तयोर्गिरिसुते स हि कुम्भकर्णः
तद्बन्धुरेव च परः स दशाननोऽसौ ॥ २१

मुकुत न भए हते भगवाना । तीनि जनम द्विज बचन प्रवाना ॥
एक बार तिन्ह के हित लागी । धरेउ सरीर भगत अनुरागी ॥

यद्यप्यमू भगवता निहतौ, न मुक्तौ
जन्मत्रयावधिरुमे स हि विप्रशापः ।
जातः पुनः स भगवाननयोर्हितार्थम्
धृत्वा तनुं भुवि दयानिधिरद्रिकन्ये ॥ २२

कस्यप अदिति तहाँ पितु माता । दसरथ कौसल्या बिख्याता ॥
एक कलप एहि बिधि अवतारा । चरित पवित्र किए संसारा ॥

जातादितिश्च सति कोसलदेशकन्या
जातोऽद्रिजे दशरथस्तु च कश्यपोऽसौ ।
पुत्रस्तयोरजनि सैव हरिस्तदायं
कल्पेऽकरोच्चरितमेष परं पवित्रम् ॥ २३

एक कलप सुर देखि दुखारे । समर जलंधर सन सब हारे ॥
संभु कीन्ह संग्राम अपारा । दनुज महाबल मरइ न मारा ॥

युद्धे जलंधरपराजितदेववृन्दाः
क्लान्ता बभूवुरपरावसरे यदैते ।
शम्भुस्तदा स दनुजेन चकार युद्धं
नष्टो न चामितबलस्तु महारिपुः सः ॥ २४

परम सती असुराधिप नारी । तेहिं बल ताहि न जितहिं पुरारी ॥
—छल करि टारेउ तासु ब्रत प्रभु सुर कारज कीन्ह ।
जब तेहिं जानेउ मरम तब श्राप कोप करि दीन्ह ॥
तासु श्राप हरि दीन्ह प्रमाना । कौतुकनिधि कृपाल भगवाना ॥

आसीत् सती च महती दनुजेन्द्रजाया
नालं यतस्त्रिपुरहापि च हन्तुमेनम् ।
भग्नं व्रतं हि हरिणा च्छलिना तदास्याः
संपादितं गिरिसुते सुरकार्यमेवम् ॥ २५

यावत् सती हरिकृतं कपटं विजज्ञे
क्रुद्धा शशाप गिरिजे भगवन्तमेषा ।
शापं च कौतुकनिधिः करुणासमुद्रः
प्रत्यग्रहीत् हरिरुमे गतभर्तृकायाः ॥ २६

तहाँ जलंधर रावन भयऊ । रन हति राम परम पद दयऊ ॥

जातः स चैव गिरिपुत्रि जलंधरोऽसौ
भूयोऽपि दैत्यनृपतिर्भुवि रावणाख्यः ।
युद्धे यदा तु निजघान हरिस्तमार्ये
मुक्तोऽभवत्स दनुजो गिरिराजकन्ये ॥ २७

एक जनम कर कारन एहा । जेहि लगि राम धरी नरदेहा ॥
प्रति अवतार कथा प्रभु केरी । सुनु मुनि बरनी कबिन्ह घनेरी ॥

यद्धेतुना नरतनुं हरिरत्र दध्रे
सैषोऽस्ति शैलतनये शृणु सावधानम् ।
अत्यद्भुता हरिकथा प्रतिजन्मनीयं
सा वर्णिता कविभिरत्र बहुप्रकारम् ॥ २८

नारद श्राप दीन्ह एक बारा । कलप एक तेहि लगि अवतारा ।।
गिरिजा चकित भईं सुनि बानी । नारद बिष्नुभगत पुनि ग्यानी ।।

देवर्षिरेकसमये च शशाप येन
प्रादुर्बभूव पुनरेष हरिर्धरायाम् ।"
सुज्ञः कथं स हरिभक्तवरः सुरर्षि-
र्देवं शपेदिति बभूव च विस्मितोमा ।। २९

कारन कवन श्राप मुनि दीन्हा । का अपराध रमापति कीन्हा ।।
यह प्रसंग मोहि कहहु पुरारी । मुनि मन मोह आचरज भारी ।।

"यन्नारदस्य च बभूव मतिर्विमुग्धा
तन्मेऽतिचित्रमिव नाथ विभाति नूनम् ।
लक्ष्मीपतेः कथय मामपराधमेनं
शप्तः स येन सुरनाथ सुरर्षिणैवम्" ।। ३०

–बोले बिहसि महेस तब ग्यानी मूढ़ न कोइ ।
जेहि जस रघुपति करहिं जब सो तस तेहि छन होइ ।।

श्रुत्वेति शैलतनयावचनं महेशः
किञ्चिद्विहस्य वचनं विदधे तदेदम् ।
"विज्ञो न चात्र गिरिजे न च कोऽपि मूढः
यादृक् कृतो रघुवरेण स तादृगेव ।।" ३१

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
श्रीरामपूर्वावतारवर्णनं नाम षड्विंशस्तरङ्गः ।

–कहउँ राम गुन गाथ भरद्वाज सादर सुनहु ।
भव भंजन रघुनाथ भजु तुलसी तजि मान मद ।।

"अग्रे शृणुष्व रघुरामगुणौघवृत्तम्
पुण्यं भवाब्धितरणं कथयामि तुभ्यम् ।"
ऊचे यथा मुनिवरं स च याज्ञवल्क्यः
गाथां कविः कथयते तुलसी तथैवः ।। १

"श्रीरामपुण्यचरितं दुरितापहारि
प्रध्वंसते भवभयं तनुते हितं नः ।
रामं सदा भजत मुक्तमदाभिमानाः"
लोकान् कविः कथयते तुलसी तथैवः ।। २

हिमगिरि गुहा एक अति पावनि । बह समीप सुरसरी सुहावनि ।।
आश्रम परम पुनीत सुहावा । देखि देवरिषि मन अति भावा ।।

आसीद् गुहा हिमनगेऽतिपवित्ररम्या
तीरे सुशीतल-सुरम्य-सुरापगायाः ।
तं चाश्रमं परमपावनमद्रिसानौ
दृष्ट्वा बभूव मुदितः स मुनिः सुराणाम् ।। ३

निरखि सैल सरि बिपिन बिभागा । भयउ रमापति पद अनुरागा ।।
सुमिरत हरिहि श्राप गति बाधी । सहज बिमल मन लागि समाधी ।।

शैलं निरीक्ष्य सरितं च वनश्रियं च
प्रादुर्बभूव हरिभक्तिरथास्य चित्ते ।
एकस्थल-स्थिति-निरोधक-शापमुक्त-
श्चित्तं चकार विमलं निरतं समाधौ ।। ४

मुनि गति देखि सुरेस डेराना । कामहि बोलि कीन्ह सनमाना ।।

दृष्ट्वा तथा सुरमुनिं तपसि स्थितं तं
देवेश्वरः स्वपदलोपभयाभिभूतः ।
सद्यः सगौरवमथाजुहुवे मनोजम्
प्रोवाच चारुगिरया समये सखायम् ।। ५

सहित सहाय जाहु मम हेतू । चलेउ हरषि हियँ जलचरकेतू ।।

" गच्छाद्रिराजमयि मन्मथ मद्धितार्थम् ।
भङ्क्तुं तपः सुरमुनेः सह मित्रसंघैः । "
श्रुत्वेति भर्तृवचनं मुदितो मनोजः
स्वीकृत्य शासनमगादचलाधिराजम् ।। ६

सुनासीर मन महुँ असि त्रासा । चहत देवरिषि मम पुर बासा ।।
जे कामी लोलुप जग माहीं । कुटिल काक इव सबहि डेराहीं ।।

' राज्यं ध्रुवं स हि जिहीर्षति मे सुरर्षिः '
चित्तं भयातुरमभूदिति देवनेतुः ।
ये लोलुपा जगति कामवशाश्च वा ते
काका यथात्र कुटिला विचरन्ति भीताः ।। ७

–सूख हाड़ लै भाग सठ स्वान निरखि मृगराज ।
छीनि लेइ जनि जान जड़ तिमि सुरपतिहि न लाज ।।

" शुष्कास्थि किं मम मुखादपहर्तुमेषः
सिंहः सतृष्णमवलोकयतेऽत्र भो माम् । "
मत्वैवमात्मनि यथा प्रपलायते श्वा
त्रेपे तथा सुरपतिर्न विशङ्कमानः ।। ८

तेहि आश्रमहिं मदन जब गयऊ । निज मायाँ बसंत निरमयऊ ।।
कुसुमित बिबिध बिटप बहुरंगा । कूजहिं कोकिल गुंजहिं भृंगा ।।

गत्वाश्रमं सुरमुनेः स ससर्ज कामः
मायाबलेन मधुमासमथाद्रिदेशे ।
फुल्लास्तदा बहुविधा विटपाः सुपुष्पैः
भृङ्गा जुगुञ्जुरथ तत्र पिकाश्चुकूजुः ।। ९

चली सुहावनि त्रिबिध बयारी । काम कृसानु बढ़ावनिहारी ।।
रंभादिक सुरनारि नबीना । सकल असमसर कला प्रबीना ।।

प्रोत्साहयन् मनसिजानलमेव वायुः
मन्दः सुगन्धसहितश्च ववौ सुशीतः ।

देवाङ्गनाश्च रतिकेलिकलाविदग्धाः
रम्भादिकाः स्मरसहायकरास्तदासन् ॥ १०

करहिं गान बहु तान तरंगा । बहुबिधि क्रीड़हिं पानि पतंगा ॥
देखि सहाय मदन हरषाना । कीन्हेसि पुनि प्रपंच बिधि नाना ॥

काश्चिज्जगुर्मधुरताननतरङ्गमग्नाः
चिक्रीडुरन्यललनाः सह कन्दुकैश्च ।
प्रोत्साहितो मनसिजोऽपि च वीक्ष्य सर्वाः
मायाप्रपञ्चमसृजद् बहुचित्ररूपम् ॥ ११

काम कला कछु मुनिहि न ब्यापी । निज भयँ डरेउ मनोभव पापी ॥
सीम कि चाँपि सकइ कोउ तासू । बड़ रखवार रमापति जासू ॥

पस्पर्श नैव मुनिराजमनङ्गमाया
ग्रस्तः स्मरः स तु विनाशभियापराधात् ।
यो रक्षितो भगवता स्वयमेव भक्तः
कस्तं प्रतारयितुमर्हति मायया वा ॥ १२

—सहित सहाय सभीत अति मानि हारि मन मैन ।
गहेसि जाइ मुनि चरन तब कहि सुठि आरत बैन ॥

ज्ञात्वा तदा निजपराजयमन्तरङ्गे
कामो भिया सह सुहृद्भिरथाभिभूतः ।
लज्जान्वितः सुरमुनेः प्रणनाम पादौ
तं चार्तमेवमतिदीनवचोभिरूचे ॥ १३

भयउ न नारद मन कछु रोषा । कहि प्रिय बचन काम परितोषा ॥
नाइ चरन सिरु आयसु पाई । गयउ मदन तब सहित सहाई ॥

नासीन्पुनेर्मनसि कोपलवोऽपि यस्मात्
प्रीत्यैव मन्मथमुवाच वचः स तस्मात् ।
नत्वा मुनेः पदयुगं स च कामदेवः
सद्यः सहायसहितश्च ततः प्रतस्थे ॥ १४

मुनि सुसीलता आपनि करनी । सुरपति सभाँ जाइ सब बरनी ॥
सुनि सब कें मन अचरजु आवा । मुनिहि प्रसंसि हरिहि सिरु नावा ॥

गत्वा स्मरः सुरसभाम् अमरर्षिवृत्तम्
व्यज्ञापयत् सह ततः स्वपराभवेन ।
विस्मापयन् सुरगणान् प्रणनाम विष्णुं
तं भूरि भूरि च नुनाव मुनिं सुराणाम् ॥ १५

तब नारद गवने सिव पाहीं । जिता काम अहमिति मन माहीं ॥
मार चरित संकरहि सुनाए । अतिप्रिय जानि महेस सिखाए ॥

"अद्यास्मि मन्मथरिपो विजितस्मरोऽहम्"
दृप्तः सुरर्षिरपि चैवमुवाच शम्भुम् ।
लीलाम् अवर्णयदनङ्गकृतां तदग्रे
मत्वात्मवल्लभममुं च शिवस्तदोचे ॥ १६

बार बार बिनवउँ मुनि तोही । जिमि यह कथा सुनायहु मोही ॥
तिमि जनि हरिहि सुनावहु कबहूँ । चलेहुँ प्रसंग दुराएहु तबहूँ ॥

"याचे पुनः पुनरहं मुनिराज भोस्त्वाम्
मैवं कदापि हरये वद गौरवं स्वम् ।
मह्यं यथात्र कथितः स्वपराक्रमोऽयं
यत्नेन गोपय हरेः सति चावकाशे ॥" १७

–संभु दीन्ह उपदेस हित नहिं नारदहि सोहान ।
भरद्वाज कौतुक सुनहु हरि इच्छा बलवान ॥

"नासीत् प्रियं हितवचोऽपि च तत्सुरर्षे-"
रूचे वचो मुनिवरं स च याज्ञवल्क्यः ।
"नूनं मुने बलवती परमेश्वरेच्छा
तत्कौतुकं शृणु मया परिकीर्त्यमानम् ॥" १८

राम कीन्ह चाहहिं सोइ होई । करै अन्यथा अस नहिं कोई ।।
संभु बचन मुनि मन नहिं भाए । तब बिरंचि के लोक सिधाए ।।

"यातो यतः सुरमुनिः स विरिञ्चिलोकम्
शम्भोरुपेक्ष्य हितकारकमप्यथोक्तम् ।
रामेप्सितं यदिह तच्च भवत्यवश्यं
कस्तन्मुनेऽत्र परिवर्तयितुं समर्थः ।। १९

एक बार करतल बर बीना । गावत हरि गुन गान प्रबीना ।।
छीरसिंधु गवने मुनिनाथा । जहँ बस श्रीनिवास श्रुतिमाथा ।।

गायन् हरेर्गुणगणानथ चैकदैष:
क्षीराब्धिमागमवराङ्गहरेर्निवासम् ।
धृत्वा करे श्रुतिमनोहरचारुतन्त्री-
मीयाय गायनकलाकुशलः सुरर्षिः ।। २०

हरषि मिले उठि रमानिकेता । बैठे आसन रिषिहि समेता ।।
बोले बिहसि चराचर राया । बहुते दिनन कीन्हि मुनि दाया ।।

प्रत्युज्जगाम मुदितश्च रमापतिस्तम्
स्वार्धासने समुपवेश्य च सच्चकार ।
ऊचे विहस्य च चराचरपातकस्तम्
"नूनं चिरेण मुनिराज भवत्कृपेयम् ।।" २१

काम चरित नारद सब भाषे । जद्यपि प्रथम बरजि सिवँ राखे ।।
अति प्रचंड रघुपति कै माया । जेहि न मोह अस को जग जाया ।।

इत्युक्तवन्तममरर्षिरुवाच विष्णुं
दिष्टः स यद्यपि शिवेन, मनोजवृत्तम् ।
माया मुने रघुपते र्महती न शंका ।
को मोहितस्त्रिभुवने न तया बलिष्ठः ।। २२

—रूख बदन करि बचन मृदु बोले श्रीभगवान ।
तुम्हरे सुमिरन तें मिटहिं मोह मार मद मान ।।

कृत्वारसं वदनमेवमुवाच विष्णुः
स्निग्धं सुधामधुरया गिरया सुरर्षिम् ।

"माया मदस्मरविकारविनाशकं ते
पुण्यप्रदं स्मरणमात्रमिहामरर्षे ॥ २३

सुनु मुनि मोह होइ मन ताकें । ग्यान बिराग हृदय नहिं जाकें ॥
ब्रह्मचरज ब्रत रत मतिधीरा । तुम्हहि कि करइ मनोभव पीरा ॥

ज्ञानं न यस्य हृदये न तथा विरक्तिः
मुह्यत्यसौ शृणु मुने स्मरमाययात्र ।
न ब्रह्मचर्यनियमस्थितधीरचित्तं
त्वत्सदृशं तु परिपीडयते स्मरोऽपि ॥" २४

नारद कहेउ सहित अभिमाना । कृपा तुम्हारि सकल भगवाना ॥

मत्वा स्वगौरवपरं हरिवाक्यमेतद्
प्रीतः सुरर्षिरवदत् तमिदं सगर्वम् ।
"लक्ष्मीपते ननु कृपा मयि सा तवैषा
यद्दुर्जयं विजितवान् अहमद्य कामम् ॥" २५

करुनानिधि मन दीख बिचारी । उर अंकुरेउ गरब तरु भारी ॥

आकर्ण्य तद् दुरभिमानपरं सुरर्षे-
र्वाक्यं व्यचिन्तयदिदं मनसा रमेशः ।
नूनं मुनेर्मनसि गर्वतरोः प्ररोहः
निःसंशयं समुदितो जितमन्मथस्य ॥ २६

बेगि सो मैं डारिहउँ उखारी । पन हमार सेवक हितकारी ॥
मुनि कर हित मम कौतुक होई । अवसि उपाय करबि मैं सोई ॥

उन्मूलयामि तमहं तु विना विलम्बम्
संपूरयामि निजभक्तहितव्रतं मे ।
कार्यं तथात्र हि यथास्य हितं सुरर्षेः
कश्चिन्ममापि खलु केलिकलाविलासः ॥ २७

तब नारद हरि पद सिर नाई । चले हृदयँ अहमिति अधिकाई ॥
श्रीपति निज माया तब प्रेरी । सुनहु कठिन करनी तेहि केरी ॥

नत्वा पदौ भगवतश्च मुनिः प्रतस्थे
प्रवृद्धदर्पपरिपूरितमानसोऽसौ ।

लक्ष्मीपतिः प्रविततान ततः स्वलीलाम्
तत्कौतुकं शृणु मुने सकलं कथायाम् ।। २८

—बिरचेउ मग महुँ नगर तेहिं सत जोजन बिस्तार।
श्रीनिवासपुर तें अधिक रचना बिबिध प्रकार ।।

श्रीशः स योजनशतं प्रसृतं तदैकं
दिव्यं ससर्ज नगरं विबुधर्षिमार्गे ।
माया-विनिर्मितमिदं बहुसंविधानं
नूनं रमापतिपुरादपि रम्यशोभम् ।। २९

बसहिं नगर सुंदर नर नारी। जनु बहु मनसिज रति तनुधारी ।।
तेहिं पुर बसइ सीलनिधि राजा। अगनित हय गय सेन समाजा ।।

पौराश्च तत्र रति-मन्मथरूपवन्तः
स्वामी च शीलनिधिरित्यधिपः सुशीलः ।
हस्त्यश्वसैनिकरथप्रथितैरनीकैः
स्वामी शशास च पुरं जयिनां पुरोगः ।। ३०

सत सुरेस सम बिभव बिलासा। रूप तेज बल नीति निवासा ।।
बिस्वमोहनी तासु कुमारी। श्री बिमोह जिसु रूपु निहारी ।।

तुल्यो विलासविभवादिषु यो मघोना
यो रूपतेजनिधिरेव नयार्थविज्ञः ।
कन्या व्यमोहयदथास्य यथार्थनाम्नी
रूपेण विश्वमखिलं च तथेन्द्रपत्नीम् ।। ३१

सोइ हरिमाया सब गुन खानी। सोभा तासु कि जाइ बखानी ।।
करइ स्वयंबर सो नृपबाला। आए तहँ अगनित महिपाला ।।

सा मोहिनी खनिरिवाखिलसद्गुणानाम्
कस्तद्गुणौघमिह वर्णयितुं समर्थः ।
यावत्स्वयंवरमियेष च कर्तुमेषा
तावत्समाययुरनेकनृपाः पुरेऽस्मिन् ।। ३२

मुनि कौतुकी नगर तेहिं गयऊ । पुरबासिन्ह सब पूछत भयऊ ।।
सुनि सब चरित भूप गृहँ आए । करि पूजा नृप मुनि बैठाए ।।

गत्वा पुरं सुरमुनिश्च कुतूहलेन
श्रुत्वा स्वयंवरसुवृत्तमपि प्रजाभ्यः ।
राज्ञस्ततः स भवनं समुपाजगाम
राज्ञाप्यपूजयत नन्दितमानसेन ।। ३३

–आनि देखाई नारदहि भूपति राजकुमारि ।
कहहु नाथ गुन दोष सब एहि के हृदयँ बिचारि ।।

तां दर्शयन्नरपतिः स्वसुतां सुरर्षि
व्यज्ञापयत्सविनयं दुहितुर्हितैषी ।
"हे नाथ, मे कथय दोषगुणान् सुतायाः
सम्यग् विचिन्त्य मनसा सकलार्थविज्ञ ।। " ३४

देखि रूप मुनि बिरति बिसारी । बड़ी बार लगि रहे निहारी ।।

श्रुत्वेति नारदमुनिर्नृपतेः सुतायाः
रूपं ददर्श निपुणं बहुचारुरम्यम् ।
विस्मृत्य कामविवशः स्वविरक्तिभावम्
तस्थौ चिरं दुहितरं स निरीक्षमाणः ।। ३५

लच्छन तासु बिलोकि भुलाने । हृदयँ हरष नहिं प्रगट बखाने ।।

राज्ञः सुतां समवलोक्य सुरूपयुक्ताम्
स्वात्मानमप्यथ स विस्मृतवान् सुरर्षिः ।
ज्ञात्वा सुलक्षणयुतामपि राजकन्याम्
प्रीतोऽपि चात्मनि जगाद न चैव किञ्चित् ।। ३६

जो एहि बरइ अमर सोइ होई । समरभूमि तेहि जीत न कोई ।।
सेवहिं सकल चराचर ताही । बरइ सीलनिधि कन्या जाही ।।

"यं चैव राजदुहितात्र वरिष्यतीयम्
मृत्युंजयः स हि भवेत् नृपतिर्न शङ्का ।
जेतुं न कश्चिदपि तं समरे समर्थः
सेविष्यतेऽपि च सदा स चराचराभ्याम् ।। " ३७

लच्छन सब बिचारि उर राखे । कछुक बनाइ भूप सन भाषे ।।
सुता सुलच्छन कहि नृप पाहीं । नारद चले सोच मन माहीं ।।
करौं जाइ सोइ जतन बिचारी । जेहि प्रकार मोहि बरै कुमारी ।।

एवं विचिन्त्य मनसा स मुनिः सुराणाम्
प्राकाशयन्न च गुणान् नृपतेः सुतायाः ।
" कन्या हि ते नरपते शुभलक्षणेयम् "
इत्येव भूपमवदत् प्रकटं सुरर्षिः ।। ३८

लावण्यमोहितमतिस्तु ततः सुरर्षि-
र्गच्छन् पथात्मनि विचिन्तितवाँस्तदेवम् ।
" कार्यं तदत्र हि मया नियतं यथैषा
कन्या वरं मदितरं न वरिष्यतीहि ।। ३९

जप तप कछु न होइ तेहि काला । हे बिधि मिलइ कवन बिधि बाला ।।

जापेन नैव सुलभा खलु सुन्दरीयम्
नैषा सुता नरपतेस्तपसापि लभ्या ।
लभ्या कथं हि ननु सा वद मे विधातर् "
देवर्षिचित्तमिति सोत्सुकमेतदर्थे ।। ४०

—एहि अवसर चाहिअ परम सोभा रूप बिसाल ।
जो बिलोकि रीझै कुअँरि तब मेलै जयमाल ।।

" सुविशालालंकरणं रूपं चैवं सुचारुरमणीयम् ।
नियतोपायौ चैतौ मोहयितुं तां मनोहरां कन्याम् ।। ४१

शोभारूपविमुग्धा तदा कुमारी च वर्जयित्वान्यान् ।
मत्कण्ठे जयमालां समर्पयिष्यत्यवश्यमनुरक्ता ।। ४२

हरि सन मागौं सुंदरताई । होइहि जात गहरु अति भाई ।।

तदहं संप्रति याचे हरये सुमनोहरं हि तद्रूपम् ।
हरिसंनिकटे गन्तुं प्रार्थयितुं वा कुतोऽस्ति मे समयः ।। ३४

मोरें हित हरि सम नहिं कोऊ । एहि अवसर सहाय सोइ होऊ ॥

हरिसदृशस्तु संप्रत्यन्यः कोऽपि न ममात्र हितकर्ता ।
सैव श्रीहरिरेवं कार्येऽस्मिन् मे सहायको नान्यः ॥" ४४

बहुविधि विनय कीन्हि तेहि काला । प्रगटेउ प्रभु कौतुकी कृपाला ॥

विचिन्तयन्निति मनसा जगाम हरिमेव नारदः शरणम् ।
बहुविधमनुनीतोऽसौ हरिरपि चाविर्बभूव तत्पुरतः ॥ ४५

प्रभु बिलोकि मुनि नयन जुड़ाने । होइहि काजु हिएँ हरषाने ॥

दृष्ट्वा हरिं सुरर्षेरानन्दाश्रुप्रपूरिते नेत्रे ।
'सिद्धं संप्रति कार्यं' मत्वैवं नारदस्तदा मुमुदे ॥ ४६

अति आरति कहि कथा सुनाई । करहु कृपा करि होहु सहाई ॥

कथयामास सुदीनं हरये सर्वं स्वयंवरोदन्तम् ।
"कुरु मे साहाय्यं, हे हरे, त्वदन्यत्र चास्ति मे शरणम् ॥" ४७

आपन रूप देहु प्रभु मोही । आन भाँति नहिं पावौं ओही ॥

"दास्यसि यदि ते रूपं कञ्चित्कालं रमापते मह्यम् ।
जेता स्वयंवरेऽहं पश्याम्यन्यं प्रभो न चोपायम् ॥ ४८

जेहि बिधि नाथ होइ हित मोरा । करहु सो बेगि दास मैं तोरा ॥

"दासोऽस्म्यहं हरे ते, यथा हितं मे तथा कुरु क्षिप्रम् ।"
एवं बहुविधमार्तं मुनिः सुराणां तदार्थयामास ॥ ४९

निज माया बल देखि बिसाला । हियँ हँसि बोले दीनदयाला ॥

निजमायाबलमेवं हरिरपि दृष्ट्वा तथा परंपारम् ।
ऊचे दीनदयालुः स्वात्मनि किञ्चिद्विहस्य देवमुनिम् ॥ ५०

—जेहि बिधि होइहि परम हित नारद सुनहु तुम्हार ।
सोइ हम करब न आन कछु बचन न मृषा हमार ॥

"परमहितं ते साध्यं यथानुतिष्ठाम्यहं तथैव मुने ।
नान्यत्किमपि विधास्ये न चापि वचनं कदापि मिथ्या मे ॥ ५१

कुपथ माग रुज ब्याकुल रोगी। बैद न देइ सुनहु मुनि जोगी ।।
एहि बिधि हित तुम्हार मैं ठयऊ। कहि अस अंतरहित प्रभु भयऊ ।।
माया बिबस भए मुनि मूढ़ा। समुझी नहिं हरि गिरा निगूढ़ा ।।

याचितमपि न हि दत्ते यथा भिषग् रोगिणे कुपथ्यान्नम् ।
कृतनिश्चयस्तथाहं साधयितुं सर्वथा तवात्र हितम् ।। " ५२

अन्तर्दधे ततः श्रीहरिरेवं नारदं समाश्वास्य ।
मुनिरपि मायामूढः स्पष्टार्थं तद्वचो न जग्राह ।। ५३

गवने तुरत तहाँ रिषिराई। जहाँ स्वयंबर भूमि बनाई ।।
निज निज आसन बैठे राजा। बहु बनाव करि सहित समाजा ।।

सोऽयं ततः प्रतस्थे मुनिरपि तूर्णं स्वयंवरस्थानम् ।
भूषणभूषितभूपाः स्वे स्वे स्थाने विरेजिरे यत्र ।। ५४

मुनि मन हरष रूप अति मोरें। मोहि तजि आनहि बरिहि न भोरें ।।

"अप्रतिमं मे रूपं, नूनं नृपजापि वर्जयित्वा माम् ।
वृणुते कमपि न चान्यं" स्वात्मन्येवं मुनिस्तदा मुमुदे ।। ५५

मुनि हित कारन कृपानिधाना। दीन्ह कुरूप न जाइ बखाना ।।

हरिरपि करुणासिन्धुः साधयितुं नारदस्य कल्याणम् ।
चक्रे तथा विरूपं देवमुनिं, वर्णनं यथाशक्यम् ।। ५६

सो चरित्र लखि काहुँ न पावा। नारद जानि सबहिं सिर नावा ।।

एतन्नूतनरूपं शशाक वेत्तुं न कोऽपि देवमुनेः ।
मत्वा नारदमेव प्रणताः सर्वे सभागतास्तत्र ।। ५७

–रहे तहाँ दुइ रुद्र गन ते जानहिं सब भेउ ।
बिप्रबेष देखत फिरहिं परम कौतुकी तेउ ।।

रुद्रगणौ तु सभायां विचेरतुस्तत्र सर्वमर्मविदौ ।
पश्यन्तौ हरिलीलां विनोदशीलौ च विप्रवेषधरौ ।। ५८

जेहिं समाज बैठे मुनि जाई । हृदयँ रूप अहमिति अधिकाई ।।
तहँ बैठे महेस गन दोऊ । बिप्रबेष गति लखइ न कोऊ ।।

उपविष्टे च सभायां देवमुनौ रूपगर्विते राज्ञाम् ।
सन्निधमुपविष्टौ तौ प्रच्छन्नौ ब्राह्मणौ शिवानुचरौ ।। ५९

करहिं कूटि नारदहि सुनाई । नीकि दीन्हि हरि सुंदरताई ।।
रीझिहि राजकुअँरि छबि देखी । इन्हहि बरिहि हरि जानि बिसेषी ।।

वार्तालापं चोच्चैः प्रचक्रमाते च व्यञ्जनापूर्णम् ।
उभयौ रुद्रगणौ तौ निशामयन्तौ मुनिं तदा सर्वम् ।। ६०

"नूनं बहुरमणीयं हरिणा दत्तं सुरर्षये रूपम् ।।
मत्वा 'हरि' हि चैनं राजसुता मोहिता वृणोत्येनम् ।। ६१

मुनिहि मोह मन हाथ पराएँ । हँसहि संभु गन अति सचु पाएँ ।।
जदपि सुनहिं मुनि अटपटि बानी । समुझि न परइ बुद्धि भ्रम सानी ।।

मुनिरपि मायामूढः सत्यं मेने विजल्पनं सर्वम् ।
विज्ञः सन्नपि जज्ञे भ्रान्तो हरिमायया न गूढार्थम् ।। ६२

काहुँ न लखा सो चरित बिसेषा । सो सरूप नृपकन्याँ देखा ।।
मर्कट बदन भयंकर देही । देखत हृदयँ क्रोध भा तेही ।।

राजसुतापरिवर्जं कोऽपि न जज्ञे विशेषवृत्तं तद् ।
दृष्ट्वा सा तु सुरर्षेर्वानरवदनं बभूव संक्रुद्धा ।। ६३

—सखीं संग लै कुअँरि तब चलि जनु राजमराल ।
देखत फिरइ महीप सब कर सरोज जयमाल ।।

धृतकरपङ्कजपरिणयमाला नृपजा च राजहंसीव ।
पश्यन्ती समवेतान् नृपतीन् परिचक्रमे सखीसार्धम् ।। ६४

जेहि दिसि बैठे नारद फूली । सो दिसि तेहिं न बिलोकी भूली ।।

यत्रासावुपविष्टो मुनिः सगर्वं स्वरूपविश्वस्तः ।
राजसुता तु कटाक्षं भूयो विससर्ज नैकमपि तत्र ।। ६५

पुनि पुनि मुनि उकसहिं अकुलाहीं । देखि दसा हर गन मुसुकाहीं ।।

सोत्कण्ठः स सुरर्षिः समुपाविष्टोऽपि चासनेऽधीरः ।
चलितं वेल्लितमेनं दृष्ट्वा स्मेराननौ शिवानुचरौ ।। ६६

धरि नृपतनु तहँ गयउ कृपाला । कुअँरि हरषि मेलेउ जयमाला ।।

श्रीहरिरपि नृपवेषः संप्राप्तस्तत्र राजसमुदाये ।
तत्कण्ठे वरमाला राजदुहित्रा समर्पिता हर्षात् ।। ६७

दुलहिनि लै गे लच्छिनिवासा । नृपसमाज सब भयउ निरासा ।।

दृष्ट्वा वधूं नयन्तं स्वावासं श्रीहरिं कृतार्थं तम् ।
विफलीकृतसंकल्पास्त्यक्ताशाः सर्वनृपतिवरवृन्दाः ।। ६८

मुनि अति बिकल मोहँ मति नाठी । मनि गिरि गई छूटि जनु गाँठी ।।

मोह-तमो-हत-बुद्धिः सुदुःखितः सो सुरर्षिरपि जातः ।
भ्रष्टो मणिरिव ग्रन्थेः राजसुता पश्यतोऽपि यन्नीता ।। ६९

तब हर गन बोले मुसुकाई । निज मुख मुकुर बिलोकहु जाई ।।

स्मयमानावूचाते शम्भुगणौ मुनिवरं तदा व्यक्तम् ।
"निजमुखममरर्षे त्वं सकृदपि सम्यग् विलोकयादर्शे" ।। ७०

अस कहि दोउ भागे भयँ भारी । बदन दीख मुनि बारि निहारी ।।

उक्त्वा कथमपि चैवं जातभयौ तौ पलायितौ शीघ्रम् ।
सुरमुनिरपि चादर्शे ददर्श वदनं तदा सुसंभ्रान्तः ।। ७१

बेषु बिलोकि क्रोध अति बाढ़ा । तिन्हहि सराप दीन्ह अति गाढ़ा ।।

दृष्ट्वा दुर्दर्शं तद् रूपं जज्ज्वाल कोपसंतप्तः ।
परुषवचोभिः सद्यः शशाप तौ शिवगणौ च धावन्तौ ।। ७२

–होहु निसाचर जाइ तुम्ह कपटी पापी दोउ ।
हँसेहु हमहि सो लेहु फल बहुरि हँसेहु मुनि कोउ ।।

पातकिनावुभयावपि कपटकरौ राक्षसौ जनिष्येथे ।
उचितं शापफलं तद् परिहसतं योगिनं पुनश्चान्यम् ।। ७३

पुनि जल दीख रूप निज पावा । तदपि हृदयँ संतोष न आवा ।।

पुनरपि पश्यँस्तोये ददर्श रूपं निजं मुनिश्चकितः ।
दृष्ट्वापि च तच्चित्तं क्रोधोत्तप्तं शमं न चायातम् ।। ७४

फरकत अधर कोप मन माहीं । सपदि चले कमलापति पाहीं ।।

क्रोधोद्दीपितचित्तः क्रोधस्फुरिताधरस्तदा चैषः ।
क्षुब्धः सपदि सुरर्षिर्द्रष्टुं कमलापतिं चकार मतिम् ।। ७५

देहउँ श्राप कि मरिहउँ जाई । जगत मोरि उपहास कराई ।।

" शपेऽथवा श्रीनाथं गमयामासोपहास्यतां यो माम् ।
त्यक्ष्याम्यथवा सद्यः प्राणान्''एव व्यचिन्तयत् मार्गे ।। ७६

बीचहिं पंथ मिले दनुजारी । संग रमा सोइ राजकुमारी ।।

अध्वन्येव मुनिस्तं दनुजारिं श्रीहरिं रमानाथम् ।
आलोकयदनुयातं राजदुहित्रा तया च रमया च ।। ७७

बोले मधुर बचन सुरसाई । मुनि कहँ चले बिकल की नाई ।।

" गच्छसि कुत्र सुरर्षे ससंभ्रमं व्याकुलो यथैव पथा । "
पप्रच्छैवं विष्णुर्मधुरगिरा नारदं समायान्तम् ।। ७८

सुनत बचन उपजा अति क्रोधा । माया बस न रहा मन बोधा ।।

मत्वा हरिवचनं तत् कपटकरं सुरमुनिः सुसंक्रुद्धः ।
प्रत्यूचे तं परुषं मायामूढो गिरा निरर्गलया ।। ७९

पर संपदा सकहु नहिं देखी । तुम्हरें इरिषा कपट बिसेषी ।।

"ईर्ष्यालुः कितवस्त्वं मायावी वञ्चनापटुश्चैवम् ।
पारयसे न हि सोढुं परसुखवैभवसमृद्धिमभ्यधिकाम् ।। ८०

मथत सिंधु रुद्रहि बौरायहु । सुरन्ह प्रेरि बिष पान करायहु ।।

सागर-मथनावसरे त्वया शठेनैव वञ्चितः शम्भुः ।
त्वत्प्रेरितैश्च देवैर्दत्तं गरलं तदा महेशाय । ८१

—असुर सुरा बिष संकरहि आपु रमा मनि चारु ।

मदिरामसुरवरेभ्यो दत्वा हालाहलं महेशाय ।
कौस्तुभमणिः सुचारुः स्वयं गृहीता त्वया रमा चैवम् ॥ ८२

स्वारथ साधक कुटिल तुम्ह सदा कपट ब्यवहारु ॥
परम स्वतंत्र न सिर पर कोई । भावइ मनहि करहु तुम्ह सोई ॥

कपटव्यवहारोऽयं कुटिलमते स्वार्थसाधकस्तेऽयम् ।
व्यवहरसि स्वच्छन्दं नियामकस्ते न कोऽपि त्रैलोक्ये ॥ ८३

भलेहि मंद मंदेहि भल करहू । बिसमय हरष न हियँ कछु धरहू ।

असदिव कुरुषे सत् त्वं सद्वच्चैवाप्यसत् तथाशङ्कम् ॥
हर्षविषादातीतं चित्तं ते श्रीहरे हि निःशङ्कम् ॥ ८४

डहकि डहकि परिचेहु सब काहू । अति असंक मन सदा उछाहू ॥

इतरच्छिद्रान्वेषणकुशलस्त्वं ब्रूयसे विशेषज्ञः ।
परवञ्चनापटोस्ते कुतो भयं वा कुतोऽथवा लज्जा ॥ ८५

करम सुभासुभ तुम्हहि न बाधा । अब लगि तुम्हहि न काहूँ साधा ॥

अशुभशुभानां चैवं बाधा ते नास्ति कर्मणां काचित् ।
तुल्यबलो न च कश्चिद् दृष्टोऽद्यापि त्वया प्रतिद्वन्द्वी ॥ ८६

भले भवन अब बायन दीन्हा । पावहुगे फल आपन कीन्हा ॥

संप्रति शोभनभवने दैववशादेव वायनं दत्तम् ।
कृतकर्मणां फलं तद् निःसंशयमद्य भोक्ष्यसे शीघ्रम् ॥ ८७

बंचेहु मोहि जवनि धरि देहा । सोइ तनु धरहु श्राप मम एहा ।

आश्रित्य च यद्देहं प्रतारितोऽहं हरे त्वयाशङ्कम् ।
आश्रयसे भूयस्त्वं मानवदेहं तमेव मम शापात् ॥ ८८

कपि आकृति तुम्ह कीन्हि हमारी । करिहहिं कीस सहाय तुम्हारा ।

दत्तं वानररूपं दुर्दर्शं यत् त्वया हरे मह्यम् ।
व्यसनातुरस्य विष्णो साहाय्यस्तेऽपि वानरा भूयुः ॥ ८९

मम अपकार कीन्ह तुम्ह भारी । नारि बिरहँ तुम्ह होब दुखारी ।।

अपकृतमपि मे यद्वा त्वयापहरता मदीप्सितां नारीम् ।
नारीविरहजदुःखं तवापि विष्णो भवत्यपरिहार्यम् ।। ” ९०

—श्राप सीस धरि हरषि हियँ प्रभु बहु बिनती कीन्हि ।
निज माया कै प्रबलता करषि कृपानिधि लीन्हि ।।

सुरमुनिवचनं त्वेवं परुषमपि प्रीतयेऽभवद्विष्णोः ।
नोक्त्वा किमपि विरुद्धं नतशिरसा सो दधार मुनिशापम् ।। ९१
सद्यः प्रतिसंजह्रे यावद् मायाबलं हरिः स्वीयम् ।
यातो विलयं तावत् सर्वः सुरमुनिमनोगतः क्रोधः ।। ९२

जब हरि माया दूरि निवारी । नहिं तहँ रमा न राजकुमारी ।।
तब मुनि अति सभीत हरि चरना । गहे पाहि प्रनतारति हरना ।।
मृषा होउ मम श्राप कृपाला । मम इच्छा कह दीनदयाला ।।

याते मायाजाले न तत्र लक्ष्मीर्न चापि राजसुता ।
भयकम्पितसकलाङ्गः प्रणम्य पादौ हरेर्मुनिश्चोचे ।। ९३
“ शरणागतभयहर्तः श्रीकान्त त्राहि मां प्रभो दासम् ।
शापो भवतु स मिथ्या, क्षमस्व मां पापिनं कृपासिन्धो ।। ” ९४
श्रुत्वा करुणवचस्तत्प्रत्यूचे श्रीहरिः सुरर्षि तम् ।
“ वृत्तं मदिच्छयेदं सर्वं नारद, कुरुष्व मा चिन्ताम् ।। ” ९५

मैं दुर्वचन कहे बहु तेरे । कह मुनि पाप मिटिहिं किमि मेरे ।।

आश्वासितोऽपि चैवं हरिणा करुणाकरेण मुनिरूचे ।
“ दुर्वचनं यत्प्रोक्तं दुरितं मे तत्कथं प्रभो नश्येत् ।। ” ९६

जपहु जाइ संकर सत नामा । होइहि हृदयँ तुरत बिश्रामा ।।

सुरमुनिपृष्टश्चैवं हरिरपि तं प्रत्युवाच वचनमिदम् ।
‘ विश्रामस्ते मनसः शङ्करशतनामजाप एव मुने ।। ९७

कोउ नहिं सिव समान प्रिय मोरें । असि परतीति तजहु जनि भोरें ।।

शंकरसदृश्चान्यः प्रियभक्तो विद्यते न कश्चिन्मे ।
ज्ञात्वैवं च सुरर्षे सत्यमिदं ते दृढं भवतु चित्ते ।। ९८

जेहि पर कृपा न करहिं पुरारी । सो न पाव मुनि भगति हमारी ।।
अस उर धरि महि बिचरहु जाई । अब न तुम्हहि माया निअराई ।।

स्निह्यति यस्मिन्नैष: शम्भुर्न च सो कदापि मे भक्त: ।
निश्चित्यैवं हृदये विचर धरायां भयं न ते किञ्चित् ।। " ९९

—बहुबिधि मुनिहि प्रबोधि प्रभु तब भए अंतरधान ।
सत्यलोक नारद चले करत राम गुन गान ।।

आश्वासयँस्तथैष: स्वयमपि चान्तर्दधे रमाकान्त: ।
गायन् हरिगुणगानं विरिञ्चिलोकं मुनि: प्रतस्थेऽसौ ।। १००

हर गन मुनिहि जात पथ देखी । बिगत मोह मन हरष बिसेषी ।।
अति सभीत नारद पहिं आए । गहि पद आरत बचन सुनाए ।।

दृष्ट्वा विगलितमोहं मार्गस्थं नारदं शिवानुचरौ ।
नत्वा सुरमुनिचरणौ वाक्यमिदं चोचतुस्तमतिभीतौ ।। १०१

हर गन हम न बिप्र मुनिराया । बड़ अपराध कीन्ह फल पाया ।।
श्राप अनुग्रह करहु कृपाला । बोले नारद दीनदयाला ।।
निसिचर जाइ होहु तुम्ह दोऊ । बैभव बिपुल तेज बल होऊ ।।
भुजबल बिस्व जितब तुम्ह जहिआ । धरिहहिं बिष्नु मनुज तनु तहिआ ।।
समर मरन हरि हाथ तुम्हारा । होइहहु मुकुत न पुनि संसारा ।।

" शिवपददासावावाम् न भूसुरौ सुरमुने त्वया ज्ञेयौ ।
शप्तौ कृतापराधौ देहि दयालो विमुक्तिमपि शापात् ।। " १०२

ऊचे सुरमुनिरेनौ महदैश्वर्योपभोगिनौ हि युवाम् ।
भूत्वापि च दैतेयौ विपुलबलयुतौ जगद्विजेतारौ ।। १०३

धृत्वा मानवरूपं हत्वा समराङ्गणे च वां विष्णु: ।
जनिमृतिसंसृतिचक्राद् विमोचयिष्यत्यवश्यमेव युवाम् ।। १०४

चले जुगल मुनि पद सिर नाई । भए निसाचर कालहि पाई ।।

नत्वा सुरमुनिचरणौ शंकरचरणानुगौ ततो यातौ ।
शापफलोचितसमये दानवरूपेण भूतले जातौ ।। १०५

०–एक कलप एहि हेतु प्रभु लीन्ह मनुज अवतार ।
सुर रंजन सज्जन सुखद हरि भंजन भुबि भार ।।

शिवगणशापप्रशमनहेतोराविर्बभूव हरिरेवम् ।
सुजनानन्दनसुरगणरञ्जनभूभारभञ्जनाभिज्ञः ।। १०६

एहि बिधि जनम करम हरि केरे । सुंदर सुखद बिचित्र घनेरे ।।
कलप कलप प्रति प्रभु अवतरहीं । चारु चरित नानाबिधि करहीं ।।

अद्भुतसुखदसुरम्याण्येवं हरिजन्मकर्मचरितानि ।
कल्पे कल्पे कुरुते हरिरेवं भुवि सुचारुचरितानि ।। १०७

तव तब कथा मुनीसन्ह गाई । परम पुनीत प्रबंध बनाई ।।
बिबिध प्रसंग अनूप बखाने । करहिं न सुनि आचरजु सयाने ।।

तत् तद् चरितं गिरिजे श्रीविष्णोस्तेषु तेषु कल्पेषु ।
गीतं कविभिरनेकैः सविस्तरं यन्न शङ्क्यते विज्ञैः ।। १०८

हरि अनंत हरिकथा अनंता । कहहिं सुनहिं बहुबिधि सब संता ।।

अनुपमहरिचरितानां हरेरिवार्ये न विद्यते पारः ।
बहुधा बहुविधमेतद् शृण्वन्ति श्रावयन्ति साधुजनाः ।। १०९

रामचंद्र के चरित सुहाए । कलप कोटि लगि जाहिं न गाए ।।

रघुवरचरितं पुण्यं सुखदसुरम्यं सदा सुकविवृंदः ।
शतकोटीः कल्पानां गायति यद्यपि गिरा न यात्यन्तम् ।। ११०

यह प्रसंग मैं कहा भवानी । हरिमायाँ मोहहिं मुनि ग्यानी ।।

श्रीहरिमायामूढा भवन्ति मुनयो मनीषिणः सर्वे ।
संदर्शयितुमिदं ते कथितमिदं सुरमुनेर्मया वृत्तम् ।। १११

प्रभु कौतुकी प्रनत हितकारी । सेवत सुलभ सकल दुख हारी ।।

कामं नानारूपैः श्रीहरिरिह मायया चरत्यार्ये ।
शरणागतहितकर्ता सेवासुलभस्तु सैव दुःखहरः ।। ११२

–सुर नर मुनि कोउ नाहिं जेहि न मोह माया प्रबल ।
अस बिचारि मन माहिं भजिअ महामाया पतिहि ।।

सुरनरमुनिषु न कश्चिद् हरिमाया यं न मुह्यति प्रबला ।
भज गिरिजे भगवन्तं मायेशं तं सदा विचार्यैवम् ।। ११३

अपर हेतु सुनु सैलकुमारी । कहउँ बिचित्र कथा विस्तारी ।।
जेहि कारन अज अगुन अरूपा । ब्रह्म भयउ कोसलपुर भूपा ।।

अपरमपीमं गिरिजे शृणु हेतुं भगवतोऽवतारस्य ।
अभवदयोध्याधीशो निर्गुणरूपं च येन तद् ब्रह्म ।। ११४

जो प्रभु बिपिन फिरत तुम्ह देखा । बंधु समेत धरें मुनिबेषा ।।

दृष्टवती त्वं चैनं पूर्वस्मिन् जन्मनि स्वयं गिरिजे ।
मुनिवेषं श्रीरामं विचरन्तं स्वानुजेन सह विपिने ।। ११५

जासु चरित अवलोकि भवानी । सती सरीर रहिहु बौरानी ।।
अजहुँ न छाया मिटति तुम्हारी । तासु चरित सुनु भ्रम रुज हारी ।।
लीला कीन्हि जो तेहिं अवतारा । सो सब कहिहउँ मति अनुसारा ।।

वीक्ष्य तदा तद् रूपं भ्रान्तासीस्त्वं तथा हिमाचलजे ।
अद्यापि यथा छाया निःशेषं त्वां न मुञ्चति प्राज्ञे ।। ११६

शृणु तच्चरितं गिरिजे चित्तभ्रमरोगमूलनाशकरम् ।
कथये मत्यनुसारं श्रीहरिरामावतारलीलास्ते ।।" ११७

भरद्वाज सुनि संकर बानी । सकुचि सप्रेम उमा मुसुकानी ।।
लगे बहुरि बरनै बृषकेतू । सो अवतार भयउ जेहि हेतू ।।

श्रुत्वा वचनं शम्भोः सती सलज्जस्मितं मुने तस्थे ।
कथयितुमस्यै शम्भुः प्रचक्रमे रामजन्मवृत्तान्तम् ।। ११८

इति तुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
श्रीरामावतारप्रस्तावो नाम सप्तविंशस्तरङ्गः ।

तरङ्गः २८

–सो मैं तुम्ह सन कहउँ सबु सुनु मुनीस मन लाइ ।
राम कथा कलि मल हरनि मंगल करनि सुहाइ ।।

तदिदं रामचरित्रं कथयेऽहं ते मुने भरद्वाज ।
कलि-मल-मूलोद्दालन-सकल-सुमङ्गलकरं सुरमणीयम् ।। १

स्वायंभू मनु अरु सतरूपा । जिन्ह तें भै नरसृष्टि अनूपा ।।
दंपति धरम आचरन नीका । अजहुँ गाव श्रुति जिन्ह कै लीका ।।

प्रभवौ मानवसृष्टेर्मनुः स्वयंभूस्तथा च शतरूपा ।
धर्माचरण-सुपूतौ निगमागम-गीत-शील-गुण-गाथौ ।। २

नृप उत्तानपाद सुत तासू । ध्रुव हरिभगत भयउ सुत जासू ।।

पुत्रस्तयोरथासीद्राजा चोत्तानपादनामकः ।
यस्मादजायतैषो हरिपददासोत्तमो ध्रुवो नाम ।। ३

लघु सुत नाम प्रियब्रत ताही । बेद पुरान प्रसंसहिं जाही ।।

आसीत् प्रियव्रताख्यो दम्पत्योश्चात्मजः कनिष्ठोऽपि ।
यद्-गुण-गौरव-गाथां वेद-पुराणान्यपि प्रशंसन्ति ।। ४

देवहूति पुनि तासु कुमारी । जो मुनि कर्दम कै प्रिय नारी ।।
आदिदेव प्रभु दीनदयाला । जठर धरेउ जेहिं कपिल कृपाला ।।

भार्या कर्दमनाम्नो मुनेस्तयोर्देवहूतिरिति कन्या ।
यत्पुत्रः कपिलाख्यो दीनदयालुः कृपाकरो नाथः ।। ५

सांख्य सास्त्र जिन्ह प्रगट बखाना । तत्त्व बिचार निपुन भगवाना ।।
तेहिं मनु राज कीन्ह बहु काला । प्रभु आयसु सब बिधि प्रतिपाला ।।

तत्त्वज्ञः स महर्षिः सांख्य-ज्ञान-प्रवर्तकश्चाद्यः ।
सोऽयं मनुः स्वयंभूर्विध्यनुसारं शशास बहुकालम् ।। ६

–होइ न विषय बिराग भवन बसत भा चौथपन ।
हृदयँ बहुत दुख लाग जनम गयउ हरिभगति बिनु ।

"यद्यपि संप्राप्तेयं जरा न विषयान्मनो विरक्तं मे ।
आयुर्गच्छति सर्वं भगवद्भक्त्या विनैव निःसारम् ॥" ७

बरबस राज सुतहि तब दीन्हा । नारि समेत गवन बन कीन्हा ॥
तीरथ बर नैमिष बिख्याता । अति पुनीत साधक सिधि दाता ॥

विचिन्त्य मनसेति दुःखितमना मनीषी मनुर्-
बलात्सुतसमर्पिताखिल-प्रभुत्व-भारः प्रभुः ।
जगाम सह भार्यया सुविदितं वनं नैमिषं
यतीप्सित-फलप्रदं सुपरिपूत-तीर्थोत्तमम् ॥ ८

बसहिं तहाँ मुनि सिद्ध समाजा । तहँ हियँ हरषि चलेउ मनु राजा ॥
पंथ जात सोहहिं मतिधीरा । ग्यान भगति जनु धरें सरीरा ॥

असंख्य-मुनि-सिद्ध-वृन्द-वसतिं सभार्यस्तथा
व्यराजत महामनाः प्रमुदितः पथा संचरन् ।
षडङ्ग-निगमागमावगम-संचयो मूर्तिमान्
चरन् धृतशरीरया हरिपदाब्ज-भक्त्या यथा ॥ ९

पहुँचे जाइ धेनुमति तीरा । हरषि नहाने निरमल नीरा ॥
आए मिलन सिद्ध मुनि ग्यानी । धरम धुरंधर नृपरिषि जानी ॥

प्रहृष्टमतिरेष वीक्ष्य सरितं तदा गोमतीं
सुनिर्मलजले चकार सह जायया मज्जनम् ।
सनातन-सुधर्म-पालन-धुरंधरं तं मनुं
सभाजयितुमाययुः सकल-सिद्धसंघाः स्वयम् ॥ १०

जहँ जहँ तीरथ रहे सुहाए । मुनिन्ह सकल सादर करवाए ॥
कृस सरीर मुनिपट परिधाना । सत समाज नित सुनहिं पुराना ॥

चकार मुनिभिर्मनुः सकल-रम्य-तीर्थाटनं
व्रत-क्षपित-काय-वल्कलधरः स धर्मप्रियः ।
पुराण-शुचि-संकथा-श्रुतिभिरात्मजाया-समं
सतां सततसन्निधौ श्रवणमात्मनः पावयन् ॥ ११

–द्वादस अच्छर मंत्र पुनि जपहिं सहित अनुराग ।
बासुदेव पद पंकरुह दंपति मन अति लाग ।।
करहिं अहार साक फल कंदा । सुमिरहिं ब्रह्म सच्चिदानंदा ।।

परात्पर-पदाब्जयुग्म-रत-मानसौ दम्पती
बभूवतुरहर्निशम् परम-नाम-जापे रतौ ।
स्मरन् मनसि तद् द्वयं परमसच्चिदानन्दनं
दधार वन-कन्द-मूल-फल-सेवनैर्जीवनम् ।। १२

पुनि हरि हेतु करन तप लागे । बारि अधार मूल फल त्यागे ।।
उर अभिलाष निरंतर होई । देखिअ नयन परम प्रभु सोई ।।

तपश्चरण-दत्त-चित्त-महिषी-नृपाभ्यां समं
ततस्तदपि चोज्झितं वनफलाशनं सत्वरम् ।
बभूव जलपानमात्रमिह जीवितालम्बनम्
प्रभोश्चरणदर्शनम् मनसि चेप्सितं केवलम् ।। १३

अगुन अखंड अनंत अनादी । जेहि चिंतहिं परमारथबादी ।।
नेति नेति जेहि बेद निरूपा । निजानंद निरुपाधि अनूपा ।।
संभु बिरंचि बिष्नु भगवाना । उपजहिं जासु अंस तें नाना ।।
ऐसेउ प्रभु सेवक बस अहई । भगत हेतु लीलातनु गहई ।।

अनाद्यमृतनामरूपगुणहीनमीशं हि यं
वचोभिरिह वर्णयन्ति परमार्थविज्ञाः स्वयम् ।
निरूपयति वा श्रुतिश्च खलु नेति नेतीति यं
तमीक्षितुमिहोत्सुकौ च महिषीनृपो केवलम् ।। १४

"अजो निरुपमश्च यो निरुपधिर्निजानन्दनः
विरिञ्चिहरिशंभवोऽपि च यदंशभूताः स्वयम् ।
स्वदास-वश-मानसः स धृत-दिव्य-रूपः प्रभुः
स्वभक्त-हित-काम्यया भवति भूतले गोचरः ।।" १५

जौं यह बचन सत्य श्रुति भाषा । तौ हमार पूजिहि अभिलाषा ।।

'यदि श्रुतिवचस्तदत्र न कदापि मिथ्या भवेत्
तदीप्सितमिहावयोर्नियतमीश्वरः पूरयेत् ।'

इति प्रभुपदाब्जदर्शनमनीषया दम्पती
सुघोरमपि चेरतुः सुदृढनिश्चयौ तत्तपः ॥ १६

–एहि बिधि बीते बरष षट सहस बारि आहार ।
संबत सप्त सहस्र पुनि रहे समीर अधार ॥
बरष सहस दस त्यागेउ सोऊ । ठाढे रहे एक पद दोऊ ॥

पिबन् सलिलमेव षड्दशशताः समास्तद्द्वयं
ततो दशशताधिकाः पवनसेवनैः केवलम् ।
निनाय च विनानिलं शतशतास्ततस्तत्समाः
अतिष्ठदवनीतले च चरणेन कृच्छ्रं चरत् ॥ १७

बिधि हरि हर तप देखि अपारा । मनु समीप आए बहु बारा ॥
मागहु बर बहु भाँति लोभाए । परम धीर नहिं चलहिं चलाए ॥

तपस्तदमितं समीक्ष्य बहुविस्मितानन्दिताः
विधिर्हरिहरौ तथा मनुसमीपमीयुः स्वयम् ।
'वरं वृणुत'मित्यनेकविधमूचिरे दम्पतीं
तयोस्तु न चचाल चित्तमणुमप्यथो निश्चयात् ॥ १८

अस्थिमात्र होइ रहे सरीरा । तदपि मनाग मनहिं नहिं पीरा ॥
प्रभु सर्बग्य दास निज जानी । गति अनन्य तापस नृप रानी ॥

बभूवतुरथास्थि-पञ्जरसमे तनू पीडिते
मनागपि मनीषिणोर्न मनसी तु संतापिते ।
अनन्यगतिकौ तदा स्वपदसेवकौ दम्पती
समीक्ष्य स दयाघनः प्रभुरभूत् प्रसन्नस्तयोः ॥ १९

मागु मागु बरु भै नभ बानी । परम गभीर कृपामृत सानी ॥
मृतक जिआवनि गिरा सुहाई । श्रवन रंध्र होइ उर जब आई ॥

कृपामृत-परिप्लुत-प्रकट-चारु-गम्भीरया
गिरा गगनजातयामृतरसायनीभूतया ।
वरं वृणुतमित्युवाच परमेश्वरो दम्पती
निशम्य महिषीनृपावपगतश्रमावाशु तौ ॥ २०

हृष्टपुष्ट तन भए सुहाए। मानहुँ अबहिं भवन ते आए॥
श्रवन सुधा सम बचन सुनि पुलक प्रफुल्लित गात।
बोले मनु करि दंडवत प्रेम न हृदयँ समात।
सुनु सेवक सुरतरु सुरधेनू। बिधि हरि हर बंदित पद रेनू॥

तथा नवनवीकृतावुभयदम्पती तत्क्षणे
यथा न सुचिरादिवात्मभवनादुभावागतौ।
प्रहर्षपुलकाङ्कितावमृतमिष्टवाचा प्रभो-
रमान्न मनसोर्यथा प्रभुपदानुरागस्तयोः॥ २१

ऊचे मनुः प्रभुपदप्रणतस्ततस्तम्
"ब्रह्मा तथा हरिहरौ तव पाददासौ।
त्वं कामधेनुरिह कल्पतरुस्त्वमेव
त्वत्पादसेवकमनोरथसंप्रदाता॥ २२

सेवत सुलभ सकल सुख दायक। प्रनतपाल सचराचर नायक॥

त्वं सेवितोऽसि सुलभः सुखदः प्रभो त्वं
त्वं पालकोऽसि च पदप्रणतस्य नित्यम्।
त्वं रक्षकोऽसि शरणागत-सेवकानां
स्वामी त्वमेव च विभो जडचेतनानाम्॥ २३

जौं अनाथ हित हम पर नेहू। तौ प्रसन्न होइ यह बर देहू॥
जो सरूप बस सिव मन माहीं। जेहि कारन मुनि जतन कराहीं॥
जो भुसुंडि मन मानस हंसा। सगुन अगुन जेहि निगम प्रसंसा॥

प्रीतोऽसि नाथ यदि दीनदयानिधानं
याचे वरं सविनयं सफलीकुरु त्वम्।
यद् भालचन्द्र-हृदये निवसत्यपूर्वं
तद्दर्शयस्व निजरूपमनाथबन्धो॥ २४

यद्वीक्षितुम् मुनिवराः सततं यतन्ते
यद्वा मराल इव काक-भुशुण्डि-चित्ते।
यन्निर्गुणं सगुणमित्यपि वर्णयन्ति
वेदाः सदा तदभिदर्शय नौ स्वरूपम्॥ २५

देखहिं हम सो रूप भरि लोचन। कृपा करहु प्रनतारति मोचन ॥
दंपति बचन परम प्रिय लागे। मृदुल बिनीत प्रेम रस पागे ॥

साक्षात्कुरु प्रणतनाथ तदावयोस्ते
रूपम् भविष्यति यथा नयनोत्सवो नौ।"
सप्रश्रयम् मृदुलमत्यनुरागपूर्णं
तद्दम्पतीसुवचनम् प्रभुतुष्टयेऽभूत् ॥ २६

भगत बछल प्रभु कृपानिधाना। बिस्वबास प्रगटे भगवाना ॥

सर्वप्रभुः सकलविश्वनिकेतनोऽसौ
भक्तप्रियः सकलवित् करुणासमुद्रः।
तत्संमुखम् प्रकटयन् निजरूपमर्घ्यं
तन्मानसाभिलषितं सफलीचकार ॥ २७

—नील सरोरुह नील मनि नील नीरधर स्याम।
लाजहिं तन सोभा निरखि कोटि कोटि सत काम ॥

तन्नीलनीरजसुकोमलकृष्णरूपं
तन्नीलनीरधरसारमरूपरूपम्।
तन्नीलरत्न-सम-भासुरमीशरूपं
दृष्ट्वा ह्रिया नतमुखाः शत-कामदेवाः ॥ २८

सरद मयंक बदन छबि सींवा। चारु कपोल चिबुक दर ग्रीवा ॥

तच्छारदेन्दुवदनम् परिवेषरम्यं
सीमा यथैव चरमा ननु चारुतायाः।
रम्या हनुः सुरुचिरा रुचिरौ कपोलौ
लावण्यवद्दरसमुन्नतकण्ठदेशः ॥ २९

अधर अरुन रद सुंदर नासा। बिधु कर निकर बिनिंदक हासा ॥

ओष्ठौ प्रताम्रसुभगौ सुभगैव नासा
धत्ते सुरम्यरदनावलिरग्र्यशोभाम्।
दृष्ट्वा सुचारु-मुखसार-सुहास्यलक्ष्मीं
व्रीडान्वितं ननु सुधांशु-मयूख-जालम् ॥ ३०

नव अंबुज अंबक छबि नीकी । चितवनि ललित भावँती जी की ।।
भृकुटि मनोज चाप छबि हारी । तिलक ललाट पटल दुतिकारी ।।

धत्ते सुनेत्र-युगलं नव-नीरज-श्री-
मद्-वीक्षणं च ललितम् अति-लोभनीयम् ।
भ्रू-वल्लरी कुसुम-बाण-धनुर्विजेत्री
दिव्या ललाट-पटले तिलक-प्रभापि ।। ३१

कुंडल मकर मुकुट सिर भ्राजा । कुटिल केस जनु मधुप समाजा ।।
उर श्रीबत्स रुचिर बनमाला । पदिक हार भूषन मनिजाला ।।

श्रोत्रद्वयम् मकर-कुण्डल-मण्डितं तद्
दिव्यं किरीटमतिसुन्दरमुत्तमाङ्गे ।
कृष्णाः द्विरेफकुलभाः कुरलालकास्ते
श्रीवत्स-माल्य-मणिभूषितमप्युरस्तद् ।। ३२

केहरि कंधर चारु जनेऊ । बाहु बिभूषन सुंदर तेऊ ।।
करि कर सरिस सुभग भुजदंडा । कटि निषंग कर सर कोदंडा ।।

ग्रीवोपवीत-सुभगा हरिकन्धराभा
बाहू सुशोभन-विभूषण-भूषितांसौ ।
वृसानुपूर्वसुभगम् भुजयुग्मकं तद्
हस्तौ धनुःशरधराविषुधिः सुमध्ये ।। ३३

–तड़ित बिनिंदक पीत पट उदर रेख बर तीनि ।
नाभि मनोहर लेति जनु जमुन भवँर छबि छीनि ।।

विद्युद्-विनिन्दक-समुज्ज्वल-पीतवर्णम्
कौशेयकम् परिदधाति कटि-प्रदेशे ।
चारूदरं त्रिवलि-भूषण-भूषिताभं
नाभी गभीरयमुनाजलगुल्मशोभा ।। ३४

पद राजीव बरनि नहिं जाहीं । मुनि मन मधुप बसहिं जेन्ह माहीं ।।
बाम भाग सोभति अनुकूला । आदिसक्ति छबिनिधि जगमूला ।।

गुञ्जन्ति यत्र मुनि-मानस-भृङ्ग-पुञ्जास्-
तत्पादतामरसयुग्ममवर्णनीयम् ।

पार्श्वे सदा भगवतश्च विराजमाना
सीता सुलक्षण-युता जगदादिमाया ॥ ३५

जासु अंस उपजहिं गुनखानी। अगनित लच्छि उमा ब्रह्मानी ॥
भृकुटि बिलास जासु जग होई। राम बाम दिसि सीता सोई ॥

भार्या यतो हरि-विरिञ्चि-महेश्वराणां
सौन्दर्य-शील-गुण-गौरव-संपदाढ्याः।
यद्-भ्रू-लता-विलसनाद्रचितं जगत्सा
श्रीराम-वाम-तनु-भूषण-भूमिकन्या ॥ ३६

छबिसमुद्र हरि रूप बिलोकी। एकटक रहे नयन पट रोकी ॥
चितवहिं सादर रूप अनूपा। तृप्ति न मानहिं मनु सतरूपा ॥

लावण्यसिन्धुमवलोक्य कृपानिधानं
विस्मृत्य नेत्रपुटयोः सहजं निमेषम्।
जायापती प्रमुदिताववतस्थतुस्तौ
रूपम् प्रभोरनुपमं चिरमापिबन्तौ ॥ ३७

हरष बिबस तन दसा भुलानी। परे दंड इव गहि पद पानी ॥
सिर परसे प्रभु निज कर कंजा। तुरत उठाए करुनापुंजा ॥

हर्ष-प्रभावित-हृदौ गत-देह-संज्ञौ
धृत्वा प्रभोः पद-सरोज-युगं कराभ्याम्।
राज्ञी तथा मनुरपि प्रणिपेततुस्ता-
वुत्थापितौ भगवताशु कराम्बुजेन ॥ ३८

बोले कृपानिधान पुनि अति प्रसन्न मोहि जानि।
मागहु बर जोइ भाव मन महादानि अनुमानि ॥

ऊचे प्रभुः परम-कारुणिको वचस्तौ
"प्रीतोऽस्म्यहं वदतमद्य मनोरथं वाम्।
मत्वा महान्तमिह मां खलु दानशौण्डं
यद्रोचते तदभिधत्तमसंवृतार्थम् ॥" ३९

सुनि प्रभु बचन जोरि जुग पानी । धरि धीरजु बोली मृदु बानी ॥

श्रुत्वा प्रभोर्वचनमेतदुभौ प्रहृष्टौ
बद्ध्वाञ्जली समवतस्थतुरग्रतस्तौ ।
सप्रश्रयं च कथमप्यवलम्ब्य धैर्यं
कारुण्यसिन्धुमवदन्मनुरप्यथैवम् ॥ ४०

नाथ देखि पद कमल तुम्हारे । अब पूरे सब काम हमारे ॥

"दृष्टं यदद्य भगवन्निजलोचनाभ्याम्
फुल्लारविन्द-सदृशं तव पादयुग्मम् ।
हे नाथ यत्किमपि नौ मनसेप्सितं तद्
नूनं प्रभो सुसफलीकृतमेव सर्वम् ॥ ४१

एक लालसा बड़ि उर माहीं । सुगम अगम कहि जाति सो नाहीं ॥
तुम्हहि देत अति सुगम गोसाईं । अगम लाग मोहि निज कृपनाई ।

शिष्टम् मनोभिलषितं भगवन्नथैकं
यद्दुर्लभं च सुलभं च विभाति चित्रम् ॥
क्षुद्रस्य मेऽतिकठिनं प्रतिभाति मे तद्
दातुस्तवातिसुगमं नियतं कृपालो ॥ ४२

जथा दरिद्र बिबुधतरु पाई । बहु संपति मागत सकुचाई ॥
तासु प्रभाउ जान नहिं सोई । तथा हृदयँ मम संसय होई ॥

अज्ञात-कल्पतरु-दान-गुणो दरिद्रो
जिह्रेति नाथ बहुलं धनमर्थयँस्तम् ।
आशङ्कते हृदयमद्य ममापि तद्वत्
मन्मानसाभिलषितं प्रकटं प्रवक्तुम् ॥ ४३

सो तुम्ह जानहु अंतरजामी । पुरवहु मोर मनोरथ स्वामी ॥
सकुच बिहाइ मागु नृप मोही । मोरें नहिं अदेय कछु तोही ॥

जानासि चैव भगवन् मम मानसं त्वं
सर्वान्तरङ्गविलसत्-सकलार्थदर्शिन् । "
इत्युक्तवन्तमवदत् प्रभुरात्मभक्तं
"हित्वा ह्रियं कथय, मे न किमप्यदेयम् ॥ " ४४

—दानि सिरोमनि कृपानिधि नाथ कहउँ सतिभाउ।
चाहउँ तुम्हहि समान सुत प्रभु सन कवन दुराउ ॥

"हे दानशौण्ड भगवन् करुणानिधान
स्पष्टं वदामि पुरतस्तव मेऽभिलाषम् ।
काङ्क्षे प्रभो खलु सुतं सदृशं त्वयाहं
किं गूढमत्र ननु सर्वविदो विभो ते ॥" ४५

देखि प्रीति सुनि बचन अमोले। एवमस्तु करुनानिधि बोले ॥
आपु सरिस खोजौं कहँ जाई। नृप तव तनय होब मैं आई ॥

श्रुत्वा मनोः प्रभुरनर्घवचस्तदेवं
दृष्ट्वैकनिष्ठमनुरागमपि प्रसन्नः ।
ऊचे "तथास्तु ! मृगये क्व तु मत्समं कम्
भूत्वा स्वयं हि युवयोस्तनयो जनिष्ये ॥" ४६

सतरूपहि बिलोकि कर जोरें। देबि मागु बरु जो रुचि तोरें ॥
जो बरु नाथ चतुर नृप मागा। सोइ कृपाल मोहि अति प्रिय लागा ॥

"यत् ते मनोभिलषितं कथये"ति राज्ञीं
बद्धाञ्जलिं तदनु चाभिदधे कृपालुः ।
"यद् याचितं चतुरभूपतिनाऽत्र भर्त्रा
तन्मे प्रियं सदय यद्यपि सर्वसाक्षिन् ॥ ४७

प्रभु परंतु सुठि होति ढिठाई। जदपि भगत हित तुम्हहि सोहाई ॥
तुम्ह ब्रह्मादि जनक जग स्वामी। ब्रह्म सकल उर अंतरजामी ॥
अस समुझत मन संसय होई। कहा जो प्रभु प्रवान पुनि सोई ॥

यद्यप्यतोऽन्यदभिवाञ्छितमार्यबन्धो
ब्रह्मादिसंभव न चेष्टतरं ममात्र ।
वक्तुं तु भक्तहितवल्लभ धर्षयेऽहं
त्वत्प्रीतये हि करुणाकर साहसं तद् ॥ ४८

हे विश्वनाथ सकलान्तरचिद्विलास
किं ते पुरः प्रभुवरात्र वदामि नूनम् ।
विस्रम्भिता तु तव नाथ कृपावचोभिर्-
याचे प्रभो किमपि दीनदयानिधे त्वाम् ।। ४९

जे निज भगत नाथ तव अहहीं । जो सुख पावहिं जो गति लहहीं ।।
–सोइ सुख सोइ गति सोइ भगति सोइ निज चरन सनेहु ।
सोइ बिबेक सोइ रहनि प्रभु हमहि कृपा करि देहु ।।

यच्छर्म यां च गतिमाप्नुवते सुभक्ताः
तच्छर्म तां च गतिमप्यहमर्थये त्वाम् ।
ज्ञानं तदेव तव पादरतिश्च सैव
तत् साधुवृत्तमपि नौ भगवन् प्रयच्छ ।।" ५०

सुनि मृदु गूढ़ रुचिर बर रचना । कृपासिंधु बोले मृदु बचना ।।
जो कछु रुचि तुम्हरे मन माहीं । मैं सो दीन्ह सब संसय नाहीं ।।

श्रुत्वेति चारुमृदुगूढवचस्तदीयं
तां प्रत्युवाच प्रभुरत्युपकारशीलः ।
"यच्चान्तरे यदपि ते रुचयेऽस्ति राज्ञि
दत्तम् मया सकलमेव न तेऽस्तु चिन्ता ।। ५१

मातु बिबेक अलौकिक तोरें । कबहुँ न मिटिहि अनुग्रह मोरें ।।
बंदि चरन मनु कहेउ बहोरी । अवर एक बिनती प्रभु मोरी ।।
सुत बिषइक तव पद रति होऊ । मोहि बड़ मूढ़ कहै किन कोऊ ।।

मातर् विनङ्क्ष्यति न ते परमार्थबोधो
नूनं कदाचिदपि मत्कृपया न शङ्का ।"
श्रुत्वेति तच्चरणयोः प्रणिपत्य भूयः
सप्रश्रयम् मनुरुवाच परात्परं तम् ।। ५२

"पुत्रे पितुर्भवति नाथ यथानुरागस्-
त्वत्पादपङ्कजरतिर्मम चास्तु तद्वत् ।
भूयोऽपि मे शृणु विभो मनसोऽभिलाषम्
मूढेति मां परिहसन्तु सुखेन लोकाः ।। ५३

मनि बिनु फनि जिमि जल बिनु मीना । मम जीवन तिमि तुम्हहि अधीना ।।
अस बरु मागि चरन गहि रहेऊ । एवमस्तु करुनानिधि कहेऊ ।।
अब तुम्ह मम अनुसासन मानी । बसहु जाइ सुरपति रजधानी ।।

यद्वन्न जीवति फणिर्मणिना विहीनः
मीनोऽपि वा भवति नोदकमन्तरेण ।
तद्वच्च जीवितमिदं करुणानिधानं
त्वत्पादपङ्कजवशं कुरु नाथ नित्यम् ।।" ५४

एवं मनुः प्रभुवरं वरमर्थयित्वा
तस्थौ धृतात्मकरतच्चरणारविन्दः ।
ऊचे तथेति करुणानिधिरप्यथैनम्
आज्ञापयन्नमरराजपुरीं प्रयातुम् ।। ५५

–तहँ करि भोग बिसाल तात गएँ कछु काल पुनि ।
होइहहु अवध भुआल तब मैं होब तुम्हार सुत ।।

भूयश्च तं प्रभुरुवाच मनुं प्रसन्नः
"भुक्त्वा हि तात विविधान् सुरलोकभोगान् ।
पश्चादजय्यनगरे भवितासि राजा
लब्धासि मां च तनयं नियतं तदैव ।। ५६

इच्छामय नरबेष सँवारें । होइहउँ प्रगट निकेत तुम्हारें ।।
अंसन्ह सहित देह धरि ताता । करिहउँ चरित भगत सुखदाता ।।
जे सुनि सादर नर बड़भागी । भव तरिहहिं ममता मद त्यागी ।।
आदिसक्ति जेहिं जग उपजाया । सोउ अवतरिहि मोरि यह माया ।।

अंशैश्च मे सह तदा नृपते जनिष्ये
मन्मायया च नृपते जगदादिशक्त्या ।
लीलामयीं नरतनुं नृप धारयिष्ये
मद्भक्तवृन्दसुखदं चरितं करिष्ये ।। ५७

नीत्वा क्षयम् मदविकारमहंकृतिं च
श्रृण्वन्ति सादरमिदं चरितं जना ये ।
ते लीलया भवसमुद्रमतीत्य भक्ताः
पुण्यं पदं सुकृतिनो नितरां लभन्ते ।। ५८

पुरउब मैं अभिलाष तुम्हारा । सत्य सत्य पन सत्य हमारा ।।
पुनि पुनि अस कहि कृपानिधाना । अंतरधान भए भगवाना ।।

एवम् मनोभिलषितं युवयोर्मनोऽहं
संपूरयामि सकलं कथये त्रिवारम् ।"
एवम् पुनः पुनरपि प्रभुरावदँस्तम्
अन्तर्दधे चरणदाससहितो दयालुः ।। ५९

दंपति उर धरि भगत कृपाला । तेहिं आश्रम निवसे कछु काला ।।
समय पाइ तनु तजि अनयासा । जाइ कीन्ह अमरावति बासा ।।

नीत्वा तदाश्रमपदे कतिचिद् दिनानि
राज्ञीनृपौ निहितमानसदेवदेवौ ।
त्यक्त्वा तनू सुसमये च विना हि यत्नैर्-
वस्तुं सुरेश्वरपुरे ययतुस्ततस्तौ ।। ६०

यह इतिहास पुनीत अति उमहि कही बृषकेतु ।
भरद्वाज सुनु अपर पुनि राम जनम कर हेतु ।।

प्रोवाच पुण्यचरितं गिरिजां महेशस्-
तत् ते मया कथितमद्य मुनीन्द्र तुभ्यम् ।
अस्मात् परं शृणु मुनेऽपरहेतुमेतं
यस्मादवातरदिह प्रभुरामभद्रः ।। ६१

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानस-भावानुवादे
दशरथजन्मप्रस्तावो नाम अष्टाविंशस्तरङ्गः ।

तरङ्गः २९

सुनु मुनि कथा पुनीत पुरानी । जो गिरिजा प्रति संभु बखानी ।।
बिस्व बिदित एक कैकय देसू । सत्यकेतु तहँ बसइ नरेसू ।।
धरम धुरंधर नीति निधाना । तेज प्रताप सील बलवाना ।।
तेहि कें भए जुगल सुत बीरा । सब गुन धाम महा रनधीरा ।।

पुराण-विदितं पुनः शृणु मुने चरित्रं शुभम्
पुराकथयदीश्वरः स्वयमिदं सुतायै गिरेः ।
जगद्-विदित-कैकयेषु च बभूव राजा महान्
प्रताप-बल-शील-धर्म-परतादिभिर्मण्डितः ।। १

नृपः स खलु सत्यकेतुरिति संज्ञया विश्रुतः
बभूव भुवन-श्रुतः स्वबल-तेजसा नीतिमान् ।
अजायत सुतद्वयं सकल-सद्गुणैर्मण्डितम्
महारणधुरंधरं नरपतेश्च तस्योज्ज्वलम् ।। २

राज धनी जो जेठ सुत आही । नाम प्रतापभानु अस ताही ।।
अपर सुतहि अरिमर्दन नामा । भुजबल अतुल अचल संग्रामा ।।

प्रताप-रवि-भासुरः प्रथमजो यथार्थाभिधः
स्वभाव-गुण-सुन्दरः स किल यौवराज्ये स्थितः ।
कनिष्ठतनयोऽतुलो भुजबलेऽचलः संगरे
ततः स अरिमर्दनेति च यथार्थनाम्ना श्रुतः ।। ३

भाइहि भाइहि परम समीती । सकल दोष छल बरजित प्रीती ।।
जेठे सुतहि राज नृप दीन्हा । हरि हित आपु गवन बन कीन्हा ।।

द्वयोः परमसौहृदं कपटकिल्मिषैर्वर्जितं
ततः प्रथमजे स्वयं निहित-राज्य-चिन्ता-भरः ।
तपोवनमगान्नृपः सपदि सत्यकेतुर्महान्
प्रसादयितुमीश्वरं स्वतपसा तृतीयाश्रमे ।। ४

—जब प्रतापरबि भयउ नृप फिरी दोहाई देस ।
प्रजा पाल अति बेदबिधि कतहुँ नहीं अघ लेस ।।

राज्यारोहण-घोषः प्रतापभानोरभूत् तदा राज्ये ।
श्रुत्यनुसारं सर्वां निरस्तपापं शशास सोऽपि महीम् ।। ५

नृप हितकारक सचिव सयाना । नाम धरमरुचि सुक्र समाना ।।
सचिव सयान बंधु बलबीरा । आपु प्रतापपुंज रनधीरा ।।

आसीन्नृपहितकर्ता शुक्र-समस्तस्य धर्मरुचिनामा ।
सचिवो दक्षश्चतुरो, बन्धुः शूरः, स्वयं च रणधीरः ।। ६

सेन संग चतुरंग अपारा । अमित सुभट सब समर जुझारा ।।
सेन बिलोकि राउ हरषाना । अरु बाजे गहगहे निसाना ।।
बिजय हेतु कटकई बनाई । सुदिन साधि नृप चलेउ बजाई ।।
जहँ तहँ परीं अनेक लराईं । जीते सकल भूप बरिआई ।।

अमित-सुभट-भूयिष्ठा करि-रथ-तुरगादिभिश्च संनद्धा ।
समर-धुरन्धर-राज्ञः समुचित-गर्वास्पदं महासेना ।। ७
हृष्टो मनसि स नृपतिर्दिग्विजयार्थं तदा चकार मतिम् ।
सज्जीकृत्य स सेनां संक्रमणं चादिदेश सुमुहूर्ते ।। ८
तुर्य-स्वनानुसारं ननाद रणदुन्दुभिस्तदा चोच्चैः ।
नरपतिदर्शं राजा शूरः समराङ्गणे पराजिग्ये ।। ९

सप्त दीप भुजबल बस कीन्हे । लै लै दंड छाड़ि नृप दीन्हे ।।

सप्त-द्वीपा वसुधा वशीकृता तेन बाहु-बल-योगात् ।
संचित्यापि च दण्डं मुमोच सर्वान् नृपान् स भूयोऽपि ।। १०

सकल अवनि मंडल तेहि काला । एक प्रतापभानु महिपाला ।।
स्वबस बिस्व करि बाहुबल निज पुर कीन्ह प्रबेसु ।
अरथ धरम कामादि सुख सेवइ समयँ नरेसु ।।
भूप प्रतापभानु बल पाई । कामधेनु भै भूमि सुहाई ।।

एकः प्रतापभानुः शशास भूमण्डलं तदा पूर्णम् ।
भुजबलनिर्जितविश्वः प्रविवेश ततः पुरीं निजाम् अन्ते ।। ११

धर्मार्थकामभोगान् बुभुजे सर्वान् यथासमयमेषः ।
भूपति-भुज-बल-पुष्टा सुरधेनुः सा बभूव भूमिरपि ॥ १२

सब दुख बरजित प्रजा सुखारी । धरमसील सुंदर नर नारी ॥

राज्ये प्रतापभानोर्विगत-क्लेशा प्रजा ससंतुष्टा ।
नरनार्यो रमणीया धर्माचरणानुरागिणः सर्वाः ॥ १३

सचिव धरमरुचि हरि पद प्रीती । नृप हित हेतु सिखव नित नीती ॥

धर्मरुचिः सचिवोऽपि श्रीहरिपादाम्बुज-प्रसक्त-मनाः ।
नृप-हित-साधन-हेतोरुपादिशद् राजनीतिमवनीशम् ॥ १४

गुर सुर संत पितर महिदेवा । करइ सदा नृप सब कै सेवा ॥
भूप धरम जे बेद बखाने । सकल करइ सादर सुख माने ॥

गुरुसुर-भूसुर-सेवा-निरत-मनाः सादरं स धर्मात्मा ।
श्रुति-विहितं नृप-धर्मं प्रतापभानुर्दृढं समादद्रे ॥ १५

दिन प्रति देइ बिबिध बिधि दाना । सुनइ सास्त्र बर बेद पुराना ॥

बहुविधदानरतोऽसौ लग्नः श्रवणे पुराण-शास्त्राणाम् ।
वेदाध्ययन-निमग्नः सुखेन कालं स यापयामास ॥ १६

नाना बापीं कूप तड़ागा । सुमन बाटिका सुंदर बागा ॥

वापी-कूप-तडागानि रम्यारामाः स्थले स्थले ।
विनिर्ममे स पौरेभ्यो विविधाः पुष्पवाटिकाः ॥ १७

बिप्रभवन सुरभवन सुहाए । सब तीरथन्ह बिचित्र बनाए ॥

विप्रवासाँस्तथानेकान् देवतायतनानि च ।
कारयामास धर्मज्ञस्तीर्थे तीर्थे स भूमिपः ॥ १८

–जहँ लगि कहे पुरान श्रुति एक एक सब जाग ।
बार सहस्र सहस्र नृप किए सहित अनुराग ॥

पुराणैः श्रुतिभिश्चैवं कीर्तितानि मखानि च ।
सहस्रवारं सर्वाणि धर्मप्रीत्या चकार सः ॥ १९

हृदयँ न कछु फल अनुसंधाना । भूप बिबेकी परम सुजाना ।।

फलाशामपि त्यक्त्वासौ चक्रे कर्माणि धर्मविद् ।
विवेकी ज्ञानवान् योगी शास्त्र-पारंगतो नृपः ।। २०

करइ जे धरम करम मन बानी । बासुदेव अर्पित नृप ग्यानी ।।

कायेन मनसा वाचा यत्किञ्चित् कृतवानसौ ।
तत् तच्चार्पितवान् भक्त्या पुण्यं भगवते नृपः ।। २१

चढ़ि बर बाजि बार एक राजा । मृगया कर सब साजि समाजा ।।
बिंध्याचल गभीर बन गयऊ । मृग पुनीत बहु मारत भयऊ ।।
फिरत बिपिन नृप दीख बराहू । जनु बन दुरेउ ससिहि ग्रसि राहू ।।

मृगयार्थं सुसन्नद्धः प्रतस्थेऽसावथैकदा ।
वरवाजि-समारूढो विन्ध्याद्रि-घन-काननम् ।। २२

नैकान् मृगोत्तमान् हत्वा ददर्शैकं स शूकरम् ।
विचरन्तं वने राजा महादंष्ट्रं सुदारुणम् ।। २३

भासुरोग्र-रदः सोऽयं शुशुभे वन-शूकरः ।
निगीर्य शशिनं राहुर्निलीनो विपिने यथा ।। २४

बड़ बिधु नहिं समात मुख माहीं । मनहुँ क्रोधबस उगिलत नाहीं ।।

महाकायः शशी नूनं खण्ड-ग्रस्तः प्रलम्बते ।
विजहाति न राहुस्तं क्रुद्धस्तुण्डात् स्ववैरिणम् ।। २५

कोल कराल दसन छबि गाई । तनु बिसाल पीवर अधिकाई ।।
घुरुघुरात हय आरौ पाएँ । चकित बिलोकत कान उठाएँ ।।

कराल-रदनः सोऽयं महापीवर-विग्रहः ।
हयपाद-रवं श्रुत्वा स्तब्ध-कर्णः स्थितोऽभवत् ।। २६

अपश्यत् परितश्चासौ विज्ञातुं भय-कारणम् ।
घुर्घुर-ध्वनिना गर्जन् दक्षस्तस्थौ महावने ।। २७

—नील महीधर सिखर सम देखि बिसाल बराहु ।
चपरि चलेउ हय सुटुकि नृप हाँकि न होइ निबाहु ।।

वराहं तं महाकायं नीलाद्रि-शृङ्ग-संनिभम् ।
दृष्ट्वाश्वं सकशाघातं प्रेरयामास भूपतिः ।। २८

"न हि ते मरणाद् अन्या गतिरद्यास्ति सूकर ।"
सवेगं संनिधं गच्छन् जगर्जैवं महीपतिः ।। २९

आवत देखि अधिक रव बाजी । चलेउ बराह मरुत गति भाजी ।।
तुरत कीन्ह नृप सर संधाना । महि मिलि गयउ बिलोकत बाना ।।

प्रवृद्धं हि तदा श्रुत्वा तुरगस्य पद-ध्वनिम् ।
आयान्तं स्वान्तिके चैवं वीक्ष्याश्वं सूकरस्तदा ।। ३०

आरेभे वायु-वेगेन पलायितुमितस्ततः ।
संदधे सायकं शीघ्रं कार्मुके नृपतिस्तदा ।। ३१

परिहर्तुं शराघातं सूकरोऽपि भयाकुलः ।
न्यपातयदथात्मानं भूमौ भूमि-समं तदा ।। ३२

तकि तकि तीर महीस चलावा । करि छल सुअर सरीर बचावा ।।

व्यसृजत्-कृत संधानान् सायकान् स महीपतिः ।
अरक्षत् सोऽपि चात्मानं वञ्चको वन-सूकरः ।। ३३

प्रगटत दुरत जाइ मृग भागा । रिस बस भूप चलेउ सँग लागा ।।

क्वचित् दृष्टं क्वचिन्नष्टं धावन्तं धूर्तसुकरम् ।
अनुधावन् सुसंक्रुद्धः सुदूरं प्रययौ नृपः ।। ३४

गयउ दूरि घन गहन बराहू । जहँ नाहिन गज बाजि निबाहू ।।
अति अकेल बन बिपुल कलेसू । तदपि न मृग मग तजइ नरेसू ।।

प्रविष्टः सूकरश्चैवं नीरन्ध्र-घन-काननम् ।
हस्त्यश्व-दुष्प्रवेशं तद् दृष्ट्वाप्यन्वसरन्नृपः ।। ३५

एकाकित्वं विविक्तं च काय-क्लेशं तथात्मनः ।
अगणय्य स वेगेन राजा सूकरमन्वगात् ।। ३६

कोल बिलोकि भूप बड़ धीरा। भागि पैठ गिरिगुहाँ गभीरा ॥

दृष्ट्वा तत्-साहसं राज्ञः प्राण-भीत्या पलायितः।
निलीनश्च वराहोऽसौ गभीर-गिरि-गह्वरे ॥ ३७

अगम देखि नृप अति पछिताई। फिरेउ महाबन परेउ भुलाई ॥
—खेद खिन्न छुद्धित तृषित राजा बाजि समेत।
खोजत ब्याकुल सरित सर जल बिनु भयउ अचेत ॥

दुष्प्रवेशं हि तं दृष्ट्वा नृपतिर्गिरि-कन्दरम्।
अनन्यगतिको दुःखात् प्रत्यागन्तुं प्रचक्रमे ॥ ३८

मार्गभ्रष्टस्तु निबिडे दुर्गमे विपिने तदा।
जातखेदः सहाश्वेन तृषार्तोऽभून्महीपतिः ॥ ३९

मार्गमाणस्तडागं वा सरितं वा तृषाकुलः।
मूर्च्छितः स महीपालः कंचित्कालं तदाभवत् ॥ ४०

फिरत बिपिन आश्रम एक देखा। तहँ बस नृपति कपट मुनिबेषा ॥

समाश्वस्य ततो भूयो विचरन् घन-कानने।
दृष्ट्वाश्रमं सुदूराच्च बभूव विगत-क्लमः ॥ ४१
प्रच्छन्नो मुनिवेषेण नृपतिः कोऽपि वञ्चकः।
बद्धवैरः प्रतापेन वसति स्म तदाश्रमे ॥ ४२

जासु देस नृप लीन्ह छड़ाई। समर सेन तजि गयउ पराई ॥

पराजितो नृपश्चैषः प्रताप-रविणा युधि।
हृत-राज्यः पुरारण्ये ससरात् प्रपलायितः ॥ ४३

समय प्रतापभानु कर जानि। आपन अति असमय अनुमानी ॥

जेतुः प्रताप-सूर्यस्य मत्वा सुसमयं तदा।
अकालं चात्मनो ज्ञात्वा बभूव बहु-दुःखितः ॥ ४४

गयउ न गृह मन बहुत गलानी। मिला न राजहि नृप अभिमानी ॥

न जगाम तदा गेहं चावमानेन लज्जितः।
स्वाभिमान-वशाच्चैवं न ययौ जेतृ-संनिधम् ॥ ४५

रिस उर मारि रंक जिमि राजा । बिपीन बसइ तापस कें साजा ।।

निगृह्य स्वात्मनि क्रोधं निर्धनः स महीपतिः ।
आश्रमे यतिवेषेण वसति स्म ततो वने ।। ४६

तासु समीप गवन नृप कीन्हा । यह प्रतापरबि तेहिं तब चीन्हा ।।

उपागच्छत् तमेवैनं प्रतापार्को महीपतिम् ।
अभिज्ञातश्च सद्योऽसौ प्रच्छन्न-मुनिनाश्रमे ।। ४७

राउ तृषित नहिं सो पहिचाना । देखि सुबेष महामुनि जाना ।।
उतरि तुरग तें कीन्ह प्रनामा । परम चतुर न कहेउ निज नामा ।।
– भूपति तृषित बिलोकि तेहिं सरबरु दीन्ह देखाइ ।।

तृषार्तस्तु प्रतापार्कः मेने नूनं मुनिं हि तम् ।
अश्व-पृष्ठावतीर्णः सन् सादरं प्रणनाम तम् ।। ४८
अकीर्तयन्न तु प्राज्ञः निज-नाम मुनिं तदा ।
दर्शयामास कासारं मुनिस्त्वेनं तृषाकुलम् ।। ४९

मज्जन पान समेत हय कीन्ह नृपति हरषाइ ।।
गै श्रम सकल सुखी नृप भयऊ । निज आश्रम तापस लै गयऊ ।।
आसन दीन्ह अस्त रबि जानी । पुनि तापस बोलेउ मृदु बानी ।।
को तुम्ह कस बन फिरहु अकेलें । सुंदर जुवा जीव परहेलें ।।

कृत्वा स्नानं च पानं च कासारे सह वाजिना ।
संतुष्टः स महीपालो विगताध्व-परिश्रमः ।। ५०
आनयत् तं मुनिर्जिह्मः स्वाश्रमं नृपतिं पुनः ।
दत्वासनं ततश्चोचे छद्म-वाचा सुकोमलम् ।। ५१
"एकाकी रूपवान् कस्त्वं युवा चरसि कानने ।
तृणवज्जीवितं मत्वा गतेऽस्तशिखरं रवौ ।। ५२

चक्रवर्ति के लच्छन तोरें । देखत दया लागि अति मोरें ।।

चक्रवर्ति-सुचिह्नानि दृष्ट्वा चैतानि भद्र ते ।
द्रावितं दयया चैतद् त्वदर्थं मानसं हि मे ।। ५३
[श्रुत्वा सुमधुरं चैतद् दयार्द्रं वचनं मुनेः ।
नृपः संजात-विश्रम्भस्तमुवाच वचस्तदा ।।] ५४

नाम प्रतापभानु अवनीसा । तासु सचिव मैं सुनहु मुनीसा ॥

प्रतापभानुरित्येकः शूरो राजा महीतले ।
विद्धि मां सचिवं तस्य मुनीश्वर दयानिधे ॥ ५५

फिरत अहेरें परेउँ भुलाई । बडे भाग देखेउँ पद आई ॥

मृगयार्थं वने घोरे विचरन् मुनिसत्तम ।
दृष्टवान् दैवयोगेन विस्मृताध्वा भवत्-पदे ॥ ५६

हम कहँ दुर्लभ दरस तुम्हारा । जानत हौं कछु भल होनिहारा ॥

अन्यथा दुर्लभं चैतद् दर्शनं ते महामुने ।
सूचयत्येव कल्याणं नियतं मे दयानिधे ॥" ५७
[श्रुत्वातिमधुरं वाक्यं राज्ञस्तद्विनयान्वितम् ।
प्रहृष्टोऽभूत् स मायावी प्रच्छन्नमुनिरात्मनि ॥] ५८

कह मुनि तात भयउ अँधिआरा । जोजन सत्तरि नगरु तुम्हारा ॥

मुनिरूचे, "महाभाग, यातोऽस्त-शिखरं रविः ।
नगरं च सुदूरं ते भद्र योजन-सप्ततिम् ॥ ५९

–निसा घोर गंभीर बन पंथ न सुनहु सुजान ।
बसहु आजु अस जानि तुम्ह जाएहु होत बिहान ॥

तमोवृता निशा चैषा सुघोर-दारुणं वनम् ।
प्रनष्टाध्वा च कुत्र त्वं गमिष्यसि महावने ॥ ६०
एवं विचार्य भद्र त्वं निवसाद्य ममाश्रमे ।
प्रभातायां च शर्वर्यां यथेष्टं गच्छसी" ति तम् ॥ ६१

तुलसी जसि भवतब्यता तैसी मिलइ सहाइ ।
आपुनु आवइ ताहि पहिं ताहि तहाँ लै जाइ ॥

भवितव्यतानुसारं लभते मनुजः सहायतां नूनम् ।
गमयति वात्मसमीपं गच्छति वा तं नरं स्वयं चैषा ॥ ६२

भलेहिं नाथ आयसु धरि सीसा । बाँधि तुरग तरु बैठ महीसा ॥

धृत्वा शिरसि तदाज्ञां बाढं नाथेत्युवाच नृपतिस्तम् ।
बद्ध्वाश्वं तरु-मूले स्वयं तदोपाविशन्मुनेर्निकटे ॥ ६३

नृप बहु भाँति प्रसंसेउ ताही । चरन बंदि निज भाग्य सराही ॥
पुनि बोले मृदु गिरा सुहाई । जानि पिता प्रभु करउँ ढिठाई ॥
मोहि मुनीस सुत सेवक जानी । नाथ नाम निज कहहु बखानी ॥

कृत्वा मुनेः प्रशंसां बहुधा, पादौ ननाम नतशीर्षः ।
ऊचे कोमलवचनं मुनिं स नृपतिः कृतज्ञतापूर्वम् ॥ ६४
"धन्योऽहं जनकं मे मत्वा त्वां धर्षये मुने प्रष्टुम् ।
कीर्तय मे निजनाम स्वयं च मत्वा सुतं हि मां नाथ ॥ ६५

तेहि न जान नृप नृपहि सो जाना । भूप सुहृद सो कपट सयाना ॥

अभिजज्ञे न हि राजा शुद्ध-मतिः कपट-तापसं चैनम् ।
ज्ञातो नृपो यथावन्माया-मुनिना तु पूर्वमेवासौ ॥ ६६

बैरी पुनि छत्री पुनि राजा । छल बल कीन्ह चहइ निज काजा ॥

प्रथमम‌रिस्तत्रापि क्षत्रियवर्णो, नृपः स तत्रापि ।
निज-हित-साधन-दक्षो योजयितुं छल-बलं चकार मतिम् ॥ ६७

समुझि राजसुख दुखित आरती । अवाँ अनल इव सुलगइ छाती ॥

राज्य-सुखानि स्मृत्वा पुरोपभुक्तानि जिह्म-मुनिरेषः ।
दुःखानलेन हृदये जज्वाल यथा कुलाल-पाक-पुटी ॥ ६८

सरल बचन नृप के सुनि काना । बयर सँभारि हृदयँ हरषाना ॥
—कपट बोरि बानि मृदुल बोलेउ जुगुति समेत ।

निष्कपटं नृपवचनं श्रुत्वा वैरं पुरातनं स्मृत्वा ।
प्रमुदित-चित्तश्चोचे माया-मृदुलं मुनिर्नृपं युक्त्या ॥ ६९

नाम हमार भिखारि अब निर्धन रहित निकेत ॥
कह नृप जे बिग्यान निधाना । तुम्ह सारिखे गलित अभिमाना ॥
सदा रहहिं अपनपौ दुराएँ । सब बिधि कुसल कुबेष बनाएँ ॥

"निर्धन-नामैवाहं कुतो धनं मे कुतोऽथवा धाम ।"
श्रुत्वेति नृपश्चोचे "ज्ञान-निधानं भवादृशाः सन्तः ॥ ७०
धृत्वा कपट-कुवेषं कुशलं मत्वात्मनस्ततो लोके ।
निवसन्ति प्रच्छन्ना नूनं गलिताभिमानिनः सर्वे ॥ ७१

तेहि तें कहहिं संत श्रुति टेरें। परम अकिंचन प्रिय हरि केरें ॥

"योऽसौ परम-दरिद्रः सैव सदा श्रीहरेः प्रियो भक्तः।
एवं श्रुतिभिरतस्ते प्रोच्चैर्गर्जन्ति साधवः सर्वे ॥ ७२

तुम्ह सम अधन भिखारि अगेहा। होत बिरंचि सिवहि संदेहा ॥

दृष्ट्वा त्वादृग्-रूपान् अनिकेतान् निर्धनान् मुनीन् नूनम्।
सत्य-स्वरूप-विषये नूनं ब्रह्माहरौ च संभ्रान्तौ ॥ ७३

जोसि सोसि तव चरन नमामी। मो पर कृपा करिअ अब स्वामी ॥

यो भवसि त्वं स्वामिन् स च भवसि प्रार्थये प्रसादं ते।
प्रणनामि च पादाब्जे" मुनिवरमेवं नृपस्तदा चोचे ॥ ७४

सहज प्रीति भूपति कै देखी। आपु विषय बिस्वास बिसेषी ॥
सब प्रकार राजहि अपनाई। बोलेउ अधिक सनेह जनाई ॥

दृष्ट्वाकृत्रिम-भावं विश्वासं चास्य तादृशं गाढम्।
सुखितो जिह्म-मुनिस्तं पुनरप्यानेतुमात्मवशमूचे ॥ ७५

सुनु सतिभाउ कहउँ महिपाला। इहाँ बसत बीते बहु काला ॥
–अब लगि मोहि न मिलेउ कोउ मैं न जनावउँ काहु।

शृणु नृपते कः कालो ममाश्रमे निवसतश्च यातोऽस्मिन्।
नैवायातो मनुजः कश्चिन्नैवाप्यहं गतः क्वापि ॥ ७६

लोकमान्यता अनल सम कर तप कानन दाहु ॥

लोक-प्रियता नूनं वह्नि-समा नरपतेऽत्र विद्धि त्वम्।
मुनि-जन-तपोवनं या निःशेषं दहति मास्तु शङ्केति ॥ ७७

–तुलसी देखि सुबेषु भूलहिं मूढ न चतुर नर।
सुंदर केकिहि पेखु बचन सुधा सम असन अहि ॥

[माया-मृदुलं वचनं श्रुत्वा प्रच्छन्नतापसस्यैवम्।
नीतिज्ञोऽपि च मुग्धो नृपस्तदा वञ्चितः स शुद्धमतिः ॥] ७८
कथयति तुलसी बाह्यं रूपं वा सुन्दरोऽथवा वेषः।
मूढानाम् इव लोके मोहयते मतिमतां सदा चित्तम् ॥ ७९

भीषण-भुजगाहारोऽप्यहो मयूरः शिखा-कलाप-धरः ।
किं न सुधा-सम-वचनैर्मोह्यते मतिमतो यथा मूढान् ॥ ८०

तातें गुपुत रहउँ जग माहीं । हरि तजि किमपि प्रयोजन नाहीं ॥

मुनिरूचे पुनरेनं वसाम्यहं गूढमत्र हरिभक्त्या ।
हरिवर्जं न हि किञ्चित् प्रयोजनं मेऽत्र विद्यते जगता ॥ ८१

प्रभु जानत सब बिनहिं जनाएँ । कहहु कवनि सिधि लोक रिझाएँ ॥

हरिरपि सर्वज्ञोऽसौ प्रदर्शनीयं किमत्र सर्व-विदः ।
प्राप्तव्यं न च किञ्चिज्जनानुरोधेन मेऽत्र जननाथ ॥ ८२

तुम्ह सुचि सुमति परम प्रिय मोरें । प्रीति प्रतीति मोहि पर तोरें ॥
अब जौं तात दुरावउँ तोही । दारुन दोष घटइ अति मोही ॥

परमप्रियोऽसि मे त्वं तवापि चाहं प्रियस्तथा सुमते ।
पापकरो हि भवेयं प्रतारयित्वा तवात्र विश्वासम् ॥" ८३

जिमि जिमि तापसु कथइ उदासा । तमि तमि नृपहि उपज बिस्वासा ॥
देखा स्वबस कर्म मन बानी । तब बोला तापस बगध्यानी ॥

निरीहवचनानि तानि च यथा यथोचे मुनिः ।
तथा दृढतरं बभूव नृपतेः प्रतीतिर्मुनौ ॥ ८४
यदा बकमुनिर्मनोवचनकर्मभिस्तं नृपम् ।
ददर्श वशमात्मनस्तमवदत् तदासाविदम् ॥ ८५

नाम हमार एकतनु भाई । सुनि नृप बोलेउ पुनि सिरु नाई ॥

"तदेकतनुरित्येवं विद्धि माम् अवनीपते ।"
श्रुत्वेदं नृपतिश्चोचे प्रणम्य शिरसा मुनिम् ॥ ८६

कहहु नाम कर अरथ बखानी । मोहि सेवक अति आपन जानी ॥

"मत्वा माम् आत्मनो दासं निरतं चरणाब्जयोः ।
समग्रं ब्रूहि मे नाथ स्वनाम्नोऽर्थं दयार्णव ॥" ८७

[मुनिरूचे "शृणुश्वेमं नाम्नोऽर्थं मे महीपते ।
कथयामि च ते सत्यं यथा प्रीतोऽस्म्यहं भृशम् ॥] ८८

आदिसृष्टि उपजी जबहिं तब उतपति भै मोरि ।
नाम एकतनु हेतु तेहि देह न धरी बहोरि ।
जानि आचरजु करहु मन माहीं । सुत तप तें दुर्लभ कछु नाहीं ।।

अनयैवात्र तन्वाहं जातोऽस्म्यादिम-सर्जने ।
ततः प्रभृति मे नास्ति द्वितीया तनुरत्र भोः ।। ८९

अत एव च मे नाम तदेकतनुरित्यभूत् ।
नैतच्चित्रं महीपाल तपसा किं नु दुर्लभम् ।। ९०

तपबल तें जग सृजइ बिधाता । तपबल बिष्नु भए परित्राता ।।
विधाता निर्ममे विश्वं तपसैव महीपते ।
परिरक्षति तद्विष्णुस्तपोयोगात् सदानघ ।। ९१

तपबल संभु करहिं संघारा । तप तें अगम न कछु संसारा ।।
संहरत्यपि शम्भुस्तद् विश्वं सर्वं तपोबलात् ।
न किञ्चिदपि दुष्प्राप्यं संसारे तपसा नृप ।। " ९२

भयउ नृपहि सुनि अति अनुरागा । कथा पुरातन कहै सो लागा ।।
सुप्रीतं नृपतिं दृष्ट्वा वचनैर्मुनिरीदृशैः ।
पुरातनकथास्तस्मै तदाख्यातुं प्रचक्रमे ।। ९३

करम धरम इतिहास अनेका । करइ निरूपन बिरति बिबेका ।।
इतिहासं पुराणं च कर्म-धर्म-समं नृपम् ।
वर्णयित्वा ततश्चोचे ज्ञान-वैराग्य-साधनम् ।। ९४

उदभव पालन प्रलय कहानी । कहेसि अमित आचरज बखानी ।।
उत्पत्ति-स्थिति-संहारान् अद्भुतान् जगतस्तथा ।
विचित्रान् वर्णयामास मुनिस्तस्मै सविस्तरम् ।। ९५

सुनि महीप तापस बस भयऊ । आपन नाम कहन तब लयऊ ।।
वशीभूतस्तदा भूपः कितवस्यास्य योगिनः ।
प्रकीर्तयितुमारेभे स्वनामापि च वास्तवम् ।। ९६

कह तापस नृप जानउँ तोही । कीन्हेहु कपट लाग भल मोही ।।

आक्षिप्य तु वचो राज्ञः मुनिरूचे स वञ्चकः ।
" विदितं नाम ते सत्यं प्रीतोऽस्मि तव कैतवात् ।। ९७

–सुनु महीस असि नीति जहँ तहँ नाम न कहहिं नृप ।
मोहि तोहि पर अति प्रीति सोइ चतुरता बिचारि तव ।।

न वाच्यं यत्र कुत्रापि नृपैः स्वं नाम वास्तवम् ।
राजनीत्युपदेशोऽयं प्रीतोऽस्मि तव पाटवात् ।। ९८

नाम तुम्हार प्रताप दिनेसा । सत्यकेतु तव पिता नरेसा ।।

प्रतापभानुरित्येवं नाम ते विदितं मम ।
सत्यकेतुरिति ज्ञातं पितुर्नामापि ते नृप ।। ९९

गुर प्रसाद सब जानिअ राजा । कहिअ न आपन जानि अकाजा ।।

सर्वं गुरुकृपायोगाज्जानामि जगतीपते ।
कथिते तु स्वयं हानिर्नोक्तं किञ्चिदतो मया ।। १००

देखि तात तव सहज सुधाई । प्रीति प्रतीति नीति निपुनाई ।।
उपजि परी ममता मन मोरें कहउँ कथा निज पूछे तोरें ।।

प्रीतिर्नीतिः प्रतीतिश्च शुद्धभावश्च तेऽनघ ।
यथा मे प्रीतये भूप कथितं ते तथा मया ।। १०१

अब प्रसन्न मैं संसय नाहीं । मागु जो भूप भाव मन माहीं ।।

प्रसन्नोऽस्मि भृशं तेऽहं मा ते शङ्का महीपते ।
कथयस्व यथाकामं यत्ते मनसि विद्यते ।। " १०२

सुनि सुबचन भूपति हरषाना । गहि पद बिनय कीन्हि बिधि नाना ।।

श्रुत्वा सुवचनं चैतत् प्रहृष्टः स महीपतिः ।
नत्वा मूर्ध्ना मुनेः पादौ प्रार्थयामास निर्भरम् ।। १०३

कृपासिंधु मुनि दरसन तोरें । चारि पदारथ करतल मोरें ।।

" दर्शनादेव ते पुण्यात् दयासिन्धो सतां पते ।
पुरुषार्थ-चतुष्कं च नूनं करतले हि मे ।। १०४

प्रभुहि तथापि प्रसन्न बिलोकी । मागि अगम बर होउँ असोकी ॥

प्रसन्नस्तु यथा मेऽद्य प्रभुरेवं कृपाकरः ।
वरमेकं तथा याचे दुःखमुक्तो भवामि च ॥ १०५

–जरा मरन दुख रहित तनु समर जितै जनि कोउ ।
एकछत्र रिपुहीन महि राज कलप सत होउ ।

जराशोकविमुक्तेयं तनुरस्तु दयानिधे ।
मृत्योरपि तथाजय्या कुरु नाथ तनुं मम ॥ १०६
समरेऽपि च मा कश्चिज्जेतुं मां पारयेदरिः ।
एकच्छत्रं हि मे राज्यं शतकल्पानि चास्त्विह ॥" १०७

कह तापस नृप ऐसेइ होऊ । कारन एक कठिन सुनु सोऊ ॥
कालउ तुअ पद नाइहि सीसा । एक बिप्रकुल छाडि महीसा ॥

मुनिरूचे "तथैवास्तु व्यावृत्तिस्तु वदाम्यहम् ।
विप्रवर्जं जगत् सर्वं मृत्युना सह ते वशे ॥ १०८

तपबल बिप्र सदा बरिआरा । तिन्ह के कोप न कोउ रखवारा ॥

विप्रस्तु बलवान् नित्यं तपसात्र विशांपते ।
कः समर्थः परित्रातुं कुपिताद् अग्रजन्मनः ॥ १०९

जौं बिप्रन्ह बस करहु नरेसा । तौ तुअ बस बिधि बिष्नु महेसा ॥

विप्रान् यदि वशे राजन् करिष्यसि महीतले ।
ब्रह्माविष्णुमहेशाश्च सदा स्थास्यन्ति ते वशे ॥ ११०

चल न ब्रह्मकुल सन बरिआई । सत्य कहउँ दोउ भुजा गठाई

विप्रस्याग्रे न सिध्यन्ति बल-साहस-विक्रमाः ।
कथयामि च सत्यं ते बाहूद्वयस्य महीपते ॥ १११

बिप्र श्राप बिनु सुनु महिपाला । तोर नास नहिं कवनेहुँ काला ॥

विप्र-शापादृते राजन् नास्ति ते भय-कारणम् ।
विप्राद् अन्यत्र वा राजन् नाशस्ते नहि संभवः ॥" ११२

हरषेउ राउ बचन सुनि तासू । नाथ न होइ मोर अब नासू ।।

भृशं प्रमुदितो राजा श्रुत्वेदं मुनिभाषितम् ।
"नियतं नास्ति मे नाशः कदाचिदपि संप्रति ।। ११३

तव प्रसाद प्रभु कृपानिधाना । मो कहुँ सर्ब काल कल्याना ।।

प्रसन्ने त्वयि मे नाथ कल्याणं सार्वकालिकम् ।
भविष्यति मुने नूनम्" इत्युवाच मुनिं तदा ।। ११४

–एवमस्तु कहि कपटमुनि बोला कुटिल बहोरि ।।
मिलब हमार भुलाब निज कहहु त हमहि न खोरि ।

तातें मैं तोहि बरजउँ राजा । कहें कथा तव परम अकाजा ।।
छठें श्रवन यह परत कहानी । नास तुम्हारा सत्य मम बानी ।।

"एवमेवास्तु राजेन्द्र फलिष्यति हि ते स्पृहा ।
मार्गभ्रंशस्तु कान्तारे संवादश्चावयोरयम् ।। ११५
वक्तव्यौ न हि कस्यापि रहस्यं रक्ष यत्नतः ।
नो चेद् दोषो न मे कश्चिन्महाहानिस्तु ते नृप ।। ११६
षट्कर्णेषु रहस्यं तद् याते चात्र नराधिप ।
नाशस्ते नियतस्तूर्णं विद्धि मां सत्यवादिनम् ।। ११७

यह प्रगटें अथवा द्विजश्रापा । नास तोर सुनु भानुप्रतापा ।।
आन उपायँ निधन तव नाहीं । जौं हरि हर कोपहिं मन माहीं ।।

विप्र-शापोऽथवा राजन् रहस्यस्याप्यरक्षणम् ।
नाशहेतू हि ते नित्यं न ते निधनमन्यथा ।। ११८
वर्जयित्वा तु तौ नूनं भूयोऽपि शृणु भूपते ।
क्रोधादपि महेशस्य हरेर्वा नास्ति ते भयम् ।।" ११९

सत्य नाथ पद गहि नृप भाषा । द्विज गुर कोप कहहु को राखा ।।

इत्युक्त्वा विरते तस्मिन् मुनौ कैतवकारिणि ।
महीपतिरुवाचैवं तत्पाद-नत-मस्तकः ।। १२०
"को नु रक्षेद् इह क्रोधाद् गुरोर्विप्रस्य वा मुने ।
वर्जनीयो हि तत्कोपः सत्यं नाथ वचो हि ते ।। १२१

राखइ गुर जौं कोप बिधाता । गुर बिरोध नहिं कोउ जग त्राता ॥
परित्राता गुर्विश्वे कुपितेऽपि विधातरि ।
कुपिते तु गुरौ नाथ न कश्चिद् रक्षको भुवि ॥ १२२

जौं न चलब हम कहे तुम्हारें । होउ नास नहिं सोच हमारें ॥
करिष्ये यदि नाहं ते कल्याणवचनं मुने ।
कामं भवतु मे नाशो न मे चिन्तात्र काचन ॥ १२३

एकहिं डर डरपत मन मोरा । प्रभु महिदेव श्राप अति घोरा ॥
एकमेव तु चित्ते मे भयं वसति दारुणम् ।
महाघोरः सदा शापो भूसुराणां मुनीश्वर ॥ १२४

होहिं बिप्र बस कवन बिधि कहहु कृपा करि सोउ ।
तुम्ह तजि दीनदयाल निज हितू न देखउँ कोउ ॥
कथम् आत्मवशं कुर्याम् विप्रवर्गं महीतले ।
ब्रूहि मां कृपया नाथ त्वदन्यो न हि मे हितः ॥" १२५

सुनु नृप बिबिध जतन जग माहीं । कष्टसाध्य पुनि होहिं कि नाहीं ॥
मुनिरूचे भृशं प्रीतः श्रुत्वा तन्नृपतेर्वचः ।
"ब्रवीमि त्वां महाभाग रहस्यं शृणु भूपते ॥ १२६
बहूनि सन्ति संसारे साधनानि महीपते ।
कष्ट-साध्यानि सर्वाणि राजन् सिध्यन्ति वा न वा ॥ १२७

अहइ एक अति सुगम उपाई । तहाँ परंतु एक कठिनाई ॥
उपायं सुगमं त्वेकं कथयामि हिताय ते ।
प्रत्यूहो विद्यते कश्चिद् यद्यप्यत्रापि भूपते ॥ १२८

मम आधीन जुगुति नृप सोई । मोर जाब तव नगर न होई ॥
उपायः स महीपाल मदधीनो हि सर्वथा ।
अहं तु नगरीं राजन्नागमिष्यामि नैव ते ॥ १२९

आजु लगें जब अरु तें भयऊँ । काहू के गृह ग्राम न गयऊँ ॥
अद्य यावत् कदाप्येवम् आरभ्य जन्मनो हि मे ।
गेहं वा नगरं वाहं गतः कस्यापि भूपते ॥ १३०

जौं न जाउँ तव होइ अकाजू । बना आइ असमंजस आजू ।।

यद्यहं नगरं राजन्नागच्छामि न ते पुनः ।
सिध्यतीह न कार्यं ते प्रत्यूहः सैव भूपते ।। " १३१

सुनि महीस बोलेउ मृदु बानी । नाथ निगम असि नीति बखानी ।

श्रुत्वेदं नृपतिश्चोचे मृदु-मन्दं मुनीश्वरम् ।
"वर्णिता नाथ किं नैषा नीतिर्वेदेषु चोत्तमा ।। १३२

बड़े सनेह लघुन्ह पर करहीं । गिरि निज सिरनि सदा तृन धरहीं ।।
जलधि अगाध मौलि बह फेनू संतत धरनि धरत सिर रेनू ।।

तृणम् अद्रिः समुद्रश्च लघु-फेनं स्वमस्तके ।
निदधाति धरा धूलिं सन्तः क्षुद्रानुरागिणः ।। " १३३

–अस कहि गहे नरेस पद स्वामी होहु कृपाल ।
मोहि लागि दुख सहिअ प्रभु सज्जन दीनदयाल ।।

मुनेर्धृत्वाङ्घ्रियुगलं स्वकराभ्यां नरेश्वरः ।
पुनरूचेऽतिकरुणं वाक्यं चैवं मुनिं तदा ।। १३४

"मदर्थं नाथ कष्टं तत् सहस्व करुणाकर ।
दीनबन्धो कृपासिन्धो प्रसीद मयि सेवके ।। " १३५

जानि नृपहि आपन आधीना । बोला तापस कपट प्रबीना ।।
सत्य कहउँ भूपति सुनु तोही । जग नाहिन दुर्लभ कछु मोही ।।

स्वाधीनं नृपतिं दृष्ट्वा मुनिरूचे स वञ्चकः ।
"सत्यं वच्मि महीपाल दुर्लभं मे न विद्यते ।। १३६

अवसि काज मैं करिहउँ तोरा । मन तन बचन भगत तैं मोरा ।।

साहाय्यं ते करिष्यामि कार्येऽस्मिन् नियतं नृप ।
भक्तोऽसि मे यथा काया-वाङ्मनोभिर्नरोत्तम ।। १३७

जोग जुगुति तप मंत्र प्रभाऊ । फलइ तबहिं जब करिअ दुराऊ ।।

तपो योगोऽथवा युक्तिर्मन्त्रसामर्थ्यमेव वा ।
सिध्यन्ति सर्व एवैते सुगूढाचरिता यदा ।। १३८

जौं नरेस मैं करौं रसोई । तुम्ह परुसहु मोहि जान न कोई ॥
अन्न सो जोइ जोइ भोजन करई । सोइ सोइ तव आयसु अनुसरई ॥

'सूदोऽहं, परिवेष्टा त्वं, न च मां वेत्ति कश्चन ।'
एवं भोजयसे यं यं स स ते कुरुते वचः ॥ १३९

पुनि तिन्ह के गृह जेवँइ जोऊ । तव बस होइ भूप सुनु सोऊ ॥

ये चापि भुञ्जते भूप तेषां सद्मसु भूसुराः ।
ते ते चैवं वशीभूताः सर्वे चाज्ञाकरास्तव ॥ १४०

जाइ उपाय रचहु नृप एहू । संबत भरि संकलप करेहू ॥

उपायश्च स एवैषः कार्योऽत्र नृपते त्वया ।
भव भोजयिता भूप संवत्सरमितःपरम् ॥ १४१

–नित नूतन द्विज सहस सत बरेहु सहित परिवार ।
मैं तुम्हरे संकलप लगि दिनहिं करबि जेवनार ॥

नित्य-नूत्नं विप्र-लक्षं सकुटुम्बं दिने दिने ।
त्वया भोज्यं ससंकल्पं पचाम्यन्नं स्वयं नृप ॥ १४२

एहि बिधी भूप कष्ट अति थोरें । होइहहिं सकल बिप्र बस तोरें ॥
करिहहिं बिप्र होम मख सेवा । तेहिं प्रसंग सहजेहिं बस देवा ॥

एवं स्वल्पेन यत्नेन द्विजाः सर्वे वशे तव ।
तैर् हुतैर्हवनैर्देवा विनायासं हि ते वशे ॥ १४३

और एक तोहि कहउँ लखाऊ । मैं एहिं बेष न आउब काऊ ॥

वक्तुम् इच्छामि भूयोऽपि किञ्चिद् अन्यन्नरेश्वर ।
नागमिष्यामि ते गेहं वेषेणैतेन भूमिप ॥ १४४

तुम्हरे उपरोहित कहुँ राया । हरि आनब मैं करि निज माया ॥
तपबल तेहि करि आपु समाना । रखिहउँ इहाँ बरष परवाना ॥

निज-माया-बलाद् राजन् हृत्वा तेऽहं पुरोहितम् ।
कृत्वा तं मत्समानं च मत्स्थानेऽत्र निवासये ॥ १४५

मैं धरि तासु बेषु सुनु राजा । सब बिधि तोर सँवारब काजा ।।

धृत्वा स्वयं च तद्रूपं गेहे ते निवसाम्यहम् ।
संवत्सरं च कार्यं ते साधयाम्यवनीपते ।। १४६

गैनिसि बहुत सयन अब कीजे । मोहि तोहि भूप भेंट दिन तीजे ।।

प्रगताथ निशा चैषा स्वपिहि त्वं महीपते ।
अद्यारभ्य समेष्यावस्तृतीये दिवसे पुनः ।। १४७

मैं तपबल तोहि तुरग समेता । पहुँचेहउँ सोवतहि निकेता ।।

तपोबलात् तथैवाहं निशायां सुप्तमेव च ।
प्रापयिष्यामि गेहं त्वां तुरगं च नरोत्तम ।। १४८

—मैं आउब सोइ बेषु धरि पहिचानेहु तब मोहि ।
जब एकांत बोलाइ सब कथा सुनावौं तोहि ।।

धृतपूर्वोक्तवेषोऽहं ततश्चायामि ते गृहम् ।
कथयामि कथाम् एनां रहसि स्वयमेव ते ।। १४९
संकेतः स महीपाल प्रत्यभिज्ञार्थमावयोः ।
स्मर्तव्यः सादरं सोऽयं कर्तव्यं मे वचस्तदा ।। " १५०

सयन कीन्ह नृप आयसु मानी । आसन जाइ बैठ छलग्यानी ।।

कृत्वाज्ञां तां मुनेः क्षिप्रं विश्रान्तः स महीपतिः ।
उपविष्टस्तु धूर्तोऽसावासने वञ्चको मुनिः ।। १५१

श्रमित भूप निद्रा अति आइ । सो किमि सोव सोच अधिकाई ।।

परिश्रान्तश्च नृपतिः गाढ-सुप्तः क्षणेन च ।
कितवस्य कुतो निद्रा कूटोपाचस्य चिन्तया ।। १५२

कालकेतु निसिचर तहँ आवा । जेहिं सूकर होइ नृपहि भुलावा ।।

प्राप्तस्तदा मुनिं जिह्मं कालकेतुर्निशाचरः ।
सूकरच्छद्मरूपेण नृपं योऽपाहरद् वने ।। १५३

परम मित्र तापस नृप केरा । जानइ सो अति कपट घनेरा ।।

सहायश्य सखा चैव मुनेः परमवल्लभः ।
कपटोपायकुशलः कालकेतुः स दुर्जनः ।। १५४

तेहि के सत सुत अरु दस भाई । खल अति अजय देव दुखदाई ॥

पुत्राणां शतकं तस्य बन्धूनां दशकं तथा ।
अजय्यं समरे दुष्टं सुरसद्-विप्र-पीडकम् ॥ १५५

प्रथमहिं भूप समर सब मारे । बिप्र संत सुर देखि दुखारे ॥
तेहिं खल पाछिल बयरु सँभारा । तापस नृप मिलि मंत्र बिचारा ॥
जेहिं रिपु छय सोइ रचेन्हि उपाऊ । भावी बस न जान कछु राऊ ॥

प्रतापभानुना युद्धे पूर्वमेव यथा हतम् ।
स्मरन् वैरं हि तत्पूर्वं कालकेतुः स दुर्मतिः ॥ १५६

कुमन्त्रणां मुनेः सार्धं चकारारिजिघांसया ।
भवितव्यवशीभूतो राजा तद् वेत्तुमक्षमः ॥ १५७

–रिपु तेजसी अकेल अपि लघु करि गनिअ न ताहु ।
अजहुँ देत दुख रबि ससिहि सिर अवसेषित राहु ॥

एकाकी न हि मन्तव्यः क्षुद्रः शत्रुः प्रतापवान् ।
राहुः शिरोऽवशिष्टोऽपि ग्रसते शशि-भास्करौ ॥ १५८

तापस नृप निज सखहि निहारी । हरषि मिलेउ उठि भयउ सुखारी ॥
मित्रहि कहि सब कथा सुनाई । जातुधान बोला सुख पाई ॥
अब साधेउँ रिपु सुनहु नरेसा । जौं तुम्ह कीन्ह मोर उपदेसा ॥
परिहरि सोच रहहु तुम्ह सोई । बिनु औषध बिआधि बिधि खोई ॥

संमिल्य सुहृदं चैनं प्रहृष्टः कपटी मुनिः ।
कथयामास वृत्तान्तं सर्वं तस्मै सविस्तरम् ॥ १५९

संतुष्टो यातुधानोऽसौ कालकेतुरुवाच तम् ।
प्रीतोऽस्म्यहं कृतं यावद् वचनं मे त्वयात्र भोः ॥ १६०

विद्धि शत्रुं वशे मित्र वीतचिन्तो भवाधुना ।
स्वपिहि त्वं, हृता व्याधिर्विधात्रा भेषजं विना ॥ १६१

कुल समेत रिपु मूल बहाई । चौथें दिवस मिलब मैं आई ।।

सकुलं तं रिपुं हत्वा निःशेषं नाशयाम्यहम् ।
अद्यारभ्य चतुर्थेऽह्नि त्वत्-सकाशं निवर्तये ।।" १६२

तापस नृपहि बहुत परितोषी । चला महाकपटी अतिरोषी ।।

एवं तापसभूपं तं संतोष्य बहुधा शठम् ।
महाशठः क्रोधशीलो गतः स रजनीचरः ।। १६३

भानुप्रतापहि बाजि समेता । पहुँचाएसि छन माझ निकेता ।।

प्रसुप्तं च प्रतापार्कं तुरगेण समं तदा ।
प्रापयामास मायावी गृहं तूर्णं निशाचरः ।। १६४

नृपहि नारि पहिं सयन कराई । हयगृहँ बाँधेसि बाजि बनाई ।।

स्वापयामास राजानं भार्यायाः सन्निधं गृहे ।
बबन्ध तुरगं चैवं वाजि-शालान्तरे ततः ।। १६५

– राजा के उपरोहितहि हरि लै गयउ बहोरि ।
लै राखेसि गिरि खोह महुँ मायाँ करि मति भोरि ।।
आपु बिरचि उपरोहित रूपा । परेउ जाइ तेहि सेज अनूपा ।।

हृत्वा राजपुरोहितं स दनुजः कृत्वा च बुद्धिभ्रमम्
कान्तारे गिरि-गह्वरे तमनयन्मायाबलादात्मनः ।
रूपं राजपुरोहितस्य च पुनर्धृत्वा स्वयं वञ्चकः
सुप्तस्तस्य निशाचरः सुशयने प्रासादकक्षे सुखम् ।। १६६

जागेउ नृप अनभएँ बिहाना । देखि भवन अति अचरजु माना ।।
मुनि महिमा मन महुँ अनुमानी । उठेउ गवँहि जेहि जान न रानी ।।

प्रत्यूषे महति प्रतापरविरप्यासीत् प्रबुद्धो यदा
दृष्ट्वात्मानमसौ गृहे स्वशयने सुप्तं भृशं हर्षितः ।
स्पृष्टश्चेतसि तापसस्य महता मायाबलेनानघः
सुप्तायां शयने जहौ सुनिभृतं राज्ञ्यां स्वतल्पं नृपः ।। १६७

कानन गयउ बाजि चढ़ि तेहीं । पुर नर नारि न जानेउ केहीं ।।
गएँ जाम जुग भूपति आवा । घर घर उत्सब बाज बधावा ।।

आरुह्यापि ततस्तमेव तुरगं निर्गत्य तूर्णं पुरात्
पौरैरेवमलक्षितः स नृपतिः प्राप्तः पुनः काननम् ।
आयातश्च ततः पुरं नरपतिर्याते मुहूर्तद्वये
पौरैरप्यभिनन्दितः प्रमुदितैर्भेरीस्वनैः सादरम् ।। १६८

उपरोहितहि देख जब राजा । चकित बिलोक सुमिरि सोइ काजा ।।
जुग सम नृपहि गए दिन तीनी । कपटी मुनि पद रह मति लीनी ।।
समय जानि उपरोहित आवा । नृपहि मते सब कहि समुझावा ।।

दृष्ट्वा चापि पुरोहितं स चकितः स्मृत्वा स्वकार्यं नृपः
यातानि त्रिदिनानि चास्य युगवत् धूर्ताङ्घ्रिलग्नात्मनः ।
संप्राप्तः स पुरोहितः सुनिभृतं काले सुयोग्ये नृपं
सर्वां पूर्वकृतां न्यवेदयदसौ राज्ञे रहोमन्त्रणाम् ।। १६९

– नृप हरषेउ पहचानि गुरु भ्रम बस रहा न चेत ।
बरे तुरत सत सहस बर बिप्र कुटुंब समेत ।।

संकेतेन निरस्तसंशयमतिर्ज्ञात्वा गुरुं तं निजं
हर्षोत् फुल्लितमानसः स नृपतिर्विश्रान्तचित्तस्तदा ।
विप्रान् लक्षमितान् कुटुम्बसहितान् आमन्त्रयत् तत्क्षणात्
येषां न स्ववशे मतिः स्वहितमप्येते न वेत्तुं क्षमाः ।। १७०

उपरोहित जेवनार बनाई । छरस चारि बिधि जसि श्रुति गाई ।।
मायामय तेहिं कीन्हि रसोई । बिंजन बहु गनि सकइ न कोई ।।
बिबिध मृगन्ह कर आमिष राँधा । तेहि महुँ बिप्र माँसु खल साँधा ।।

भोज्यं चापि चतुर्विधं रुचिकरं मायामयं षड्-रसम्
मायावी गुरुरागमादि-विहितं सिद्धीचकार स्वयम् ।
नाना-व्यञ्जन-शोभने मृगपशुस्वाद्वामिषैः संयुते
विप्राणामपि चामिषं स कुटिलो व्यामिश्रयद् भोजने ।। १७१

भोजन कहुँ सब बिप्र बोलाए । पद पखारि सादर बैठाए ।।

आमन्त्र्य विप्रवृन्दं लक्षमितं सह-कुटुम्ब-परिवारम् ।
चरण-क्षालन-पूर्वं सादरमुपवेशयांचकार नृपः ।। १७२

परुसन जबहिं लाग महिपाला । भै अकासबानी तेहि काला ।।

यावच्चारेभेऽसौ परिवेषयितुं सुभोजनं राजा ।
तावद् गगनगिरं ते सर्वे चाकर्णयन् महाविप्राः ।। १७३

बिप्रबृंद उठि उठि गृह जाहू । है बड़ि हानि अन्न जनि खाहू ।।
भयउ रसोईं भूसुर माँसू । सब द्विज उठे मानि बिस्वासू ।।
भूप बिकल मति मोहँ भुलानी । भावी बस न आव मुख बानी ।।

"उत्तिष्ठत स्वगेहं गच्छत विप्राः सदोषमन्नमिदम् ।
ब्राह्मण-मांसम् पक्वं महानसे भुसुरा न भोक्तव्यम् ।।" १७४
श्रुत्वेति चोत्थितास्ते विप्राः सर्वे तदा सुसंक्रुद्धाः ।
भवितव्यवशो राजा यद्यपि भीतो न तान् किमप्यूचे ।। १७५

—बोले बिप्र सकोप तब नहिं कछु कीन्ह बिचार ।
जाइ निसाचर होहु नृप मूढ़ सहित परिवार ।।

"राजन् सहपरिवारं जनिष्यसे दानवस्त्वमायत्याम् ।"
एवं शापगिरं ते क्रुद्धा नृपमूचिरे द्विजाः सहसा ।। १७६

छत्रबंधु तैं बिप्र बोलाई । घालै लिए सहित समुदाई ।।
ईस्वर राखा धरम हमारा । जैहसि तैं समेत परिवारा ।।

"रे रे कुटिलमते त्वं विप्रान् सकुटुम्बमीहसे नष्टान् ।
त्राता नो परमेशः सहपरिवारं स्वयं विनश्य त्वम् ।। १७७

संबत मध्य नास तव होऊ । जलदाता न रहिहि कुल कोऊ ।।

नाशस्तेऽयं नियतः पूर्वं संवत्सरान्महीपाल ।
जलदातापि च कश्चित् कुले न वर्तिष्यते ततस्तेऽत्र ।।" १७८

नृप सुनि श्राप बिकल अति त्रासा । भै बहोरि बर गिरा अकासा ।।

भय-कम्पित-सकलाङ्गः श्रुत्वा शापं नृपोऽग्रजानां तम् ।
पुनरश्रूयत वाणी दिव्या गगनोत्थिता तदा पुण्या ।। १७९

बिप्रहु श्राप बिचारि न दीन्हा । नहिं अपराध भूप कछु कीन्हा ॥
चकित बिप्र सब सुनि नभबानी । भूप गयउ जहँ भोजन खानी ॥

"अविचार्यैवं विप्राः निरागसं भूपतिं शपध्वेऽत्र ।"
श्रुत्वेति द्विजवृन्दश्चकितो राजा महानसं यातः ॥　१८०

तहँ न असन नहिं बिप्र सुआरा । फिरेउ राउ मन सोच अपारा ॥

न ददर्श तु तत्रासौ भोज्यं नैवापि बल्लवं विप्रम् ।
भ्रान्तो भय-चकितोऽसौ चिन्ताकुलितो निववृते सद्यः ॥　१८१

सब प्रसंग महिसुरन्ह सुनाई । त्रसित परेउ अवनीं अकुलाई ॥

कथयामास तदासौ विप्रेभ्यः सर्वमेव वृत्तान्तम् ।
मूर्च्छाविकलो भूमौ पपात भूम्याः पतिर्भयाक्रान्तः ॥　१८२

—भूपति भावी मिटइ नहिं जदपि न दूषन तोर ।
किएँ अन्यथा होइ नहिं बिप्रश्राप अति घोर ॥

"यद्यपि नास्ति तवास्मिन् दोषः कश्चिन्महीपते नूनम् ।
यद् भाव्यं तद् भाव्यं न विप्रशापोऽन्यथा भवति घोरः ॥"　१८३

अस कहि सब महिदेव सिधाए । समाचार पुरलोगन्ह पाए ॥

उक्त्वैवं वचनं भूपं निर्जग्मुस्तेऽग्रजास्ततः ।
विदितं सकलं वृत्तं पौराणाम् अचिरात् तदा ॥　१८४

सोचहिं दूषन दैवहि देहीं । बिरचत हंस काग किय जेहीं ॥

चिन्ताक्रान्ताश्च ते सर्वे विधातारम् अदूषयन् ।
हंस-निर्माणकाले यो निर्ममे काकमीदृशम् ॥　१८५

उपरोहितहि भवन पहुँचाई । असुर तापसहि खबरि जनाई ॥

पुरोहितं च भूयस्तं प्रापयित्वा नृपं तदा ।
प्रच्छन्नतापसं यातः कालकेतुर्निशाचरः ॥　१८६

तेहिं खल जहँ तहँ पत्र पठाए । सजि सजि सेन भूप सब धाए ॥

प्रेषयामास पत्राणि सर्वेभ्यः स मुनिस्तदा ।
विजितेभ्यो नृपेभ्योऽसौ प्रतापभानुना पुरा ॥　१८७

समवेतास्तदा तूर्णं महीपाला युयुत्सवः ।
सेनाभिः सहिताः सर्वे विजये कृतनिश्चयाः ॥ १८८

घेरेन्हि नगर निसान बजाई । बिबिध भाँति नित होई लराई ॥
दुन्दुभि-ध्वनिना सार्धं पर्यवेष्टन्त ते पुरम् ।
नानोपायैरयुध्यन्त प्रतापभानुना सह ॥ १८९

जूझे सकल सुभट करि करनी । बंधु समेत परेउ नृप धरनी ॥
प्रतापभानोः सुभटाः युध्यमाना रणे हताः ।
रणभूमौ नृपश्चासौ पपात सहबन्धुना ॥ १९०

सत्यकेतु कुल कोउ नहिं बाँचा । बिप्रश्राप किमि होइ असाँचा ॥
सत्यकेतोः कुले कश्चिन्नावशिष्टो नरस्तदा ।
विप्रशापः कथं नूनं मिथ्या भवितुमर्हति ॥ १९१

रिपु जिति सब नृप नगर बसाई । निज पुर गवने जय जसु पाई ॥
जित्वा नृपं तदा सर्वे निवास्य नगरं पुनः ।
स्वं स्वं पुरं ततो जग्मुः रिपवः श्रीयशोयुताः ॥ १९२

—भरद्वाज सुनु जाहि जब होइ बिधाता बाम ।
धूरि मेरुसम जनक जम ताहि ब्यालसम दाम ॥
पश्य नूनं भरद्वाज सति वामे विधातरि ।
रजो मेरुः पिता कालः रज्जुः सर्पो भवत्युत ॥ १९३

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
रावण-जन्म-पूर्व-पीठिका नाम एकोनत्रिंशस्तरङ्गः ।

तरङ्गः ३०

काल पाइ मुनि सुनु सोइ राजा । भयउ निसाचर सहित समाजा ।।

प्रतापभानुः सैवासौ संबभूव पुनर्मुने ।
सुयोग्यसमये प्राप्ते रावणो रजनींचरः ।। १

दस सिर ताहि बीस भुजदंडा । रावन नाम बीर बरिबंडा ।।

दशतुण्डः प्रचण्डोऽसौ दशदोर्दण्डयुग्मकः ।
दुर्जयः समरे दैत्यः वीरो विक्रान्तदर्शनः ।। २

भूप अनुज अरिमर्दन नामा । भयउ सो कुंभकरन बलधामा ।।

अनुजस्तस्य चैवासावरिमर्दन-नामकः ।
संबभूव पुनर्भूमौ कुम्भकर्णः प्रभाववान् ।। ३

सचिव जो रहा धरमरुचि जासू । भयउ बिमात्र बंधु लघु तासू ।।

स धर्मरुचिरेवासौ सचिवश्च महीपतेः ।
विमात्रोऽवरजो भूत्वा पुनर्जातोऽवनीतले ।। ४

नाम बिभीषन जेहि जग जाना । बिष्नुभगत बिग्यान निधाना ।।

बिभीषणेति नाम्नासौ बभूव विदितो भुवि ।
विष्णुभक्तो महाँश्चासौ ज्ञानविज्ञानवान् शुचिः ।। ५

रहे जे सुत सेवक नृप केरे । भए निसाचर घोर घनेरे ।।

ये के च नृपतेः पुत्राः सेवकाश्चैव वा मुने ।
परिवारः समस्तश्च जाता घोरा निशाचराः ।। ६

कामरूप खल जिनस अनेका । कुटिल भयंकर बिगत बिबेका ।।

कामरूपाः खलाः सर्वे विचित्राकारदर्शनाः ।
विवेकरहिताः सर्वे कुटिला भयरूपिणः ।। ७

कृपा रहित हिंसक सब पापी । बरनि न जाहिं बिस्व परितापी ।।

निर्दयाः हिंसकाः क्रूराः पापात्मानो निशाचराः ।
यत्कृता विश्वपीडात्र शब्दातीता कवेः सदा ।। ८

—उपजे जदपि पुलस्त्यकुल पावव अमल अनूप।
तदपि महीसुर श्राप बस भए सकल अघरूप ।।

जाता यद्यपि सर्वे ते पौलस्त्ये निर्मले कुले।
विप्रशापात् तथाप्येते बभूवुः पापरूपिणः ।। ९

कीन्ह बिबिध तप तीनिहुँ भाई। परम उग्र नहिं बरनि सो जाई ।।
भ्रातरस्तु त्रयोऽप्येते तपस्तेपुः सुदारुणम्।
विविधं परमोग्रं च वर्णनं यस्य दुष्करम् ।। १०

गयउ निकट तप देखि बिधाता। मागहु बर प्रसन्न में ताता ।।
दृष्ट्वोग्रं तत् तपस्तेषां प्रसन्नोऽभूद् विधिस्तदा।
उवाच तान् उपागम्य "ब्रूत किं वोऽस्त्यभीप्सितम् ।।" ११

करि बिनती पद गहि दससीसा। बोलेउ बचन सुनहु जगदीसा ।।
प्रणिपत्य पदे तस्य प्रार्थयामास रावणः।
"शृणु मे विनतिं नाथ कृपालो जगदीश्वर ।। १२

हम काहू के मरहिं न मारें। बानर मनुज जाति दुइ बारें ।।
नर-वानर-वर्जं मां हन्तुं मास्तु क्षमो विभो।
कोऽप्यन्यस्त्रिषु लोकेषु वरमेनं वृणोम्यहम् ।।" १३

एवमस्तु तुम्ह बड़ तप कीन्हा। मैं ब्रह्माँ मिलि तेहि बर दीन्हा ।।
"तथास्तु दनुजश्रेष्ठ, कृतं घोरं तपस्त्वया।"
इत्येवास्मै वरं शीघ्रं ददतुर्विधिशङ्करौ ।। १४

पुनि प्रभु कुंभकरन पहिं गयऊ। तेहि बिलोकि मन बिसमय भयऊ ।।
कुम्भकर्णं ततो यावद् उपागच्छत् प्रजापतिः।
तावत् स विस्मयाक्रान्तो दृष्ट्वा तस्य बृहत् तनुम् ।। १५

जौं एहिं खल नित करब अहारू। होइहि सब उजारि संसारू ।।
'दानवोऽयं महाकायो नित्यं भुञ्जीत चेद् भुवि।
भविष्यति जगत् सर्वं मरु-स्थलमिवाचिरात् ।।' १६

सारद प्रेरि तासु मति फेरी । मागेसि नीद मास षट केरी ॥

विचिन्त्यैवं तदा ब्रह्मा नेतुं तन्मतिमुत्पथम् ।
सरस्वतीं चकाराज्ञां लोककल्याणचिन्तया ॥ १७
भ्रान्तबुद्धिस्तदा दैत्यः कुम्भकर्णो महातनुः ।
निद्रां षाण्मासिकीं दीर्घाम् आर्थयत् परमेष्ठिनम् ॥ १८

– गए बिभीषन पास पुनि कसेउ पुत्र बर मागु ।

बिभीषणं पुनर्गत्वा ब्रह्मोवाच दयानिधिः ।
वरं याचस्व पुत्र त्वं प्रीतोऽस्मि तपसेति च ॥ १९

तेहिं मागेउ भगवंत पद कमल अमल अनुरागु ॥
तिन्हहि देइ बर ब्रह्म सिधाए । हरषित ते अपने गृह आए ॥

भगवत्-पादयोः सोऽयं ययाचे रतिमुत्तमाम् ।
साधयामास लोकेशो दत्वा तस्मै वरं शुभम् ॥ २०
संतुष्टा वरलाभेन भ्रातरश्च त्रयस्तथा ।
प्रत्याजग्मुस्तदा सर्वे स्वं स्वं गेहं निशाचराः ॥ २१

मय तनुजा मंदोदरि नामा । परम सुंदरी नारि ललामा ॥
सोइ मयँ दीन्हि रावनहि आनी । होइहि जातुधानपति जानी ॥

भविष्यति दशास्योऽयमचिराद् दानवाधिपः ।
विचार्य मनसेत्येवं मयनामासुरस्तदा ॥ २२
रावणाय ददौ विज्ञो विवाहे निजकन्यकाम् ।
सुन्दरीं ललनारत्नं नाम्ना मन्दोदरीं शुभाम् ॥ २३

हरषित भयउ नारि भलि पाई । पुनि दोउ बंधु बिआहेसि जाई ॥

संतुष्टो दशतुण्डोऽपि प्राप्य भार्यां मनोरमाम् ।
कारयामास चोद्वाहौ भ्रात्रोरपि कनिष्ठयोः ॥ २४

गिरि त्रिकूट एक सिंधु मझारी । बिधि निर्मित दुर्गम अति भारी ॥

आसीद् गिरिस्त्रिकूटाख्यः समुद्र-वलयाङ्कितः ।
निर्ममौ च विधिर्यस्मिन् पुरा दुर्गम् अनुत्तमम् ॥ २५

सोइ मय दानवँ बहुरि सँवारा । कनक रचित मनिभवन अपारा ॥

परिश्चकार तं दुर्गं निपुणः स मयः पुनः ।
निर्माय सुबहून् कक्षान् मणि-हेम-विभूषितान् ॥ २६

भोगावति जसि अहिकुल बासा । अमरावति जसि सक्रनिवासा ॥

नागलोके यथा श्रेष्ठा रम्या भोगावती पुरी ।
शक्रस्य वा यथा स्वर्गे रमणीयामरावती ॥ २७

तिन्ह तें अधिक रम्य अति बंका । जग बिख्यात नाम तेहि लंका ॥

त्रिषु लोकेषु विख्याता दुर्ग-संरक्षिता सदा ।
लङ्कापुरी ततोऽप्येषा रमणीयतरा भुवि ॥ २८

– खाईं सिंधु गभीर अति चारिहुँ दिसि फिरि आव ।
कनक कोट मनि खचित दृढ़ बरनि जाइ बनाव ॥

रत्न-काञ्चन-कोटेन दुर्गमेन सुरक्षिताम् ।
चतुरब्धि-परीतां तां कोऽलं वर्णयितुं गिरा ॥ २९

हरि प्रेरित जेहिं कलप जोइ जातुधानपति होइ ।
सूर प्रतापी अतुलबल दल समेत बस सोइ ॥

यस्मिन् कल्पे हि यो राजा राक्षसाणां हरीप्सितः ।
वसति स्म तदा तस्यां बल-वीर्य-विभूषितः ॥ ३०

रहे तहाँ निसिचर भट भारे । ते सब सुरन्ह समर संघारे ॥

पुरा लङ्कापुरे चोषुर्दैत्यवीरा महाभटाः ।
निहतास्तु सुरैरेते सर्वे रण-समुद्यमे ॥ ३१

अब तहँ रहहिं सक्र के प्रेरे । रच्छक कोटि जच्छपति केरे ॥

दशलक्षमितास्त्वस्यां सेवका यक्षरक्षकाः ।
शक्राज्ञया ततश्चोषुः लङ्कापुर्यां महौजसः ॥ ३२

दसमुख कतहुँ खबरि असि पाई । सेन साजि गढ़ घेरेसि जाई ॥

यावद् यक्ष-समाचारं रावणो ज्ञातवान् अमुम् ।
तावदेव ससेनोऽसौ पर्यवेष्टत दुर्गमम् ॥ ३३

देखि बिकट भट बड़ि कटकाई । जच्छ जीव लै गए पराई ॥

योद्धारं तं करालोग्रं महतीं च हि तच्चमूम् ।
दृष्ट्वा पलायिताः सर्वे यक्षाः प्राणभिया ततः ॥ ३४

फिरि सब नगर दसासन देखा । गयउ सोच सुख भयउ बिसेषा ॥
सुंदर सहज अगम अनुमानी । कीन्हि तहाँ रावन रजधानी ॥

संचर्य नगरे रम्ये वीतचिन्तो दशाननः ।
निसर्ग-दुर्गमं चेदं राजधानीं चकार सः ॥ ३५

जेहि जस जोग बाँटि गृह दीन्हे । सुखी सकल रजनीचर कीन्हे ॥

विभज्य नगरावासान् यथायोग्यं दशाननः ।
संतोषयांश्चकारासौ सर्वान् दानव-नागरान् ॥ ३६

एक बार कुबेर पर धावा । पुष्पक जान जीति लै आवा ॥

अथैकदाभिदुद्राव कुबेरं दानवाधिपः ।
विमानं पुष्पकं चास्य जित्वाधिगतवान् बलात् ॥ ३७

— कौतुकहीं कैलास पुनि लीन्हेसि जाइ उठाइ ।
मनहुँ तौलि निज बाहुबल चला बहुत सुख पाइ ॥

लीलयोद्धृत्य कैलासं संतुल्य भुजयोर्बलम् ।
प्रत्याययौ ततश्चासौ सुखितो बलगर्वितः ॥ ३८

सुख संपति सुत सेन सहाई । जय प्रताप बल बुद्धि बड़ाई ॥

सुखं वित्तं बलं वीर्यं सेना बुद्धिः सहायता ।
पुत्राः पौत्रास्तथैवास्य जय-विक्रम-गौरवाः ॥ ३९

नित नूतन सब बाढ़त जाई । जिमि प्रतिलाभ लोभ अधिकाई ॥

नवीना इव सर्वेऽपि प्रावर्धन्त दिने दिने ।
प्रतिलाभोऽभवच्चास्य नव-लोभ-विवृद्धये ॥ ४०

अतिबल कुंभकरन अस भ्राता । जेहि कहुँ नहिं प्रतिभट जग जाता ॥

भ्राता चास्य दशास्यस्य कुम्भकर्णो महाबली ।
न भूतो यत्समो योद्धा त्रिषु लोकेषु कश्चन ॥ ४१

करइ पान सोवइ षट मासा । जागत होइ तिहूँ पुर त्रासा ।।

स्वपिति स्म स षण्मासं सुरां पीत्वा निशाचरः ।
प्रबोधो घस्मरस्यास्य त्रैलोक्य-भय-कारणम् ।। ४२

जौं दिन प्रति अहार कर सोई । बिस्व बेगि सब चौपट होई ।।

भुञ्जीत यदि चैवासौ प्रत्यहं भक्षकाग्रणीः ।
कुर्वीत नचिरात् सर्वं विश्वं रिक्तं न संशयः ।। ४३

समरधीर नहिं जाइ बखाना । तेहि सम अमित बीर बलवाना ।।

रणधीरस्तथाचासौ यथा शक्यं न वर्णनम् ।
अन्ये च बहवः शूराः लङ्कायां रणवल्लभाः ।। ४४

बारिदनाद जेठ सुत तासू । भट महुँ प्रथम लीक जग जासू ।।
जेहि न होइ रन सनमुख कोई । सुरपुर नितहिं परावन होई ।।

दशाननात्मजः सोऽयं मेघनादोऽतुलो रणे ।
सुरसंत्रासकः शूरो नास्य प्रतिभटो युधि ।। ४५

—कुमुख अकंपन कुलिसरद धूमकेतु अतिकाय ।

दुर्मुखोऽकम्पनश्चैवं वज्रदन्तस्तथैव च ।
धूमकेत्वतिकायौ च सर्वे रणधुरंधराः ।। ४६

एक एक जग जीति सक ऐसे सुभट निकाय ।।

कामरूप जानहिं सब माया । सपनेहुँ जिन्ह कें धरम न दाया ।।
दसमुख बैठ सभाँ एक बारा । देखि अमित आपन परिवारा ।।

एकैकोऽप्यलमेतेषां जेतुं सर्वमिदं जगत् ।
कामरूपाश्च ते सर्वे दया-धर्मादि-वर्जिताः ।। ४७

माया-प्रयोग-निपुणाः कुटिलाः समर-प्रियाः ।
अथैकदा सभायां ते समवेताः निशाचराः ।। ४८

सुत समूह जन परिजन नाती । गनै को पार निसाचर जाती ।।

पुत्रपौत्रांश्च विक्रान्तान् दानवांश्च सभागतान् ।
कोऽलं गणयितुं सर्वान् नानारूप-प्रकारकान् ।। ४९

सेन बिलोकि सहज अभिमानी । बोला वचन क्रोध मद सानी ।।

विलोक्य परिवारं तं जातगर्वो दशाननः ।
प्रकृत्यैवोद्धतः सोऽयं सक्रोधम् अवदद् वचः ।। ५०

सुनहु सकल रजनीचर जूथा । हमरे बैरी बिबुध बरूथा ।।
ते सनमुख नहिं करहिं लराई । देखि सबल रिपु जाहिं पराई ।।

" दैत्याः शृणुत वचो मे सहजा नो वैरिणः सुराः सर्वे ।
संमुखयन्ति न युद्धे दृष्ट्वा बलिनं रिपुं पलायन्ते ।। ५१

तेन्ह कर मरन एक बिधि होई । कहउँ बुझाइ सुनहु अब सोई ।।

विदितमिदं वः सत्यं, नाशस्तेषां सुदुष्करः समरे ।
मरणोपायं त्वेकं कथयाम्येषां शृणुध्वमधुना तम् ।। ५२

द्विजभोजन मख होम सराधा । सब कै जाइ करब तुम्ह बाधा ।।
– छुधा छीन बलहीन सुर सहजेहिं मिलिहहिं आइ ।

द्विजभोजन-मख-होम-श्राद्धादिषु विघ्नकारिणो भूत्वा ।
बलहीनान् कुरुतैनान् स्वयं तदायान्ति मत्समीपं ते ।। ५३

तब मारिहउँ कि छाड़िहउँ भली भाँति अपनाइ ।।

क्षुधित-सुदुर्बल-देवाँस्तदा हनिष्याम्यहं दनुजवीराः ।
कृत्वा तानतिदीनान् मदधीनान् मोचयामि वा सर्वान् ।। ५४

मेघनाद कहुँ पुनि हँकरावा । दीन्ही सिख बलु बयरु बढ़ावा ।।

पुत्रं वारिदनादं प्रोत्साहितवैरविक्रमं चैवम् ।
ऊचे दानवनेता नियोजयन् देवतोद्दलन-कार्ये ।। ५५

जे सुर समर धीर बलवाना । जिन्ह कें लरिबे कर अभिमाना ।।
तिन्हहि जीति रन आनेसु बाँधी । उठि सुत पितु अनुसासन काँधी ।।
एहि बिधि सबही अग्या दीन्ही । आपुनु चलेउ गदा कर लीन्ही ।।
चलत दसानन डोलति अवनी । गर्जत गर्भ स्रवहिं सुर रवनी ।।

" ये केचन विबुधानां रणधीराः शौर्यगर्विणो वीराः ।
बन्दिग्राहं सर्वान् गृहाण सुत सङ्गरे विनिर्जित्य ।। " ५६

उत्तस्थौ स तनूजः शिरसा तच्छासनं पितुर्धृत्वा ।
उत्तस्थुश्च तथान्ये सर्वेऽप्याज्ञापिताश्च ते वीराः ॥ ५७
प्रचलति दशवदने तु प्रोच्चैर्गर्जति तदा गदाहस्ते ।
वसुधापि च विचकम्पे विगलितगर्भाः सुराङ्गनाः स्वर्गे ॥ ५८

रावन आवत सुनेउ सकोहा । देवन्ह तके मेरुगिरि खोहा ॥

श्रुत्वा चाक्रममाणं क्रोधान्धं रावणं सुराः सर्वे ।
प्रपलायिता भयार्ताः सुमेरुगिरिकन्दरं ययुः शरणम् ॥ ५९

दिगपालन्ह के लोक सुहाए । सूने सकल दसासन पाए ॥
पुनि पुनि सिंघनाद करि भारी । देइ देवतन्ह गारि पचारी ॥

शून्यान् ददर्श लोकान् दिक्पालानां दशाननः सर्वान् ।
गर्जन् धिक्कारोक्ति रणार्थमाकारयाँश्चकार सुरान् ॥ ६०

रन मद मत्त फिरइ जग धावा । प्रतिभट खोजत कतहुँ न पावा ॥

रणमदमत्तश्चायं प्रतिभटमन्वेषितुं समानबलम् ।
संचर्यापि न लेभे निखिले वसुधातलेऽपि योद्धारम् ॥ ६१

रवि ससि पवन बरुन धनधारी । अगिनि काल जम सब अधिकारी ॥
किंनर सिद्ध मनुज सुर नागा । हठी सब ही के पंथहिं लागा ॥

रवि-शशि-पवन-कुबेराः काल-यमौ वरुण-पावकौ चैवम् ।
सुरवर-किन्नर-सिद्धाः नागाश्चैवं नरास्तथा सर्वे ॥ ६२
ये केचन बलवन्तः प्रतापवन्तस्तथा त्रिलोकेऽस्मिन् ।
क्रमशः क्लिष्टाः सर्वे दुरात्मना रावणेन निःशङ्कम् ॥ ६३

ब्रह्मसृष्टि जहँ लगि तनुधारी । दसमुख बसबर्ती नर नारी ॥

यः कश्चन तनुधारी न्यवसद् विधि-निर्मिते प्रपञ्चेऽस्मिन् ।
तं वा तां वा दनुजश्चकार वशमात्मनः स्ववीर्यवशात् ॥ ६४

आयसु करहिं सकल भयभीता । नवहिं आइ नित चरन बिनीता ॥

सर्वे भुज-बल-विजिताः वचनं दनुजस्य चक्रिरे सद्यः ।
भय-संपिण्डित-गात्रा दानव-पदयोः सदावनतशीर्षाः ॥ ६५

–भुजबल बिस्व बस्य करि राखेसि कोउ न सुतंत्र ।
मंडलीक मनि रावन राज करइ निज मंत्र ॥

बल विजितं नृपवृन्दं चकार वशमात्मनः स निःशेषम् ।
ईशामास च सर्वान् सामन्तेशः स्वयं मनःपूतम् ॥ ६६

देव जच्छ गंधर्ब नर किंनर नाग कुमारि ।
जीति बरीं निज बाहुबल बहु सुंदर बर नारि ॥

सुर-नर-किन्नर-पन्नग-गन्धर्वाणां तथा च यक्षाणाम् ।
भुजबल-जितवर-नारी-सुकुमारीभिश्चकार चोद्वाहम् ॥ ६७

इंद्रजीत सन जो कछु कहेऊ । सो सब जनु पहिलेहिं करि रहेऊ ॥

पुत्रं नीरदनादं यत्किञ्चित्-कर्तुमादिदेश पिता ।
कथनात् प्राग् इवतूर्णं सर्वमसौ तच्चकार रणधीरः ॥ ६८

प्रथमहिं जिन्ह कहुँ आयसु दीन्हा । तिन्ह कर चरित सुनहु जो कीन्हा ॥
देखत भीमरूप सब पापी । निसिचर निकर देव परितापी ॥
करहिं उपद्रव असुर निकाया । नाना रूप धरहिं करि माया ॥

यत्किञ्चन तत्पूर्वं दनुजेन्द्रश्चादिदेश दैत्येभ्यः ।
चरितमिदं तन्निखिलं संप्रति तेषां शृणुध्वमतिचित्रम् ॥ ६९

सकलनिशाचरनिकरा विकराला पापकारिणो दुष्टाः ।
मायारूपविदग्धाः सुरनरपरितापकारिणो घोराः ॥ ७०

जेहि बिधि होइ धर्म निर्मूला । सो सब करहिं बेद प्रतिकूला ॥
जेहिं जेहिं देस धेनु द्विज पावहिं । नगर गाउँ पुर आगि लगावहिं ॥

वेदविरुद्धाचारा धर्मध्वंसनपराश्च ते सर्वे ।
ददहुः पुरनगराण्यपि धेनु-ब्राह्मण-जिघांसयाशङ्कम् ॥ ७१

सुभ आचरन कतहुँ नहिं होई । देव बिप्र गुरु मान न कोई ॥

सुर-गुरु-भूसुर-भक्तिर्दानव-भय-शङ्कया गता विलयम् ।
लुप्ता तथा प्रजानां यज्ञादिक-धर्म-कर्म-सुश्रद्धा ॥ ७२

नहिं हरिभगति जग्य तप ग्याना । सपनेहुँ सुनिअ न बेद पुराना ।।

नासीद्धरिपद-भक्तिर्यज्ञो वा नैव तत् तपश्चरणम् ।
वेद-पुराण-श्रवणं स्वप्नेऽपि न तत्त्व-चिन्तनं किञ्चित् ।। ७३

– जप जोग बिरागा तप मख भागा श्रवन सुनइ दससीसा ।
आपुनु उठि धावइ रहै न पावइ धरि सब घालइ खीसा ।।
अस भ्रष्ट अचारा भा संसारा धर्म सुनिअ नहिं काना ।

विराग-योग-याग-भाग-कृच्छ्र-जाप-कीर्तन-
प्रदीप्त-कोप-पावकः समुत्थितो दशाननः ।
प्रधावति स्म सत्वरं स्वयं समूलनाशने
प्रनष्ट-पुण्य-कर्म-धर्म-शर्म सर्व-भूतलम् ।। ७४

तेहि बहुबिधि त्रासइ देस निकासइ जो कह बेद पुराना ।।
–बरनि न जाइ अनीति घोर निसाचर जो करहिं ।
हिंसा पर अति प्रीति तिन्ह के पापहि कवनि मिति ।।

पुराण-वेद-कीर्तनं चकार यः क्वचिन्नरः
दशाननस्तमर्दयन् बहिश्चकार सत्वरम् ।
अवर्णनीयमासुरं सुघोरदुष्कृतं गिरा
न हिंसन-प्रियस्य विद्यते कुतोऽपि किल्मिषम् ।। ७५

बाढ़े खल बहु चोर जुआरा । जे लंपट परधन परदारा ।।

अक्ष-क्रीडा-व्यसनं स्तैन्यं दैन्यं खलत्वमपि चैवम् ।
प्राचीयन्त जनानां परधन-दारा-सुलम्पटत्वं च ।। ७६

मानहिं मातु पिता नहिं देवा । साधुन्ह सन करवावहिं सेवा ।।

न हि माता न पिता वा न देवता दुर्गुण-प्रियाणां वा ।
न च साधूनां सेवा सुजनैः स्वयमेव सेव्यमानानाम् ।। ७७

जिन्ह के यह आचरन भवानी । ते जानेहु निसिचर सब प्रानी ।।

यः कश्चन लोकेऽस्मिन् कुरुते दुर्वर्तनं तथा घोरम् ।
मन्तव्यः स स गिरिजे निशाचरो गूढरूपतनुधारी ।। ७८

अतिसय देखि धर्म कै ग्लानी । परम सभीत धरा अकुलानी ॥
गिरि सरि सिंधु भार नहिं मोही । जस मोहि गरुअ एक परद्रोही ॥
सकल धर्म देखइ बिपरीता । कहि न सकइ रावन भय भीता ॥

परप्रमथिनां न दुःसहभरं बिभर्तुं क्षमा
सरिद्-गिरि-समुद्र-भारमपि मन्यमाना गुरुम् ।
अधर्म-परमावधिं तमवलोक्य भीता धरा
दशानन-भयान्न किञ्चिदपि वक्तुमासीत् क्षमा ॥ ७९

धेनु रूप धरि हृदयँ बिचारी । गई तहाँ जहँ सुर मुनि झारी ॥
निज संताप सुनाएसि रोई । काहू तें कछु काज न होई ॥

विचिन्त्य च पुनः स्वयं विधृत-धेनुरूपा धरा
जगाम कनकाचलं मुनिसुराश्रयं संकटे ।
न्यवेदयदसह्यमात्मरुजमश्रुपूर्णेक्षणा
न कोऽप्यलमपास्तुमापदमभूत् तु तेषां तदा ॥ ८०

–सुर मुनि गन्धर्बा मिलि करि सर्बा गे बिरंचि के लोका ।
सँग गोतनुधारी भूमि बिचारी परम बिकल भय सोका ॥

सुरवर-मुनि-गन्धर्वा विरिञ्चि-लोकं प्रतस्थिरे सर्वे ।
गोरूपा भयभीताताननुयाता वसुंधरा विकला ॥ ८१

ब्रह्माँ सब जाना मन अनुमाना मोर कछू न बसाई ।

सर्वज्ञः स विरिञ्चिर्मत्वा कार्यं स्वशक्त्यतीतं तद् ।
चिन्ता-विगलित-गात्राम् उवाच वसुधां वचः सदयमेवम् ॥ ८२

जा करि तैं दासी सो अबिनासी हमरेउ तोर सहाई ॥

“गच्छसि वसुधे विष्णुं यस्यासि त्वं सदा चरण-दासी ।
संप्रति नः प्रभुरेकस्तवेव वसुधे सखा परित्राता ॥ ८३

–धरनि धरहि मन धीर कह बिरंचि हरिपद सुमिरु ।
जानत जन की पीर प्रभु भंजिहि दारुन बिपति ॥

हरिचरणस्मृतिरेका दास्यति ते संकटे मनोधैर्यम् ।
दीनानाथ-दयालुः स्वदास-विपदां विनाशकः प्रभुः ॥ ८४

बैठे सुर सब करहिं बिचारा। कहँ पाइअ प्रभु करिअ पुकारा॥
श्रुत्वा विधि-वचनं तद् विचार-मग्नं बभूव विबुध-कुलम्।
'क्वासौ हरि'रित्यासीत् संभ्रम-कोलाहलो महाँस्तेषाम्॥ ८५

पुर बैकुंठ जान कह कोई। कोउ कह पयनिधि बस प्रभु सोई॥
गच्छामो वैकुण्ठं द्रष्टुं हरिमित्युपादिशन् केचित्।
"निवसति दुग्धसमुद्रे श्रीहरि"रिति चाप्यबोधयन् केचित्॥ ८६

जाके हृदयँ भगति जसि प्रीती। प्रभु तहँ प्रगट सदा तेहिं रीती॥
यस्यास्ति यथा भक्तिः प्रीतिर्वा प्रभु-पदाब्जयोश्च यथा।
श्रीहरिरपि चात्मानं दर्शयते तं तथैव सुप्रीतः॥ ८७

[ऊचे स्वयं त्रिनेत्रो हिमगिरि-तनुजां तदा भरद्वाज।
श्रीहरि-भक्त्यनुरागं रूपं चैवास्य तत्त्वतो जानन्।] ८८

तेहिं समाज गिरिजा मैं रहेऊँ। अवसर पाइ बचन एक कहेऊँ॥
"सुरमुनि-परिवारेऽस्मिन्नहमपि चासंस्तदा हिमाद्रिसुते।
शृण्वन् सुर-संवादं लब्धावसरश्च वाक्यमवदंस्तान्॥" ८९

हरि ब्यापक सर्बत्र समाना। प्रेम तें प्रगट होहिं मैं जाना॥
"परमेशो विभुरेषः सर्वस्मिन् विद्यते हरिर्विश्वे।
प्रकटयते चात्मानं प्रेम्णा चरणानुरागिणश्चाग्रे॥ ९०

देस काल दिसि बिदिसिहु माहीं। कहहु सो कहाँ जहाँ प्रभु नाहीं॥
कोऽसौ देशः कालः का वा दिग् यत्र नास्ति हरिरेषः।
वदतेदं बत देवाः सर्वं व्याप्नोति किं न सर्वज्ञः॥ ९१

अग जगमय सब रहित बिरागी। प्रेम तें प्रभु प्रगटइ जिमि आगी॥
सर्वं स्थिरचरविश्वं व्याप्यापि श्रीहरिर्निरासक्तः।
सर्वेभ्यश्च विभिन्नः सर्वज्ञोऽसौ सदैव गत-सङ्गः॥ ९२

आविर्भवति यथाग्निः काष्ठाभ्यां यत्नतः समाहूतः।
दर्शयति प्रभुरेवं स्वात्मानं प्रार्थितो यदा प्रीत्या॥" ९३

मोर बचन सब के मन माना । साधु साधु करि ब्रह्म बखाना ।।

इति मे वचनं गिरिजे सर्वेषां प्रीतयेऽभवत् तेषाम् ।
विधिरपि सुप्रीतः सन् सुसाधुवादैर् नुनाव मे वचनम् ।। ९४

–सुनि बिरंचि मन हरष तन पुलकि नयन बह नीर ।
अस्तुति करत जोरि कर सावधान मतिधीर ।।

हर्षोत्फुल्लितचित्तः पुलकित-कायस्तथाश्रु-निचिताक्षः ।
वागीशः स विरिञ्चिर्हरेः स्तुतिं साञ्जलिः समारेभे ।। ९५

जय जय सुरनायक

–जय जय सुरनायक जन सुखदायक प्रनतपाल भगवंता ।
गो द्विज हितकारी जय असुरारी सिंधुसुता प्रिय कंता ।।

पालन सुर धरनी अद्‌भुत करनी मरम न जानइ कोई ।
जो सहज कृपाला दीनदयाला करउ अनुग्रह सोई ।।

जय जय अबिनासी सब घट बासी ब्यापक परमानंदा ।
अबिगत गोतीतं चरित पुनीतं मायारहित मुकुंदा ।।

जेहि लागि बिरागी अति अनुरागी बिगतमोह मुनिबृंदा ।
निसि बासर ध्यावहिं गुन गन गावहिं जयति सच्चिदानंदा ।।

जेहिं सृष्टि उपाई त्रिबिध बनाई संग सहाय न दूजा ।
सो करउ अघारी चिंत हमारी जानिअ भगति न पूजा ।।

जो भव भय भंजन मुनि मन रंजन गंजन बिपति बरूथा ।
मन बच क्रम बानी छाड़ि सयानी सरन सकल सुरजूथा ।।

सारद श्रुति सेषा रिषय असेषा जा कहुँ कोउ नहिं जाना ।
जेहि दीन पिआरे बेद पुकारे द्रवउ सो श्रीभगवाना ।।

भव बारिधि मंदर सब बिधि सुंदर गुनमंदिर सुखपुंजा ।
मुनि सिद्ध सकल सुर परम भयातुर नमत नाथ पद कंजा ।।

ॐ जय ! जगदीश हरे !

जय जय जय सुरनायक ! जनसुखदायक ! !
जय जगदीश हरे !

गोद्विजपालक जय जय ! दनुजकुलान्तक जय जय ! !
सिंधुसुतेश हरे ! ॐ जय जगदीश हरे ॥ ९६

सकल-रसातल-पालक ! सुरनरतारक ! ! चित्रचरित्र हरे ।
सहजकृपाकर जय जय ! दीनदयाघन जय जय ! !
सुरविपदं हर रे ! ॐ जय जगदीश हरे ॥ ९७

सकल-चराचर-वर्तन ! परमसुखाकर ! ! जनहृदयालय रे ।
अविदितपावन सुचरित ! जननविनाशविवर्जित ! !
मायारहित हरे ! ॐ जय जगदीश हरे ॥ ९८

इहपरलोकविमोहक-भोगविवर्जित-मुनिमानसलय रे ।
अविरतसंस्तुतगुणगण ! जय जय चिन्मय सन्मय ! !
जयसुखधाम हरे ! ॐ जय जगदीश हरे ॥ ९९

निजबलमात्रविनिर्मित-सगुणचराचर ! रचनाचतुर हरे ।
अघहर चिन्तय सुरकुलमविदितपूजनसेवन-
मनुगृह्णीश्व हरे ! ॐ जय जगदीश हरे ॥ १००

कृतिमतिवचनसमेतं ! सुरकुलमखिलम् ! ! शरणं पदयोस्ते ।
जय जय भव-भय-भञ्जन । मुनिजन-मानस-रञ्जन ! !
विघ्न-विभञ्जन रे ! ॐ जय जगदीश हरे ॥ १०१

श्रुतिरहिपतिरपि चैवम् ! मुनिवरवृन्दम् ! ! सरस्वती चैवम् ।
अनितर-शरण-सकरुणं श्रुति-विदितं तव रूपम्
न हि जानन्ति हरे ! ॐ जय जगदीश हरे ॥ १०२

भय-वश-साधु-मुनीश्वर-विबुध-कुलं तव प्रणतं पदयुगले ।
जय भव-जल-निधि-मन्दर ! जय जय शुभ-गुण-मन्दिर ! !
सुन्दर सुखद हरे ! ॐ जय जगदीश हरे ॥ १०३

— जानि सभय सुर भूमि सुनि बचन समेत सनेह ।
गगनगिरा गंभीर भइ हरनि सोक संदेह ॥

भय-कम्पित-विकलाङ्गं दृष्ट्वा भू-सिद्ध-देव-वृन्दं तद् ।
गगन-गिरा परमेशः प्रसाद-वचनं भयार्तिहरमूचे ॥ १०४

जनि डरपहु मुनि सिद्ध सुरेसा । तुम्हहि लागि धरिहउँ नर बेसा ॥
अंसन्ह सहित मनुज अवतारा । लेहउँ दिनकर बंस उदारा ॥

"त्यजत सुराः भयशङ्काम् अंशैः सह धारयामि नरदेहम् ।
विख्याते रवि-वंशे भवत्-कृते संभवाम्यहं भूम्याम् ॥ १०५

कस्यप अदिति महातप कीन्हा । तिन्ह कहुँ मैं पूरब बर दीन्हा ॥
ते दसरथ कौसल्या रूपा । कोसलपुरीं प्रगट नरभूपा ॥

कृत-तपसौ सुर-पितरौ लब्ध्वा पूर्वं वर-प्रसादं मे ।
संप्रति भुवि संजातौ कौसल्या-दशरथावयोध्यायाम् ॥ १०६

तिन्ह कें गृह अवतरिहउँ जाई । रघुकुल तिलक सो चारिउ भाई ॥
नारद बचन सत्य सब करिहउँ । परम सक्ति समेत अवतरिहउँ ॥
हरिहउँ सकल भूमि गरुआई । निर्भय होहु देव समुदाई ॥

महिषी-नृपयोर्भवने संप्रति लप्स्ये जनिं तयोरेव ।
भूत्वा रघुकुल-तिलकं बन्धु-चतुष्कं सहैव शक्त्या मे ॥ १०७

नारद-वचनं चैवं स्वयं करिष्ये सुरा यथार्थं तद् ।
अपनेष्यामि च सर्वं धरणी-भारं जहीत भयममराः ॥" १०८

गगन ब्रह्मबानी सुनि काना । तुरत फिरे सुर हृदय जुड़ाना ॥

श्रुत्वा नभसश्चैवं ब्रह्म-गिरं देवताः सुसंहृष्टाः ।
विगलित-चिन्ता-भाराः प्रत्यायातास्ततः समाश्वस्ताः ॥ १०९

तब ब्रह्माँ धरनिहि समुझावा । अभय भई भरोस जियँ आवा ॥

धरणीमपि स विरिञ्चिस्ततः समाश्वासयांश्चकार पुनः ।
अपहृत-भय-संदेहा निववृते साऽपि धैर्यमवलम्ब्य ॥ ११०

—निज लोकहि बिरंचि गे देवन्ह इहइ सिखाइ ।
बानर तनु धरि धरि महि हरि पद सेवहु जाइ ।।

"धृत्वा वानर-देहान् सर्वे यूयं तथैव वसुधायाम् ।
आविर्भवत सुरा भोः ! सेवध्वं श्रीपतेश्चरण-युग्मम् ।।" १११

गए देव सब निज निज धामा । भूमि सहित मन कहुँ बिश्रामा ।।
जो कछु आयसु ब्रह्माँ दीन्हा । हरषे देव बिलंब न कीन्हा ।।

उपदिश्यामर-वृन्दं वानर-कार्यं विरिञ्चिरपि चैवम् ।
स्तुत्वा हरि-पद-सेवां भूयो भूयो जगाम निजलोकम् ।। ११२

निर्वृत-चित्ताः सर्वाः सह भूम्या देवता गृहं याताः ।
अविलम्बेन च सर्वाः विधातुराज्ञां च चक्रिरे प्रीताः ।। ११३

बनचर देह धरी छिति माहीं । अतुलित बल प्रताप तिन्ह पाहीं ।।
गिरि तरु नख आयुध सब बीरा । हरि मारग चितवहिं मतिधीरा ।।
गिरि कानन जहँ तहँ भरि पूरी । रहे निज निज अनीक रचि रूरी ।।

संजाता वसुधायां शाखामृगरूपिणः सुराः सर्वे ।
अतुलित-भुज-बल-वीर्याः गिरि-तरु-नख-शस्त्र-धारिणः शूराः ।।

सज्जीकृत्य च सेनाः सुविशालाः काननेषु शैलेषु ।
न्यवसन् प्रच्छन्नास्ते प्रतीक्षमाणाः हरेः शुभागमनम् ।। ११५

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
राम-जन्म-पूर्व-पीठिका नाम त्रिंशस्तरङ्गः ।

तरङ्गः ३१

यह सब रुचिर चरित मैं भाषा । अब सो सुनहु जो बीचहिं राखा ।।

कथितं सुरुचिर-चरितं श्रुतं मुने, तच्छृणुश्व भूयोऽपि ।
वृत्तं चित्तहरं यद् निरूपितं सावशेषमथ पूर्वम् ।। १

अवधपुरीं रघुकुलमनि राऊ । वेद बिदित तेहि दसरथ नाऊँ ।।
धरम धुरंधर गुननिधि ग्यानी । हृदयँ भगति मति सारँगपानी ।।

राजा दशरथनामा रघुकुल-रत्नं बभूव वसुधायाम् ।
वेदोदित-गुणगरिमो धर्मधुरीणश्च शास्त्रविद् ज्ञानी ।। २

शार्ङ्गधनुर्धर-भक्ति-प्रपूरितं दशरथस्य हृदयाब्जम् ।
प्रभुपद-पद्म-विलीना मतिरपि राज्ञः सदैव शुचि-शोभा ।। ३

– कौसल्यादि नारि प्रिय सब आचरन पुनीत ।
पति अनुकूल प्रेम दृढ़ हरि पद कमल बिनीत ।।

कौसल्यादि-महिष्यः सर्वा दयिता विनीत-शुचि-शीलाः ।
तिष्ठन्त्यः पति-वचने श्रीहरिचरणाम्बुज-द्वये निरताः ।। ४

एक बार भूपति मन माहीं । भै गलानि मोरें सुत नाहीं ।।
गुर गृह गयउ तुरत महिपाला । चरन लागि करि बिनय बिसाला ।।

अनवाप्तात्मज-कामः खिन्नमनास्त्वेव दशरथो नृपतिः ।
प्राप्तः कुलगुरु-गेहं प्रणम्य पादौ तमर्थयामास ।। ५

निज दुख सुख सब गुरहि सुनायउ । कहि बसिष्ठ बहुबिधि समुझायउ ।।

निज-सुख-दुःखं सर्वं निवेदयामास नरपतिर्गुरवे ।
ऊचे गुरुरपि धीरस्तदा समाश्वासयन् नृपं चैवम् ।। ६

धरहु धीर होइहहिं सुत चारी । त्रिभुवन बिदित भगत भय हारी ।।

"त्रिभुवन-विदिता राजन् चत्वारस्ते सुता जनिष्यन्ते ।
बद्धादराः सदा ये श्रीपति-पद-भक्त-भय-निराकरणे ।।" ७

सृंगी रिषिहि बसिष्ठ बोलावा । पुत्रकाम सुभ जग्य करावा ।।

आमन्त्रयद् वसिष्ठो वेदर्षि शृङ्गिणं तदा शीघ्रम् ।
नरपति-हितकर्ताऽसावकारयत् पुत्रकाम-शुभयज्ञम् ।। ८

भगति सहित मुनि आहुति दीन्हें । प्रगटे अगिनि चरू कर लीन्हें ।।

नृप-हित-दक्षे सम्यग् जुह्वति चैवाहुतिं मुनौ भक्त्या ।
प्रीतो हिरण्यरेताः संमुखमाविर्बभूव चरु-हस्तः ।। ९

जो बसिष्ठ कछु हृदयँ बिचारा । सकल काजु भा सिद्ध तुम्हारा ।।
यह हबि बाँटि देहु नृप जाई । जथा जोग जेहि भाग बनाई ।।

"सिद्धः संप्रति राजन् कृतस्त्वदर्थे वसिष्ठ-संकल्पः ।
गृह्णीष्व मे प्रसादं विभज्य यच्छ स्वयं स्वभार्याभ्यः ।।" १०

–तब अदृस्य भए पावक सकल सभहि समुझाइ ।
परमानंद मगन नृप हरष न हृदयँ समाइ ।।

इत्युक्त्वाथ स नृपतिं प्रबोध्य सर्वान् अदर्शनं यातः ।
नरपतिरपि संतृप्तो हृदये धर्तुं शशाक नानन्दम् ।। ११

तबहिं रायँ प्रिय नारि बोलाईं । कौसल्यादि तहाँ चलि आईं ।।
अर्ध भाग कौसल्यहि दीन्हा । उभय भाग आधे कर कीन्हा ।।
कैकेई कहँ नृप सो दयऊ । रह्यो सो उभय भाग पुनि भयऊ ।।

परमानन्द-निमग्नः समाजुहावात्मनस्तदा भार्याः ।
पट्टाभिषिक्त-राज्ञ्यै सप्रेमार्धं ददौ चरोः सद्यः ।। १२

अवशिष्टस्याप्यर्धं प्रिय-पत्न्यै चाददत् स कैकेय्यै ।
तदुपरि चाप्यवशिष्टं द्विधा स नृपतिर्विभाजयामास ।। १३

कौसल्या कैकेई हाथ धरि । दीन्ह सुमित्रहि मन प्रसन्न करि ।।

एकैकं निज-हस्ते धृत्वा तौ पुण्य-पायसस्यांशौ ।
कौसल्या कैकेयी प्रीत्या ददतुः स्वयं सुमित्रायै ।। १४

एहि बिधि गर्भसहित सब नारी । भईं हृदयँ हरषित सुख भारी ।।

एवं दशरथ-राज्ञ्यः तिस्रश्चैवाभवन् सगर्भास्ताः ।
हर्षोत्फुल्लित-चित्ता दिव्यसुखं चाप्नुवँस्तदा सर्वाः ।। १५

जा दिन तें हरि गर्भहिं आए । सकल लोम सुख संपति छाए ॥

श्रीहरिरूपेष्वेवं महिषी-गर्भस्थितेषु भू-लोके ।
प्राचीयन्त कृतार्था लोकाः सुख-संपदा तदा सर्वे ॥ १६

मंदिर महँ सब राजहिं रानीं । सोभा सील तेज की खानीं ॥

प्रावर्धन्त च भूयो राज्ञीनां रूप-शील-गुण-शोभाः ।
नरपति-भवने सर्वाः विरेजिरे दिव्य-गर्भ-तेजोभिः ॥ १७

सुख जुत कछुक काल चलि गयऊ । जेहिं प्रभु प्रगट सो अवसर भयऊ ॥

प्राप्तः शुभ-करसमयः सुखं प्रयातेषु तेषु मासेषु ।
श्रीहरिरिह नररूपं यस्मिन् प्रकटीचकार चात्मीयम् ॥ १८

— जोग लगन ग्रह बार तिथि सकल भए अनुकूल ।
चर अरु अचर हर्षजुत राम जनम सुखमूल ॥

योग-ग्रह-तिथि-वारा लग्नं चैवाप्यथानुकूलं तद् ।
सर्व-सुमङ्गल-मूलं जन्म स्थिर-चर-सुखाय बालस्य ॥ १९

नौमी तिथि मधु मास पुनीता । सुकल पच्छ अभिजित हरिप्रीता ॥
मध्यदिवस अति सीत न घामा । पावन काल लोक बिश्रामा ॥
सीतल मंद सुरभि बह बाऊ । हरषित सुर संतन मन चाऊ ॥
बन कुसुमित गिरिगन मनिआरा । स्रवहिं सकल सरिताऽमृतधारा ॥

मधु-मासः शुभ-नवमी पक्षः शुक्लोऽभिजिच्च नक्षत्रम् ।
मध्याह्नः शुभ-समयो नात्युष्णो नातिशीतलश्चैवम् ॥ २०

संप्राप्तः सुमुहूर्तो सुख-हेतुः सर्वलोक-विश्रामः ।
हृष्टः सुरवर-संघः सन्तश्चैवाप्यतीव संतुष्टाः ॥ २१

मन्द-सुगंधित-शीतः पवमश्चैवाववुः सुख-स्पर्शः ।
फुल्लास्तरुवर-संघाः सरितः सर्वाः सुधा-मधुर-धाराः ॥ २२

वसुधा-तल-गिरिनिचयः सुरत्न-मणि-भासुरस्तदा सर्वः ।
सुरभि-सुमैरतिशबला फलभर-नत-शाखिनो वनाभोगाः ॥ २३

सो अवसर बिरंचि जब जाना । चले सकल सुर साजि बिमाना ।।
गगन बिमल संकुल सुर जूथा । गावहिं गुन गंधर्ब बरूथा ।।
बरषहिं सुमन सुअंजुलि साजी । गहगहि गगन दुंदुभी बाजी ।।
अस्तुति करहिं नाग मुनि देवा । बहुबिधि लावहिं निज निज सेवा ।।

संप्राप्ते शुभ-समये देवाः स्वैः स्वैरलंकृतैर्यानैः ।
समवेताः सानन्दं गगनाभोगे विरिञ्चिना सार्धम् ।। २४
प्रभुवर-शुभ-गुण-गानं गन्धर्वैः संघशः समारब्धम् ।
विकसित-कुसुम-सुवृष्टिः पपात नभसस्तदातिमोदकरा ।। २५
ननदुर् दुन्दुभयोऽपि प्रोच्चैर्गगनाङ्गणे तदा हर्षात् ।
सुरवर-मुनिगण-नागाः स्तुत्युपहारैर् अपूजयन् बालम् ।। २६

– सुर समूह बिनती करि पहुँचे निज निज धाम ।

संप्रार्थ्यैवं भक्त्या जगदाधारं प्रभुं जगद्वासम् ।
सुरवर-संघाः सर्वे स्वं स्वं गेहं ततः पुनर्याताः ।। २७

जगनिवास प्रभु प्रगटे अखिल लोक बिश्राम ।।
– भए प्रगट कृपाला दीनदयाला कौसल्या हितकारी ।
हरषित महतारी मुनि मन हारी अद्भुत रूप बिचारी ।।
लोचन अभिरामा तनु घनस्यामा निज आयुध भुज चारी ।
भूषन बनमाला नयन बिसाला सोभासिंधु खरारी ।।
कह दुइ कर जोरी अस्तुति तोरी केहि बिधि करौं अनंता ।
माया गुन ग्यानातीत अमाना बेद पुरान भनंता ।।
करुना सुख सागर सब गुन आगर जेहि गावहिं श्रुति संता ।
सो मम हित लागी जन अनुरागी भयउ प्रगट श्रीकंता ।।
ब्रह्मांड निकाया निर्मित माया रोम रोम प्रति बेद कहै ।
मम उर सो बासी यह उपहासी सुनत धीर मति थिर न रहै ।।
उपजा जब ग्याना प्रभु मुसुकाना चरित बहुत बिधि कीन्ह चहै ।
कहि कथा सुहाई मातु बुझाई जेहि प्रकार सुत प्रेम लहै ।।
माता पुनि बोली सो मति डोली तजहु तात यह रूपा ।
कीजै सिसुलीला अति प्रियसीला यह सुख परम अनूपा ।।
सुनि बचन सुजाना रोदन ठाना होइ बालक सुरभूपा ।

परम-परेशो लोक-निवासः संजातो भय-हर्ता ।
विलसति लोके नर-तनु-रूपे भूतल-भाग्य-विधाता ॥ २८

दीन-दयाघन-जन-हित-साधन-कौसल्या-हित-कर्ता ।
नेत्र-विलोभन-मेघ-सदृश-तनु-मुनि-जन-मानस-हर्ता ॥ २९

धृत-चतुरायुध-चतुर्भुजोज्ज्वल-भूषण-माला-धारी
आयत-लोचन-रूप-सिंधुरिह-संजातः खर-वैरी ॥ ३०

दृष्ट्वाद्भुतमिदमात्मज-रूपं हृष्टोत्कण्ठित-चित्ता ।
बद्धाञ्जलिरथ हरि-गुण-गौरवमकरोदेवं माता ॥ ३१

"ज्ञान-मान-गुण-मायातीतः श्रुतिभिर्गीतः श्रीशः ।
भक्त-त्राता मम हितकर्ता स त्वं प्रकटित-रूपः ॥ ३२

अगणित-माया-विश्व-निकायाविष्ट-प्रतिरोमाङ्गः ।
अवसो गर्भे सैव मदीये मनुज-तनुं त्वं धृत्वा ॥ ३३

अत्यद्भुतमिदमाकर्ण्यैवं सर्वे विस्मित-चित्ताः ।
धीराणाम् अपि विचलति मतिरिह का कौसल्यावार्ता ॥" ३४

श्रुत्वा वचनं ज्ञात्वा जननीम् एवं परमार्थज्ञाम् ।
नाना-चरित-चिकीर्षुः श्रीशः सकल-जगद्-हितकर्ता ॥ ३५

अबोधयत् तां पूर्व-कथाभिस् तनुजः स्मित-युत-वचनैर् ।
गत-संदेहा विगलित-मोहा पुनरपि चोचे माता ॥ ३६

"त्यज सुत दिव्यं प्रभुवर-रूपं कुरु मधुरां शिशु-लीलाम् ।
सुत-मुख-पङ्कज-नयन-महोत्सवमाशंसेऽहं माता ॥" ३७

आकर्ण्यैवं मातुर्वचनं चतुरः सुर-गण-नेता ।
रुरोद जननी-श्रुति-मति-सुभगं बालक-रूपं धृत्वा ॥ ३८

यह चरित जे गावहिं हरिपद पावहिं ते न परहिं भवकूपा ॥

सुरुचिर-चरितं चेदं भक्त्या गायन्ति ये नरा लोके ।
गत्वा परम-पदं ते न हि भव-कूपं पुनर् निवर्तन्ते ॥ ३९

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
श्रीरामजन्म-नाम एकत्रिंशस्तरङ्गः ॥

तरङ्गः ३२

—बिप्र धेनु सुर संत हित लीन्ह मनुज अवतार।
निज इच्छा निर्मित तनु माया गुन गो पार ॥

गो-द्विज-सुजन-सुराणां कल्याणायाददौ मनुज-देहम् ।
गो-गुण-मायातीतः स्वेच्छा-निर्मित-तनुः स परमेशः ॥ १

सुनि सिसु रुदन परम प्रिय बानी । संभ्रम चलि आईं सब रानी ॥
हरषित जहँ तहँ धाईं दासी । आनँद मगन सकल पुरबासी ॥

श्रुति-सुखदं शिशु-रुदनं श्रुत्वा याताः ससंभ्रमं राज्ञ्यः ।
सुख-संभ्रान्ता दास्यः नृप-भवने, प्रमुदिताश्च पौर-जनाः ॥ २

दसरथ पुत्रजन्म सुनि काना । मानहुँ ब्रह्मानंद समाना ॥
परम प्रेम मन पुलक सरीरा । चाहत उठन करत मति धीरा ॥

ब्रह्मानन्द-समानं श्रुत्वा सुत-जन्मनः प्रियं वृत्तम् ।
वात्सल्य-प्लुत-चेता रोमाञ्चित-तनुरभूत् स भूपालः ॥ ३

प्रेमातिशयाक्रान्तो नृपतिः सरभसमियेष चोत्थातुम् ।
तस्थावविचल-चित्तः कथमप्यन्ते निगृह्य चात्मानम् ॥ ४

जाकर नाम सुनत सुभ होई । मोरें गृह आवा प्रभु सोई ॥

"यन्नामसंकीर्तनमत्र नित्यं
कल्याणमेवातनुते जनानाम् ।
सैवैष जातः सदने मदीये
कल्याणकृत् सर्व-चराचराणाम् " ॥ ५

परमानंद पूरि मन राजा । कहा बोलाइ बजावहु बाजा ॥

विचिन्त्य चैवं मनसा नृपोऽसा-
वानन्द-बाष्प-प्लुत-नेत्र-युग्मः ।
प्रख्यापयामास पुरे स तूर्णम्
वादित्र-घोषैः सुत-जन्म-वृत्तम् ॥ ६

गुर बसिष्ठ कहँ गयउ हँकारा । आए द्विजन सहित नृपद्वारा ।।
अनुपम बालक देखेन्हि जाई । रूप रासि गुन कहि न सिराई ।।

निमन्त्रितस्तेन च विप्रसाधं
गुरुर्वसिष्ठः समुपागतस्तम् ।
अदर्शयत् तं सुतमद्वितीयं
सौन्दर्यसिन्धुं गुण-राशि-मग्र्यम् ।। ७

—नंदीमुख सराध करि जातकरम स कीन्ह ।
हाटक धेनु बसन मनि नृप बिप्रन्ह कहँ दीन्ह ।।

नान्दी-मुख-श्राद्ध-विधिं विधिज्ञः
स जातकर्मापि च कारयित्वा ।
ददौ द्विजेभ्यश्च हि दानशूरो
गो-वस्त्र-रत्नानि तथा सुवर्णम् ।। ८

ध्वज पताक तोरन पुर छावा । कहि न जाइ जेहि भाँति बनावा ।।
सुमनबृष्टि अकास तें होई । ब्रह्मानंद मगन सब लोई ।।

पुरं पताकादिभिरग्र्य-शोभं
न गीर् अलं वर्णयितुं समग्रम् ।
पपात वृष्टिर्नभसः सुमानां
प्रहृष्ट-चित्ताः सकलाश्च पौराः ।। ९

बृंद बृंद मिली चलीं लोगाईं । सहज सिंगार किएँ उठि धाईं ।।
कनक कलस मंगल भरि थारा । गावत पैठहिं भूप दुआरा ।।

निसर्ग-सौन्दर्य-विभूषिताङ्गाः
सुवासिनीनाम् अमिताश्च संघाः ।
मोदातिरेकोज्झित-हंस-यानाः
हर्म्यं ययुः काञ्चन-कुम्भ-हस्ताः ।। १०

करि आरति नेवछावरि करहीं । बार बार सिसु चरनन्हि परहीं ।।
मागध सूत बंदिगन गायक । पावन गुन गावहिं रघुनायक ।।

नीराजयित्वा रघुवंश-दीपं
पादारविन्दे बहुशः प्रणेमुः ।
सूतास्तथा चारण-बन्दि-संघाः
जगुर् गुणौघं रघुवंश-केतोः ।। ११

सर्वस दान दीन्ह सब काहू । जेहिं पावा राखा नहिं ताहू ।।
मृगमद चंदन कुंकुम कीचा । मची सकल बीथिन्ह बिच बीचा ।।

प्राप्तं प्रभूतं धनमप्यधीपात्
पौरैः परेभ्यो मुदितैर्विसृष्टम् ।
कस्तूरिका-चन्दन-कुङ्कुमानाम्
सेकैः सपङ्काः नगरस्य मार्गाः ।। १२

—गृह गृह बाज बधाव सुभ प्रगटे सुषमा कंद ।।
हरषवंत सब जहँ तहँ नगर नारि नर बृंद ।।

आविष्कृते रूप-निधौ धरायां
स्वात्मानमेवं रघुवंश-गेहे ।
निर्वर्तितः पौरजनैर्महोऽसौ
गृहे गृहे मङ्गल-वाद्य-घोषैः ।। २३

कैकयसुता सुमित्रा दोऊ । सुंदर सुत जनमत भैं ओऊ ।।
वह सुख संपति समय समाजा । कहि न सकइ सारद अहिराजा ।।

सुतौ सुमित्रा सुषुवे सुरूपौ
राज्ञी च कैकेय्यपि पुत्रमग्र्यम् ।
वक्तुं वचोभिः सुख-पर्वणीं ताम्
न शारदालं न च सर्पराजः ।। १४

अवधपुरी सोहइ एहि भाँती । प्रभुहि मिलन आई जनु राती ।।
देखि भानु जनु मन सकुचानी । तदपि बनी संध्या अनुमानी ।।

रेजे तदेयं रघु-राजधानी
प्राप्ता प्रभुं द्रष्टुमिव त्रियामा ।
वीक्ष्याभिवक्त्रं तु हिरण्यगर्भम्
भेजे सलज्जं ननु सान्ध्यरागम् ।। १५

अगर धूप बहु जनु अँधिआरी । उड़इ अबीर मनहुँ अरुनारी ।।
मंदिर मनि समूह जनु तारा । नृप गृह कलस सो इंदु उदारा ।।

सन्ध्यान्धकारोऽगुरु-धूमिकेव
सन्धि-प्रकाशो ननु रक्त-चूर्णम् ।
तारागणास्ते गृह-रत्न-दीपाः
पूर्णेन्दुवत् काञ्चन-कुम्भ-गोलः ।। १६

भवन वेदधुनि अति मृदु बानी । जनु खग मुखर समयँ जनु सानी ।
कौतुक देखि पतंग भुलाना । एक मास तेइँ जात न जाना ।।

ऋङ्मन्त्र-घोषो नृप-मन्दिरेऽसौ
सायंतनीयः स विहंग-रावः ।
दृष्ट्वाद्भुतं विस्मृत-नित्य-कृत्यः
स्थितः सहस्रांशुरिवात्र मासम् ।। १७

— मास दिवस कर दिवस भा मरम न जानइ कोइ ।
रथ समेत रबि थाकेउ निसा कवन बिधि होइ ।।

दिनं तदाभूत् किल मासदीर्घं
रहस्यमेतत् तु न वेद कश्चित् ।
रवौ स्थिते रुद्ध-रथेऽन्तरिक्षे
पदं कथं सा निदधीत रात्रिः ।। १८

यह रहस्य काहूँ नहिं जाना । दिनमनि चले करत गुनगाना ।।
देखि महोत्सव सुर मुनि नागा । चले भवन बरनत निज भागा ।।

चचाल मासेन ततो विवस्वान्
गायन् गुणौघं रघुवंशकेतोः ।
दृष्टोत्सवं देव-तपस्वि-नागाः
धन्याः स्वधामानि ययुः स्तुवन्तः ।। १९

औरउ एक कहउँ निज चोरी । सुनु गिरिजा अति दृढ़ मति तोरी ।

श्रीराम-पादाब्ज-रतिर्यथा ते
सुनिर्भरैवं शृणु चाद्रिजाते ।
रहस्यमेकं कथयेऽपरं ते
गोप्यं सदेदं ननु शैल-कन्ये ।। २०

काकभुसुंडि संग हम दोऊ । मनुजरूप जानइ नहिं कोऊ ।।

अहं तथा काक-भुशुण्डिरेवं
तस्मिन् पुरे चास्व तदा धरायाम् ।
मनुष्य-देहौ न हि कश्चिदावां
शक्तस्तदासीद् अभिवेत्तुमार्ये ।। २१

परमानंद प्रेमसुख फूले । बीथिन्ह फिरहिं मगन मन भूले ।।
यह सुभ चरित जान पै सोई । कृपा राम कै जापर होई ।।

आनन्द-भक्ति-प्लुत-मानसौ नौ
रथ्यास्वयोध्या-नगरस्य चोभौ
यथासुखं वातुलवद् भ्रमन्तौ
जानात्यसौ रामकृपान्वितो यः ।। २२

तेहि अवसर जो जेहि बिधि आवा । दीन्ह भूप जो जेहि मन भावा ।।

यथा हि यो यत्र गतः क्षितीशं
यो तस्य वासीन्मनसोऽभिलाषः ।
तस्मै तदा तत्र च तद् नृपोऽसौ
ददौ समग्रं गिरिजेऽविशङ्कम् ।। २३

गज रथ तुरग हेम गो हीरा । दीन्हे नृप नानाबिधि चीरा ।।

हस्त्यश्वधेनूः वसनानि चैवं
हिरण्यरत्नानि तथा रथाँश्च ।
तदा जनेभ्यो नृपतिर्वितीर्य
संतोषयामास च सर्व-पौरान् ।। २४

—मन संतोषे सबन्हि के जहँ जहँ देहिं असीस ।
सकल तनय चिर जीवहुँ तुलसिदास के ईस ।।

"ये स्वामिनो भक्त-हितैषिणो ये
जीवन्तु सर्वे चिरमात्मजास्ते ।"
दत्वाशिषं चेति महीभुजे ते
ययुः कृतार्थाः सुखिताश्च सर्वे ।। २५

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
श्रीरामजन्म-महोत्सव-वर्णनं नाम द्वात्रिंशस्तरङ्गः ।

तरङ्गः ३२

कछुक दिवस बीते एहि भाँती । जात न जानिअ दिन अरु राती ॥
नामकरन कर अवसरु जानी । भूप बोलि पठए मुनि ग्यानी ॥

यातानि चैवं कतिचिद् दिनानि
ज्ञातानि नैवोत्सव-संभ्रमेषु ।
प्राप्ते हि संज्ञा-करणस्य काले
न्यमन्त्रयद् भूमिपतिर् वसिष्ठम् ॥ १

करि पूजा भूपति अस भाषा । धरिअ नाम जो मुनि गुनि राखा ॥

तं पूजयित्वा मुनि-मानसस्थं
सप्रश्रयं चैवमुवाच भूपः ।
"कुरुष्व नामानि मुने सुतानां
संकल्पितानि प्रथमं स्वचित्ते ॥" २

इन्ह के नाम अनेक अनूपा । में नृप कहब स्वमति अनुरूपा ॥
जो आनंद सिंधु सुख रासी । सीकर तें त्रैलोक सुपासी ॥
सो सुख धाम राम अस नामा । अखिल लोक दायक बिश्रामा ॥

"नामान्यनेकानि नृपात्मजानां
यथामति त्वत्र निवेदयेऽहम् ।
आनन्दसिन्धुः सुखराशिरेष
ज्येष्ठः सुतोऽयं नृपते त्वदीयः ॥ ३

यत्सीकरोऽपि त्रिजगत्-सुखाय
त्रिलोक-विश्राम-समुद्भवो यः ।
निधानमेकं खलु मङ्गलानां
रामेति नामास्ति च तस्य राजन् ॥ ४

बिस्व भरन पोषन कर जोई । ताकर नाम भरत अस होई ॥
जाके सुमिरन तें रिपु नासा । नाम सत्रुहन बेद प्रकासा ॥

बिभर्ति यः पोषयते च योऽयं
तस्यास्ति संज्ञा भरतेति राजन् ।

निहन्ति शत्रून् स्मरणं यदीयं
शत्रुघ्न-नाम्ना गदितः स वेदे ॥ ५

–लच्छन धाम राम प्रिय सकल जगत आधार ।
गुरु बसिष्ट तेहि राखा लछिमन नाम उदार ॥

निधानमेकं शुभलक्षणानां
रामप्रियो यो जगदाश्रयो यः ।
तस्यास्ति संज्ञा नृप लक्ष्मणेति"
गुरुर्वसिष्ठस्तमुवाच वाग्मी ॥ ६

धरे नाम गुर हृदयँ बिचारी । बेद तत्व नृप तव सुत चारी ॥

विचार्य चैवात्मनि सम्यगेवं
नामानि चोक्त्वा सकलात्मजानाम् ।
ऊचे वसिष्ठश्"चतुरात्मजास्ते
राजन् चतुर्वेदसमा नु लोके ॥ ७

मुनि धन जन सरबस सिव प्राना । बाल केलि रस तेहिं सुख माना ॥

सर्वस्वमेते नृपते जनानां
धनं मुनीनां चतुरात्मजास्ते ।
शंभोस्तथा जीवनमेव सर्वे
जातास्तवैते शिशु-केलि-लोभात् ॥" ८

बारेहि ते निज हित पति जानी । लछिमन राम चरन रति मानी ॥
भरत सत्रुहन दूनउ भाई प्रभु सेवक जसि प्रीति बड़ाई ॥

मत्वाग्रजं राममथात्मनाथं
सौमित्रिरस्याङ्घ्रि-सरोज-लग्नः ।
प्रीतिर्विशेषा भरतेऽपि बाल्यात्
सेवापरस्येव च शत्रुहन्तुः ॥ ९

स्याम गौर सुंदर दोउ जोरी । निरखहिं छबि जननीं तृन तोरी ॥

श्यामो हि रम्यः खलु रामचन्द्रः
सौमित्रिरासीत् तु सुगौरवर्णः ।

श्यामस्तथासीत् भरतोऽपि रम्यः
सुगौरकायस्तु स शत्रुहन्ता ।। १०
द्वयोर्द्वयोस्तद् युगलं सुरम्यं
न वीक्ष्य तृप्तिर्जननीजनानाम् ।
दुर्दृष्टिदोषं प्रतिहन्तुमेतास्-
तृणं लुनन्ति स्म तदातिप्रीत्या ।। ११

चारिउ सील रूप गुन धामा । तदपि अधिक सुखसागर रामा ।।

सर्वे च ते पङ्क्तिरथस्य पुत्राः
शीलान्विताः सद्गुण-रूप-युक्ताः ।
सर्वातिरिक्तस्तु स सौख्यसिन्धुः
श्रीरामचन्द्रः स्वगुणैर्वरेण्यः ।। १२

हृदयँ अनुग्रह इंदु प्रकासा । सूचत किरन मनोहर हासा ।।

विराजते स्मास्य कृपा-सुधांशुः
श्रीरामचन्द्रस्य हृदन्तरिक्षे ।
यदंशुजालम् मुखचारुहास-
श्रीछद्मनाविष्कुरुते स्म दीप्तिम् ।। १३

कबहुँ उछंग कबहुँ बर पलना । मातु दुलारइ कहि प्रिय ललना ।।

अङ्कं समारोप्य कदाचिदेनम्
प्रेङ्खीकृतं वा क्वचिदात्मजातम् ।
"प्रियोऽसि रे वत्स भृशं ममे"ति
प्रीत्या सुतं लालयते स्म माता ।। १४

–ब्यापक ब्रह्म निरंजन निर्गुन विगत बिनोद ।
सो अज प्रेम भगति बस कौसल्या कें गोद ।।

विगतविनोदम् मायातीतम्
निर्गुणमखिलगतं संपूर्णम् ।
ब्रह्मैवेदं विलसति नूनम्
भक्तिवशं कौसल्योत्सङ्गे ।। १५

काम कोटि छबि स्याम सरीरा । नील कंज बारिद गंभीरा ।।
अरुन चरन पंकज नख जोती । कमल दलन्हि बैठे जनु मोती ।।

इन्दीवर-वर-वारिद-नीलम्
कोटि-कुसुम-शर-सुन्दर-रूपम् ।
अरुण-चरण-नख-किरण-वितंसम्
मुक्ताफलमिव कमल-दलस्थम् ।। १६

रेख कुलिस ध्वज अंकुस सोहे । नूपुर धुनि सुनि मुनि मन मोहे ।।

कुलिशाङ्कुश-शुभ-केतन-लाञ्छन-
मण्डित-मृदु-पद-सरसिज-युगलम् ।
मञ्जु-मधुर-वर-नूपुर-शिञ्जित-
मोहित-मुनिजन-हृदय-मरालम् ।। १७

कटि किंकिनी उदर त्रय रेखा । नाभि गभीर जान जेहिं देखा ।।

त्रिवलि-विभूषित-सुमधुरोदरम्
किङ्किणिका-कृत-कटि-सुविभूषम् ।
वेत्ति च नाभि-गभीरावर्तम्
कोऽपि नरो यो दर्शन-धन्यः ।। १८

भुज बिसाल भूषन जुत भूरी । हियँ हरि नख अति सोभा रूरी ।।
उर मनिहार पदिक की सोभा । बिप्र चरन देखत मन लोभा ।।

विविध-विभूषण-भूषित-रूपम्
भुज-युगलं सुविशाल-सुरम्यम् ।
व्याघ्र-नखाङ्कित-भृगु-पद-लाञ्छित-
रत्नहार-सुविभूषित-हृदयम् ।। १९

कंबु कंठ अति चिबुक सुहाई । आनन अमित मदन छबि छाई ।।
दुइ दुइ दसन अधर अरुनारे । नासा तिलक को बरनै पारे ।।

सुभग-तिलक-नासा-गल-चिबुकम्
वदनममित-मदनच्छवि-रुचिरम् ।
अरुणाधर-वृत-सद्योलक्षित-
दशन-मुकुल-युगलं बहु रम्यम् । २०

सुंदर श्रवन सुचारु कपोला । अति प्रिय मधुर तोतरे बोला ॥
चिक्कन कच कुंचित गभुआरे । बहु प्रकार रचि मातु सँवारे ॥

चारु-कपोलं रुचिर-श्रवणम्
मधु-मधुरं तद् बालक-रूपम् ।
अस्फुट-वर्ण-मनोहर-वचनम्
जननी-विरचित-कुञ्चित-केशम् ॥ २१

पीत झगुलिआ तनु पहिराई । जानु पानि बिचरनि मोहि भाई ॥
रूप सकहिं नहिं कहि श्रुति सेषा । सो जानइ सपनेहुँ जेहिं देखा ॥

कनक-सुवर्णम् बालक-वसनम्
कर-तल-जानु-मनोहर-गमनम् ।
श्रुतिरहिपतिरपि रुद्ध-मुखौ, यद्
वर्णयितुं कोऽलं शिशुरूपम् ॥ २२

–सुख संदोह मोहपर ग्यान गिरा गोतीत ।
दंपति परम प्रेम बस कर सिसुचरित पुनीत ॥

सुख-संदोहः सोऽयम् मोहपरोऽगोचरो गिरोऽतीतः ।
पित्रोः प्रेमवशः सन् शिशु-लीलाम् आतनोति परमेशः ॥ २३

एहि बिधि राम जगत पितु माता । कोसलपुर बासिन्ह सुखदाता ॥

जातः श्रीरामोऽयं जगतो माता पिता तथैवायम् ।
कोसलपुर-नर-नारी-सुखदाता भवभयापहर्तायम् ॥ २४

जिन्ह रघुनाथ चरन रति मानी । तिन्ह की यह गति प्रगट भवानी ॥

रामपदाब्जरतो यः सुखयति शिशुलीलयापि तं रामः ।
भाग्यमहः परमोऽयं भक्तेर्महिमेति विद्धि गिरिजे त्वम् ॥ २५

रघुपति बिमुख जतन कर कोरी । कवन सकइ भव बंधन छोरी ॥
जीव चराचर बस कै राखे । सो माया प्रभु सों भय भाखे ॥

रघुपति-पद-रति-विमुखः कोटिशतैरपि न मुच्यते यत्नैः ।
त्रस्यति परम-परेशाद् मायापि च यद्वशे सदा जीवाः ॥ २६

भृकुटि बिलास नचावइ ताही । अस प्रभु छाडि़ भजिअ कहु काही ।।

नर्तयतीमां मायां भ्रुकुटि-विलासेन चैव परमेशः ।
हित्वा तं भगवन्तं भजेम गिरिजे कमत्र वद सत्यम् ।। २७

मन क्रम बचन छाडि़ चतुराई । भजत कृपा करिहहिं रघुराई ।।

सोऽयं रघुकुल-नाथो वचन-मनःकर्मसेवितः सततम् ।
कुरुतेऽनुग्रहमेवं कोऽर्थो मति-पाटवेन तत्पुरतः ।। २८

एहि बिधि सिसुबिनोद प्रभु कीन्हा । सकल नगरबासिन्ह सुख दीन्हा ।।
लै उछंग कबहुँक हलरावै । कबहुँ पालनें घालि झुलावै ।।

एवं प्रभुवरलीला पौराणां प्रीतये बभूव भृशम् ।
सविशेषं स्वोत्सङ्गे दोलायां वोपलालनान्मातुः ।। २९

—प्रेम मगन कौसल्या निसि दिन जात न जान ।
सुत सनेह बस माता बालचरित कर गान ।।

दिनमपि रजनीं चैवं न वेद सा जन्मदा सुत-स्नेहात् ।
शिशु-चरितं सुख-हेतोः पुत्र-प्रेम्णा जगौ सदा प्रीता ।। ३०

एक बार जननीं अन्हवाए । करि सिंगार पलनाँ पौढ़ाए ।।
निज कुल इष्टदेव भगवाना । पूजा हेतु कीन्ह अस्नाना ।।

स्नान-विलेपन-भूषित-बालं
दोलामथ चारोप्य सैकदा ।
स्नात्वा स्वयमपि देवतार्चनम्
समाचरत् कौसल्या माता ।। ३१

करि पूजा नैबेद्य चढ़ावा । आपु गई जहँ पाक बनावा ।।

कृत्वा भक्त्या देवतार्चनं
नैवेद्यं चार्पयत् प्रभूतम् ।
महानसं सा ततः कारणात्
गत्वा कञ्चित् कालं यावत् ।। ३२

बहुरि मातु तहवाँ चलि आई । भोजन करत देख सुत जाई ॥
गै जननी सिसु पहिं भयभीता । देखा बाल तहाँ पुनि सूता ॥

पूजाकक्षम् पुनरायाता
दद‍र्श तावद् विस्मित-चित्ता ।
बालं रामं देवगृहे सा
भक्षन्तं नैवेद्यं प्रीत्या ॥ ३३

बहुरि आइ देखा सुत सोई । हृदयँ कंप मन धीर न होई ॥
इहाँ उहाँ दुइ बालक देखा । मतिभ्रम मोर कि आन बिसेषा ॥

एकम् प्रेङ्खारोपितमेषा
तथैव चान्यम् पूजा-कक्षे ।
दृष्ट्वा युगपत् शिशु-द्वयं सा
भीता भ्रान्ता कम्पित-गात्रा ॥ ३४

देखि राम जननी अकुलानी । प्रभु हँसि दीन्ह मधुर मुसुकानी ॥
– देखरावा मातहि निज अद्‌भुत रूप अखंड ।

दृष्ट्वा जननीं व्याकुल-चित्ताम्
जहास मन्दम् मधुरम् बालः ।
अदर्शयत् ताम् अद्‌भुत-रूपम्
निजं यथार्थं निखिलं रामः ॥ ३५

रोम रोम प्रति लागे कोटि कोटि ब्रह्मंड ॥
अगनित रबि ससि सिव चतुरानन । बहु गिरि सरित सिंधु महि कानन ॥
काल कर्म गुन ग्यान सुभाऊ । सोउ देखा जो सुना न काऊ ॥

रोमे रोमे यस्यापश्यत्
ब्रह्माण्डानां कोटिं माता ।
असंख्य-सूर्यान् अगणित-चन्द्रान्
महेश-चतुराननादि-देवान् ॥ ३६

गिरयः सरितस्तथा समुद्राः
मही-गोलकाः कानन-देशाः ।
ज्ञान-गुणानां तथा कर्मणाम्
अगणित-निवहास्तत्रैवासन् ॥ ३७

देखी माया सब बिधि गाढ़ी। अति सभीत जोरें कर ठाढ़ी ॥
देखा जीव नचावइ जाही। देखी भगति जो छोरइ ताही ॥
तन पुलकित मुख बचन न आवा। नयन मूदि चरननि सिरु नावा ॥

स्थिता बलवती मायाप्यस्मिन्
बद्ध्वाञ्जलिमतिभय-संभ्रान्ता।
माया-वशगा जीवाश्चैवम्
भक्तिर् भव-भय-पाश-मोचिका ॥ ३८

दृष्ट्वा रोमाञ्चित-तनुरेषा
तस्थौ तूष्णीं वक्तुमशक्ता।
साध्वस-विस्मय-संवृत-नेत्रा
बाल-पदाब्ज-युगे प्रणिपतिता ॥ ३९

बिसमयवंत देखि महतारी। भए बहुरि सिसुरूप खरारी ॥

दृष्ट्वा जननीं भय-संभ्रान्ताम्
श्रीरामोऽसौ परम-परेशः।
प्रतिसंहृत्य तदद्भुतरूपम्
बभूव बालः सदयो भूयः ॥ ४०

अस्तुति करि न जाइ भय माना। जगत पिता मैं सुत करि जाना ॥

"असंशयं सा प्रगल्भता मे
स्वात्मजबुद्धिः परमपरेशे।"
इत्यपराध-भयादसमर्था
स्तोतुमपीशं सा कौसल्या ॥ ४१

हरि जननी बहुबिधि समुझाई। यह जनि कतहुँ कहसि सुनु माई ॥

श्रीहरिरपि तदवस्थाम् एनाम्
अबोधयत् बहुविधमतिसदयः।
"मातर् मा शुच शृणु मे वचनम्
रक्ष्यमिदं यत्नेन रहस्यम् ॥" ४२

–बार बार कौसल्या बिनय करइ कर जोरि ।
अब जनि कबहूँ ब्यापै प्रभु मोहि माया तोरि ॥

वारं वारं कौसल्याम्बा
बद्धाञ्जलिरूचे सुविनीता ।
"मा ते माया दीनदयाघन
बुद्धिं भ्रमयतु मे पुनरेवम् ॥ ४३

बालचरित हरि बहुबिधि कीन्हा । अति अनंद दासन्ह कहँ दीन्हा ॥
कछुक काल बीतें सब भाई । बड़े भए परिजन सुखदाई ॥

एवं हरिकृत-बालक-चरितम्
परिजन-मानस-सौख्य-निधानम् ।
यातेष्वेवं सुखद-दिनेषु
क्रान्त-शैशवाः सकला बालाः । ४४

चूड़ाकरन कीन्ह गुरु जाई । बिप्रन्ह पुनि दछिना बहु पाई ॥
परम मनोहर चरित अपारा । करत फिरत चारिउ सुकुमारा ॥

निर्वाहितमथ चूडाकरणम्
सकल-सुतानां गुरुणा प्रेम्णा ।
अधिगत-बहुविध-मङ्गल-दानम्
द्विजकुलमपि संतृप्तं सर्वम् ॥ ४५

अथ सुकुमारा नृपति-कुमाराः
परम-मनोहर-मङ्गल-चरिताः ।
सकुतुक-वीक्षित-केलि-कलापाः
पुरजन-परिजन-परम-शर्मदाः ॥ ४६

मन क्रम बचन अगोचर जोई । दसरथ अजिर बिचर प्रभु सोई ॥

मनः कर्म-वचनैरनवाप्यः
निर्गुणरूपः परमपरेशः ।
भूत्वा बालो दशरथराज्ञः
व्यचरत् गृहचत्वरे लीलया ॥ ४७

भोजन करत बोल जब राजा । नहिं आवत तजि बाल समाजा ।।

बाल-मित्र-गण-वलय-परीतः
नायाति स्म स पित्राहूतः ।
भोजन-समये केलि-निमग्नः
विस्मृत-क्षुत्-तृष्णादि-विकारः ।। ४८

कौसल्या जब बोलन जाई । ठुमुकु ठुमुकु प्रभु चलहिं पराई ।।

मात्राहूतः पुनरपि चैषः
धावति स्म दूरं बहुचपलः ।
अनुसरति स्म च जननी बालम्
दिधीर्षती निजपुत्रं रामम् ।। ४९

निगम नेति सिव अंत न पावा । ताहि धरै जननी हठि धावा ।।

वेत्ति यदन्तं न हि स महेशः
योऽयं निगमैर्नेति च गदितः ।
धर्तुम् तमिमं परमपरेशम्
अयतत माता प्रसभं रामम् ।। ५०

धूसर धूरि भरें तनु आए । भूपति बिहसि गोद बैठाए ।।

श्रीरामोऽसौ केलि-श्रान्तः
नृप-भवनाजिर-धूलि-धूसरः ।
स्वयं समारोप्यते स्म पित्रा
विहस्य किञ्चित् स्वाङ्कम् प्रेम्णा ।। ५१

–भोजन करत चपल चित इत उत अवसरु पाइ ।
भाजि चले किलकत मुख दधि ओदन लपटाइ ।।

दुर्विनीत इव भोजन-समये
चञ्चल-चित्तो बालो रामः ।
लीला-कलकलमुच्चैः कुर्वन्
धावति स्म दध्योदन-लिप्तः ।। ५२

बालचरित अति सरल सुहाए । सारद सेष संभु श्रुति गाए ।।

सरल-सुभग-शिशुचरितं मुग्धम्
विलोभनीयं रामस्येदम् ।
शेष-शारदा-श्रुति-शिव-गीतम्
पावन-सौख्य-निधानं नित्यम् ।। ५३

जिन्ह कर मन इन्ह सन नहिं राता । ते जन बंचित किए बिधाता ।।

पावन-सुन्दर-शुभ-शिशु-चरिते
चित्तं यस्य नरस्य न रमते ।
पितामहेन स मनुजोऽधन्यः
प्रतारितोऽत्र न कार्या शङ्का ।। ५४

भए कुमार जबहिं सब भ्राता । दीन्ह जनेऊ गुरु पितु माता ।।
गुरगृहँ गए पढ़न रघुराई । अलप काल बिद्या सब आई ।।

कृतोपयन-संस्काराः सर्वे
राजकुमाराः प्राप्ते समये ।
गुरु-सदने चानुजैः सहासा-
वचिराद् अधिगतविद्यो रामः ।। ५५

जाकी सहज स्वास श्रुति चारी । सो हरि पढ़ यह कौतुक भारी ।।

श्रुतयो यस्य सहज-निःश्वासास्-
तेनाधीताः सकला वेदाः ।
अतिगहना परमेश्वर-लीला
पश्यत कौतुकमयि नरनार्यः ।। ५६

बिद्या बिनय निपुन गुन सीला । खेलहिं खेल सकल नृपलीला ।।

विद्या-विनय-विभूषित-रूपाः
सर्वे शीलगुणैरुपपन्नाः ।
नरपति-केलि-कुतूहल-मग्नाः
क्रीडायाम् अपि राजकुमाराः ।। ५७

करतल बान धनुष अति सोहा । देखत रूप चराचर मोहा ।।
जिन्ह बीथिन्ह बिहरहिं सब भाई । थकित होहिं सब लोग लुगाई ।।

वीक्ष्यैतान् शर-कार्मुक-हस्तान्
मुह्यन्ति स्म चराचर-जीवाः ।
पश्यन्ति स्म च निष्पन्दाक्षम्
चकिताः पौराः पुर-रथ्यासु ।। ५८

–कोसलपुर बासी नर नारि बृद्ध अरु बाल ।
प्रानहु ते प्रिय लागत सब कहुँ राम कृपाल ।।

आबालक-जरठाः जनसंघाः
कोसलपुर-नर-नार्यः सर्वाः ।
प्राणेभ्योऽपि प्रियतरमेनम्
मन्यन्ते स्म दयाघन-रामम् ।। ५९

बंधु सखा सँग लेहिं बोलाई । बन मृगया नित खेलहिं जाई ।।
पावन मृग मारहिं जियँ जानी । दिन प्रति नृपहि देखावहिं आनी ।।

अनुज-मित्र-जन-सहितं नित्यम्
विहरण-शीलो गहन-वनान्ते ।
हत्वा हरिण-कुलं प्रभुरामः
दर्शयते स्म नृपं प्रतिदिवसम् ।। ६०

जे मृग राम बान के मारे । ते तनु तजि सुरलोक सिधारे ।।

दशरथसुत-शर-निकर-परेताः
धन्याः सर्वे कानन-हरिणाः ।
अचिरोज्झित-जड-रूप-शरीराः
सुरवर-लोकं सुखिता याताः ।। ६१

अनुज सखा सँग भोजन करहीं । मातु पिता अग्या अनुसरहीं ।।

मृगया-केलि-सुखित-रघुनाथः
गुरुजन-वचन-करः प्रतियातः ।
अनुज-मित्र-परिवार-समेतम्
भक्षयति स्म च मधुराहारम् ।। ६२

जेहि बिधि सुखी होहिं पुर लोगा । करहिं कृपानिधि सोइ संजोगा ।।
बेद पुरान सुनहिं मन लाई । आपु कहहिं अनुजन्ह समुझाई ।।

कुरुते स्म च यद् दशरथपुत्रः
तत् तद् पुर-जन-हर्ष-निधानम् ।
अधिगत-विद्या-वेद-पुराणः
बोधयते स्म च बन्धून् सद्यः ।। ६३

प्रातःकाल उठि कै रघुनाथा । मातु पिता गुरु नावहिं माथा ।।
आयसु मागि करहिं पुर काजा । देखि चरित हरषइ मन राजा ।।

प्रातःकाले त्यक्त्वा शयनम्
वन्दते स्म गुरु-चरणौ नित्यम् ।
अवेक्षते स्म ततः पुरकार्यं
नृपाज्ञया नृप-हर्षकरोऽयम् ।। ६४

—ब्यापक अकल अनीह अज निर्गुन नाम न रूप ।
भगत हेतु नाना बिधि करत चरित्र अनूप ।।

अवयवरहितः सर्वगतोऽसौ
नाम-रूप-गुण-जन्म-विहीनः ।
कुरुते नानालीला नित्यं
परम-परेशो भक्त-जनार्थम् ।। ६५

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
श्रीराम-बाल्य-वर्णनं नाम त्रयस्त्रिंशस्तरङ्गः ।

तरङ्गः ३४

यह सब चरित कहा मैं गाई । आगिलि कथा सुनहु मन लाई ।।

रघुनन्दन-वृत्तं तद् गीतं रम्यार्थमद्भुतम् ।
सावधानं शृणुध्वम् भोस् तदूर्ध्वं चरितं शुभम् ।। १

बिस्वामित्र महामुनि ग्यानी । बसहिं बिपिन सुभ आश्रम जानी ।।

वसति स्म वनेकस्मिन् विश्वामित्रो महामुनिः ।
आश्रमे रमणीयेऽसौ तपस्वी ज्ञानवान् शुचिः ।। २

जहँ जप जग्य जोग मुनि करहीं । अति मारीच सुबाहुहि डरहीं ।।

योग-याग-रतो नित्यं व्रतानुष्ठान-तत्परः ।
संत्रासितः सदैवायं मारिचेन सुबाहुना ।। ३

देखत जग्य निसाचर धावहिं । करहिं उपद्रव मुनि दुख पावहिं ।।

समारब्धे हि यज्ञे तावुभावपि निशाचरौ ।
धावतः स्म विनाशार्थं मुनि-संताप-कारिणौ ।। ४

गाधितनय मन चिंता ब्यापी । हरि बिनु मरहिं न निसिचर पापी ।।

'विना हरिं निहन्तुं तावन्यः कोऽप्यस्ति न प्रभुः ।'
ज्ञात्वैवं गाधिजश्चासीत् चिन्ता-संविग्न-मानसः ।। ५

तब मुनिबर मन कीन्ह बिचारा । प्रभु अवतरेउ हरन महि भारा ।।

"अवतीर्णः स भगवान् संप्रत्यस्मिन् महीतले ।
पापभारं लघूकर्तुं धरण्याः करुणाघनः ।। ६

एहूँ मिस देखौं पद जाई । करि बिनती आनौं दोउ भाई ।।

गत्वा तदन्तिके नूनं कृत्वा पादाभिवन्दनम् ।
विज्ञापयामि चागन्तुं सानुजं चाश्रमं मम ।। ७

ग्यान बिराग सकल गुन अयना । सो प्रभु मैं देखब भरि नयना ।।

ज्ञानवैराग्यराशिं तं भगवन्तं गुणाकरम् ।
कृत्वाक्षिविषयं चाहं नूनं यास्यामि धन्यताम् ।।" ८

–बहुबिधि करत मनोरथ जात लागि नहिं बार ।।

विचिन्त्यैवं न चैवासौ गणयामास गाधिजः ।
गच्छन् मनोरथेनैव प्रयाण-समयं सुधीः ।। ९

करि मज्जन सरऊ जल गए भूप दरबार ।।

स्नातः स शरयूतीरे प्रसन्नः परमार्थविद् ।
राजद्वारम् उपायातः प्रभु-दर्शन-काङ्क्षया ।। १०

मुनि आगमन सुना जब राजा । मिलन गयउ लै बिप्र समाजा ।।

तदागमनवृत्तान्तं श्रुत्वा दशरथः स्वयम् ।
सह विप्रगणैश्चैनं प्रत्युद्यातः प्रतापवान् ।। ११

करि दंडवत मुनिहि सनमानी । निज आसन बैठारेन्हि आनी ।।

अभिनन्द्य ततश्चैनं सादरं वसुधाधिपः ।
निजासनमतीवाहँ समुपावेशयत् स्वयम् ।। १२

चरन पखारि कीन्हि अति पूजा । मो सम आजु धन्य नहिं दूजा ।।

प्रक्षाल्य चरणौ चैवं पूजयामास धर्मविद् ।
उवाचैनं "न धन्योऽस्ति मत्समोऽन्योद्य भूतले ।।" १३

बिबिध भाँति भोजन करवावा । मुनिबर हृदयँ हरष अति पावा ।।
पुनि चरननि मेले सुत चारी । राम देखि मुनि देह बिसारी ।।
भए मगन देखत मुख सोभा । जनु चकोर पूरन ससि लोभा ।।

निवेद्य च ततस्तस्मै भोजनं सुरुचिप्रदम् ।
नामयामास संतुष्टं चतुर्भिः स्वात्मजैर्नृपः ।। १४
ददर्श गाधिजो रामं विस्मृत्यात्मानमग्रजम् ।
चकोर इव पूर्णेन्दुं पश्यन् तृप्तिं ययौ न सः ।। १५

तब मन हरषि बचन कह राऊ । मुनि अस कृपा न कीन्हिहु काऊ ।।

प्रहृष्टो नृपतिश्चैनमुवाच वचनं ततः ।
"धन्योऽस्म्यहं मुने नैवं कृपा-लाभः पुरा मम ।।" १६

केहि कारन आगमन तुम्हारा। कहहु सो करत न लावउँ बारा ॥

"कथयस्व मुनिश्रेष्ठ शुभागमन-कारणम् ।
करिष्ये चाविलम्बेन वचनं ते दयार्णव ॥" १७

असुर समूह सतावहिं मोही। मैं जाचन आयउँ नृप तोही ॥
अनुज समेत देहु रघुनाथा। निसिचर बध मैं होब सनाथा ॥

श्रुत्वेति नृपतेर्वाक्यं प्रत्यूचे मुनिरप्यसौ ।
"धर्मविघ्नं महज्जातं दानवेभ्योऽद्य मे नृप ॥ १८
याचेऽहं त्वामतो भूप किञ्चिद् अद्य शृणुष्व तद् ।
प्रेषयैनं सुतं ज्येष्ठं मया सह सलक्ष्मणम् ॥ १९
आगत्य विपिने चैषः सानुजो रघुनायकः ।
हत्वाऽसुरगणान् राजन् सनाथं मां करिष्यति ॥ २०

—देहु भूप मन हरषित तजहु मोह अग्यान ।
धर्म सुजस प्रभु तुम्ह कौं इन्ह कहँ अति कल्यान ॥

त्यक्त्वा मोहं महीपाल तथैवाज्ञानमन्तरात् ।
प्रसन्न-मनसा चैतौ सुतौ मे दातुमर्हसि ॥ २१
ततः स्वधर्मं कीर्तिं च प्राप्स्यस्यत्र महीपते ।
कल्याण-भागिनौ चैतौ सुपुत्रौ नियतं हि ते ॥" २२

सुनि राजा अति अप्रिय बानी। हृदय कंप मुख दुति कुमुलानी ॥

अप्रियं वचनं चेदं श्रुत्वा मुनिमुखान्नृपः ।
चकम्पे भयसंक्रान्तो विवर्णित-मुख-द्युतिः ॥ २३

चौथेंपन पायउँ सुत चारी। बिप्र बचन नहिं कहेहु बिचारी ॥

"वार्धक्ये यन्मया प्राप्तं विप्र पुत्र-चतुष्टयम् ।
अविचारितमेतत् ते वचोऽतः प्रतिभाति मे ॥ २४

मागहु भूमि धेनु धन कोसा। सर्बस देउँ आजु सहरोसा ॥

याचस्व मां मुने भूमिं धेनूर्धनमथैव वा ।
सर्वस्वं वातिहर्षेण तुभ्यं दास्याम्यसंशयम् ॥ २५

देह प्रान तें प्रिय कछु नाहीं । सोउ मुनि देउँ निमिष एक माहीं ।।

नास्ति देहात् परं चान्यत् प्राणेभ्योऽपि प्रियं मुने ।
दास्यामि सर्वमेवैतत् सपद्येव दयाघन ।। २६

सब सुत प्रिय मोहि प्रान कि नाईं । राम देत नहिं बनइ गोसाईं ।।
कहँ निसिचर अति घोर कठोरा । कहँ सुंदर सुत परम किसोरा ।।

प्राणेभ्यः सर्व एवैते पुत्राः प्रियतराः मम ।
तत्रापि च सुते ज्येष्ठे रामेऽहं दृढ-वत्सलः ।। २७

कदाचिदपि नाहं ते प्रदातुं प्रभवामि तम् ।
क्वातिघोरा मुने दैत्याः सुकुमारः क्व मे सुतः ।। " २८

सुनि नृप गिरा प्रेम रस सानी । हृदयँ हरष माना मुनि ग्यानी ।।

श्रुत्वेदं नृपतेर्वाक्यं वात्सल्य-रस-पूरितम् ।
संतुष्टः स महाज्ञानी विश्वामित्रो मुनीश्वरः ।। २९

तब बसिष्ट बहुबिधि समुझावा । नृप संदेह नास कहँ पावा ।।

वसिष्ठस्तु तदा भूपं बोधयामास धर्मवित् ।
निरस्त-संशयश्चासीद् येन राम-पिता तदा ।। ३०

अति आदर दोउ तनय बोलाए । हृदयँ लाइ बहु भाँति सिखाए ।।

सादरं च तदाहूय संपरिष्वज्य चात्मजौ ।
उपादिदेश बहुधा भूयो भूयो महीपतिः ।। ३१

मेरे प्रान नाथ सुत दोऊ । तुम्ह मुनि पिता आन नहिं कोऊ ।।

ततश्चोचे वचो विप्रं सधैर्यं धरणीपतिः ।
विश्वामित्रं मुनि-श्रेष्ठं सर्व-संतोष-कारणम् ।। ३२

"बहिश्चरा हि मे प्राणाः पुत्रौ ह्येतौ मुनीश्वर ।
त्वदन्यो न तयोस्त्राता पिता वा कोऽपि गाधिज ।।" ३३

–सौंपे भूप रिषिहि सुत बहुबिधि देइ असीस ।
जननी भवन गए प्रभु चले नाइ पद सीस ।।

दत्ताशिषौ ततस्तस्मै दत्तौ राज्ञा स्वपुत्रकौ ।
प्रणताम्बपदौ चैतौ प्रस्थितौ मुनिना सह ।। ३४

–पुरुषसिंह दोउ बीर हरषि चले मुनि भय हरन ।
कृपासिंधु मतिधीर अखिल बिस्व कारन करन ।।

नरसिंहावुभावेतौ वीरौ सत्यपराक्रमौ ।
सहर्षं प्रस्थितौ तूर्णं हर्तुं मुनिभयं वने ।। ३५

ब्रह्माण्ड-नायकौ चैतौ धीरौ कारुण्य-सागरौ ।
सानन्दं मुनिना सार्धं प्रस्थितौ रामलक्ष्मणौ ।। ३६

अरुन नयन उर बाहु बिसाला । नील जलज तनु स्याम तमाला ।।

व्यूढोरस्कः सुताम्राक्षो दीर्घ-बाहुः कुमारकः ।
नील-वारिज-संकाशस्तमाल-श्यामलः प्रभुः ।। ३७

कटि पट पीत कसें बर भाथा । रुचिर चाप सायक दुहुँ हाथा ।।

पीताम्बरधरो रामो रेजे तूणीर-शोभितः ।
धनुर्धरो महाधीरः शर-हस्तो मनोहरः ।। ३८

स्याम गौर सुंदर दोउ भाई । बिस्वामित्र महानिधि पाई ।।

श्यामो रामः सुगौरोऽसौ लक्ष्मणस्तु सुलक्षणः ।
राजपुत्र-द्वयं चेदं मुनेरासीन्महद् धनम् ।। ३९

प्रभु ब्रह्मन्यदेव मैं जाना । मोहि निति पिता तजेउ भगवाना ।।

“ विप्र-भक्तः प्रभुर्नूनं मन्येऽहं रघुनायकः ।
मदर्थं यः स्वपितरं तत्याज करुणा-घनः ।। ” ४०

चले जात मुनि दीन्हि देखाई । सुनि ताडका क्रोध करि धाई ।।

विचिन्त्यैवं मुनिर्मार्गे दर्शयामास ताटकाम् ।
अभिद्रुवन्तीं संक्रुद्धां श्रुत्वा शब्दं निशाचरीम् ।। ४१

एकहिं बान प्रान हरि लीन्हा । दीन जानि तेहि निज पद दीन्हा ।।

निजघान तदैवैनां शरेणैकेन राक्षसीम् ।
मत्वा दीनां ददौ त्वस्यै पदं दिव्यं निजं प्रभुः ।। ४२

तब रिषि निज नाथहि जियँ चीन्ही । बिद्यानिधि कहुँ बिद्या दीन्ही ।।

विश्वनाथाय नाथाय सर्वज्ञायापि सर्वविद् ।
विश्वामित्रो ददौ विद्यां जानन्नपि परात्परम् ।। ४३

जाते लाग न छुधा पिपासा । अतुलित बल तनु तेज प्रकासा ।।

अतुल्य-तनु-तेजोऽसौ येन लेभे नृपात्मजः ।
क्षुत्-पिपासे तथैवैनं नाबाधेतां पथा क्वचित् ।। ४४

– आयुध सर्ब समर्पि कै प्रभु नज आश्रम आनि ।

समर्प्यास्मै स्वनाथाय सर्व-शस्त्रास्त्र-संग्रहम् ।
आनयामास सुप्रीतः श्रीरामं स्वाश्रमं मुनिः ।। ४५

कंद मूल फल भोजन दीन्ह भगति हित जानि ।।

परात्परं तथैवैनं जानन्निजहितैषिणम् ।
कन्द-मूल-फलान्यस्मै ततो भक्त्या समर्पयत् ।। ४६

प्रात कहा मुनि सन रघुराई । निर्भय जन्य करहु तुम्ह जाई ।।

प्रातःकाले प्रभुश्चैनमुवाच मुनिपुंगवम् ।
यजस्व त्वं यथाकामं निःशङ्कं मुनिसत्तम ।। ४७

होम करन लागे मुनि झारी । आपु रहे मख कीं रखवारी ।।

विश्वामित्रोऽपि विध्वस्तः समारेभे महाध्वरम् ।
अरक्षद् राक्षसेभ्यस्तं स्वयं रामो महायशाः ।। ४८

सुनि मारीच निसाचर क्रोही । लै सहाय धावा मुनिद्रोही ।।

मुनिशत्रुर्महाक्रोधी श्रुतवृत्तो निशाचरः ।
मारिचः ससहायोऽपि संप्राप्तस्तत्र सत्वरम् ।। ४९

बिनु फर बान राम तेहि मारा । सत जोजन गा सागर पारा ॥

निरग्रेण शरेणैनं प्राहरच्चरणे प्रभुः ।
शत-योजन-सिन्धोर्यद् पारं गत्वापतद् भुवि ॥ ५०

पावक सर सुबाहु पुनि मारा । अनुज निसाचर कटकु सँघारा ॥

हतवान् वह्नि-बाणेन सुबाहुं यावदग्रजः ।
निशाचर-बलं तावन्निजघान रणेऽनुजः ॥ ५१

मारि असुर द्विज निर्भयकारी । अस्तुति करहिं देव मुनि झारी ॥

कुमाराभ्यां कृतं चैवं काननं र्निनिशाचरम् ।
द्विज-वृन्दं च निर्भीकं दृष्ट्वा तुष्टुविरेऽमराः ॥ ५२

तहँ पुनि कछुक दिवस रघुराया । रहे कीन्हि बिप्रन्ह पर दाया ॥

कानिचिच्च दिनान्येवं विप्र-प्रेम्णा दया-घनः ।
उवास रघुनाथोऽपि विश्वामित्राश्रमे ततः ॥ ५३

भगति हेतु बहु कथा पुराना । कहे बिप्र जद्यपि प्रभु जाना ॥

भक्तिमद्भ्यो हि विज्ञेभ्यः शृण्वन्नाना मनोरमाः ।
पुण्याश्रम-निवासिभ्यो मुनिभ्यश्च कथास्तदा ॥ ५४

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
मख-रक्षणं नाम चतुस्त्रिंशस्तरङ्गः ।



तब मुनि सादर कहा बुझाई । चरित एक प्रभु देखिअ जाई ।।
धनुषजग्य सुनि रघुकुल नाथा । हरषि चले मुनिवर के साथा ।।

अथ श्रीरघुनाथं तं मुनिरूचे वचस्ततः ।
"दर्शनीयं च किञ्चित् त्वां दर्शयिष्यामि राघव ।।" १
प्रस्तूयैवं मुनिस्तस्मै कथयामास सादरम् ।
शिव-कार्मुक-वृत्तान्तं महदाश्चर्य-वर्धनम् ।। २
प्रतस्थे रघुनाथोऽपि श्रुत्वा वृत्तं तदद्भुतम् ।
सहर्षं मुनिना सार्धं दिदृक्षुः पुण्य-कार्मुकम् ।। ३

आश्रम एक दीख मग माहीं । खग मृग जीव जंतु तहँ नाहीं ।।

दृष्टो मार्गे ततस्ताभ्यां कश्चिन्निर्मानुषाश्रमः ।
न यत्र विहगा जीवा मृगा वा जन्तवोऽपि वा ।। ४

पूछा मुनिहि सिला प्रभु देखी । सकल कथा मुनि कहा बिसेषी ।।

दृष्ट्वैकामाश्रमे तस्मिन् शिलां श्रीरघुनायकः ।
जिज्ञासुर्मुनिमपृच्छत् शिला-वृत्तं कुतूहलात् ।। ५
विश्वामित्रोऽपि रामाय कथयामास सर्ववित् ।
शिला-संबन्धिनीम् एनां कथाम् अस्मै पुरातनीम् ।। ६

– गौतम नारि श्राप बस उपल देह धरि धीर ।
चरन कमल रज चाहति कृपा करहु रघुबीर ।।

"नेयं शिला प्रभो नूनं गौतमर्षेरियं सती ।
शिलीभूता महासाध्वी पति-शापात् पतिव्रता ।। ७
आस्थाय हृदये धैर्यं तिष्ठत्यत्र चिरादियम् ।
त्वत्-पदाब्ज-रजःस्पर्शं प्रतिपालयती सती ।। ८
तदिमां दीन-बन्धो त्वं स्पृष्ट्वा पादेन राघव ।
पावयित्वानुकम्पार्हां संजीवायितुमर्हसि ।।" ९

– परसत पद पावन सोक नसावन प्रगट भई तपपुंज सही ।

इति श्रुत्वा गिरं रामो मुनिश्रेष्ठस्य धीमतः ।
चकार वचनं तूर्णं तस्य कारुण्यसागरः ।। १०
श्रीराम-चरण-स्पर्शात् पुण्याच्छोक-विनाशकात् ।
शिलायाः प्रकटीभूता तपोमूर्तिस्तदा शुचिः ।। ११

देखत रघुनायक जन सुख दायक सनमुख होइ कर जोरि रही ॥

सुखागारं प्रभुं दृष्ट्वा संमुखं सा तपस्विनी ।
आनतास्या मुनेः पत्नी तस्थौ बद्धाञ्जलिस्तदा ॥ १२

अति प्रेम अधीरा पुलक सरीरा मुख नहिं आवइ बचन कही ।

अधीरा भक्ति-विवशा रोमाञ्चित-तनुस्तदा ।
नालं वक्तुं किमप्यासीद् अहल्या प्रभु-संमुखे ॥ १३

अतिसय बड़भागी चरनन्हि लागी जुगल नयन जलधार बही ॥

स्पर्श-धन्यापतत् सद्यः श्रीराम-पद-पद्मयोः ।
तत्पादावभिषिञ्चन्ती प्रहृष्टा नयनाम्बुभिः ॥ १४

धीरजु मन कीन्हा प्रभु कहुँ चीन्हा रघुपति कृपाँ भगति पाई ।
अति निर्मल बानीं अस्तुति ठानी ग्यानगम्य जय रघुराई ॥

आस्थाय कथमप्यन्ते धैर्यम् आत्मनि सा पुनः ।
श्रीराम-कृपया भक्त्या दधौ वाणीं सुनिर्मलाम् ॥ १५

मैं नारि अपावन प्रभु जग पावन रावन रिपु जन सुखदाई ।
राजीव बिलोचन भव भय मोचन पाहि पाहि सरनहिं आई ॥
मुनि श्राप जो दीन्हा अति भल कीन्हा परम अनुग्रह मैं माना ।
देखेउँ भरि लोचन हरि भवमोचन इहइ लाभ संकर जाना ॥
बिनती प्रभु मोरी मैं मति भोरी नाथ न मागउँ बर आना ।
पद कमल परागा रस अनुरागा मम मन मधुप करै पाना ॥
जेहिं पद सुरसरिता परम पुनीता प्रगट भई सिव सीस धरी ।
सोई पद पंकज जेहि पूजत अज मम सिर धरेउ कृपाल हरी ॥

जय जय जय जय रघु-कुल-नन्दन
सरसिज-लोचन भव-भय-मोचन ।
दानव-नाशन जन-सुख-साधन
त्रिभुवन-पावन दीन-दया-घन ॥ जय जय० १६
अभागिनीं माम् अनितर-शरणाम्
पातकिनीं माम् अनुचित-चरिताम् ।

कलङ्किनीं माम् अगतिक-ललनाम्
पाहि दयाघन तव पद-लीनाम् ॥ जय जय० १७
उपकृतमिव मे परम कठोरैर् —
मुनि-वदनोदित-शाप-वचोभिः ।
पावन-दर्शनमिह मम जातम्
तव भव-भञ्जन शिव-सुख-साधन ॥ जय जय० १८
प्रभु-पद-सरसिज-रेणु-मरन्दे
मानस-मधुपो भवतु रतो मे ।
प्रार्थयतीदम् मुग्धमतिर्मे
नाभिलषति वरमपरमियं रे ॥ जय जय० १९
सुरसरिदपि सा परमपवित्रा ।
रघुवर तव पद-सरसिज-जाता ।
चरण-सरोजं राम तवेदम्
हत-जीवितमिदमद्य पुनीते ॥ जय जय० २०
विलसति सततं शिवशिरसीदम्
पूजयतीदं विधिरपि नित्यम् ।
तदिदम् पुण्यं तव पद-युगलं
शिरसि ममेदं निहितम् प्रेम्णा ॥ जय जय० २१

एहि भाँति सिधारी गौतम नारी बार बार हरि चरन परी ।
जो अति मन भावा सो बरु पावा गै पतिलोक अनंद भरी ॥

स्तुत्वैवम् भगवन्तं सा प्रणिपत्य पुनः पुनः ।
प्राप्येप्सित-वरं नारी पति-लोकं गता मुदा ॥ २२

—अस प्रभु दीनबंधु हरि कारन रहित दयाल ।
तुलसिदास सठ तेहि भजु छाडि़ कपट जंजाल ॥

"दीनबन्धुर्दयासिन्धुः सोऽयं सेव्यः सदा प्रभुः ।
निर्व्यलीकं त्वया चित्त" तुलसी वदते सदा ॥ २३

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
अहल्योद्धरणं नाम पञ्चत्रिंशस्तरङ्गः ।

तरङ्गः ३९

चले राम लछिमन मुनि संगा । गए जहाँ जग पावनि गंगा ।।

गच्छन्तौ मिथिलाम् एवं श्रीरामलक्ष्मणावुभौ ।
संप्राप्तौ मुनिभिः सार्धं गङ्गां त्रैलोक्य-पावनीम् ।। १

गाधिसूनु सब कथा सुनाई । जेहि प्रकार सुरसरि महि आई ।।

अवातरद् यथा भूमिं यदा चैषा सुरापगा ।
तथा पुण्यां कथां सर्वां शृण्वन्तौ तौ मुनेर्मुखात् ।। २

तब प्रभु रिषिन्ह समेत नहाए बिबिध दान महिदेवन्हि पाए ।।

पुण्ये मन्दाकिनी-तोये स्नात्वा तौ मुनिभिः सह ।
दत्वा दानानि विप्रेभ्यः प्रीणयामासतुश्च तान् ।। ३

हरषि चले मुनि बृंद सहाया । बेगि बिदेह नगर निअराया ।।

प्रस्थितौ च ततो भूयः सहर्षं तौ सहर्षिभिः ।
मिथिला-नगरोपान्ते समायातौ च सत्वरम् ।। ४

पुर रम्यता राम जब देखी । हरषे अनुज समेत बिसेषी ।।

सोत्साहम् प्रविशन् रामः नगरीं सहलक्ष्मणः ।
दृष्ट्वा शोभां बभूवास्याः सविशेष-मुदान्वितः ।। ५

बापीं कूप सरित सर नाना । सलिल सुधासम मनि सोपाना ।।

सुधा-सलिल-संपूर्णान् मणि-सोपान-भूषितान् ।
वापी-कूप-तडागादीन् दृष्ट्वा रेमे रघूत्तमः ।। ६

गुंजत मंजु मत्त रस भृंगा । कूजत कल बहुबरन बिहंगा ।।

मधु-पान-मदोन्मत्तान् ददर्शालींश्च गुञ्जतः ।
कूजतश्च कलं रम्यम् बहु-वर्ण-विहंगमान् ।। ७

बरन बरन बिकसे बनजाता । त्रिबिध समीर सदा सुखदाता ।।

प्रफुल्लानि च पद्मानि नानावर्णानि सर्वतः ।
ववौ मन्दं सुख-स्पर्शो गन्धवाहोऽपि शीतलः ।। ८

—सुमन वाटिका बाग बन बिपुल बिहंग निवास ।
फूलत फलत सुपल्लवत सोहत पुर चहुँ पास ।।
बनइ न बरनत नगर निकाई । जहाँ जाइ मन तहँइँ लोभाई ।।

पुष्पिताः फलिताश्चैवं पल्लवैश्च सुशोभिताः ।
विपुलैश्च द्विजावासैः सदा कूजन-पूरिताः ।। ९

क्रीडारामाश्च सर्वत्र नाना-सुमन-वाटिकाः ।
नेत्रानन्दकरा यत्र तथैवासन् समन्ततः ।। १०

पतति स्म च यत्राक्षि तत्र चित्त-प्रलोभनम् ।
अपूर्वाम् मिथिला-शोभां कस्तां वर्णयितुं क्षमः ।। ११

चारु बजारु बिचित्र अँबारी । मनिमय बिधि जनु स्वकर सँवारी ।।

रमणीया विपण्यश्च नाना-रत्न-वितर्दयः ।
विधिना निर्मिता नूनं स्वकराभ्यां सकौशलम् ।। १२

धनिक बनिक बर धनद समाना । बैठे सकल बस्तु लै नाना ।।

धनदेन समा यत्र धनिकाश्च वणिक्-जनाः ।
प्रदर्शयन्तः सर्वत्र नाना-पण्यानि युक्तितः ।। १३

चौहट सुंदर गलीं सुहाई । संतत रहहिं सुगंध सिंचाई ।।

चतुष्पथानि रम्याणि वीथिकाः सुमनोहराः ।
सुगन्धित-जलैर्नित्यम् प्रसिक्ताः यत्र रेजिरे ।। १४

मंगलमय मंदिर सब केरें । चित्रित जनु रतिनाथ चितेरें ।।

भवनानि च भव्यानि सर्वेषाम् पुर-वासिनाम् ।
चित्रितानि सुरम्याणि कामेनेव सकौशलम् ।। १५

पुर नर नारि सुभग सुचि संता । धरम-सील ग्यानी गुनवंता ।।

सुभगाश्च सुशीलाश्च धर्म-ज्ञान-गुणान्विता ।
साधु-वृत्तास्तथा यत्र सकलाः पुरवासिनः ।। १६

अति अनूप जहँ जनक निवासू । बिथकहिं बिबुध बिलोकि बिलासू ।।

प्रासादोऽनुपमो यत्र जनकस्य महीपतेः ।
विलास-वैभवं यस्य विबुधानन्द-कारणम् ।। १७

होत चकित चित कोट बिलोकी । सकल भुवन सोभा जनु रोकी ।।

प्राचीरं परमोदारम् महदाश्चर्यकारणम् ।
भुवनत्रय-सौन्दर्यम् आवेष्टितुमिवोच्छ्रितम् ।। १८

–धवल धाम मनि पुरट पट सुघटित नाना भाँति ।
सिय निवास सुंदर सदन सोभा किमि कहि जाति ।।

गृहद्वारपटा यत्र सुवर्ण-मणि-भूषिताः ।
सीता-सदन-सौन्दर्यं को नु वर्णयितुं क्षमः ।। १९

सुभग द्वार सब कुलिस कपाटा । भूप भीर नट मागध भाटा ।।

हर्म्य-द्वार-कपाटानि यत्रापश्यत् रघूत्तमः ।
वज्राभेद्यानि सर्वाणि सुभगानि तथैव च ।। २०
जनाकीर्णं सदैवेदं हर्म्य-द्वारं सुशोभनम् ।
सामन्तैश्च तथा सूतैर्नट-मागध-बन्दिभिः ।। २१

बनी बिसाल बाजि गज साला । हय गय रथ संकुल सब काला ।

गजाश्वशाला यत्रासन् सुविशाला मनोरमाः ।
संकुलाः सततं चाश्वैर्वारणैः स्यन्दनैस्तथा ।। २२

सूर सचिव सेनप बहुतेरे । नृपगृह सरिस सदन सब केरे ।।

असंख्याताश्च यत्रासन् सेनान्यः सचिवास्तथा ।
महाशूराः सदा दक्षा नृपतेर्हितकारिणः ।। २३
भवनानि सुरम्याणि सर्वेषाम् अधिकारिणाम् ।
यत्रापश्यत् रघूद्वाहस्तुल्यानि नृपसद्मना ।। २४

पुर बाहेर सर सरित समीपा । उतरे जहँ तहँ बिपुल महीपा ।।

नद्याः कूले सरस्तीरे यत्र तत्र पुरान्तिके ।
निमन्त्रिता नृपाश्चोषुः बहवः पट-वेश्मसु ।। २५

देखि अनूप एक अँवराई । सब सुपास सब भाँति सुहाई ।।
कौसिक कहेउ मोर मनु माना । इहाँ रहिअ रघुबीर सुजाना ।।
भलेहिं नाथ कहि कृपानिकेता । उतरे तहँ मुनिबृंद समेता ।।

दृष्ट्वैकं सुघनच्छायं रमणीयं सुखप्रदम् ।
सहकार-वनं तत्र विश्वामित्रोऽवदत् प्रभुम् ।। २६

"भविष्यति हि वासोऽत्र रघुवीर सुखाय नः।"
श्रुत्वेदं प्रभुरप्यूचे तथेति करुणाघनः ॥ २७

बिस्वामित्र महामुनि आए। समाचार मिथिलापति पाए ॥

'विश्वामित्रः समायातो मिथिलायां महर्षिभिः।'
एवं श्रुतिपथं यातं वृत्तं तन्मिथिलापतेः ॥ २८

—संग सचिव सुचि भूरि भट भूसुर बर गुर ग्याति।
चले मिलन मुनिनायकहि मुदित राउ एहि भाँति ॥

सचिवैः शुचिभिः सार्धं भूसुरैः स्वजनैस्तथा।
भूरिवीरैश्च विक्रान्तैर्ययौ द्रष्टुम् मुनिं नृपः ॥ २९

कीन्ह प्रनामु चरन धरि माथा। दीन्हि असीस मुदित मुनिनाथा ॥

ननाम प्रथमं राजा मुनिराज-पदाम्बुजे।
मुदितो मुनिरप्यस्मै ददावाशिषमुत्तमाम् ॥ ३०

बिप्रबृंद सब सादर बंदे। जानि भाग्य बड़ राउ अनंदे ॥

विप्र-वृन्दं ततो राजा ववन्दे सादरम् मुदा।
मेने धन्यं तदात्मानं सर्वेषां शुभ-दर्शनात् ॥ ३१

कुसल प्रस्न कहि बारहिं बारा। बिस्वामित्र नृपहि बैठारा ॥

भूयो भूयस्तमपृच्छत्-कुशलम् मुनिसत्तमः।
समुपावेशयन् प्रेम्णा स्वात्मनः सन्निधौ नृपम् ॥ ३२

तेहि अवसर आए दोउ भाई। गए रहे देखन फुलवाई ॥

आसन्न-कुसुमोद्यानं गतौ द्रष्टुं कुतूहलात्।
तस्मिन्नेव क्षणे तत्र संप्राप्तौ रामलक्ष्मणौ ॥ ३३

स्याम गौर मृदु बयस किसोरा। लोचन सुखद बिस्व चित चोरा ॥

श्याम-गौरौ किशोरौ तौ भ्रातरौ राम-लक्ष्मणौ।
नेत्रानन्द-करौ दृष्टौ सर्वैश्चित्तापहारिणौ ॥ ३४

उठे सकल जब रघुपति आए। बिस्वामित्र निकट बैठाए ।।

उत्थिताः सादरं सर्वे समायाते रघूत्तमे ।
समुपावेशयत् पार्श्वे प्रेम्णा तं मुनिसत्तमः ।। ३५

भए सब सुखी देखि दोउ भ्राता। बारि बिलोचन पुलकित गाता ।।

दृष्ट्वा तौ भ्रातरौ सर्वे सुख-सौहार्द-पूरिताः ।
संजात-हर्ष-रोमाञ्चाः आनन्दाश्रु-विलोचनाः ।। ३६

मूरति मधुर मनोहर देखी। भयउ बिदेहु बिदेहु बिसेषी ।।

दृष्ट्वा राघव-मूर्ति तां मधुरां चित्त-हारिणीम् ।
विदेहोऽप्यभवद् रंजा विदेहः पुनरेव नु ।। ३७

—प्रेम मगन मनु जानि नृपु करि बिबेकु धरि धीर।

निमग्नमपि चात्मानम् अनुराग-सुधा-रसे ।
बलादिव बहिः कर्षन् धैर्यम् आस्थाय चात्मनि ।। ३८

बोलेउ मुनि पद नाइ सिरु गदगद गिरा गभीर।

प्रणम्य मुनिपादाब्जे सविवेकं सगद्गदम् ।
गभीरया गिरोवाच राजा तं मुनिसत्तमम् ।। ३९

कहहु नाथ सुंदर दोउ बालक। मुनिकुल तिलक कि नृपकुल पालक।

"नृपवंशावतंसौ वा मुनि-वंश-प्रदीपकौ ।
क्वावेतौ कथयर्षे मे बालकौ सुमनोहरौ ।। ४०

ब्रह्म जो निगम नेति कहि गावा। उभय बेष धरि की सोइ आवा ।।

यन्नेति गदिदं वेदैर्ब्रह्मैवेदम् मुनेऽथवा ।
कुमार-द्वय-रूपेण विलसत्यत्र मत्पुरः ।। ४१

सहज बिरागरूप मनु मोरा। थकित होत जिमि चंद चकोरा ।।
ताते प्रभु पूछउँ सतिभाऊ। कहहु नाथ जनि करहु दुराऊ ।।
इन्हहि बिलोकत अति अनुरागा। बरबस ब्रह्मसुखहि मन त्यागा ।।

पूर्णबिम्बम् पुरो दृष्ट्वा राकायां रजनीपतेः ।
मोदते मुह्यते यद्वच्चकोरस्य मुने मनः ।। ४२

अनासक्तमपीदम् मे प्रकृत्यैवात्र मानसम् ।
अनयोर्दर्शनात् मुग्धं तथैव सुकुमारयोः ।। ४३

ब्रह्मानन्दमपि त्यक्त्वा चित्तम् मे मुनिसत्तम ।
प्रेमातिशय-संसक्तं यदस्मिन् बाल-युग्मके ।। ४४

तदेतत् परिपृच्छामि त्वाम् अहं विमलात्मना ।
कावेतौ कथयर्षे मे निर्व्यलीकं दयार्णव ।।" ४५

कह मुनि बिहसि कहेहु नृप नीका । बचन तुम्हार न होइ अलीका ।।

श्रुत्वेदम् मुनिरप्यूचे विहस्यैवं नृपं वचः ।
"साधूक्तं, न हि ते वाक्यम् मिथ्या भवति भूपते ।। ४६

ये प्रिय सबहि जहाँ लगि प्रानी । मन मुसुकाहिं रामु सुनि बानी ।।

सर्वेषाम् प्राणिमात्राणाम् प्रियोऽयं हि सदा नृप ।"
इति श्रुत्वा मुनेर्वाक्यं सिष्मिये रघुनन्दनः ।। ४७

'रहस्यम् मा मुने तन्मे प्रकटीकुरु तत्पुरः ।'
संकेतमिवैवं तं कर्तुम् प्रच्छन्नमीश्वरः ।। ४८

रघुकुल मनि दसरथ के जाए । मम हित लागि नरेस पठाए ।।
–रामु लखनु दोउ बंधुवर रूप सील बल धाम ।
मख राखेउ सबु साखि जगु जिते असुर संग्राम ।।

मुनिरूचे पुनः सम्यग् रहस्यं गोपयन् नृपम् ।
"पुत्रः पङ्क्ति-रथस्यायं रघुवंश-शिरोमणिः ।। ४९

प्रेषितः सदयं राज्ञा काननम् मद्धितैषिणा ।
लक्ष्मणेन सह भ्रात्रा धर्मकार्य-चिकीर्षुणा ।। ५०

रूप-शीलादि-संपन्नौ बलिनौ रामलक्ष्मणौ ।
कुमारौ भ्रातरौ ह्येतौ मख-रक्षण-तत्परौ ।। ५१

जित्वासुरान् रणे वीरान् कृत्वा विक्रममद्भुतम् ।
उभाभ्यां रक्षितो यज्ञः समक्षं जगतो नृप ।।" ५२

मुनि तव चरन देखि कह राऊ । कहि न सकउँ निज पुन्य प्रभाऊ ।
सुंदर स्याम गौर दोउ भ्राता । आनँदहू के आनँद दाता ।।
इन्ह कै प्रीति परसपर पावनि । कहि न जाइ मन भाव सुहावनि ।
सुनहु नाथ कह मुदित बिदेहू । ब्रह्म जीव इव सहज सनेहू ।।

श्रुत्वेदम् मिथिलाधीशः प्रहृष्टो मुनिमब्रवीत् ।
"द्विगुणो मे मुने हर्षो नान्यो धन्योऽद्य मत्समः ।। ५३
पूर्व-पुण्य-प्रभावं मे न गीर्वक्तुम् अलम् मम ।
यत्ते पादाब्जयोर्जातम् पुण्यं दर्शनमद्य मे ।। ५४
अनयोरप्युभयोर्भ्रात्रोरद्य मे श्याम-गौरयोः ।
आनन्दानन्दनं चेदम् पूर्वपुण्येन दर्शनम् ।। ५५
परस्परानुरागोऽयं रमणीयोऽनयोर्मुने ।
सहजः सुभगो दिव्यः यथैव ब्रह्मजीवयोः ।।" ५६

पुनि पुनि प्रभुहि चितव नरनाहू । पुलक गात उर अधिक उछाहू ।।
पुनः पुनर्ददर्शासौ नरनाथो रघूत्तमम् ।
गात्रं रोमाञ्चितं सर्वम् मानसं पूरितं मुदा ।। ५७

मुनिहि प्रसंसि नाइ पद सीसू । चलेउ लवाइ नगर अवनीसू ।।
भूयः स्तुत्वा मुनिश्रेष्ठं नत्वा चास्य पदाम्बुजे ।
आनयामास तं राजा राजधानीं सहात्मना ।। ५८

सुंदर सदनु सुखद सब काला । तहाँ बासु लै दीन्ह भुआला ।।
सर्वर्तु-सुखदे चैवं सुंदरे सदने तथा ।
विप्रं सह कुमाराभ्यां वासयामास भूपतिः ।। ५९

करि पूजा सब बिधि सेवकाई । गयउ राउ गृह बिदा कराई ।।
पूजयामास तं भूपो विश्वामित्रम् मुनीश्वरम् ।
तोषयन् बहुसेवाभिर्जगाम नृपतिर्गृहम् ।। ६०

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
मिथिला-गमनं नाम षट्त्रिंशस्तरङ्गः ।

तरङ्गः ३७

–रिषय संग रघुबंस मनि करि भोजनु बिश्रामु ।
बैठे प्रभु भ्राता सहित दिवसु रहा भरि जामु ।।

भुक्त्वाथ मुनिभिः साधँ विश्रम्य च ततः सुखम् ।
संगतो लक्ष्मणेनासीद् अपराह्ले रघूत्तमः ।। १

लखन हृदयँ लालसा बिसेषी । जाइ जनकपुर आइअ देखी ।।
प्रभु भय बहुरि मुनिहि सकुचाहीं । प्रगट न कहहिं मनहिं मुसुकाहीं ।

समुत्सुकोऽपि सौमित्रिर्वीक्षितुम् मिथिलापुरम् ।
अनुक्त्वा प्रकटं किञ्चिदासीत् स्मेरमुखस्तदा ।। २

किं वक्ष्यत्यग्रजो रामः कथम् मन्येत वा मुनिः ।
इति भीतो न शक्तोऽसौ वक्तुं निजमनोरथम् ।। ३

राम अनुज मन की गति जानी । भगत बछलता हियँ हुलसानी ।।
परम बिनीत सकुचि मुसुकाई । बोले गुर अनुसासन पाई ।।
नाथ लखनु पुरु देखन चहहीं । प्रभु सकोच डर प्रगट न कहहीं ।।
जौं राउर आयसु मैं पावौं । नगर देखाइ तुरत लै आवौं ।।

ज्ञात्वा त्वस्य मनोभावं श्रीरामो भक्तवत्सलः ।
सप्रश्रयं ससंकोचम् मुनिमूचे स्मिताननः ।। ४

न वक्ति प्रकटं किञ्चित् भय-संकोच-पीडितः ।।
"सौमित्रिर्द्रष्टुकामोऽसौ नगरं मिथिलापतेः । ५

अनुज्ञातस्त्वया नाथ दर्शयित्वाऽनुजम् पुरम् ।
प्रत्यागच्छामि तेनाहं न चिरान्मुनिसत्तम ।।" ६

सुनि मुनीसु कह बचन सप्रीती । कस न राम तुम्ह राखहु नीती ।।
धरम सेतु पालक तुम्ह ताता । प्रेम बिबस सेवक सुखदाता ।।

सुविनीतमिति श्रुत्वा श्रीरामवचनं मुनिः ।
प्रसन्न-मनसा चैवम् प्रत्युवाच रघूत्तमम् ।। ७

"धर्मसेतुः स्वयं साक्षात् त्राता धाता त्वमत्र नः।
सुखदाता स्वदासानाम् भक्त-वत्सल पालक ।। ८
नीति-धर्म-निदेशानाम् उल्लङ्घनमतस्त्वयि।
दूरादपि कुतो राम शङ्कनीयं सतां पते ।। ९

–जाइ देखि आवहु नगरु सुख निधान दोउ भाइ।
करहु सुफल सब के नयन सुंदर बदन देखाइ ।।
गच्छ गच्छ सुखं राम सुखधाम सहानुजम्।
दर्शयित्वा मुखाम्भोजं कृतार्थान् कुरु नागरान् ।।" १०

मुनि पद कमल बंदि दोउ भ्राता। चले लोक लोचन सुख दाता।
प्रणम्य मुनिपादाब्जे भ्रातरौ राम-लक्ष्मणौ।
प्रस्थितौ नगरं द्रष्टुं लोक-लोचन-सौख्यदौ ।। ११

बालक वृंद देखि अति सोभा। लगे संग लोचन मनु लोभा ।।
रमणीयां वपुःशोभां दृष्ट्वापूर्वां तथानयोः।
बालानां समुदायाश्च लुब्धास्तावन्वयुर्मुदा ।। १२

पीत बसन परिकर कटि माथा। चारु चाप सर सोहत हाथा ।।
कटि-संबद्ध-तूणीरौ कुमारौ पीत-वाससौ।
शर-चाप-धरौ धीरौ प्रस्थितौ राम-लक्ष्मणौ ।। १३

तन अनुहरत सुचंदन खोरी। स्यामल गौर मनोहर जोरी ।।
तनु-वर्ण-समानेन चन्दनेन विभूषितौ।
श्यामगौरौ विरेजाते भ्रातरौ राम-लक्ष्मणौ ।। १४

केहरि कंधर बाहु बिसाला। उर अति रुचिर नागमनि माला।
सुभग सोन सरसीरुह लोचन। बदन मयंक तापत्रय मोचन ।।
कानन्हि कनक फूल छबि देहीं। चितवत चितहि चोरि तनु लेहीं।
चितवनि चारु भृकुटि बर बाँकी। तिलक रेख सोभा जनु चाँकी ।।
महाबाहू महोरस्कौ भ्रातरौ हरिकंधरौ।
मुक्ताहारधरौ धीरौ रक्तोत्पलविलोचनौ ।। १५

किञ्चिद्-वक्र-भ्रुवौ चोभौ सुचारु-मधुरेक्षणौ ।
कोसलाधिपतेः पुत्रौ सुवर्ण-श्रुति-भूषणौ ॥ १६

ताप-त्रय-हरौ वीरौ चारु-चन्द्राननावुभौ ।
सौन्दर्य-मुद्रयेवोभौ तिलकेन विभूषितौ ॥ १७

जन-मानस-हर्तारौ लोचनानन्द-दायिनौ ।
प्रस्थितौ नगरं द्रष्टुं भ्रातरौ राम-लक्ष्मणौ ॥ १८

रुचिर चौतनीं सुभग सिर मेचक कुंचित केस ।
नख सिख सुंदर बंधु दोउ सोभा सकल सुदेस ॥

चतुरस्त्र-शिरोवस्त्रौ कृष्ण-कुञ्चित-कुन्तलौ ।
आ-शिखा-नख-पर्यन्तं सुलक्षण-वपुःश्रियौ ॥ १९

देखन नगरु भूपसुत आए । समाचार पुरबासिन्ह पाए ॥

'आगतौ सुकुमारौ द्वौ द्रष्टुकामौ पुरश्रियम् ।'
इत्याकर्ण्य समाचारं सोत्सुकाः पुरवासिनः ॥ २०

धाए धाम काम सब त्यागी । मनहुँ रंक निधि लूटन लागी ॥

त्यक्त-नित्य-क्रमाः सर्वे द्रष्टुकामा नृपात्मजौ ।
रङ्का इव धनागारमपहर्तुम् प्रदुद्रुवुः ॥ २१

निरखि सहज सुंदर दोउ भाई । होहिं सुखी लोचन फल पाई ॥

दृष्ट्वाऽकृत्रिम-सौन्दर्यं तयोर्भ्रात्रोस्तथाद्भुतम् ।
प्राप्त-नेत्र-फलान् सर्वे स्वात्मानम् मेनिरे जनाः ॥ २२

जुबतीं भवन झरोखन्हि लागीं । निरखहिं राम रूप अनुरागीं ॥

वेश्म-वातायनेभ्यश्च युवत्योऽपि समुत्सुकाः ।
श्रीराम-रमणीयाभां सानुरागं व्यलोकयन् ॥ २३

कहहिं परसपर बचन सप्रीती । सखि इन्ह कोटि काम छबि जीती ।
सुर नर असुर नाग मुनि माहीं । सोभा असि कहुँ सुनिअति नाहीं ॥

बिष्नु चारि भुज बिधि मुख चारी । बिकट बेष मुख पंच पुरारी।
अपर देउ अस कोउ न आही । यह छबि सखि पटतरिअ जाही ।।

"जित-शत-मन्मथ-रूपः श्रीरामो लोचनाभिरामोऽयम् ।
न श्रुतपूर्वं रूपं सुर-नर-मुनि-नाग-दानवेष्वेवम् ।। २४

ब्रह्मा-चतुर्मुखत्वात् चतुर्भुजत्वात् हरिः सुर-श्रेष्ठः ।
शंभुः पञ्चमुखत्वाद् विरूप-वेषस्तथोपमा-बाह्यः ।। २५

श्रीहरि-विधि-हर-वर्जं सुरेषु कोऽन्योऽस्ति रूप-संपन्नः ।
उपमा कुतस्त्रिलोके सुमधुर-रमणीय-रामरूपस्य ।। २६

–बय किसोर सुषमा सदन स्याम गौर सुख धाम ।
अंग अंग पर वारिअहिं कोटि कोटि सत काम ।।

सुकुमारौ सुख-कन्दौ श्यामल-गौरौ वपुःश्रिया युक्तौ ।
शत-शत-मन्मथ-रूप-प्रत्यादेशौ सहोदरावेतौ ।। २७

कहहु सखी अस को तनुधारी । जो न मोह यह रूप निहारी ।।

वद सखि वीक्ष्य कुमारौ को न विमुह्येत् धरातले मनुजः ।"
एवं मिथिलानगरे परस्परं प्रेमतोऽवदन् नार्यः ।। २८

कोउ सप्रेम बोली मृदु बानी । जो मैं सुना सो सुनहु सयानी ।।

अपरा सुमधुर-वचना प्रत्यूचे प्रेमतः सखीं भूयः ।
"शृणु सखि कथये तुभ्यं श्रुतं मया यत् कुमारयोर्वृत्तम् ।। २९

ए दोऊ दसरथ के ढोटा । बाल मरालन्हि के कल जोटा ।।
मुनि कौसिक मख के रखवारे । जिन्ह रन अजिर निसाचर मारे ।।

दशरथ-पुत्रौ चैतौ राजमरालाविवात्र राजेते ।
विश्वामित्र-मुनीश्वर-मख-रक्षण-रणजितासुरौ शूरौ ।। ३०

स्याम गात कल कंज बिलोचन । जो मारीच सुभुज मदु मोचन ।।
श्यामल-वर्णः सोऽयं सुन्दर-सरसिज-विलोचनः शूरः ।
जन-सुख-सिन्धुः सोऽयं सुबाहु-मारीच-शौर्य-गर्व-हरः ।। ३१

कौसल्या सुत सो सुख खानी । नामु रामु धनु सायक पानी ।।

कौसल्यासुखधाम श्रीरामः सुप्रतीष्टनामायम् ।
जन-मानस-सुख-कन्दः शर-कार्मुक-मण्डितः स रघुनाथः ।। ३२

गौर किसोर बेषु बर काछें । कर सर चाप राम के पाछें ।।

अपरः सखि सुकुमारः सुगौर-वर्णः शरासनेषु-धरः ।
सुन्दर-वेषः सोऽयं रामपदे दोऽनुवर्तते धीरः ।। ३३

लछिमनु नामु राम लघु भ्राता । सुनु सखि तासु सुमित्रा माता ।।

लक्ष्मणनामा सोऽयं पुत्रः शुभ-लक्षणः सुमित्रायाः ।
दशरथ-नयनानन्दः श्रीरामस्यानुजः किशोरोऽयम् ।। ३४

–बिप्रकाजु करि बंधु दोउ मग मुनिबधू उधारि ।
आए देखन चापमख सुनि हरषीं सब नारि ।।

संपादित-मुनिकार्यौ संजीवित-गौतमर्षि-भार्यौ तौ ।
आयातौ नगरेऽस्मिन् शिव-कार्मुक-मख-विलोकयितुकामौ ।।" ३५

देखि राम छबि कोउ एक कहई । जोगु जानकिहि यह बरु अहई ।।
जौं सखि इन्हहि देख नरनाहू । पन परिहरि हठि करइ बिबाहू ।।

श्रुत्वा वृत्तं रम्यं कुमारयोः स्त्री-जनः स सुप्रीतः ।
ऊचे कापि च वचनं रघुपति-रूपं निरीक्ष्य पुनरेवम् ।। ३६

"श्रीरामं सखि मन्ये सीतायै समुचितं वरं नूनम् ।
पश्यति यदि नृपतिस्तं सोऽपि च मन्येत तं स्वकन्यार्हम् ।। ३७

रहयित्वापि च राजा कन्या-परिणय-पणं सुदुःसाध्यम् ।
यच्छति दुहितरमस्मै रघुकुल-वीराय नात्र संदेहः ।।" ३८

कोउ कह ए भूपति पहिचाने । मुनि समेत सादर सनमाने ।।

ऊचे तदुपरि काचित् "दृष्टो राज्ञा कुमारवीरोऽयम् ।
प्रेम्णा वीक्षितरूपः समादृतः सह मुनीश्वरेणायम् ।। ३९

सखि परंतु पनु राउ न तजई । बिधि बस हठि अबिबेकहि भजई ।।

न तु सखि चलितो राजा परिणय-पण-निश्चयात् किलोदन्तः ।
अविवेकः स हि राज्ञः प्रतिपादयते विधेर्बलं नूनम् ।।" ४०

कोउ कह जौं भल अहइ बिधाता । सब कहँ सुनिअ उचित फलदाता ।।

अपरा तदुपरि चोचे "महामनाः श्रूयते विधाताऽसौ ।
सदयो जनहितकर्ता कुरुते भद्रं सदा स सर्वेषाम् ।। ४१

तौ जानकिहि मिलिहि बरु एहू । नाहिन आलि इहाँ संदेहू ।।

सत्यनुकूले दैवे प्राप्स्यति नृप-नन्दिनी वरं रामम् ।
न हि सखि कार्या शङ्का सफला नो भवति कामना नूनम् ।। ४२

जौं बिधि बस अस बनै सँजोगू । तौ कृतकृत्य होइ सब लोगू ।।

संयोगो यदि भावी समान-गुण-रूप-शीलयोरेवम् ।
हृष्यति वसुधा-लोकस्तुष्यति चैवं दिवौकसां वासः ।। ४३

सखि हमरें आरति अति तातें । कबहुँक ए आवहिं एहि नातें ।।

भूत्वा जामातासौ विदेह-नृपतेः कदा नु रघुनाथः ।
आयास्यति पुनरेवं मिथिलामिति मे समुत्सुकं चेतः ।। ४४

–नाहिं त हम कहुँ सुनहु सखि इन्ह कर दरसनु दूरि ।
यह संघटु तब होइ जब पुन्य पुराकृत भूरि ।।

नो चेत् रघुकुल-नन्दन-दर्शनमपि नः सुदुर्लभं नूनम् ।
संभाव्यः सखि योगो बलवद्यदि नः पुराकृतं पुण्यम् ।।" ४५

बोली अपर कहेहु सखि नीका । एहिं बिआह अति हित सबही का ।।

ऊचे काचिच्चान्या "साधूक्तं सखि ममापि मतिरेषा ।
सीताराम-विवाहः सर्वेषां भूतये न संदेहः ।।" ४६

कोउ कह संकर चाप कठोरा । ए स्यामल मृदुगात किसोरा ।।

पुनरप्यन्या काचित् पुरनारी तामुवाच साशङ्कम् ।
"क्वोग्रं शिव-कोदण्डं क्व च सखि सुकुमार-राजपुत्रोऽयम् ।। ४७
उन्नमनं शिव-धनुषो परिणय-पण-पूरणं ततश्चायम् ।
श्यामल-कोमल-गात्रः कोसल-पति-नन्दनः कथं कुर्यात् ।। ४८

सबु असमंजस अहइ सयानी । यह सुनि अपर कहइ मृदु बानी ।।

मनसेप्सितमपि चेदं विचिन्त्य सर्वं न भाति संभाव्यम्"
इत्याकर्ण्य वचस्तामुवाच काचित् पुनश्च सौम्य-गिरा ।। ४९

सखि इन्ह कहँ कोउ कोउ अस कहहीं । बड़ प्रभाउ देखत लघु अहहीं ॥

'तनु-मूर्तिर्बहु-कीर्तिः सोऽयं दिव्य-प्रभाव-संपन्नः ।'
दशरथ-नन्दन-विषये कथयन्त्येवं जनाः सुविश्रब्धम् ॥ ५०

परसि जासु पद पंकज धूरी । तरी अहल्या कृत अघ भूरी ॥
सो कि रहिहि बिनु सिवधनु तोरें । यह प्रतीति परिहरिअ न भोरें ॥

यत्पद-पद्म-पराग-स्पर्शोऽहल्यासुघोर-पाप-हरः ।
शिव-कोदण्ड-विभञ्जनमपि नहि तस्मिन् कदापि दुःसाध्यम् ॥ ५१

जेहिं बिरंचि रचि सीय सँवारी । तेहिं स्यामल वरु रचेउ बिचारी ॥

विनिर्मिता येनैषा सकौशलं चारु-दर्शना सीता ।
विधिना तेनैवैषः श्यामल-वर्णो विनिर्मितो भर्ता ॥" ५२

तासु वचन सुनि सब हरषानीं । ऐसेइ होउ कहहिं मृदु बानीं ॥

प्रमुदित-चित्ताः सर्वाः श्रुत्वेदं शोभनं वचस्तस्याः ।
"एवम्, भवति न शङ्के"त्येवं मृदु-मञ्जुलं तदोचुस्ताः ॥ ५३

–हियँ हरषहिं बरषहिं सुमन सुमुखि सुलोचनि बृंद ।
जाहिं जहाँ जहँ बंधु दोउ तहँ तहँ परमानंद ॥

शशि-वदनाः पुर-नार्यः सुलोचनाः संघशः सुसंहृष्टाः ।
सुमनोवृष्टिभिरेनौ ववर्षुरानन्द-वर्षिणौ सर्वाः ॥ ५४

पुर पूरब दिसि गे दोउ भाई । जहँ धनुमख हित भूमि बनाई ॥

गतौ पूर्वदिशं पश्चात् भ्रातरौ रामलक्ष्मणौ ।
धनुर्यज्ञोत्सवं यत्र कर्तुमैच्छत् विदेहराट् ॥ ५५

अति बिस्तार चारु गच ढारी । बिमल बेदिका रुचिर सँवारी ॥

कल्पिता यत्र विस्तीर्णा समरेखा मख-स्थली ।
व्यराजतोच्छ्रिता यस्यां मङ्गला यज्ञ-वेदिका ॥ ५६

चहुँ दिसि कंचन मंच बिसाला । रचे जहाँ बैठेहिं महिपाला ॥

'बहवः सुविशालाश्च रत्न-काञ्चन-मञ्चकाः ।
नृपतीनां कृते यत्र कल्पिताश्च समन्ततः ॥ ५७

तेहि पाछें समीप चहुँ पासा । अपर मंच मंडली बिलासा ॥
कछुक ऊँचि सब भाँति सुहाई । बैठहिं नगर लोग जहँ जाई ॥

सन्निधौ पृष्ठतस्तेषां स्थापिता मण्डले पुनः ।
नागराणां कृते रम्या मञ्चकाः किञ्चिदुच्छ्रिताः ॥ ५८

तिन्ह के निकट बिसाल सुहाए । धवल धाम बहु बरन बनाए ॥

धामानि धवलान्यत्र तत्समीपे बहूनि च ।
नाना-वर्ण-सुरम्याणि विशालानि च सर्वतः ॥ ५९

जहँ बैठें देखहिं सब नारी । जथाजोगु निज कुल अनुहारी ॥

"उपविश्य यथास्थानं नार्यो येषु कुलोचितम् ।
शक्ष्यन्ति च विनायासं द्रष्टुं यज्ञ-महोत्सवम् ॥" ६०

पुर बालक कहि कहि मृदु बचना । सादर प्रभुहि देखावहिं रचना ॥

सुमञ्जु-वचनैश्चैवं सर्वे ते पुर-बालकाः ।
सादरं दर्शयामासुः श्रीरामं तां मख-स्थलीम् ॥ ६१

–सब सिसु एहि मिस प्रेमबस परसि मनोहर गात ।
तन पुलकहिं अति हरषु हियँ देखि देखि दोउ भ्रात ॥

येन केन मिषेणैते संस्पृश्य सुमनोहरम् ।
राम-गात्रं सुख-स्पर्शं हर्ष-रोमाञ्च-मण्डिताः ॥ ६२

सिसु सब राम प्रेमबस जाने । प्रीति समेत निकेत बखाने ॥

रामोऽप्यत्यादरेणैव यज्ञ-भूमिं ददर्श ताम् ।
जानन्नगर-बालानां प्रेमभावं सुनिर्भरम् ॥ ६३

निज निज रुचि सब लेहिं बोलाई । सहित सनेह जाहिं दोउ भाई ॥

न्यमन्त्रयन् यथाकामं बालकाः भ्रातरौ गृहम् ।
भ्रातरावपि सस्नेहं प्रीणयामासतुश्च तान् ॥ ६४

राम देखावहिं अनुजहि रचना । कहि मृदु मधुर मनोहर बचना ॥
लव निमेष महुँ भुवन निकाया । रचइ जासु अनुसासन माया ॥

यदाज्ञया महामाया कोटि-ब्रह्माण्ड-गोलकान् ।
क्षणात् सृजति सैवासौ श्रीरामः परमेश्वरः ॥ ६५

दर्शयामास सौमित्रिं यज्ञ-भूमिं सकौतुकम् ।
वचनैर्मृदु-गम्भीरैः स्तुत्वा निर्माण-कौशलम् ।। ६६

भगति हेतु सोइ दीनदयाला । चितवत चकित धनुष मखसाला ।।
कौतुक देखि चले गुरु पाहीं । जानि बिलंबु त्रास मन माहीं ।।

आश्चर्यवत् स्वयं चासौ श्रीरामो भक्त-वत्सलः ।
यज्ञ-शालां दयाशीलो ददर्श सकुतूहलम् ।। ६७
दृष्ट्वा तत्कौतुकं सर्वं प्रतस्थे सानुजं प्रभुः ।
व्यतीतं समयं मत्वा सभयं गुरु-सन्निधौ ।। ६८

जासु त्रास डर कहुँ डर होई । भजन प्रभाउ देखावत सोई ।।

भयस्यापि भयं यस्मात् सैवैषः परमेश्वरः ।
विश्वामित्र-मुनेर्भीतः महिमा भजनस्य सः ।। ६९

कहि बातें मृदु मधुर सुहाईं । किए बिदा बालक बरिआईं ।।

वचोभिः स्निग्ध-मधुरैरामन्त्र्य पुर-बालकान् ।
प्रत्यायातौ मुनि-श्रेष्ठं सभयं भ्रातरौ ततः ।। ७०

–सभय सप्रेम बिनीत अति सकुच सहित दोउ भाइ ।
गुर पद पंकज नाइ सिर बैठे आयसु पाइ ।।

प्रणम्य गुरु-पादाब्जे लब्ध्वाज्ञां सादरं नतौ ।
उपविष्टौ ससंकोचं सभयं भ्रातरौ ततः ।। ७१

निसि प्रबेस मुनि आयसु दीन्हा । सबहीं संध्याबंदनु कीन्हा ।।

गुर्वाज्ञया ततश्चोभौ भ्रातरौ रजनीमुखे ।
चक्रतुर्धर्म-निष्ठौ तौ सन्ध्या-वन्दनमप्युभौ ।। ७२

कहत कथा इतिहास पुरानी । रुचिर रजनि जुग जाम सिरानी ।।

इतिहास-कथा नाना पुराणाख्यानकानि च ।
शृण्वन्तः कथयन्तश्च निन्युर्याम-द्वयं निशः ।। ७३

मुनिबर सयन कीन्हि तब जाई । लगे चरन चापन दोउ भाई ।।

तल्पारूढस्य विप्रस्य विश्वामित्र-मुनेस्ततः ।
पीडयन्तौ तदा पादावास्तां श्रीरामलक्ष्मणौ ।। ७४

जिन्ह के चरन सरोरुह लागी । करत बिबिध जप जोग बिरागी ।।

यत्-पदाब्ज-सुख-स्पर्शे यत्-पदाब्ज-सुदर्शने ।
जप-योग-रता नित्यं वीत-रागाश्च योगिनः ।। ७५

तेइ दोउ बंधु प्रेम जनु जीते । गुर पद कमल पलोटत प्रीते ।।

तौ चात्र रामसौमित्री भक्तिभाववशाविव ।
पीडयन्तौ तथा चास्तां गुरु-पादाम्बुज-द्वयम् ।। ७६

बार बार मुनि अग्या दीन्ही । रघुबर जाइ सयन तब कीन्ही ।।

पुनः पुनर्यदा चैतावादिष्टौ गुरुणा ततः ।
अनिच्छन्तावुभौ चान्ते जग्मतुः स्वपितुं तदा ।। ७७

चापत चरन लखनु उर लाएँ । सभय सप्रेम परम सचु पाएँ ।।

निधाय हृदये भक्त्या लक्ष्मणः सुखितस्तदा ।
सादरं पीडयन्नासीद् रामपादाम्बुजन्मनी ।। ७८

पुनि पुनि प्रभु कह सोवहु ताता । पौढ़े धरि उर पद जलजाता ।।

स्वपिहीति च रामेण भूयो भूयः प्रचोदितः ।
तत्पदे हृदये धृत्वा सुष्वापान्ते च लक्ष्मणः ।। ७९

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
मिथिलादर्शनं नाम सप्तत्रिंशस्तरङ्गः ।

तरङ्गः ३८

–उठे लखनु निसि बिगत सुनि अरुनसिखा धुनि कान ।
गुर तें पहिलेहिं जगतपति जागे रामु सुजान ॥

कुक्कुटस्य रवं श्रुत्वा प्रातः सौमित्रिरुत्थितः ।
प्राबुध्यत गुरोः पूर्वं श्रीरामोऽपि जगत्पतिः ॥ १

सकल सौच करि जाइ नहाए । नित्य निबाहि मुनिहि सिर नाए ।

भ्रातरौ तौ शुचिर्भूतौ स्नातौ निर्मलवाससौ ।
कृतसन्ध्यादिकौ चैवं गुरोः पादौ प्रणेमतुः ॥ २

समय जानि गुर आयसु पाई । लेन प्रसून चले दोउ भाई ॥

पूजायाः समयं ज्ञात्वा गृहीत्वा गुरु-संमतिम् ।
अवचेतुं प्रसूनानि प्रतस्थे बन्धु-युग्मकम् ॥ ३

भूप बागु बर देखेउ जाई । जहँ बसंत रितु रही लोभाई ॥
लागे बिटप मनोहर नाना । बरन बरन बर बेलि बिताना ॥

ददृशाते ततश्चोभौ सविशेष-मनोहरम् ।
पुष्पोद्यानं विदेहस्य मिथिलायामनुत्तमम् ॥ ४

नाना-वर्ण-लता-कुञ्जान् विटपान् सुमनोहरान् ।
चकार वसतिं दृष्ट्वा वसन्तो यत्र मोहितः ॥ ५

नव पल्लव फल सुमन सुहाए । निज संपति सुर रूख लजाए ॥

नव-पल्लव-पुष्प-श्रीफल-सम्पद्भिरात्मनः ।
जहसुः कल्पवृक्षं च तरवो यत्र सुन्दराः ॥ ६

चातक कोकिल कीर चकोरा । कूजत बिहग नटत कल मोरा ॥

चातकाः कोकिलाः कीराश्चकोराश्च तथेतरे ।
गायन्ति स्म कलं यत्र नृत्यन्ति स्म च बर्हिणः ॥ ७

मध्य बाग सरु सोह सुहावा । मनि सोपान बिचित्र बनावा ।।
बिमल सलिलु सरसिज बहुरंगा । जलखग कूजत गुंजत भृंगा ।

मणि-सोपान-संपन्नं प्रफुल्ल-शबलाम्बुजम् ।
शुचि-वारि सरो यस्य मध्यदेशे व्यराजत ।। ८
कूजन्ति स्म कलं यत्र नित्यं वारि-विहंगमाः ।
गुञ्जन्ति स्म च पद्मेषु प्रफुल्लेषु तथालयः ।। ९

—बागु तड़ागु बिलोकि प्रभु हरषे बंधु समेत ।
परम रम्य आरामु यहु जो रामहि सुख देत ।।

दृष्ट्वोद्यानं तडागं च प्रहृष्टौ राम-लक्ष्मणौ ।
यद्वीक्ष्य सुखितो रामो रम्यं तत्परमार्थतः ।। १०

चहुँ दिसि चितइ पूँछि मालीगन । लगे लेन दल फूल मुदित मन ।।

वीक्ष्य सर्वतो रामलक्ष्मणौ मालाकारैः प्रत्युद्यातौ ।
मुदा प्रविष्टो पुष्पोद्यानं समारभेतां पुष्पसंचयम् ।। ११

तेहि अवसर सीता तहँ आई । गिरिजा पूजन जननि पठाई ।।
संग सखीं सब सुभग सयानीं । गावहिं गीत मनोहर बानीं ।।

जननी-वचनाज्जनक-नन्दिनी गिरिजा-पूजन-कुसुम-कामिनी ।
गायन्ती सहचरी-संगता पुष्पोद्यानं तदा प्रविष्टा ।। १२

सर समीप गिरिजा गृह सोहा । बरनि न जाइ देखि मनु मोहा ।।
मज्जनु करि सर सखिन्ह समेता । गई मुदित मन गौरि निकेता ।।

तडाग-तोये स्नाता पूता सखी-समेतं बाला सीता ।
सरःसमीपं सुचारु-रम्यं गिरिजादेव्या गता मन्दिरम् ।। १३

पूजा कीन्हि अधिक अनुरागा । निज अनुरूप सुभग बरु मागा ।।

भक्ति-भाव-कृत-गिरिजा-पूजा व्याहृत-समुचित-वर-प्रार्थना ।
मुदित-मानसा विदेह-कन्या गर्भागाराद् बहिरायाता ।। १४

एक सखी सिय संगु बिहाई । गई रही देखन फुलवाई ।।
तेहिं दोउ बंधु बिलोके जाई । प्रेम बिबस सीता पहिं आई ।।

तावत् काचित् सखी सुवदना परिभ्रमन्ती विहाय सीताम् ।
राम-लक्ष्मणौ विलोकयित्वा प्रत्यायाता प्रेम-विह्वला ।। १५

–तासु दसा देखी सखिन्ह पुलक गात जलु नैन ।
कहु कारनु निज हरष कर पूछहिं सब मृदु बैन ॥

सास्र-लोचना पुलकित-गात्रा तदा सखीभिर्विलोकिता सा ।
सर्वाभिः सुमनोहरवाचा हर्ष-कारणं बहुशः पृष्टा ॥ १६

देखन बागु कुअँर दुइ आए । बय किसोर सब भाँति सुहाए ॥
स्याम गौर किमि कहौं बखानी । गिरा अनयन नयन बिनु बानी ॥

"सकल-सुलक्षण-सुन्दर-गात्रौ श्यामल-गौरौ राजकुमारौ ।
उपवन-शोभा-वीक्षितुकामौ पुष्पोद्याने मया वीक्षितौ ॥ १७

मुग्धं मधुरं किशोर-रूपं शब्दैः सार्थं वर्णयितुं तत् ।
कुतो लोचने शब्दानां मे वाणी वा नेत्रयोः कुतो मे ॥" १८

सुनि हरषीं सब सखीं सयानी । सिय हियँ अति उतकंठा जानी ॥

श्रुत्वा वृत्तं चित्तरञ्जकं दृष्ट्वा सीतामनः सस्पृहम् ।
मुदित-मानसाः सख्यः सर्वाः राजकुमार-कथासु निमग्नाः ॥ १९

एक कहइ नृपसुत तेइ आली । सुने जे मुनि सँग आए काली ॥

ऊचे काचित्, "श्रुतं मयेदं राजपुत्रयोर्नगरागमनम् ।
विश्वामित्रसमेतं चैतौ ह्यः किल मिथिलानगरं प्राप्तौ ॥ २०

जिन्ह निज रूप मोहनी डारी । कीन्हे स्वबस नगर नर नारी ॥
बरनत छबि जहँ तहँ सब लोगू । अवसि देखिअहिं देखन जोगू ॥
तासु वचन अति सियहि सोहाने । दरस लागि लोचन अकुलाने ॥

रूपसम्पदा ययोर्विमुग्धाः सकला मिथिलायां नरनार्यः ।
सुमधुररूपं ययोरपूर्वं मुदा श्लाघते निखिला मिथिला ॥ २१

वयमपि गत्वा पश्यामस्तौ दर्शन-योग्यौ राजकुमारौ ।"
श्रुत्वा वचनं प्रीता सीता कुमार-दर्शन-लोलुप-चित्ता ॥ २२

चली अग्र करि प्रिय सखि सोई । प्रीति पुरातन लखइ न कोई ॥

तामेवैनां सखीं वल्लभां पुरोगामिनीं कृत्वा सीता ।
राजकुमारौ द्रष्टुं हृष्टा ततः प्रतस्थे विधिमादिष्टा । २३

सुमिरि सीय नारद बचन उपजी प्रीति पुनीत ।
चकित बिलोकति सकल दिसि जनु सिसु मृगी सभीत ।।

चिरस्थायिनीं प्रीतिं नूनं प्रभवति कः खलु मनुजो रोद्धुम् ।
त्रिकालदर्शी तथा सुरर्षिर्यदादिशत् तत् कथं नु मिथ्या ।। २४
भावि-भर्तृगत-नारद-वचनं जनक-दुहित्रा तदा संस्मृतम् ।
अविदित-राजकुमारे चित्तं सहज-सुमङ्गल-भाव-निबद्धम् ।। २५
चकित-चकितमिव सुभग-वीक्षितं हरिण-शिशोरिव सभयं गमनम् ।
मुग्धं ललितं प्रणय-विलसितं चारु-मनोहरमतीव दृश्यम् ।। २६

कंकन किंकनि नूपुर धुनि सुनि । कहत लखन सन रामु हृदयँ गुनि ।।
मानहुँ मदन दुंदुभी दीन्ही । मनसा बिस्व बिजय कहँ कीन्ही ।।

किङ्किणिका-कृत-मधुरं क्वणितं मणि-कङ्कण-कृत-सुभगं रणितम् ।
मञ्जीराणां मधुर-शिञ्जितं सकलं रघुवर-कर्णं यातम् ।। २७
अनुजं चैवं रघुपतिरूपे ‘ सुभग-कल-रवं शृणु सौमित्रे ।
विश्व-विजय-कृत-निश्चय-कामः कुरुते नूनं दुन्दुभि-नादम् ।। ” २८

अस कहि फिरि चितए तेहि ओरा । सिय मुख ससि भए नयन चकोरा ।।

उक्त्वावरजं रघुपतिरेवं ददर्श यावद्-वलित-कन्धरम् ।
तावत् सीता-वदन-सुधांशौ संसक्तौ तन्नयन-चकोरौ ।। २९

भए बिलोचन चारु अचंचल । मनहुँ सकुचि तिमि तजे दिगंचल ।।

रघुवर-चारु-विलोचन-युग्मं सीता-वदने वीक्ष्य निश्चलम् ।
संकोचेनोज्झितमिव तूर्णं निमिना नयनच्छद-निज-निलयम् ।। ३०

देखि सीय सोभा सुखु पावा । हृदयँ सराहत बचनु न आवा ।।

जनक-सुता-मुख-सुमधुर-शोभां दृष्ट्वा मुदितः सुखितो रामः ।
हृष्टं यद्यपि हृदयं प्रेम्णा नालं किञ्चिद् गदितुं वाचा ।। ३१

जनु बिरंचि सब निज निपुनाई । बिरचि बिस्व कहँ प्रगटि देखाई ।।
सुंदरता कहुँ सुंदर करई । छबिगृहँ दीपसिखा जनु बरई ।।
सब उपमा कबि रहे जुठारी । केहिं पटतरौं बिदेहकुमारी ।।

‘सृजन-कौशलं विधिना नूनं प्रकटितमद्भुत-रूपे निखिलम् ।
यच्छति नूनं रमणीयत्वं रम्यत्वाय तदनुपम-रूपम् ।। ३२

प्रज्वलित-लावण्य-निकेता दीपशिखा ननु सीता-शोभा ।
पूर्वोच्छिष्टोपमान द्रव्यैः कविभिः कथमुपमिमेऽहमेनाम् ॥' ३३

–सिय सोभा हियँ बरनि प्रभु आपनि दसा बिचारि ।
बोले सुचि मन अनुज सन बचन समय अनुहारि ॥

बहुविधमेवं हृदये स्तुत्वा सीतारूपं रघु-कुल-नाथः ।
शुचि-हृदयः समयोचितमेवं सौमित्रिं प्रियमूचे वाक्यम् ॥ ३४

तात जनकतनया यह सोई । धनुषजग्य जेहि कारन होई ॥
''सेयं लक्ष्मण नृपतेः प्रियदुहिता यत्कृते समारब्धः ।
संप्रति जनकपुरेऽस्मिन् परिणय-पण-कार्मुकाध्वरः पित्रा ॥ ३५

पूजन गौरि सखीं लै आई । करत प्रकासु फिरइ फुलवाई ॥
विहरन्ती सानन्दं प्रकाशयन्तीव सर्व-पुष्प-वनम् ।
आयाता कुसुमेभ्यो गिरिजा-पूजार्थिनी सखी-सार्धम् ॥ ३६

जासु बिलो अलौकिक सोभा । सहज पुनीत मोर मनु छोभा ॥
शान्तमिदं मे चित्तं प्रकृति-पवित्रं तथैव सौमित्रे ।
प्रक्षुब्धं कथमस्या वपुःश्रियो दर्शनेन न हि जाने ॥ ३७

सो सबु कारन जान बिधाता । फरकहिं सुभद अंग सुनु भ्राता ॥
प्रस्फुरतीदं नेत्रं यन्मे शुभ-सूचकं तु सौमित्रे ।
नूनं विधिरपि सर्वं शुभं करिष्यत्यवश्यमिति मन्ये ॥ ३८

रघुबंसिन्ह कर सहज सुभाऊ । मनु कुपंथ पगु धरइ न काऊ ॥
मोहि अतिसय प्रतीति मन केरी । जेहिं सपनेहुँ परनारि न हेरी ॥
गच्छति नहि सौमित्रे रघु-कुलजानां मनः कुमार्गेण ।
स्वप्नेष्वपि नहि चित्तं परस्त्रियं चिन्तयेत् कदाचिन्मे ॥ ३९

सुरुचिरमपि ये रूपं पश्यन्त्यत्र न परस्त्रियः पुरुषाः ।
येभ्यो न हि दातृभ्यः कदाचिदपि यान्ति याचका विमुखाः ॥ ४०

जिन्ह कै लहहिं न रिपु रन पीठी । नहिं पावहिं परतिय मनु डीठी ।।
मंगन लहहिं न जिन्ह कै नाहीं । ते नरबर थोरे जग माहीं ।।

ये न च तात कदाचित् रणाजिरात् रिपुभयात् पलायन्ते ।
न हि सुलभाः सौमित्रे तथाविधाः शुचि-गुणान्विता लोके ।।" ४१

—करत बतकही अनुज सन मन सिय रूप लोभान ।
मुख सरोज मकरंद छबि करइ मधुप इव पान ।।

ऊचेऽनुजं गिरैवं मनस्तु सीता-वपुःश्रिया लुब्धम् ।
जनक-सुता-मुख-सरसिज-मधु-पाने मधुकरो यथा लग्नम् ।। ४२

चितवति चकित चहूँ दिसि सीता । कहँ गए नृपकिसोर मनु चिंता ।।

क्व नु खलु राजकुमारो गतो भवेदित्यधीरताक्रान्ता ।
चकिता सीताऽप्यासीत् पश्यन्ती सर्वतश्च सोत्कण्ठम् ।। ४३

जहँ बिलोक मृग सावक नैनी । जनु तहँ बरिस कमल सित श्रेनी ।।

चकित-कटाक्षानेवं मृगनयना यत्र यत्र विससर्ज ।
सित-सरसिज-सरणीमिव ववर्ष ननु तत्र तत्र साजस्रम् ।। ४४

लता ओट तब सखिन्ह लखाए । स्यामल गौर किसोर सुहाए ।।

श्यामल-गौर-किशोरौ लतान्तरित-विग्रहौ सुगात्रौ तौ ।
सीतां सोत्सुकचित्तां निदर्शयामास तत्सखीवृन्दम् ।। ४५

देखि रूप लोचन ललचाने । हरषे जनु निज निधि पहिचाने ।।

दृष्ट्वा तौ सुकुमारौ राजकुमारौ विदेह-दुहिता सा ।
विस्मित-नेत्रा तस्थौ स्वधनं दृष्ट्वा यथापहृत-लब्धम् ।। ४६

थके नयन रघुपति छबि देखें । पलकन्हिहूँ परिहरीं निमेषें ।।
अधिक सनेहँ देह भै भोरी । सरद ससिहि जनु चितव चकोरी ।।

प्रणयार्ता नृपकन्या तथानिमेषं ददर्श रघुवीरम् ।
शरदिन्दु-सुधा-सारं यथा चकोरी पिबत्यपरितोषम् ।। ४७

लोचन मग रामहि उर आनी । दीन्हे पलक कपाट सयानी ।।

नयन-पथेन तथैनं प्रवेश्य हृदयान्तरे निराबाधम् ।
निपुणं तदापिनद्धं तया नयन-पुट-कपाट-युगलं तत् ।। ४८

जब सिय सखिन्ह प्रेमबस जानी । कहि न सकहिं कछु मन सकुचानी ।।

ज्ञाता यदा सखीभिर्दृढानुरक्ता नृपात्मजे सीता ।
आनत-वदना तस्थौ भेजे मौनं तदा तु सव्रीडम् ।। ४९

—लताभवन तें प्रगट भे तेहि अवसर दोउ भाइ ।
निकसे जनु जुग बिमल बिधु जलद पटल बिलगाइ ।।

आविर्भूतौ चोभौ तदैव तौ भ्रातरौ लता-कुञ्जात् ।
चन्द्रमसाविव विमलावुदितावपसार्य सान्द्र-घन-पटलम् ।। ५०

सोभा सीवँ सुभग दोउ बीरा । नील पीत जलजाभ सरीरा ।।

श्यामल-गौर-शरीरौ नीलोत्पल-काञ्चनाम्बुजाभौ तौ ।
रम्यौ राजकुमारौ परा हि काष्ठा शरीर-शोभायाः ।। ५१

मोरपंख सिर सोहत नीके । गुच्छ बीच बिच कुसुम कली के ।।
भाल तिलक श्रमबिंदु सुहाए । श्रवन सुभग भूषन छबि छाए ।।
बिकट भृकुटि कच घूघरवारे । नव सरोज लोचन रतनारे ।।
चारु चिबुक नासिका कपोला । हास बिलास लेत मनु मोला ।।
मुखछबि कहि न जाइ मोहि पाहीं । जो बिलोकि बहु काम लजाहीं ।।

बर्हान्तरित-सुकोमल-कुड्मल-कृत-शीर्षण्-मण्डनौ चोभौ ।
तिलक-विभूषित-भालौ स्वेदोदक-बिन्दु-मौक्तिकै रम्यौ ।। ५२
भूषण-मण्डित-कर्णौ कुञ्चित-केशौ धनुर्भ्रुवौ तौ द्वौ ।
रक्तोत्पल-दल-नेत्रौ चारु-चिबुक-नासिका-कपोलौ तौ ।। ५३
ललित-स्मित-सुविलासैर्जन-मानस-हारिणौ किशोरौ तौ ।
विजितामित-रतिनाथौ विकसित-नव-वारिजाननौ रम्यौ ।। ५४

उर मनि माल कंबु कल गीवा । काम कलभ कर भुज बलसींवा ।।

रघुकुल-भूषण-भूतौ मणि-मालालङ्कृतोरसौ वीरौ ।
काम-कलभ-कर-पीवर-भुज-युगलौ कम्बु-कन्धरौ रम्यौ ।। ५५

सुमन समेत बाम कर दोना । सावँर कुअँर सखी सुठि लोना ।।

सद्योन्मीलित-पुष्प-प्रपूरित-द्रोण-वाम-हस्तौ तौ ।
दृष्टावनिमिषनेत्रं सखीभिरेवं नृपात्मजौ चोभौ ।। ५६

—केहरि कटि पट पीत धर सुषमा सील निधान।
देखि भानुकुलभूषनहि बिसरा सखिन्ह अपान॥
धरि धीरजु एक आलि सयानी। सीता सन बोली गहि पानी॥

सुषमा-शील-निधानं श्यामल-वर्णं विलोक्य रघुवीरम्।
रवि-कुल-भूषण-भूतं सिंहकटिं पीत-वाससं रामम्॥ ५७

विस्मित-चित्तः सर्वः सखीजनोऽभूत्स सीतया सार्धम्।
आस्थायात्मनि धैर्यं काचन सीतामुवाच सविनोदम्॥ ५८

बहुरि गौरि कर ध्यान करेहू। भूपकिसोर देखि किन लेहू॥
"उन्मीलय सखिनेत्रे गिरिजा-ध्यानस्य नैव समयोऽयम्।
रामं रूप-निधानं पुरःस्थितं पश्य नेत्र-निर्वाणम्॥" ५९

सकुचि सीयँ तब नयन उघारे। सनमुख दोउ रघुसिंघ निहारे॥
उन्मीलित-नयनाब्जा लज्जा-विनयान्विता ददर्श तदा।
सभय-प्रहित-कटाक्षम् रघुकुल-सिंहौ विदेह-तनया सा॥ ६०

नख सिख देखि राम कै सोभा। सुमिरि पिता पनु मनु अति छोभा।
निर्वर्ण्यापि च रामं सुखिता सा नख-शिखान्त-रमणीयम्।
स्मृत-निर्दय-परिणय-पण-संक्षोभित-मानसाभवत् व्यथिता॥ ६१

परबस सखिन्ह लखी जब सीता। भयउ गहरु सब कहहिं सभीता॥
दृष्ट्वा परवश-चित्तां दृढानुरक्तां तथा च रघुनाथे।
जनकसुतामतिमुग्धां सख्यः सर्वा भयाकुलित-चित्ताः॥ ६२

पुनि आउब एहि बेरिआँ काली। अस कहि मन बिहसी एक आली।
"अवसन्नः सखि समयः पुनरागच्छसि परेद्युरत्रैव।
समयोऽयं प्रतिगन्तुम्" विहस्य चैवं सखी तदोचे ताम्॥ ६३

गूढ़ गिरा सुनि सिय सकुचानी। भयउ बिलंबु मातु भय मानी॥
लज्जानत-वदनाब्जा श्रुत्वा सीता वचः सपरिहासम्।
समयं मत्वातीतं मातुर्भीताभवत् तदा विवशा॥ ६४

धरि बड़ि धीर रामु उर आने । फिरी अपनपउ पितुबस जाने ।।

मत्वा जनकवशं सा स्वात्मानं जानकी सुशीलगुणा ।
श्रीरामाङ्कित-हृदया चचाल हृदि संनिधाय धैर्यं सा ।। ६५

देखन मिस मृग बिहग तरु फिरइ बहोरि बहोरि ।
निरखि निरखि रघुबीर छबि बाढ़इ प्रीति न थोरि ।।

द्रष्टुं रघुकुलवीरं प्रचितप्रणयार्तमानसा सीता ।
वन-तरु-मृग-खग-दर्शन-कैतव-साचीकृताननाम्भोजा ।। ६६

निर्वर्ण्य श्रीरामं भूयो भूयः स्वनेत्र-निर्वाणम् ।
प्रीत्या विक्लव-चित्ता सखी-समेतं जगाम जनकसुता ।। ६७

जानि कठिन सिवचाप बिसूरति । चली राखि उर स्यामल मूरति ।।

अतिकठिनं शिवचापं विचिन्त्य पणमप्यतीव दुःखार्ता ।
मेघ-श्यामल-रूपं ध्यायन्ती रघुपतेः समाश्वस्ता ।। ६८

प्रभु जब जात जानकी जानी । सुख सनेह सोभा गुन खानी ।।

सुख-सुषमा-गुण-भूमिं स्नेह-सुमूर्तिं विदेह-नृप-कन्याम् ।
जानन् रघुकुलनाथो गच्छन्तीं सह सखीभिरनुरक्ताम् ।। ६९

परम प्रेममय मृदु मसि कीन्ही । चारु चित्त भीतीं लिखि लीन्ही ।।

स्थिर-हृदयो यत-चित्तो जनकसुतासक्तमानसो रामः ।
प्रणय-मसीकृत-रेखं मानस-फलके लिलेख तच्चित्रम् ।। ७०

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानसभावानुवादे
श्रीरामसीता-परस्पर-दर्शनं नाम अष्टात्रिंशस्तरङ्गः ।।

तरङ्गः ३१

गई भवानी भवन बहोरी । बंदि चरन बोली कर जोरी ।।

गत्वा गिरिजाभवनं नत्वा तच्चरणवारिजे भूयः ।
ऊचे साञ्जलिहस्तं विदेहतनया सतीं पुनश्चैवम् ।। १

जय जय गिरिबरराज किसोरी । जय महेस मुख चंद चकोरी ।।
जय गजबदन षडानन माता । जगत जननि दामिनि दुति गाता ।।

"जय जय गिरिवरराजकुमारि जय जय शिवमुखचन्द्रचकोरि ।
जय गजवदनषडाननजननि जय भवजननि तडित्तनुकान्ति ।। २

नहिं तव आदि मध्य अवसाना । अमित प्रभाउ बेदु नहिं ताना ।।
भव भव बिभव पराभव कारिनि । बिस्व बिमोहनि स्वबस बिहारिनि ।।

आदिमध्यमृतिहीने गिरिजे वेत्ति न वेदोऽप्यमितबलं ते ।
भवभवविभवपराभवभूमे स्ववशविहारिणि जगन्मोहिनि ।। ३

–पतिदेवता सुतीय महुँ मातु प्रथम तव रेख ।
महिमा अमित न सकहिं कहि सहस सारदा सेष ।।

त्रिपुररिपोरतिवल्लभदयिते पतिपदरतजनपरमपुरोगे ।
वर्गचतुष्टय-मङ्गल-फलदे निजपद-सेवक-याचित-वरदे ।। ४

गुणगणमहिमा तव भवजाये न विदितपारो गिरिवरकन्ये ।
वदितुमलं न हि दशशतरशनो न च गिरिजे शारदा गिरा तम् ।। ५

सेवत तोहि सुलभ फल चारी । बरदायनी पुरारि पिआरी ।।
देबि पूजि पद कमल तुम्हारे । सुर नर मुनि सब होहिं सुखारे ।।
मोर मनोरथु जानहु नीकें । बसहु सदा उर पुर सबही कें ।।

नत्वा गिरिजे तव पदकमले सुर-नर-मुनयः सुखिताः सर्वे ।
वेत्सि मनोरथमपि नियतं मे निवससि गिरिजे हृदयपुरे मे ।। ६

कीन्हेउँ प्रगट न कारन तेहीं । अस कहि चरन गहे बैदेहीं ।।

उदीरयामि गिरा न हि गिरिजे मनोरथं तत्र पुरतोऽहं मे ।"
उक्त्वैवं मिथिलाधिपकन्या गिरिजापदयुगले प्रणिपतिता ।। ७

विनय प्रेम बस भई भवानी । खसी माल मूरति मुसुकानी ।।

ज्ञात्वा विनयं हृदयस्नेहं जनकसुताया गिरिजा सत्यम् ।
स्मितवदना हिमशैलतनूजा ददौ स्वमालां प्रसादचिह्नम् ।। ८

सादर सियँ प्रसादु सिर धरेऊ । बोली गौरि हरषु हियँ भरेऊ ।।

भक्त्या जनकसुतापि सविनयं दधार शिरसा गिरिजाहारम् ।
हर्षोत्फुल्लितचित्ता प्रीता सीतामूचे शशिधरकान्ता ।। ९

सुनु सिय सत्य असीस हमारी । पूजिहि मन कामना तुम्हारी ।।
नारद बचन सदा सुचि साचा । सो बरु मिलिहि जाहिं मनु राचा ।।

"मनोरथस्ते विदेहकन्ये फलति, न शङ्का सुरमुनिवचने ।
मनसि वरं यं कामयसे तं प्राप्स्यसि नियतं जनकसुते त्वम् ।। १०

–मनु जाहिं राचेउ मिलिहि सो बरु सहज सुंदर साँवरो ।
करुना निधान सुजान सीलु सनेहु जानत रावरो ।।

श्यामलसुन्दर-रघुकुलवीरं सर्वविदं सदयं हृदयेशम् ।
जानन्तं तव शीलस्नेहं प्राप्स्यसि सीते वरमभिरामम् ।। " ११

एहि भाँति गौरि असीस सुनि सिय सहित हियँ हरषीं अली ।
तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मंदिर चली ।।

श्रुतमङ्गलसुखदाशीर्वचना सखीसमेतं मुदिता सीता ।
पूजितगिरिजाचरणसरोजा जगाम भवनं कथयति तुलसी ।। १२

–जानि गौरि अनुकूल सिय हिय हरषु न जाइ कहि ।
मंजुल मंगल मूल बाम अंग फरकन लगे ।।

लब्ध्वा गिरिजाप्रसादमेवं हर्षोत्फुल्लं सीताचित्रम् ।
वर्णयितुं कोऽलं मुदमस्याः प्रस्फुरितं वामाङ्गं यस्याः ।। १३

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
गिरिजावरप्रदानं नाम एकोनत्रिंशस्तरङ्गः ।

तरङ्गः ४०

हृदयँ सराहत सीय लोनाई । गुर समीप गवने दोउ भाई ।।

स्तुन्वन्तौ मनसा प्रीत्या सीतालावण्यमद्भुतम् ।
संप्राप्तौ गुरुसंकाशं कुमारौ रामलक्ष्मणौ ।। १

राम कहा सबु कौसिक पाहीं । सरल सुभाउ छुअत छल नाहीं ।।
सुमन पाइ मुनि पूजा कीन्ही । पुनि असीस दुहु भाइन्ह दीन्ही ।।

पूजयित्वा ततः पुष्पैर्गुरोः पादाम्बुज-द्वयम् ।
तस्थतुर्तौ ततश्चोभौ भक्त्या प्रणतमस्तकौ ।। २
कथयामास निर्व्याजं वृत्तं सर्वं सविस्तरम् ।
अस्पृष्टकैतवो रामो मुनये सरलात्मना ।। ३

सुफल मनोरथ होहुँ तुम्हारे । रामु लखनु सुनि भए सुखारे ।।

"सफलः सन्तु सर्वेऽपि युवयोर्ये मनोरथाः ।"
इत्यभीष्टाशिषं लब्ध्वा गुरोः प्रीतौ कुमारकौ ।। ४

करि भोजनु मुनिबर बिग्यानी । लगे कहन कछु कथा पुरानी ।।

कृताहारस्ततो धीरः कथयामास गाधिजः ।
पुरातनकथा नाना गुरुर्बन्धुद्वयाय च ।। ५

बिगत दिवसु गुरु आयसु पाई । संध्या करन चले दोउ भाई ।।

अस्ताचलं ततो याते सहस्रांशावुभावपि ।
गुरुणानुमतौ भक्त्या चक्रतुः सान्ध्य-वन्दनम् ।। ६

प्राची दिसि ससि उयउ सुहावा । सिय मुख सरिस देखि सुखु पावा ।।

दृष्ट्वोदितं पुरश्चन्द्रं मत्वा सीतामुखं च तम् ।
सुखितो हृदये रामः सर्वलोकमनोरमः ।। ७

बहुरि बिचारु कीन्ह मन माहीं । सीय बदन सम हिमकर नाहीं ।।
—जनमु सिंधु पुनि बंधु बिषु दिन मलीन सकलंक ।
सिय मुख समता पाव किमि चंदु बापुरो रंक ।।

घटइ बढ़इ बिरहिनि दुखदाई । ग्रसइ राहु निज संधिहिं पाई ।।
कोक सोकप्रद पंकज द्रोही । अवगुन बहुत चंद्रमा तोही ।।

'न ह्यसौ प्रियया तुल्यः हिमांशुः कथमप्युत ।'
विचिन्त्य पुनरप्येवं तमुवाच रघूत्तमः ।। ८

"विषबन्धो कुतश्चेन्दो कलङ्किन् सिन्धुसंभव ।
दिवा विगतसौन्दर्य तुला ते प्रियया मम ।। ९

चयापचय-युक्तस्त्वं ग्रस्यसे राहुणा सदा ।
वियुक्त-स्त्री-मनस्ताप-प्रदाता त्वं क्षपाकर ।। १०

कोकशोकप्रदाता त्वं पद्मसंकोच-कारणम् ।
बहुदोषः कथं मूढ मत्प्रियावदनोपमः ।। ११

बैदेही मुख पटतर दीन्हे । होइ दोषु बड़ अनुचित कीन्हे ।।

वर्णयन् त्वां महादोषं प्रियामुखसमं विधो ।
पापकर्मास्म्यहं नूनं न ते दोषः क्षपाकर ।।" १२

सिय मुख छबि बिधु ब्याज बखानी । गुर पहिं चले निसा बड़ि जानी ।।
करि मुनि चरन सरोज प्रनामा । आयसु पाइ कीन्ह बिश्रामा ।।
बिगत निसा रघुनायक जागे । बंधु बिलोकि कहन अस लागे ।।

स्मरतः प्रभुरामस्य सीतावदन-चारुताम् ।
हिमांशुवर्णनच्छद्मात् प्रगता रजनी बहु ।। १३

ततो नत्वा मुनेः पादौ विश्रान्तो रघुनायकः ।
प्रातरुत्थाय सौमित्रिं प्रोवाच वचनं प्रियम् ।। १४

उयउ अरुन अवलोकहु ताता । पंकज कोक लोक सुखदाता ।।

"पश्यारुणं पुरश्चैनं सौमित्रे नेत्रसौख्यदम् ।
पद्मसंतोषकर्तारं कोकलोकसुखप्रदम् ।।" १५

बोले लखनु जोरि जुग पानी । प्रभु प्रभाउ सूचक मृदु बानी ।।

श्रुत्वेदं वचनं प्रीतः सूचयन् रामगौरवम् ।
बद्धाञ्जलिस्तमित्यूचे लक्ष्मणो रामवल्लभः ।। १६

—अरुनोदयँ सकुचे कुमुद उडगन जोति मलीन ।
"अरुणागमने राम निस्तेजास्तारकागणः ।
कुमुदानां वनं चेदं पश्य संकोचितं भृशम् ॥ १७
जिमि तुम्हार आगमन सुनि भए नृपति बलहीन ॥
विदेहनगरं चेदं संप्राप्ते त्वयि राघव ।
बलहीना यथा सर्वे राजानोऽत्र समागताः ॥ १८

नृप सब नखत करहिं उजिआरी । टारि न सकहिं चाप तम भारी ॥
विराजन्ते हि राजानो मन्दं तारागणो यथा ।
विभेत्तुं न हि ते शक्ताश्चापरूपं महत्तमः ॥ १९

कमल कोक मधुकर खग नाना । हरषे सकल निसा अवसाना ॥
प्रभातायां तु शर्वर्यां हृष्टाः सर्वे यथाग्रज ।
कोका भृङ्गाः खगाश्चैवं पद्मषण्डास्तथैव च ॥ २०

ऐसेहिं प्रभु सब भगत तुम्हारे । होइहहिं टूटें धनुष सुखारे ॥
उयउ भानु बिनु श्रम तम नासा । दुरे नखत जग तेजु प्रकासा ॥
तथैवाद्य धनुर्भङ्गे भक्तास्तुष्यन्ति ते प्रभो ।
उदितो हि सहस्रांशुर्विनायासं गतं तमः ॥ २१
निलीयन्ते च सर्वेऽपि लज्जितास्तारकागणाः ।
प्रकाशयति सूर्योऽसौ सर्वं विश्वं स्वतेजसा ॥ २२

रबि निज उदय ब्याज रघुराया । प्रभु प्रतापु सब नृपन्ह दिखाया ॥
उदयच्छद्मना राम दर्शयामास भास्करः ।
प्रतापं ते नृपान् सर्वान् सूर्य-वंश-समुद्भव ॥ २३

तव भुज बल महिमा उदघाटी । प्रगटी धनु बिघटन परिपाटी ॥
तमोभङ्गमिषेणायं धनुर्भञ्जन-पद्धतिम् ।
सूचयन् घोषयत्येव भुजयोस्ते बलं प्रभो ॥" २४

बंधु बचन सुनि प्रभु मुसुकाने । होइ सुचि सहज पुनीत नहाने ॥
श्रुत्वा भ्रातुर्वचश्चैवं जहास रघुनायकः ।
शुचिर्भूतस्ततः स्नातः सर्वकालशुचिः प्रभुः ॥ २५

नित्यक्रिया करि गुरु पहिं आए । चरन सरोज सुभग सिर नाए ॥

कृत्वा नित्यक्रियाः सर्वाः स प्राप्तो गुरुसंनिधौ ।
प्रणनाम गुरोः पादौ सुभगौ नलिनोपमौ ॥ २६

सतानंदु तब जनक बोलाए । कौसिक मुनि पहिं तुरत पठाए ॥
जनक बिनय तिन्ह आइ सुनाई । हरषे बोलि लिए दोउ भाई ॥

अथ राजा विदेहोऽपि प्रातराहूय सर्ववित् ।
शतानन्दं मुनिं शीघ्रं प्रेषयामास चर्षये ॥ २७

न्यमन्त्रयत्ततश्चासौ वचनान्नृपतेः स्वयम् ।
शतानन्दो मुनिश्रेष्ठं शिवचापाध्वरे पुनः ॥ २८

विश्वामित्रोऽपि सुप्रीतः श्रीरामलक्ष्मणौ ततः ।
शीघ्रमाजुहुवे तत्र श्रुत-वृत्त-प्रहर्षितः ॥ २९

—सतानंद पद बंदि प्रभु बैठे गुर पहिं जाइ ।

शतानन्दमुनेः पादौ नत्वा श्रीरामलक्ष्मणौ ।
आसीनौ विनयेनोभौ भ्रातरौ गुरुसंनिधौ ॥ ३०

चलहु तात मुनि कहेउ तब पठवा जनक बोलाइ ॥

विश्वामित्रोऽपि संतृप्तस्तावुवाच वचस्तदा ।
"निमन्त्रिता विदेहेन गच्छामः कार्मुकाध्वरम् ॥ ३१

सीय स्वयंबरु देखिअ जाई । ईसु काहि धौं देइ बड़ाई ॥

सीता-स्वयंवरं चैवं पश्यामः कार्मुकाध्वरे ।
भाग्यवन्तं च पश्यामो भगवत्कृपयान्वितम् ॥" ३२

लखन कहा जस भाजनु सोई । नाथ कृपा तव जापर होई ॥

विश्वामित्रवचः श्रुत्वा प्रत्यूचे लक्ष्मणोऽपि तम् ॥
"भवत्-कृपान्वितो यः स्यात् सैवेशप्रीतिभाजनम् ॥" ३३

हरषे मुनि सब सुनि बर बानी । दीन्हि असीस सबहिं सुखु मानी ॥

इतीदं शोभनं वाक्यं श्रुत्वा सौमित्रिणोदितम् ।
ददावाशीर्वचस्तस्मै प्रीतो मुनिगणस्तदा ॥ ३४

पुनि मुनिबृंद समेत कृपाला । देखन चले धनुषमख साला ॥

ततः सहर्षिभी रामः प्रस्थितः करुणाघनः ।
वीक्षितुं मिथिलापुर्यां कार्मुकाध्वरमद्भुतम् ॥ ३५

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
कार्मुकाध्वरगमनं नाम चत्वारिंशस्तरङ्गः ।

तरङ्गः ४१

रंगभूमि आए दोउ भाई । असि सुधि सब पुरबासिन्ह पाई ॥
चले सकल गृह काज बिसारी । बाल जुबान जरठ नर नारी ॥

'आगतौ भ्रातरौ द्रष्टुं यज्ञशालां कुमारकौ ।'
श्रुत्वेति च तदाबालवृद्धस्त्रीपुरुषाः पुरे ॥ १
प्रस्थिता मुदिता हित्वा नित्यकर्माणि नागराः ।
विस्मृत्य गृहकार्याणि कार्मुकाध्वर-मण्डपम् ॥ २

देखी जनक भीर भै भारी । सुचि सेवक सब लिए हँकारी ॥
तुरत सकल लोगन्ह पहिं जाहू । आसन उचित देहु सब काहू ॥

तं दृष्ट्वा जनसंमर्दं सुशीलान् निजसेवकान् ।
समाहूयादिशद्राजा व्याहर्तुं स्वागतं जनान् ॥ ३

—कहि मृदु बचन बिनीत तिन्ह बैठारे नर नारि ।
उत्तम मध्यम नीच लघु निज निज थल अनुहारि ॥

समुपावेशयामासुः सेवकाश्च पुरौकसः ।
उच्च-मध्यम-नीचादीन् तेषु तेष्वासनेषु च ॥ ४

राजकुअँर तेहि अवसर आए । मनहुँ मनोहरता तन छाए ॥
गुन सागर नागर बर बीरा । सुंदर स्यामल गौर सरीरा ॥

संप्राप्तौ मंडपं वीरौ रमणीयौ गुणाकरौ ।
श्यामगौरौ तदैवैतौ राजपुत्रौ किशोरकौ ॥ ५

राज समाज बिराजत रूरे । उडगन महुँ जनु जुग बिधु पूरे ।।

व्यराजेतां किशोरौ तौ समुदाये महीभृताम् ।
निवहे शततारारणां पूर्णचन्द्रमसाविव ।। ६

जिन्ह कें रही भावना जैसी । प्रभु मूरति तिन्ह देखी तैसी ।।

यो यस्य हृदये भावस्तेन दृष्टस्तथा प्रभुः ।
कुमारो नररूपोऽपि श्रीरामो रघुनन्दनः ।। ७

देखहिं रूप महा रनधीरा । मनहुँ बीर रसु धरें सरीरा ।।
डरे कुटिल नृप प्रभुहि निहारी । मनहुँ भयानक मूरति भारी ।।

रणधीरैर्महावीरैः साक्षाद्वीररसो यथा ।
कुटिलैस्तु भयाक्रान्तैर्मूर्तिमद् भयवत्प्रभुः ।। ८

रहे असुर छल छोनिप बेषा । तिन्ह प्रभु प्रगट कालसम देखा ।।

दानवैः कितवैः क्रूरैर्नृपवेषैः समागतैः ।
दृष्टो रामः प्रभुः साक्षात् कालो देहधरो यथा ।। ९

पुरबासिन्ह देखे दोउ भाई । नरभूषन लोचन सुखदाई ।।

पुरवासिभिरायातैर्दृष्टौ तौ भ्रातरौ तदा ।
नरजात्यवतंसावित्युभौ लोचन-सौख्यदौ ।। १०

–नारि बिलोकहिं हरषि हियँ निज निज रुचि अनुरूप ।
जनु सोहत सिंगार धरि मूरति परम अनूप ।।

अनुसृत्य मनोभावं स्वं स्वं दृष्टस्तदा प्रभुः ।
प्रहृष्टाभिश्च नारीभिः शृङ्गाररसमूर्तिवत् ।। ११

बिदुषन्ह प्रभु बिराटमय दीसा । बहु मुख कर पग लोचन सीसा ।।

विद्वद्भिः स विराड्रूपः सहस्राक्षः सहस्रपाद् ।
सहस्रास्य-शिरोग्रीवः सहस्रकरमण्डितः ।। १२

जनक जाति अवलोकहिं कैसें । सजन सगे प्रिय लागहिं जैसें ।।
सहित बिदेह बिलोकहिं रानी । सीसु सम प्रीति न जाति बखानी ।।

जनकेन च दृष्टोऽसौ वल्लभः स्वजनो यथा ।
महिषीभिस्तु दृष्टोऽसौ वात्सल्येन शिशुर्यथा ।। १३

जोगिन्ह परम तत्त्वमय भासा । सांत सुद्ध सम सहज प्रकासा ।।

शान्तः शुद्धः समश्चैवं स्वप्रकाशस्तथैव च ।
योगिभिः परमात्मेति वीक्षितो रघुनन्दनः ।। १४

हरिभगतन्ह देखे दोउ भ्राता । इष्टदेव इव सब सुख दाता ।।

इष्टदैवतमित्येव दृष्टं तद् भ्रातृयुग्मकम् ।
हरिभक्तैस्तदा हृष्टैः सर्वेप्सितसुखप्रदम् ।। १५

रामहि चितव भायँ जेहि सीया । सो सनेहु सुखु नहिं कथनीया ।।
उर अनुभवति न कहि सक सोऊ । कवन प्रकार कहै कबि कोऊ ।।

विदेहकन्यया सोऽयं यथा दृष्टो रघूद्वहः ।
वक्तुं तं साप्यशक्तैव हृदयानुभवं स्वयम् ।। १६
कथं वक्तुं कविर्भावं शक्नुयात्तं सुनिर्मलम् ।
सर्ववर्णाक्षरातीतं जानकी-रघुनाथयोः ।। १७

एहि बिधि रहा जाहि जस भाऊ । तेहिं तस देखेउ कोसलराऊ ।।

यो यस्य हृदये भावः तमेवानुसरन् प्रभुः ।
स्वात्मानं दर्शयामास तं तं नूनं तथा तथा ।। १८

—राजत राज समाज महुँ कोसलराज किसोर ।
सुंदर स्यामल गौर तन बिस्व बिलोचन चोर ।।

नरपतिनिवहे दशरथतनयौ श्यामलगौरौ रम्यशरीरौ ।
पुर-नर-ललना-लोचन-सुखदौ रेजतुरतिशयमञ्जुलरूपौ ।। १९

सहज मनोहर मूरति दोऊ । कोटि काम उपमा लघु सोऊ ।।
सरद चंद निंदक मुख नीके । नीरज नयन भावते जी के ।।

सहजमनोहरसुरुचिररूपौ हृदयविमोहनसरसिजनयनौ ।
रूपविनिन्दितनियुतरतीशौ वदनविजितशरदखिलसुधांशू ।। २०

चितवनि चारु मार मनु हरनी । भावति हृदय जाति नहिं बरनी ।।
कल कपोल श्रुति कुंडल लोला । चिबुक अधर सुंदर मृदु बोला ।।
कुमुदबंधु कर निंदक हाँसा । भृकुटी बिकट मनोहर नासा ।।

मदनहृदयहरनयनविलसितं सुभगविलोलं कुण्डलयुगलम् ।
मृदुल-कपोल-रुचिर-हनुरूपं दशरथसुतयोरतिशयमधुरम् ।। २१

सुमधुरमधरं मञ्जुलवचनं सुविहितनासाभृकुटिसुबन्धम् ।
निन्दितशशिकरकोमलहासं वर्णयितुं मे न हि पदविभवम् ।। २२

भाल बिसाल तिलक झलकाहीं । कच बिलोकि अलि अवलि लजाहीं ।
पीत चौतनीं सिरन्हि सुहाईं । कुसुम कलीं बिच बीच बनाईं ।।

उज्ज्वल-तिलक-विभूषित-भालौ श्यामल-कुन्तल-निन्दित-मधुपौ ।
कुड्मल-चित्रित-पीतशिरस्त्रौ सुमधुररूपौ दशरथतनयौ ।। २३

रेखें रुचिर कंबु कल गीवाँ । जनु त्रिभुवन सुषमा की सीवाँ ।।
—कुंजर मनि कंठा कलित उरन्हि तुलसिका माल ।

त्रिभुवनसुषमावधिसमरेखात्रितयविभूषित-रुचिरदरगलौ ।
मौक्तिकहार-सुमण्डित-कण्ठौ तुलसीमालालंकृत-हृदयौ ।। २४

बृषभ कंध केहरि ठवनि बल निधि बाहु बिसाल ।।
कटि तूनीर पीत पट बाँधें । कर सर धनुष बाम बर काँधें ।।
पीत जग्य उपबीत सुहाए । नख सिख मंजु महाछबि छाए ।।
देखि लोग सब भए सुखारे । एकटक लोचन चलत न तारे ।।

वृषभस्कन्धौ केसरिशोभौ बलनिधिभूषणपीवरबाहू ।
धृत-शरधनुषौ बद्ध-निषङ्गौ पीतोपवीत-भूषितरूपौ ।। २५

नखशिखान्तरमणीयशरीरौ सकलविलोचनसुखकररूपौ ।
अनिमिषमचलिततारकमेतौ दृष्टौ सकलै रघुकुलवीरौ ।। २६

हरषे जनकु देखि दोउ भाई । मुनि पद कमल गहे तब जाई ।।

सुखितो मिथिलाधीशो दर्शनेन कुमारयोः ।
जग्राह परमप्रेम्णा मुनेः पादाम्बुजद्वयम् ।। २७

करि बिनती निज कथा सुनाई । रंग अवनि सब मुनिहि देखाई ।।

कीर्तयित्वात्मनो वृत्तं कुलवृत्तं सविस्तरम् ।
सादरं दर्शयामास रचितं मखमण्डपम् ।। २८

जहँ जहँ जाहिं कुअँर बर दोऊ । तहँ तहँ चकित चितव सबु कोऊ ।

मुनिना सहितं चैतौ भ्रातरौ रामलक्ष्मणौ ।
सुखयामासतुः सर्वान् तत्र तत्र सुदर्शनौ ।। २९

निज निज रुख रामहि सबु देखा। कोउ न जान कछु मरमु बिसेषा॥

युगपत् संमुखो दृष्टः सर्वैस्तै रघुनन्दनः।
रहस्यं न तु विज्ञातं प्रभोर्दिव्यानुभावतः॥ ३०

भलि रचना मुनि नृप सन कहेऊ। राजाँ मुदित महासुख लहेऊ॥

'सुभगाध्वरशाले'ति स्तुत्वा निर्माणकौशलम्।
संतुष्टो मुनिरप्यूचे मिथिलेशं च तोषयन्॥ ३१

—सब मंचन्ह ते मंचु एक सुंदर बिसद बिसाल।
मुनि समेत दोउ बंधु तहँ बैठारे महिपाल॥

समुपावेशयामास मुदितो मिथिलापतिः।
भ्रातरौ मुनिना साधं विशालोच्छ्रितमासनम्॥ ३२

प्रभुहि देखि सब नृप हियँ हारे। जनु राकेस उदय भएँ तारे॥

तं वीक्ष्य सर्वातिशयानुभावं भग्नाभिलाषो निवहो नृपाणाम्।
दृष्ट्वोदितं पूर्णसुधांशुबिंबं मन्दप्रभावा नभसीव ताराः॥ ३३

असि प्रतीति सब के मन माहीं। राम चाप तोरब सक नाहीं॥
बिनु भंजेहुँ भव धनुषु बिसाला। मेलिहि सीय राम उर माला॥
अस बिचारि गवनहु घर भाई। जसु प्रतापु बलु तेजु गवाँई॥

'छेत्स्यत्यवश्यं रघुनन्दनोऽयं शैवं धनुर्नात्र कुतोऽपि शङ्का।'
प्रत्यायितं चात्मनि राजवृन्दं तत्याज मोघं मनसोऽभिलाषम्॥ ३४

'अच्छिन्नधन्वापि वपुःश्रियाऽसौ जेष्यत्यवश्यं वरहारमग्र्यम्।'
इत्यात्मसामर्थ्ययशःप्रतापान् विहाय गेहाय मतिं चकार॥ ३५

बिहसे अपर भूप सुनि बानी। जे अबिबेक अंध अभिमानी॥
तोरेहुँ धनुषु ब्याहु अवगाहा। बिनु तोरें को कुअँरि बिआहा॥

उपाहसँस्तान्नपरे नरेन्द्रा
अत्युद्धताश्चाप्यविवेकिनो ये।
"छित्वापि चापं ननु दुष्करो यः
कुतो विवाहस्त्वविभज्य चापम्॥ ३६

एक बार कालउ किन होऊ। सिय हित समर जितब हम सोऊ।
यह सुनि अवर महिप मुसुकाने। धरमसील हरिभगत सयाने॥

कालं प्रतिद्वन्द्विनमप्यवश्यं जेष्यामहे भूमिपतेः सुतार्थम्।"
आकर्ण्य दर्पोक्तिमितीतरे तान् उपाहसन् धर्मरताः नरेन्द्राः॥ ३७

—सीय बिआहबि राम गरब दूरि करि नृपन्ह के।
जीति को सक संग्राम दसरथ के रन बाँकुरे॥

"हृत्वा नृपाणामवलेपमेनं जेष्यत्यवश्यं जनकात्मजां सः।
कः संगरे कोसलराजपुत्रौ पराजयेत प्रबलोऽपि वीरौ॥ ३८

व्यर्थ मरहु जनि गाल बजाई। मन मोदकन्हि कि भूख बुताई॥

विकत्थनं किं कुरुथात्र, भूपाः वृथैव कोऽयं मरणानुरागः।
कथं मनोमोदकखादिकेयं करिष्यते क्षुच् छमनं नृपा वः॥ ३९

सिख हमारि सुनि परम पुनीता। जगदंबा जानहु जियँ सीता॥
जगत पिता रघुपतिहि बिचारी। भरि लोचन छबि लेहु निहारी॥
सुंदर सुखद सकल गुन रासी। ए दोउ बंधु संभु उर बासी॥

शृणुध्वमेतद्वचनं हितार्थं सत्यं शिवं सुन्दरमस्मदुक्तम्।
जानीत, सीता जगदम्बिकेति प्रभुश्च रामो जगतः पितेति॥ ४०

तौ भ्रातरावत्र तु रूपवन्तौ महेश्वरान्तःकरणे वसन्तौ।
दृष्ट्वा भवत्यक्षिमहोत्सवो वः सौख्यप्रदौ सद्गुणसंघयुक्तौ॥ ४१

सुधा समुद्र समीप बिहाई। मृगजलु निरखि मरहु कत धाई॥

सुधासमुद्रं निकटे विहाय किं धावथैवं मृगतृष्णिकार्थम्।
मृत्योर्विनान्यो न हि तत्र लाभो विचार्य चैवं शृणुतोपदेशम्॥ ४२

करहु जाइ जा कहुँ जोइ भावा। हम तौ आजु जनम फलु पावा॥

न चेद्वचो वा हितमप्यथेष्टं यद्रोचते तत्कुरुतात्र यूयम्।
वयं तु दृष्ट्वा रघुवंशबीरौ मन्यामहे नः सफलं नृजन्म॥" ४३

अस कहि भले भूप अनुरागे। रूप अनूप बिलोकन लागे।।
देखहिं सुर नभ चढ़े बिमाना। बरषहिं सुमन करहिं कल गाना।।

उक्त्वैव मन्ये सुखिता नरेन्द्राः
श्रीरामरूपेक्षण-दत्त-चित्ताः।
निरीक्ष्य यद्रूपमथान्तरिक्षात्
सुराश्च सर्वे गगने प्रहृष्टाः।। ४४

स्वं स्वं विमानं च तदाधिरूढः
रामं विलोक्यात्मनि संप्रहृष्टः।
गायन् सुराणां सकलोऽपि संघश्-
चकार वृष्टिं युगपत्-सुमानाम्।। ४५

–जानि सुअवसरु सीय तब पठई जनक बोलाइ।
चतुर सखीं सुंदर सकल सादर चलीं लवाइ।।

तमेव मत्वावसरं सुयोग्यं समाह्वयामास सुतां विदेहः।
तामानयामासुरथादरेण सख्यस्तदीयाश्चतुरा विदग्धाः।। ४६

सिय सोभा नहिं जाइ बखानी। जगदंबिका रूप गुन खानी।।

रूपश्रियं तां जनकात्मजाया जगज्जनन्या गुणमण्डितायाः।
न वागलं भोः कविपुङ्गवानां वक्तुं यथार्थं ननु का कथा मे।। ४७

उपमा सकल मोहि लघु लागीं। प्राकृत नारि अंग अनुरागीं।।
सिय बरनिअ तेइ उपमा देई। कुकबि कहाइ अजसु को लेई।।
जौं पटतरिअ तीय सम सीया। जग असि जुबति कहाँ कमनीया।।

सर्वोपमाद्रव्यमपि प्रयुक्तम्
मन्ये जघन्यं पुरतश्च तस्याः।
यैः प्राकृतस्त्रीजनदेहरूपम्
निगद्यते तैः सह किं तुलास्याः।। ४८

तैः प्राकृतैर्वर्णयितुं पदैस्ताम्
को धर्षयत्यत्र यशो लिलिप्सुः।
यदि स्त्रिया सुन्दरया तुला वा
क्व सास्ति नूनं कमनीय-कन्या।। ४९

गिरा मुखर तन अरध भवानी । रति अति दुखित अतनु पति जानी ।।

सरस्वती सा बहुजल्पकेति
अर्धाङ्गनात्वाच्छिववल्लभापि ।
अनङ्गभर्तेति सुदुःखिता सा
जाता रतिश्चाप्युपमान-बाह्या ।। ५०

बिष बारुनी बंधु प्रिय जेही । कहिअ रमासम किमि बैदेही ।।

सहोदरी वा मदिरा यदीया
सपिण्डता वा गरलेन यस्याः ।
कथं तया वा रमया तुलास्याः
सुमङ्गलाया जनकात्मजायाः ।। ५१

जौं छबि सुधा पयोनिधि होई । परम रूपमय कच्छपु सोई ।।
सोभा रजु मंदरु सिंगारू । मथै पानि पंकज निज मारू ।।
–एहि बिधि उपजै लच्छि जब सुंदरता सुख मूल ।
तदपि सकोच समेत कबि कहहिं सीय समतूल ।।

कूर्मो यदि स्याद‍तिरम्यरूपः
शोभा स्वयं वासुकिरज्जुरेवम् ।
शृङ्गाररूपो यदि शैलमन्थः
मथ्नीत कामः करवारिजाभ्याम् ।। ५२

सुधासमुद्रोन्मथितां तथैनाम्
सौन्दर्यसौख्योद्भवसिन्धुकन्याम् ।
साशङ्कमेवात्र जगज्जनन्यास्-
तुलापदं चोच्छ्रयते कवीन्द्रः ।। ५३

चलीं संग लै सखीं सयानी । गावत गीत मनोहर बानी ।।
सोह नवल तनु सुंदर सारी । जगत जननि अतुलित छबि भारी ।।

प्रीत्यानयन् सुस्वरगानमग्नाः
सख्योऽपि सीतां मखमण्डपे ताः ।
क्षौमं दधानां बहुशोभमानाम्
रम्यां जगन्मातरमद्वितीयाम् ।। ५४

भूषन सकल सुदेस सुहाए। अंग अंग रचि सखिन्ह बनाए ।।
रंगभूमि जब सिय पगु धारी। देखि रूप मोहे नर नारी ।।

तत्-तद्विभूषाकृतगात्रशोभा
सखीभिरेषा मिथिलेशकन्या।
यावत्सभायां निदधे पदाब्जम्
तावज्जनानामहरन्मनांसि ।। ५५

हरषि सुरन्ह दुंदुभीं बजाईं। बरषि प्रसून अपछरा गाईं ।।

चक्रुः सुरा दुन्दुभिनादमुच्चैर्
आनन्द-बाष्पप्लुतनेत्रयुग्माः।
सपुष्पवर्षं ननृतुः सगीतम्
दिव्याङ्गनास्तामवलोक्य हर्षात् ।। ५६

पानि सरोज सोह जयमाला। अवचट चितए सकल भुआला ।।

शुशुभे च यस्या जनकात्मजायाः
करपद्मयुग्मे वरपुष्पमाला।
युगपद्ददर्शावलिताननं ताम्
नृपमण्डलं तच्चकितं सभायाम् ।। ५७

सीय चकित चित रामहि चाहा। भए मोहबस सब नरनाहा ।।

चकिता च सीता प्रभुरामचन्द्रम्
मुनिना सहासीनमपश्यदग्रे।
सुभगेक्षितं तच्च विलोक्य तस्याश्
चकिताश्च सर्वे पुरवासिनोऽपि ।। ५८

मुनि समीप देखे दोउ भाई। लगे ललकि लोचन निधि पाई ।।

कृपणो यथा द्रव्यनिधिं तथा सा
नृपजावुभौ तौ मुनिना समेतौ।
स्थिरदृक् ददर्शात्मनि संप्रहृष्टा
न शशाक नेत्रे प्रतिहर्तुमेषा ।। ५९

–गुरजन लाज समाजु बड़ देखि सीय सकुचानि ।
लागि बिलोकन सखिन्ह तन रघुबीरहि उर आनि ।

अमितं जनौघं पुरतो गुरूँश्च
त्रपितावनस्थे त्ववलोक्य सीता ।
रघुवीर-रूपं हृदये निधाय
प्रजिघाय नेत्रे स्वसखीदिशं सा ॥ ६०

राम रूपु अरु सिय छबि देखें । नर नारिन्ह परिहरीं निमेषें ॥
सोचहिं सकल कहत सकुचाहीं । बिधि सन बिनय करहिं मन माहीं ॥

रघुवीर-सीता-मुखदर्शनार्थम्
परिवर्जिता दृङ्निमिषा जनौघैः ।
वदितुं न शक्ता यदि राजभीत्या
हृदये विरिञ्चि समबोधयन् ते ॥ ६१

हरु बिधि बेगि जनक जड़ताई । मति हमारि असि देहि सुहाई ॥
बिनु बिचार पनु तजि नरनाहू । सीय राम कर करै बिबाहू ॥
जगु भल कहिहि भाव सब काहू । हठ कीन्हें अंतहुँ उर दाहू ॥
एहिं लालसाँ मगन सब लोगू । बरु साँवरो जानकी जोगू ॥

"हर मूढतां तां कृपया विधे त्वम्
जनकान्तरङ्गात् त्वरया दयालो ।
सुमतिं तथास्मै वितरास्मदीयाम्
प्रतिहर्तुमुग्रं समयं वरार्थे ॥ ६२

समयं विना दातुमथात्मकन्याम्
अनुरूपभर्त्रे रघुनन्दनाय ।
उचितो वरोऽयं जनकात्मजाया"
मनसीति सर्वे प्रतिरुद्धवाचः ॥ ६३

"यदि चात्मनिर्बन्धमसौ विहाय
प्रतियच्छतीमां रघुनन्दनाय ।
स्तुवते विवेकं नृपतेस्त्रिलोकाः
परितप्यतेऽसौ समयाग्रहेण ॥" ६४

तब बंदीजन जनक बोलाए। बिरिदावली कहत चलि आए ॥
कह नृपु जाइ कहहु पन मोरा। चले भाट हियँ हरषु न थोरा ॥
—बोले बंदी बचन बर सुनहु सकल महिपाल।
पन बिदेह कर कहहिं हम भुजा उठाइ बिसाल।
नृप भुजबलु बिधु सिवधनु राहू। गरुअ कठोर बिदित सब काहू ॥
रावनु बानु महाभट भारे। देखि सरासन गवँहिं सिधारे ॥
सोइ पुरारि कोदंडु कठोरा। राज समाज आजु जोइ तोरा ॥
त्रिभुवन जय समेत बैदेही। बिनहिं बिचार बरइ हठि तेही ॥

इति चिन्तयत्स्वेव तदा जनेषु
जनकः समाहूय च बन्दिवृन्दम्।
स समादिदेशाखिलभूपतिभ्यः
समयं समाख्यातुमथाध्वरस्य ॥ ६५

"शृणुतात्र भो भूपतयः समेताः
पणबन्धमुद्यम्य करान् वदामः।
जनकस्य कन्यां परिणेतुमिच्छन्
प्रथमं हि यं पूरयतेऽत्र भूपः ॥ ६६

भुजयोर्बलं वो यदि शीतरश्मिः
शिवकार्मुकं तन्ननु राहुरेव।
गुरुभारमेतद् परुषं तथैव
विदितं हि वो भूपतयः समस्तम् ॥ ६७

दशतुण्ड-बाणासुर-वीरमुख्याः
धनुरेतदार्षं कठिनं समीक्ष्य।
गतधैर्यशौर्या अपरामृशन्तो
निभृतं सुदूरेण ततोऽपयाताः ॥ ६८

तदिदं कठोरं शिवकार्मुकं भोः
प्रभनक्ति यः कोऽपि नृपेषु वीरः।
सहितं त्रिलोकी-विजय-श्रिया तम्
जनकात्मजेयं वृणुते प्रवीरम् ॥ ६९

अविचार्य किंचित्समयानुसारम्
हठपूर्वकं वीरवराय तस्मै ।
जनकः प्रदास्यत्यतिकोमलाङ्गीम्
प्रियकन्यकां माऽस्तु च संशयो वः ।।" ७०

इति बन्दिनस्ते जनकाज्ञया तान्
नृपतीन् समेतान् वरवाक्यमूचुः ।
वदतामनल्पश्च बभूव तेषां
हृदयेषु हर्षो नृप-सेवकानाम् ।। ७१

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
सीता-स्वयंवर-पणघोषणं नाम एकचत्वारिंशस्तरङ्गः ।।

तरङ्गः ४२

सुनि पन सकल भूप अभिलाषे । भटमानी अतिसय मन माखे ।।

नृपतयः समयं च निशम्य तम्
जनकजा-कर-पल्लव-कामिनः ।
निजभुजामित-विक्रम-दर्पितास्-
तृणमिवागणयन् पणमीर्ष्यया ।। १

परिकर बाँधि उठे अकुलाई । चले इष्टदेवन्ह सिर नाई ।।

सपदि ते सुनिबध्य च मध्यमम्
शिव-शरासन-भङ्ग-समुद्यताः ।
निज-पराक्रम-दर्शन-तत्पराः
स्वकुल-देवतमात्मनि सस्मरुः ।। २

तमकि ताकि तकि सिवधनु धरहीं । उठइ न कोटि भाँति बलु करहीं ।।
जिन्ह के कछु बिचारु मन माहीं । चाप समीप महीप न जाहीं ।।

समुपमगम्य धनुर्निकटे क्रमात्
समवलोक्य सगर्वमथाभितः ।
व्यवसिता धनुरुद्धरणे ततः
सकलभूपतयो बहु येतिरे ।। ३

न तु भुवश्चलितं धनुरुत्तमम्
कर-समुद्धरणस्य तु का कथा ।
तदनुवीक्ष्य विचार्य तदेतरे
न धनुषो निकटेऽपि ययुर्बुधाः ।। ४

—तमकि धरहिं धनु मूढ़ नृप उठइ न चलहिं लजाइ ।
मनहुँ पाइ भट बाहुबलु अधिकु अधिकु गरुआइ ।।
भूप सहस दस एकहि बारा । लगे उठावन टरइ न टारा ।।

रदन-पेषण-पूर्वमथाबुधाः
व्यवसिता धनुरुच्छ्रयितुं पुनः ।
प्रतिहता विफलीकृतचेष्टिताः
प्रतिययुस्त्रपिताः पुनरासनम् ।। ५

अमित-भूप-करार्पित-तेजसा
प्रचितभारमभून्नु कार्मुकम् ।
न च मनागपि चालयितुं धनुर्
दशसहस्रमलं युगपन्नृणाम् ।। ६

डगइ न संभु सरासनु कैसें । कामी बचन सती मनु जैसें ।।

कपटचाटुशतैरपि कामिनाम्
परिणमेत यथा न सती-मनः ।
नृपति-यत्न-शतैरपि कार्मुकम्
विचलितं न तथाल्पमपि स्थलात् ।। ७

सब नृप भए जोगु उपहासी। जैसें बिनु बिराग संन्यासी॥

भवति हासकरो विरतिं विना
यतिभिराचरितश्चरमाश्रमः।
सकल-भूपति-यत्न-परम्परा
ननु तथैव ययावुपहास्यताम्॥ ८

कीरति बिजय बीरता भारी। चले चाप कर बरबस हारी॥

नृपकुलैरमितैः सुचिरार्जिता
विजय-वीर्य-पराक्रम-कीर्तयः।
गमयिता विलयं ननु लीलया
पुररिपोर्धनुषैकपदे तदा॥ ९

श्रीहत भए हारि हियँ राजा। बैठे निज निज जाइ समाजा॥

प्रतिहतोद्यमभग्नमनोरथा
नृपतयः स्वमनस्यतिलज्जिताः।
निजसमाजमधोवदनास्तदा
प्रतिययुः स्वपराभव-निर्णयात्॥ १०

नृपन्ह बिलोकि जनकु अकुलाने। बोले बचन रोष जनु साने॥

नृपकुलं निखिलं च विलोक्य तद्
विगत-बाहुबलं हत-पौरुषम्।
प्रकुपितः कुपतिर्मिथिलाधिपः
पुनरुवाच वचः परुषं नृपान्॥ ११

दीप दीप के भूपति नाना। आए सुनि हम जो पनु ठाना॥
देव दनुज धरि मनुज सरीरा। बिपुल बीर आए रनधीरा॥

"परिणयस्य निशम्य पणं नृपा
वदत संमिलिताः कियताध्वना।
दनुज-देव-गणा नररूपिणो
भटवराश्च तथात्र समागताः॥ १२

तमकि ताकि तकि सिवधनु धरहीं । उठइ न कोटि भाँति बलु करहीं ॥
जिन्ह के कछु बिचारु मन माहीं । चाप समीप महीप न जाहीं ॥

समुपमगम्य धनुर्निकटे क्रमात्
समवलोक्य सगर्वमथाभितः ।
व्यवसिता धनुरुद्धरणे ततः
सकलभूपतयो बहु येतिरे ॥ ३

न तु भुवश्चलितं धनुरुत्तमम्
कर-समुद्धरणस्य तु का कथा ।
तदनुवीक्ष्य विचार्य तदेतरे
न धनुषो निकटेऽपि ययुर्बुधाः ॥ ४

—तमकि धरहिं धनु मूढ़ नृप उठइ न चलहिं लजाइ ।
मनहुँ पाइ भट बाहुबलु अधिकु अधिकु गरुआइ ॥
भूप सहस दस एकहि बारा । लगे उठावन टरइ न टारा ॥

रदन-पेषण-पूर्वमथाबुधाः
व्यवसिता धनुरुच्छ्रयितुं पुनः ।
प्रतिहता विफलीकृतचेष्टिताः
प्रतिययुस्त्रपिताः पुनरासनम् ॥ ५

अमित-भूप-करार्पित-तेजसा
प्रचितभारमभून्नु कार्मुकम् ।
न च मनागपि चालयितुं धनुर्
दशसहस्रमलं युगपन्नृणाम् ॥ ६

डगइ न संभु सरासनु कैसें । कामी बचन सती मनु जैसें ॥

कपटचाटुशतैरपि कामिनाम्
परिणमेत यथा न सती-मनः ।
नृपति-यत्न-शतैरपि कार्मुकम्
विचलितं न तथाल्पमपि स्थलात् ॥ ७

सब नृप भए जोगु उपहासी । जैसें बिनु बिराग संन्यासी ।।

भवति हासकरो विरतिं विना
यतिभिराचरितश्चरमाश्रमः ।
सकल-भूपति-यत्न-परम्परा
ननु तथैव ययावुपहास्यताम् ।। ८

कीरति बिजय बीरता भारी । चले चाप कर बरबस हारी ।।

नृपकुलैरमितैः सुचिरार्जिता
विजय-वीर्य-पराक्रम-कीर्तयः ।
गमयिता विलयं ननु लीलया
पुररिपोर्धनुषैकपदे तदा ।। ९

श्रीहत भए हारि हियँ राजा । बैठे निज निज जाइ समाजा ।।

प्रतिहतोद्यमभग्नमनोरथा
नृपतयः स्वमनस्यतिलज्जिताः ।
निजसमाजमधोवदनास्तदा
प्रतिययुः स्वपराभव-निर्णयात् ।। १०

नृपन्ह बिलोकि जनकु अकुलाने । बोले बचन रोष जनु साने ।।

नृपकुलं निखिलं च विलोक्य तद्
विगत-बाहुबलं हत-पौरुषम् ।
प्रकुपितः कुपतिर्मिथिलाधिपः
पुनरुवाच वचः परुषं नृपान् ।। ११

दीप दीप के भूपति नाना । आए सुनि हम जो पनु ठाना ।।
देव दनुज धरि मनुज सरीरा । बिपुल बीर आए रनधीरा ।।

"परिणयस्य निशम्य पणं नृपा
वदत संमिलिताः कियताध्वना ।
दनुज-देव-गणा नररूपिणो
भटवराश्च तथात्र समागताः ।। १२

कुअँरि मनोहर बिजय बड़ि कीरति अति कमनीय।
पावनिहार बिरंचि जनु रचेउ न धनु दमनीय॥
कहहु काहि यहु लाभु न भावा। काहुँ न संकर चाप चढ़ावा॥
रहउ चढ़ाउब तोरब भाई। तिलु भरि भूमि न सके छड़ाई॥
अब जनि कोउ माखै भट मानी। बीर बिहीन मही मैं जानी॥
तजहु आस निज निज गृह जाहू। लिखा न बिधि बैदेहि बिबाहू॥
सुकृतु जाइ जौं पनु परिहरऊँ। कुअँरि कुआरि रहउ का करऊँ॥
जौं जनतेउँ बिनु भट भुबि भाई। तौ पनु करि होतेउँ न हँसाई॥

न विधिना किमिहास्ति विनिर्मितो
नरवरो धनुरुन्नमने क्षमः।
विजय-विक्रम-कीर्ति-यशःश्रियै
स्पृहयतेऽत्र न कोऽपि च वा युवा॥ १३

न परिणेतुमतीव मनोरमाम्
सुयुवतीं कुलशीलवतीमिमाम्।
प्रियसुतामुचितोऽत्र वरोऽथवा
विरचितो विधिना भुवने युवा॥ १४

क्व इह भूपतयो न च वा पुनर्
वदत लाभमिमं बहु मन्यते।
न धनुरुद्धरणाय तु कस्यचित्
भुजबलं, तदवैमि विधेर्बलम्॥ १५

न चलितं शिवकार्मुकमास्पदात्
क्व पुनरुद्धरणस्य कथापि सा।
भवतु, मा परिकुप्यतु कोऽपि वः
पुरुषहीनमिदं नु धरातलम्॥ १६

परिणये च जये च हतेप्सिताः
नृपतयः प्रतिगच्छत वो गृहम्।
न लिखितो विधिना जनकात्मजा-
परिणयः किमतः क्रियतेऽत्र वा॥ १७

परिहृतः समयो यदि चाधुना सुकृतमप्यथ नश्यति मे, नृपाः ।
न विदितं भटशून्यमिदं जगत् पणवशादुपहासपदं गतः ॥" १८

जनक बचन सुनि सब नर नारी । देखि जानकिहि भए दुखारी ॥

पुरुषवाक्यमिदं जनकोदितम् पुरजनाश्च निशम्य सुदुःखिताः ।
सुभग-रूपवतीं नृप-कन्यकाम् सकरुणं ददृशुर्वलिताननाः ॥ १९

माखे लखनु कुटिल भइँ भौंहें । रदपट फरकत नयन रिसौंहें ॥

श्रुत्वा त्वेनां भर्त्सनां क्षत्रियाणाम्
क्रोधारक्तः प्रस्फुरद्दन्तवासाः ।
सभ्रू-भङ्गं वीक्ष्य सर्वान् नरेन्द्रान्
तस्थौ वीरो लक्ष्मणो लोहिताक्षः ॥ २०

कहि न सकत रघुबीर डर लगे बचन जनु बान ।
नाइ राम पद कमल सिरु बोले गिरा प्रमान ॥

विद्धोऽप्येतैर्वाक्शरैरन्तरेऽसौ
वक्तुं किंचिन्न क्षमो रामभीत्या ।
नत्वा पादौ सादरं ज्येष्ठबन्धोर्
ऊचे वाक्यं क्रोधयुक्तं यथार्थम् ॥ २१

रघुबंसिन्ह महुँ जहँ कोउ होई । तेहिं समाज अस कहइ न कोई ॥
कही जनक जसि अनुचित बानी । बिद्यमान रघुकुल मनि जानी ॥

"सत्यप्यग्रे सूर्यवंश-प्रवीरे
क्षात्रं धर्मं कोऽवमन्येत धृष्टः ।
सत्यप्यस्मिन् राघवे राजवृन्दे
राज्ञा बुद्ध्या क्षात्र-निन्दा कृतेयम् ॥ २२

सुनहु भानुकुल पंकज भानू । कहउँ सुभाउ न कछु अभिमानू ॥
जौं तुम्हारि अनुसासन पावौं । कंदुक इव ब्रह्मांड उठावौं ॥

शृणुष्व रविवंश-वारिज-रवे वचो मेऽर्थवत्
विकत्थनमिदं न मे ननु यथार्थमुक्तं प्रभो ।
यदीच्छसि च कन्दुकेन सदृशं जगद्-गोलकम्
पदाब्ज-निकटे तवात्र निदधे गृहीत्वा करे ॥ २३

काचे घट जिमि डारौं फोरी । सकउँ मेरु मूलक जिमि तोरी ॥
तव प्रताप महिमा भगवाना । को बापुरो पिनाक पुराना ॥

अपक्व-घटवच्च तं विघटये जगत्-कन्दुकम्
सुमेरुमपि चैव मूलकवदत्र भङक्ष्ये प्रभो ।
क्व ते रघुपते प्रताप-महिमा जगन्नायक
पुरातनमिदं क्व वा शिवधनुर्जरा-जर्जरम् ॥ २४

नाथ जानि अस आयसु होऊ । कौतुकु करौं बिलोकिअ सोऊ ॥
कमल नाल जिमि चाप चढ़ावौं । जोजन सत प्रमान लै धावौं ॥

यथा विदितमेव ते भुजबलं ममेदं प्रभो
तथादिश हि मां करोमि कुतुकं, तदालोकय ।
बिभर्मि च करे प्रभो कमल-नालवत् कार्मुकम्
व्रजामि शत-योजनं रघुपते ततः प्रद्रुवन् ॥ २५

–तोरौं छत्रक दंड जिमि तव प्रताप बल नाथ ।
जौं न करौं प्रभु पद सपथ कर न धरौं धनु भाथ ॥

प्रताप-बल-गौरवात्-तव विभज्य कोदण्डकम्
सलीलमिह काकछत्रकमिवोत् क्षिपामि प्रभो ।
यदीदमपि कर्तुमद्य न च मेऽस्ति बाह्वोर्बलम्
स्पृशामि न कदापि चापमिह, ते पदाभ्यां शपे ॥" २६

लखन सकोप बचन जे बोले । डगमगानि महि दिग्गज डोले ॥
सकल लोग सब भूप डेराने । सिय हियँ हरषु जनकु सकुचाने ॥

निशम्य वचनं तदीयमतिकोपयुक्तं तथा
ननु प्रचलिता मही ननु चकम्पिरे दिग्गजाः ।
दरेण पुरवासिनः पुरुभयेन भूभृत्-कुलम्
मुदा जनक-नन्दिनी परिगतो विदेहो ह्रिया ॥ २७

गुर रघुपति सब मुनि मन माहीं । मुदित भए पुनि पुनि पुलकाहीं ॥
सयनहिं रघुपति लखनु नेवारे । प्रेम समेत निकट बैठारे ॥

स्वयं रघुवरस्तथा मुनिजनास्तु हृष्टास्तदा
पुनः पुनरपि प्रहर्ष-पुलकाङ्किताः सज्जनाः ।

स वत्सलतयाग्रजोऽवरजमोजसोद्दीपितम्
समाह्वयदथान्तिके नयन-संज्ञया वारयन् ।। २८

ब्रिस्वामित्र समय सुभ जानी । बोले अति सनेहमय बानी ।।
उठहु राम भंजहु भवचापा । मेटहु तात जनक परितापा ।।

ततः सुसमयेऽवदन् मृदुगिरा मुनिर्गाधिजः
" पुरःसर सुवीर राम शिव-कार्मुकं खण्डय ।
विदेह-परितापमत्र नय नाशमात्मौजसा
प्रताप-महिमाद्य ते सुखयतु प्रभो सज्जनान् ।। " २९

सुनि गुरु बचन चरन सिरु नावा । हरषु बिषादु न कछु उर आवा ।।
ठाढ़े भए उठि सहज सुभाएँ । ठवनि जुबा मृगराजु लजाएँ ।।

निशम्य वचनं गुरोरिति समुत्थितो राघवः
ननाम शिरसा तदीय-पद-वारिजे सादरम् ।
अतीत-सुख-दुःख-युग्ममचलत् धिया निश्चलः
सलील-पद-विक्रम-त्रपित-सिंह-विक्रीडितः ।। ३०

–उदित उदयगिरि मंच पर रघुबर बालपतंग ।
बिकसे संत सरोज सब हरषे लोचन भृंग ।।
नृपन्ह केरि आसा निसि नासी । बचन नखत अवली न प्रकासी ।।
मानी महिप कुमुद सकुचाने । कपटी भूप उलूक लुकाने ।।
भए बिसोक कोक मुनि देवा । बरिसहिं सुमन जनावहिं सेवा ।।
गुर पद बंदि सहित अनुरागा । राम मुनिन्ह सन आयसु मागा ।।

अथासनगिरेरिमं समुदितं च बालं रविम्,
विलोक्य सुजनाम्बुजानि विकचान्यभूवन् क्षणात् ।
विलोचनशिलीमुखाश्च सकला जुगुञ्जुर्मुदा
गता विलयमेव भूपति मनोरथ-श्यामिका ।। ३१

हतप्रभमभूच्च तद्वचन-तारका-मण्डलम्
मदोद्धत-महीप-कैरव-कुलं च संकोचितम् ।
अभूत् कितव-भूप-कौशिक-कुलं निलीनं भृशम्
बभूव मुनिदेव-कोक-कुलमप्यशोकं तदा ।। ३२

सुमानि ववृषुर्मुदा सुमनसो मुनीन्द्रा दिवः
प्रदर्श्य रघुवीर-पाद-कमलोपचारं निजम् ।
प्रणम्य रघुनायकः सविनयं पदे श्रीगुरोः
सुधीभिरनुमोदितः प्रववृते धनुःसंनिधम् ॥ ३३

सहजहिं चले सकल जग स्वामी । मत्त मंजु बर कुंजर गामी ॥
चलत राम सब पुर नर नारी । पुलक पूरि तन भए सुखारी ॥

चचाल मत्तेभ-समान-यानः
सलील-विन्यस्त-पदोऽभिरामः ।
यदा धनुःसंनिकटे स रामो
रोमाञ्चिताङ्गाः सुखिताश्च पौराः ॥ ३४

बंदि पितर सुर सुकृत सँभारे । जौं कछु पुन्य प्रभाउ हमारे ॥
तौ सिवधनु मृनाल की नाईं । तोरहुँ रामु गनेस गोसाईं ॥

प्रणम्य देवानथ पूर्वजाँश्च
पुण्यप्रभावं हृदि संस्मरन्तः ।
पौरास्तदोचुर् हृदये गणेशम्
सीता-विवाहार्थमथार्थयन्तः ॥ ३५

"अस्माभिरीषद् यदि नाथ नूनम्
पुण्यं कृतं श्रीगणनाथ पूर्वम् ।
विभङ्क्तु रामोऽद्य पिनाकमेतद्
यथैव कश्चित् शतपत्रवृन्तम् ॥" ३६

–रामहि प्रेम समेत लखि सखिन्ह समीप बोलाइ ।
सीता मातु सनेह बस बचन कहइ बिलखाइ ॥

सखीः समाहूय तदा समीपम्
सस्नेहमालोक्य च रामचन्द्रम् ।
उवाच सीता-जननी सखेदम्
जनान्तिकं व्याकुलिता सुतार्थम् ॥ ३७

सखि सब कौतुक देखनिहारे । जेउ कहावत हितू हमारे ।।
कोउ न बुझाइ कहइ गुर पाहीं । ए बालक असि हठ भलि नाहीं ।।

" हितैषिणोऽप्यत्र मनीषिणो ये
द्रक्ष्यन्ति नो किं कुतुकं सहासम् ।
किं गाधिपुत्रोऽपि न बोध्यते वा
बालो हि रामो, न हठोऽत्र योग्यः ।। ३८

रावन बान छुआ नहिं चापा । हारे सकल भूप करि दापा ।।
सो धनु राजकुअँर कर देहीं । बाल मराल कि मंदर लेहीं ।।
भूप सयानप सकल सिरानी । सखि बिधि गति कछु जाति न जानी ।।
बोली चतुर सखी मृदु बानी । तेजवंत लघु गनिअ न रानी ।।

स्पृष्टं न यत्कार्मुकमत्र सख्यो
बाणासुरेणापि न रावणेन ।
जहार यद् भूपति-वीर्य-दर्पम्
तत्किं समुद्धर्तुमलं कुमारः ।। ३९

मन्दारमुद्धर्तुमपि क्षमो किम्
बालो मरालो वदतात्र सख्यः ।
कामं भजन्त्वन्यनृपाश्च मौनम्
तूष्णीं किमास्ते जमकोऽपि विज्ञः ।। ४०

भ्रान्ता नु राज्ञोऽपि मतिः सुतीक्ष्णा
ज्ञातुं न शक्नोमि विधेर्विलासम् " ।
श्रुत्वेति काचिच्चतुरा तदोचे
" तेजस्विनो नो वयसानुमेयाः ।। ४१

कहँ कुंभज कहँ सिंधु अपारा । सोषेउ सुजसु सकल संसारा ।।

क्व कुम्भजः क्वापि च वारि-राशिः
शुष्कीकृतः किं न तु तेन सिन्धुः ।
गायन्ति किं नास्य यशो वदात्र
महात्मनः सर्व जनास्त्रिलोके ।। ४२

सुमानि ववृषुर्मुदा सुमनसो मुनीन्द्रा दिवः
प्रदर्श्य रघुवीर-पाद-कमलोपचारं निजम् ।
प्रणम्य रघुनायकः सविनयं पदे श्रीगुरोः
सुधीभिरनुमोदितः प्रववृते धनुःसंनिधम् ॥ ३३

सहजहिं चले सकल जग स्वामी । मत्त मंजु बर कुंजर गामी ॥
चलत राम सब पुर नर नारी । पुलक पूरि तन भए सुखारी ॥

चचाल मत्तेभ-समान-यानः
सलील-विन्यस्त-पदोऽभिरामः ।
यदा धनुःसंनिकटे स रामो
रोमाञ्चिताङ्गाः सुखिताश्च पौराः ॥ ३४

बंदि पितर सुर सुकृत सँभारे । जौं कछु पुन्य प्रभाउ हमारे ॥
तौ सिवधनु मृनाल की नाईं । तोरहुँ रामु गनेस गोसाईं ॥

प्रणम्य देवानथ पूर्वजाँश्च
पुण्यप्रभावं हृदि संस्मरन्तः ।
पौरास्तदोचुर् हृदये गणेशम्
सीता-विवाहार्थमथार्थयन्तः ॥ ३५

"अस्माभिरीषद् यदि नाथ नूनम्
पुण्यं कृतं श्रीगणनाथ पूर्वम् ।
विभङ्क्तु रामोऽद्य पिनाकमेतद्
यथैव कश्चित् शतपत्रवृन्तम् ॥" ३६

–रामहि प्रेम समेत लखि सखिन्ह समीप बोलाइ ।
सीता मातु सनेह बस बचन कहइ बिलखाइ ॥

सखीः समाहूय तदा समीपम्
सस्नेहमालोक्य च रामचन्द्रम् ।
उवाच सीता-जननी सखेदम्
जनान्तिकं व्याकुलिता सुतार्थम् ॥ ३७

सखि सब कौतुक देखनिहारे । जेउ कहावत हितू हमारे ।।
कोउ न बुझाइ कहइ गुर पाहीं । ए बालक असि हठ भलि नाहीं ।।

" हितैषिणोऽप्यत्र मनीषिणो ये
द्रक्ष्यन्ति नो किं कुतुकं सहासम् ।
किं गाधिपुत्रोऽपि न बोध्यते वा
बालो हि रामो, न हठोऽत्र योग्यः ।। ३८

रावन बान छुआ नहिं चापा । हारे सकल भूप करि दापा ।।
सो धनु राजकुअँर कर देहीं । बाल मराल कि मंदर लेहीं ।।
भूप सयानप सकल सिरानी । सखि बिधि गति कछु जाति न जानी ।।
बोली चतुर सखी मृदु बानी । तेजवंत लघु गनिअ न रानी ।।

स्पृष्टं न यत्कार्मुकमत्र सख्यो
बाणासुरेणापि न रावणेन ।
जहार यद् भूपति-वीर्य-दर्पम्
तत्किं समुद्धर्तुमलं कुमारः ।। ३९

मन्दारमुद्धर्तुमपि क्षमो किम्
बालो मरालो वदतात्र सख्यः ।
कामं भजन्त्वन्यनृपाश्च मौनम्
तूष्णीं किमास्ते जनकोऽपि विज्ञः ।। ४०

भ्रान्ता नु राज्ञोऽपि मतिः सुतीक्ष्णा
ज्ञातुं न शक्नोमि विधेर्विलासम् " ।
श्रुत्वेति काचिच्चतुरा तदोचे
" तेजस्विनो नो वयसानुमेयाः ।। ४१

कहँ कुंभज कहँ सिंधु अपारा । सोषेउ सुजसु सकल संसारा ।।

क्व कुम्भजः क्वापि च वारि-राशिः
शुष्कीकृतः किं न तु तेन सिन्धुः ।
गायन्ति किं नास्य यशो वदात्र
महात्मनः सर्व जनास्त्रिलोके ।। ४२

रबि मंडल देखत लघु लागा । उदयँ तासु तिभुवन तम भागा ।।
–मंत्र परम लघु जासु बस बिधि हरि हर सुर सर्ब ।

उच्छेदयत्यन्धतमस्त्रिलोकात्
किं नाल्पकायं ननु सूर्य-बिम्बम् ।
स्वल्पस्य मन्त्रस्य भवन्ति वश्याः
ब्रह्मादयो राज्ञि न किं सुरेन्द्राः ।। ४३

महामत्त गजराज कहुँ बस कर अंकुस खर्ब ।।
काम कुसुम धनु सायक लीन्हे । सकल भुवन अपनें बस कीन्हे ।।

महाशरीरोऽपि च कुञ्जरोऽसौ
मत्तोऽपि चाल्पाङ्कुशवश्य एव ।
पौष्पैः शरैरप्यथ पुष्पधन्वा
निरोधयत्येव जगत् समस्तम् ।। ४४

देबि तजिअ संसउ अस जानी । भंजब धनुषु राम सुनु रानी ।।

विचार्य चैवं हृदि राज्ञि सर्वम्
त्यजस्व संदेहमथात्र विज्ञे ।
निःसंशयं छेत्स्यति कार्मुकं तत्
कुमारवीरः स हि रामचन्द्रः ।।" ४५

सखी बचन सुनि भै परतीती । मिटा बिषादु बढ़ी अति प्रीती ।।

निशम्य सख्या वचनं तदैवम्
विश्वस्तभावा जननी कुमारे ।
यातो विषादो विलयं तदास्याः
प्रावर्धत प्रेम च राघवेऽस्याः ।। ४६

तब रामहि बिलोकि बैदेही । सभय हृदयँ बिनवति जेहि तेही ।।
मनहीं मन मनाव अकुलानी । होहु प्रसन्न महेस भवानी ।।
करहु सफल आपनि सेवकाई । करि हितु हरहु चाप गरुआई ।।

समुत्थितं वीक्ष्य च रामचन्द्रम्
संभ्रान्त-भीता मिथिलेश-कन्या ।
अयाचतात्मन्यखिलान् सुरान् सा
यशःप्रदानं प्रिय-राघवाय ।। ४७

"हर हर शङ्कर करुणासागर प्रसीद मे, गिरिजे विपदं हर।
कृतोपचर्या फलतु मदीया दूरीकुरुतं कार्मुकभारम् ॥ ४८

गननायक बरदायक देवा। आजु लगें कीन्हिउँ तुअ सेवा॥
बार बार बिनती सुनि मोरी। करहु चाप गुरुता अति थोरी॥

हे गणनायक हे वरदायक
सफलीकुरु मे कृत-पद-सेवाम्।
भूयोऽप्येवं शृणु मे याच्ञाम्
अपनय गजमुख धनुषो भारम् ॥" ४९

–देखि देखि रघुबीर तन सुर मनाव धरि धीर।
भरे बिलोचन प्रेम जल पुलकावली सरीर॥

वारं वारं वीक्ष्य सरागम्
सीता रघुवर-कोमल-गात्रम्।
गत्वा पुनरपि सुर-पद-शरणम्
निदधे कथमपि हृदये धीरम् ॥ ५०

विलोकयन्ती राघव-रूपम्
पुनरपि सीता श्यामल-वर्णम्।
प्रेमाश्रु-प्लुत-नयन-सरोजा
सुख-पुलकाङ्कित-निखिल-शरीरा ॥ ५१

नीकें निरखि नयन भरि सोभा। पितु पनु सुमिरि बहुरि मनु छोभा॥
अहह तात दारुनि हठ ठानी। समुझत नहिं कछु लाभु न हानी॥

निरीक्ष्य वारं वारं रामम्
विचिन्त्य चैवं परिणय-समयम्।
व्याकुलिता दोलायित-चित्ता
मेने मनसा जनकसुता सा ॥ ५२

"अहो दारुणः परिणय-समयो
दृढ-हृदयोऽयं पिता ममैवम्।
जानीते न हि लाभालाभौ
मिथ्या-गौरव-वञ्चित-हृदयः॥ ५३

सचिव सभय सिख देइ न कोई । बुध समाज बड़ अनुचित होई ।।
कहँ धनु कुलिसहु चाहि कठोरा । कहँ स्यामल मृदुगात किसोरा ।।

सचिवाः सभयं भजन्ति मौनम्
किमपि न कथयति बुध-जन-वृन्दम् ।
क्व नु खलु चापं कुलिश-कठोरम्
क्व चातिकोमल-राम-शरीरम् ।। ५४

बिधि केहि भाँति धरौं उर धीरा । सिरस सुमन कन बेधिअ हीरा ।।

कथं विधेऽहं निदधे धीरम्
कथं सहिष्ये परिभवमेनम् ।
कथं पिता मे चिकीर्षतेऽयम्
शिरीष-रजसा हीरक-भङ्गम् ।। ५५

सकल सभा कै मति भै भोरी । अब मोहि संभुचाप गति तोरी ।।
निज जड़ता लोगन्ह पर डारी । होहि हरुअ रघुपतिहि निहारी ।।

भ्रान्ते सकल-सभाजन-वृन्दे
शिवधनुषोऽन्या कुतो गतिर्मे ।
संक्रामय निजजडतामेनाम्
अयि शिव-कार्मुक जनक-सभायाम् ।। ५६

विलोकयेदं रघुपतिरूपम्
श्यामल-कोमल-मञ्जुल-गात्रम् ।
अपनय भारं भव लघुसारम्
महेश-कार्मुक कुरु प्रसादम् ।।" ५७

अति परिताप सीय मन माहीं । लव निमेष जुग सय सम जाहीं ।।

संतप्यमाना हृदये तदैवम्
विदेह-कन्या विललाप चार्तम् ।
निमेषमस्या बहुदुःखितायाः
शतैर्युगैरेव समानमासीत् ।। ५८

–प्रभुहि चितइ पुनि चितव महि राजत लोचन लोल ।
खेलत मनसिज मीन जुग जनु बिधु मंडल डोल ॥

विलोकयन्ती रघुवंश-वीरम्
विदेह-कन्या दयितं सरागम् ।
लज्जाधिरूढा पुनरानताक्षी
क्रमेण रामं भुवमैक्षतैषा ॥ ५९

व्यराजताक्षणोरतिलोलयुग्मं
चन्द्राननाया जनकात्मजायाः ।
ज्योत्स्ना-सुधा-पूरित-चन्द्रपात्रे
क्रीडद्यथा मन्मथ-मीन-युग्मम् ॥ ६०

गिरा अलिनि मुख पंकज रोकी । प्रगट न लाज निसा अवलोकी ॥

शब्द-द्विरेफो जनकात्मजाया
लज्जान्धकारे मुख-पद्मबद्धः ।
नासीत् समर्थो बहिरेतुमास्यात्
गुञ्जन्नथासीत् मुख-पद्म-कोशे ॥ ६१

लोचन जलु रह लोचन कोना । जैसें परम कृपन कर सोना ॥

अपाङ्गयोरेव तदा निरुद्धम्
तल्लोचनापाङ्गजवारि तस्थौ ।
यथा न दत्तं न च वापि भुक्तम्
द्रव्यं निरुद्धं कृपणस्य हस्ते ॥ ६२

सकुची ब्याकुलता बड़ि जानी । धरि धीरजु प्रतीति उर आनी ॥

'औत्सुक्यभावो मनसो न युक्तो'
ज्ञात्वेति लज्जाकुलिता तदा सा ।
आस्थाय धैर्यं स्वयमन्तरङ्गे
विश्वस्त-चित्ता पुनरेव भूता ॥ ६३

तन मन बचन मोर पनु साचा । रघुपति पद सरोज चितु राचा ॥

"यथा हि वाक्-काय-मनोभिरस्मिन्
श्रीरामचन्द्रे निरता सदाहम् ।
तत्पादपद्माभिनिविष्टमेतत्
चित्तं न मे चिन्तयतेऽन्यदस्मात् ॥ ६४

तौ भगवानु सकल उर बासी । करिहि मोहि रघुबर कै दासी ॥
जेहि कें जेहि पर सत्य सनेहू । सो तेहि मिलइ न कछु संदेहू ॥

तन्मे परेशः सकलान्तरस्थो
दास्यत्यवश्यं पददास्यमस्य ।
यस्यास्ति यस्मिन् दृढ-भक्ति-भावः
स तेन संगच्छति नात्र शङ्का ॥" ६५

प्रभु तन चितइ प्रेम तन ठाना । कृपानिधान राम सबु जाना ॥
सियहि बिलोकि तकेउ धनु कैसें । चितव गरुरु लघु ब्यालहि जैसें ॥

प्रत्यायितेति प्रसभं स्वचित्ते
ददर्श भूयोऽपि विदेहकन्या ।
श्रीरामचन्द्रं नयनाभिरामम्
दृढीकृतात्मव्यवसायबन्धा ॥ ६६

कृपा-निधानं रघुवंश-केतुः
सर्वं विदित्वैक्षत राजकन्याम् ।
पुनस्तथा कार्मुकमैक्षतासौ
यथा द्विजिह्वं द्विजराज-राजः ॥ ६७

—लखन लखेउ रघुबंसमनि ताकेउ हर कोदंडु ।
पुलकि गात बोले बचन चरन चापि ब्रह्मांडु ॥

यावत्कटाक्षो रघुवंशकेतोः
तथा महेशस्य पपात चापे ।
तावत् स रामावरजोऽपि जातः
प्रहर्ष-रोमाञ्चित-सर्वगात्रः ॥ ६८

ब्रह्माण्डगोलं सह भूतलेन
पादप्रहारेण स पीडयित्वा ।
उच्चैरवोचत् प्रथमं विजानन्
घोरं धनुर्भङ्गफलं तदैवम् ।। ६९

दिसि कुंजरहु कमठ अहि कोला । धरहु धरनि धरि धीर न डोला ।।
रामु चहहिं संकर धनु तोरा । होहु सजग सुनि आयसु मोरा ।।

"हे शेष हे कच्छप हे वराह
हे दिग्गजा धैर्यमिहावलम्ब्य ।
सर्वेऽप्रमत्ता भवतात्मकार्ये
शृणुध्वमेतन्निपुणं वचो मे ।। ७०

गृह्णीध्वमेनां सुदृढं धरित्रीम्
नो चेदवश्यं प्रचलिष्यतीयम् ।
बिभित्सतेऽसौ रघुवंशवीरो
रामोऽद्य घोरं शिवचापमेतद् ।।" ७१

चाप समीप रामु जब आए । नर नारिन्ह सुर सुकृत मनाए ।।

याते धनुः संनिकटेऽथ रामे
पौराः स्मरन्तः सुकृतं सुराँश्च ।
ययाचिरे स्वात्मनि देवतास्ताः
सिद्धि समारब्ध-धनुःप्रकल्पे ।। ७२

सब कर संसउ अरु अग्यानू । मंद महीपन्ह कर अभिमानू ।।
भृगुपति केरि गरब गरुआई । सुत मुनिबरन्ह केरि कदराई ।।

अज्ञानशङ्के च तदा जनानाम्
दर्पस्तथा मूर्खनरेश्वराणाम् ।
गर्वान्धता श्रीभृगुनन्दनस्य
भयम् मुनीनां च दिवौकसां च ।। ७३

सिय कर सोचु जनक पछितावा । रानिन्ह कर दारुन दुख दावा ॥
संभुचाप बड़ बोहितु पाई । चढे जाइ सब संगु बनाई ॥
राम बाहुबल सिंधु अपारू । चहत पारु नहिं कोउ कड़हारू ॥

औत्कण्ठ्यमेवं जनकात्मजाया
मनोव्यथा सा च विदेहराज्ञः ।
राज्ञीजनस्यापि च दुःखवह्निः
सर्वे मिलित्वा ननु तत्र सज्याः ॥ ७४

श्रीरामसामर्थ्यजलाशयस्य
पारं नु निर्धारयितुं परं ते ।
सर्वे धनुर्नावमथाधिरूढाः
विनैव नौकाधिपतिं तदैवम् ॥ ७५

—राम बिलोके लोग सब चित्र लिखे से देखि ।
चितई सीय कृपायतन जानी बिकल बिसेषि ॥
देखी बिपुल बिकल बैदेही । निमिष बिहात कलप सम तेही ॥

चित्रे निविष्टमिव भूपतिमण्डलं तद्
रामो ददर्श सकलं करुणानिधानम् ।
यस्याः क्षणः शतयुगेन समानमानः
सीतां ददर्श च तथा विकलां पुरः सः ॥ ७६

तृषित बारि बिनु जो तनु त्यागा । मुएँ करइ का सुधा तड़ागा ॥
का बरषा सब कृषी सुखानें । समय चुकें पुनि का पछितानें ॥

'अप्राप्य वारिकणमेव मृते तृषार्ते
किं कार्यमत्र सरसामृतपूरितेन ।
शुष्के तथा कृषिफले किमु वृष्टिपातः
पश्चाद्व्यथा ननु वृथा समये व्यतीते ॥' ७७

अस जियँ जानि जानकी देखी । प्रभु पुलके लखि प्रीति बिसेषी ॥

एवं विचिन्त्य मनसा रघुनन्दनोऽसौ
भूयो ददर्श विकलां मिथिलेशकन्याम् ।
विज्ञाय तत्प्रणयभावमथान्तरङ्गे
प्रीत्या बभूव पुलकाङ्कितसर्वगात्रः ॥ ७८

गुरहि प्रनामु मनहिं मन कीन्हा। अति लाघवँ उठाइ धनु लीन्हा॥
दमकेउ दामिनि जिमि जब लयऊ। पुनि नभ धनु मंडल सम भयऊ॥

निध्याय चात्मनि गुरुं रघुवंशवीरो
यत्नैर्विनैव धनुरुन्नमयाँश्चकार।
हस्ते धृतं तडिदिवोज्ज्वलदिव्यभासा
विस्फूर्ज्य तन्नभसि मण्डलितं बभूव॥ ७९

लेत चढ़ावत खैंचत गाढें। काहुँ न लखा देख सबु ठाढें॥

उन्नामितं ननु कदा कृतमाततज्यम्
तत्कार्मुकं ननु कदा रभसा च कृष्टम्।
दृष्टं न केनचिदहो प्रजवी स वीरस्
तस्थौ धनुर्धरवरः पुरतः सभायाः॥ ८०

तेहि छन राम मध्य धनु तोरा। भरे भुवन धुनि घोर कठोरा॥

यावच्छरासनमसावभनङ्क्तदेवम्
मध्ये द्विधा बलनिधिर् रघुवंशवीरः।
तावत् त्रिलोकभयकारणमुद्बभूव
दुर्दारुणःश्रुतिकठोररवोऽन्तराले॥ ८१

—भरे भुवन घोर कठोर रव रबि बाजि तजि मारगु चले।
चिक्करहिं दिग्गज डोल महि अहि कोल कूरुम कलमले॥
सुर असुर मुनि कर कान दीन्हे सकल बिकल बिचारहीं।
कोदंड खंडेउ राम तुलसी जयति बचन उचारहीं॥

मार्गच्युताः रवे सवितुस्तुरङ्गाः
जगर्जुरुच्चैरथ दिग्गजाश्च।
तत्कार्मुक-ध्वंसन-घोरनादात्
दोलायमाना वसुधा चकम्पे॥ ८२

शेषस्तथा चादिवराहराजः
कूर्मोऽपि भूधारणकर्मदूनाः।
मुनीश्वरा दानवदेवसंघास्
तस्थुः सचिन्ताः प्रतिरुद्धकर्णाः॥ ८३

'हे सूर्यवंशप्रभव प्रवीर
जयोऽस्तु ते राघव विक्रमार्क ।'
जगर्जुरुच्चैर्जयशब्दमेवम्
विज्ञाय भूतार्थमतीव हृष्टाः ।। ८४

'भग्नं द्विधेदं धनुरद्य नूनम्
रामेण वीरोचितविक्रमेण ।'
परस्परं ते कथयन्त उच्चैर् —
आनन्दबाष्पप्लुतनेत्रयुग्माः ।। ८५

—संकर चापु जहाजु सागरु रघुबर बाहुबलु ।
बूड़ सो सकल समाजू चढ़ा जो प्रथमहिं मोह बस ।।
रघुवरभुजवीर्यं सागरोऽनन्तपारः
शिवधनुरपि नौकायानमत्यद्भुतं तद् ।
जिगमिषुरथ पारं मूढसंघः सभायाम्
जलनिधिजलमध्ये संप्लुतः सर्व एव ।। ८६

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
शिवधनुर्भङ्गो नाम द्विचत्वारिंशस्तरङ्गः ।



तरङ्गः ४३

प्रभु दोउ चापखंड महि डारे। देखि लोग सब भए सुखारे ॥

द्विधा भङ्क्त्वा धनू रामः खण्डौ चिक्षेप भूतले।
दृष्ट्वा सर्वेऽपि सुप्रीताः सुखिताश्च सभाजनाः ॥ १

कौसिकरूप पयोनिधि पावन। प्रेम बारि अवगाहु सुहावन ॥

समुद्रोऽनन्तपारोऽसौ विश्वामित्रः सुपावनः।
अगाधैः सुभगैर्योऽयं पूरितः प्रेमबारिभिः ॥ २

रामरूप राकेसु निहारी। बढ़त बीचि पुलकावलि भारी ॥

दृष्ट्वा वीरावतंसं तं राकेशं रघुनन्दनम्।
प्रावर्ततेव सावेगं हर्षरोमाञ्चवीचिभिः ॥ ३

बाजे नभ गहगहे निसाना। देवबधू नाचहिं करि गाना ॥

आपूरितं नभश्चैवं तदा दुन्दुभिनिःस्वनैः।
ननृतुः सुरसाम्राज्ये गायन्त्योऽप्सरसो मुदा ॥ ४

ब्रह्मादिक सुर सिद्ध मुनीसा। प्रभुहि प्रसंसहिं देहिं असीसा ॥

ब्रह्मादिकसुराः सर्वे सिद्धाश्चैवं मुनीश्वराः।
महावीरं प्रभुं स्तुत्वा ददुराशिषमुत्तमाम् ॥ ५

बरिसहिं सुमन रंग बहु माला। गावहिं किंनर गीत रसाला ॥

नानावर्णविचित्राश्च ववृषुः कुसुमस्रजः।
सुस्वरं च जगुः सर्वे यक्षगंधर्वकिन्नराः ॥ ६

रही भुवन भरि जय जय बानी। धनुषभंग धुनि जात न जानी ॥

ब्रह्माण्डं पूरितं सर्वं जयशब्देन सर्वतः।
धनुर्भङ्गमहानादोऽप्यस्मिन्नेव लयं गतः ॥ ७

मुदित कहहिं जहँ जहँ नर नारी। भंजेउ राम संभुधनु भारी ॥

मुदिता नरनार्यश्च कथयामासुरध्वरे।
'रामेण कार्मुकं भग्न'मित्येव च परस्परम् ॥ ८

—बंदी मागध सूतगन बिरुद बदहिं मतिधीर ।
करहिं निछावरि लोग सब हय गय धन मनि चीर ।।

बन्दिमागधसूताश्च यशोगानपरायणाः ।
गजाश्वधनवस्त्राणि ददुः प्रमुदिताः जनाः ।। ९

झाँझि मृदंग संख सहनाई । भेरि ढोल दुंदुभी सुहाई ।।

शंखभेरी-मृदङ्गाश्च तूर्यदुन्दुभयस्तथा ।
झल्लकानि तथैवोच्चैश्चक्रुर्विजयघोषणाम् ।। १०

बाजहिं बहु बाजने सुहाए । जहँ तहँ जुबतिन्ह मंगल गाए ।।

वादित्रघोषो नगरे सर्वत्र व्यनुनादितः ।
युवत्यश्च जगुः सर्वाः शुभगानं पुरे तदा ।। ११

सखिन्ह सहित हरषी अति रानी । सूखत धान परा जनु पानी ।।

मुमुदे मिथिलाराज्ञी सखीभिः सह निर्वृता ।
शुष्के कृषिफले नूनं जलसेकः सुशीतलः ।। १२

जनक लहेउ सुखु सोचु बिहाई । पैरत थकें थाह जनु पाई ।।

परितापं विहायासौ विदेहो मुमुदे भृशम् ।
तरणेन परिश्रान्तस्तीरं वीक्ष्य यथा नरः ।। १३

श्रीहत भए भूप धनु टूटे । जैसें दिवस दीप छबि छूटे ।।

भग्ने धनुषि चैवास्मिन् राजानो नैव रेजिरे ।
यथा दीपा न शोभन्ते दिवा मन्दप्रकाशिनः ।। १४

सीय सुखहि बरनिअ केहि भाँती । जनु चातकी पाइ जलु स्वाती ।।

चातकी जललाभेन स्वात्यां तुष्येद्यथैव सा ।
तथा हृष्टा तदा सीता कोऽलं वर्णयितुं मुदम् ।। १५

रामहि लखनु बिलोकत कैसें । ससिहि चकोर किसोरकु जैसें ।।

दृष्ट्वाग्रजं च सौमित्रिस्तथा प्रीतस्तदाभवत् ।
चन्द्रं दृष्ट्वा यथा कश्चित् हृष्येत् बालचकोरकः ।। १६

सतानंद तब आयसु दीन्हा । सीताँ गमनु राम पहिं कीन्हा ॥

शतानन्देन चादिष्टा जगाम जनकात्मजा ।
वेदिकायां च यत्रासावतिष्ठद् रघुनन्दनः ॥ १७

—संग सखीं सुंदर चतुर गावहिं मंगलचार ।

शोभनाभिः सखीभिः सा चतुराभिश्च संगता ।
गायन्तीभिश्च वैदेही ययौ श्रीरामसन्निधौ ॥ १८

गवनी बाल मराल गति सुषमा अंग अपार ॥

लावण्यसुषमा सेयं तथाराजत जानकी ।
बालहंसी यथा लोके गच्छन्तीव सविभ्रमम् ॥ १९

सखिन्ह मध्य सिय सोहति कैसें । छबिगन मध्य महाछबि जैसें ॥
कर सरोज जयमाल सुहाई । बिस्व बिजय सोभा जेहिं छाई ॥

शोभनासु महाशोभा शुशुभे जनकात्मजा ।
जगद्विजयरूपश्रीः कराब्जधृतमालिका ॥ २०

तन सकोचु मन परम उछाहू । गूढ़ प्रेमु लखि परइ न काहू ॥

तनुः संकोचिता चास्याः स्त्रीजनोचितलज्जया ।
मनः समुत्सुकं स्वस्याः अव्यक्त-प्रणयातुरम् ॥ २१

जाइ समीप राम छबि देखी । रहि जनु कुअँरि चित्र अवरेखी ॥

श्रीरामसन्निधौ गत्वा वीक्ष्य रूपं मनोहरम् ।
चित्रीकृतेव सा तस्थौ विस्मयाक्रान्तमानसा ॥ २२

चतुर सखीं लखि कहा बुझाई । पहिरावहु जयमाल सुहाई ॥

विज्ञाय तन्मनोऽवस्थां चतुरा कापि तत्सखी ।
'अर्पयास्मै शुभां माला'मित्यूचे मृदुमञ्जुलम् ॥ २३

सुनत जुगल कर माल उठाई । प्रेम बिबस पहिराइ न जाई ॥

उद्दधार च तां मालां श्रुत्वा सीता सखीवचः ।
अनुरागवशा त्वासीत्कण्ठेऽर्पयितुमक्षमा ॥ २४

सोहत जनु जुग जलज सनाला । ससिहिं सभीत देत जयमाला ॥

तत्करद्वयरूपेण सनाल-कमलद्वयम् ।
न्यदधात् सभयं नूनं मालां शीतकरोरसि ॥ २५

गावहिं छबि अवलोकि सहेली । सियँ जयमाल राम उर मेली ॥

विलोक्य च तथा सीतां स्तिमितां चारुदर्शनाम् ।
गानमारेभिरे सर्वाः सख्यः सुप्रीतमानसाः ॥ २६
लज्जाभयसमाक्रान्ता झटित्येव तदा वधूः ।
निदधे वरमालां तां रामचन्द्रगले मुदा ॥ २७

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
वरमालासमर्पणं नाम त्रिचत्वारिंशस्तरङ्गः ।

तरङ्गः ४४

—रघुबर उर जयमाल देखि देव बरिसहिं सुमन ।

हृदयं विश्वनाथस्य वरमालासनाथितम् ।
विलोक्य विबुधास्तुष्टा ववृषुः कुसुमान्यथ ॥ १

सकुचे सकल भुआल जनु बिलोकि रबि कुमुदगन ॥

संकोचितास्तदा सर्वे समवेता महीभृतः ।
संकुचन्ति रविं वीक्ष्य कुमुदानां गणा यथा ॥ २

पुर अरु ब्योम बाजने बाजे । खल भए मलिन साधु सब राजे ॥

तूर्यभेरीस्वनैः पूर्णं गगनं नगरं च तद् ।
सुखिताः सज्जनाः सर्वे दुर्जना दुर्मनायिताः ॥ ३

सुर किंनर नर नाग मुनीसा । जय जय जय कहि देहिं असीसा ॥

नरकिन्नरदेवाश्च नागाश्च मुनयस्तथा ।
शुभाशीर्वचनैः सार्धं चक्रुर्विजयघोषणाम् ॥ ४

नाचहिं गावहिं बिबुध बधूटीं । बार बार कुसुमांजलि छूटीं ।।

स्वर्गाङ्गनाश्च गायन्त्यो ननृतुर्मोदपूरिताः ।
वारं वारं बभूवैवं पुष्पवृष्टिः सुरालयात् ।। ५

जहँ तहँ बिप्र बेदधुनि करहीं । बंदी बिरिदावलि उच्चरहीं ।।

विप्रवर्गश्चकारोच्चैः श्रुतिमन्त्रध्वनिं तथा ।
राजवंशयशोगाने रता मागधबन्दिनः ।। ६

महि पाताल नाक जसु व्यापा । राम बरी सिय भंजेउ चापा ।।

भग्नं शरासनं शंभोर्विजिता वरमालिका ।
रघुवीरेण रामेणे'त्येवं लोकत्रये श्रुतम् ।। ७

करहिं आरती पुर नर नारी । देहिं निछावरि बित्त बिसारी ।।

मिथिलायां तदार्तिक्यं चक्रुः पौराः सुमंगलम् ।
स्वशक्ति चाप्यतिक्रम्य ददुर्दानानि ते मुदा ।। ८

सोहति सीय राम कै जोरी । छबि सिंगारु मनहुँ एक ठोरी ।।

श्रीरामजानकीयुग्मं व्यराजत मनोहरम् ।
शृङ्गारेण यथा शोभा संयुक्ता शोभते भृशम् ।। ९

सखीं कहहिं प्रभुपद गहु सीता । करति न चरन परस अति भीता

"प्रभुपादाम्बुजे सीते प्रणमे"ति सखीजनैः ।
बोधिताप्यसकृत्सीता प्रणनाम न तत्पदे ।। १०

—गौतम तिय गति सुरति करि नहिं परसति पग पानि ।

श्रीरामचरणस्पर्शात् पाषाणादुत्थितां तथा ।
मुनिभार्यां हृदि स्मृत्वा पादस्पर्शान्निववृते ।। ११

मन बिहसे रघुबंसमनि प्रीति अलौकिक जानि ।

प्रत्यायितस्तु तत्प्रेम्णा श्रीरामः करुणाकरः ।
विदित्वा तां भयोद्विग्नां जहासात्मनि सर्वविद् ।। १२

तब सिय देखि भूप अभिलाषे । कूर कपूत मूढ़ मन माखे ।।

वीक्ष्य सीतां तथा केचिद्राजानः कामपीडिताः ।
मूढाः समत्सराः क्रुराश्चुकुपुः पुनरात्मनि ।। १३

उठि उठि पहिरि सनाह अभागे । जहँ तहँ गाल बजावन लागे ।।

उत्थायोत्थाय ते सर्वे हतभाग्या महीभृतः ।
परिधाय तनुत्राणान्यजल्पन् पुनरुद्धतम् ।। १४

लेहु छड़ाइ सीय कह कोऊ । धरि बाँधहु नृप बालक दोऊ ।।

"सीतां हरत हे वीराः निगृह्य भ्रातराविमौ ।"
इत्यवोचन् मदोन्मत्ताः बुद्धिहीनं परस्परम् ।। १५

तोरें धनुषु चाड़ नहिं सरई । जीवत हमहि कुअँरि को बरई ।।

"धनुर्भञ्जनमात्रेण विवाहो नात्र सिध्यति ।
जीवत्स्वस्मासु को नाम परिणेष्यति जानकीम् ।। १६

जौं बिदेहु कछु करै सहाई । जीतहु समर सहित दोउ भाई ।।

पक्षपाती विदेहोऽपि रामलक्ष्मणयोर्यदि ।
जेष्यामहे सहैवैनं भ्रातृभ्यां रणसंगरे ।।" १७

साधु भूप बोले सुनि बानी । राजसमाजहि लाज लजानी ।।

इत्याकर्ण्य तदा तेषां नरेन्द्राणां विकत्थनम् ।
साधवश्च तथा धीरा ऊचुरेवं परस्परम् ।। १८

"अहो मौर्ख्यमहो धाष्टर्चमहो लज्जाविहीनता ।
दृष्ट्वैनान् लज्जिता नूनं लज्जाप्यद्य महीतले ।। १९

बलु प्रतापु बीरता बड़ाई । नाक पिनाकहि संग सिधाई ।।
सोइ सूरता कि अब कहुँ पाई । असि बुधि तौ बिधि मुहँ मसि लाई ।।

सह कार्मुकभङ्गेण गतं वीर्यं बलं च वः ।
गतो दर्पः प्रतिष्ठापि विक्रमोऽपि च वो गतः ।। २०

अयि क्षुद्रा महीपाला विनष्टं सर्वमेव वः ।
कुतस्तर्हि पुनः प्राप्ता शूरतेयं युयुत्सवः ।। २१

यथा हि मतयश्चैवं युष्माकं दूषिताः सदा ।
मसीलिप्तानि तेनैव विधिना वदनानि वः ।। २२

– देखहु रामहि नयन भरि तजि इरिषा मदु कोहु ।

विहाय क्रोधमीर्ष्यां च दर्पमद्य नरेश्वराः ।
लभध्वं नेत्रनिर्वाणं दृष्ट्वैनं रघुनन्दनम् ।। २३

लखन रोषु पावकु प्रबल जानि सलभ जनि होहु ।।

सौमित्रिक्रोधमप्येनं जानीत ज्वलन-प्रभम् ।
पतङ्गवद् वृथैवास्मिन् किं पतिष्यथ भूमिपाः ।। २४

बैनतेय बलि जिमि चह कागू । जिमि ससु चहै नाग अरि भागू ।।

संविभागः कथं मूढाः काकस्येह गरुत्मता ।
शशकस्य च सिंहेन कथयध्वं महीभृतः ।। २५

जिमि चह कुसल अकारन कोही । सब संपदा चहै सिवद्रोही ।।
लोभी लोलुप कल कीरति चहई । अकलंकता कि कामी लहई ।।
हरि पद बिमुख परम गति चाहा । तस तुम्हार लालचु नरनाहा ।।

यथा कश्चिद् वृथाक्रोधी स्पृहयेत् कुशलाय भोः ।
धनाय च शिवद्रोही यशसे लोलुपस्तथा ।। २६

मोक्षाय च यथा कश्चिद् विमुखो हरिपादयोः ।
विशुद्धत्वाय वा कामी तथेयं भवतां स्पृहा ।। " २७

कोलाहलु सुनि सीय सकानी । सखीं लवाइ गईं जहँ रानी ।।

कोलाहलमिमं श्रुत्वा शङ्किता जनकात्मजा ।
सखीभिः शीघ्रमानीता मातुः संनिकटे तदा ।। २८

रामु सुभायँ चले गुरु पाहीं । सिय सनेहु बरनत मन माहीं ।।

चिन्तयन् मनसा चैवं सीतालावण्यमद्भुतम् ।
रामचन्द्रस्ततो यातः स्थितधीर्गुरुसन्निधौ ।। २९

रानिन्ह सहित सोचबस सीया। अब धौं बिधिहि काह करनीया॥

'न जाने किं पुनर्धात्रा लिखितं, किं भविष्यति।'
इत्यासीच्चिन्तया ग्रस्ता जनन्या सह जानकी॥ ३०

भूप बचन सुनि इत उत तकहीं। लखनु राम डर बोलि न सकहीं॥

श्रुत्वा विकत्थनं राज्ञां प्रक्षुब्धो लक्ष्मणस्तदा।
सक्रोधं सर्वतः पश्यन् भ्रातुरग्रे निरुद्धवाक्॥ ३१

—अरुन नयन भृकुटी कुटिल चितवत नृपन्ह सकोप।

सभ्रूभङ्गं स सावज्ञं क्रोधारक्तविलोचनः।
ददर्श नृपतीन् सर्वान् सभायां राघवानुजः॥ ३२

मनहुँ मत्त गजगन निरखि सिंघकिसोरहि चोप

संक्षुभ्यति हि सावेगं यथा सिंहकिशोरकः।
दृष्ट्वा नागान् मदोन्मत्तान् तथादृश्यत लक्ष्मणः॥ ३३

खरभरु देखि बिकल पुर नारीं। सब मिलि देहिं महीपन्ह गारीं॥

कोलाहले समुत्पन्ने सभायां राजमण्डले।
शशाप स्त्रीजनः सर्वो व्याकुलो दृप्तभूपतीन्॥ ३४

इति श्रीतुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
राजसभासंक्षोभवर्णनं नाम चतुश्चत्वारिंशस्तरङ्गः।

तरङ्गः ४५

तेहिं अवसर सुनि सिवधनु भंगा। आयउ भृगुकुल कमल पतंगा ।।

श्रुत्वा वृत्तं घोरं शिवकार्मुकखण्डनस्य तत्काले।
भृगुकुलकमलपतङ्गः समाययौ भूभृतां सभामध्ये ।। १

देखि महीप सकल सकुचाने। बाज झपट जनु लवा लुकाने ।।

दृष्ट्वा भृगुकुलकेतुं संकुचिता भयवशा नरेन्द्रास्ते।
श्येनाभिक्रमभीता निलये लावा यथा निलीयन्ते ।। २

गौरि सरीर भूति भल भ्राजा। भाल बिसाल त्रिपुंड बिराजा ।।

भस्मालिप्तशरीरः सुगौरवर्णः स भार्गवो रामः।
शुशुभे जनकसभायां त्रिपुण्ड्रमण्डितललाटपट्टयुतः ।। ३

सीस जटा ससिबदनु सुहावा। रिस बस कछुक अरुन होइ आवा ।।
भृकुटी कुटिल नयन रिस राते। सहजहुँ चितवत मनहुँ रिसाते ।।

किञ्चित्क्रोधारक्तं शशिवदनं मस्तकं जटायुक्तम्।
कुटिलं भ्रूकुटिचापं लोचनयुग्मं च लोहितं शुशुभे ।। ४

वीक्षणमपि यत्सहजं यस्मिन् कस्मिन् पपात भृगुकेतोः।
क्रुद्धेक्षणमिति मत्वा स स मनुजस्तद् बभूव संत्रस्तः ।। ५

वृषभ कंध उर बाहु बिसाला। चारु जनेउ माल मृगछाला ।।

स्कन्धौ वृषभसमानौ भुजौ विशालावुरः सुविस्तीर्णम्।
उपवीतं च सुरम्यं मधुरं माल्यं मृगाजिनं मधुरम् ।। ६

कटि मुनिबसन तून दुइ बाँधें। धनु सर कर कुठारु कल काँधें ।।

धृतशरकार्मुकहस्तः परशुविभूषितविशालभुजमूलः।
शुशुभे वल्कलवसनो बद्धनिषङ्गद्वयः स भृगुवीरः ।। ७

–सांत बेषु करनी कठिन बरनि न जाइ सरूप ।
धरि मुनितनु जनु बीर रसु आयउ जहँ सब भूप ।।

रूपं यद्यपि शान्तं कर्म सुघोरं स्वरूपमज्ञातम् ।
नूनं वीररसोऽसौ मुनिवेषेणागतः सभामध्ये ।। ८

देखत भृगुपति बेषु कराला । उठे सकल भय बिकल भुआला ।।
पितु समेत कहि कहि निज नामा । लगे करन सब दंड प्रनामा ।

भीता भृगुपतिवेषादुत्थायोत्थाय भूभृतस्तस्मै ।
प्रणिपत्यैकैकोऽपि स्वनाम पितृनामपूर्वकं चख्यौ ।। ९

जेहि सुभाहँ चितवहिं हितु जानी । सो जानइ जनु आइ खुटानी ।।

प्रजिघाय च यत्रासौ राजकुले हितचिकीर्षुरपि चक्षुः ।
अवसितमायुरितीदं मेने स स भूपतिः सभामध्ये ।। १०

जनक बहोरि आइ सिरु नावा । सीय बोलाइ प्रनामु करावा ।।

मिथिलापतिरपि शीघ्रं नतशिरसा सादरं ववन्दे तम् ।
दुहितरमाहूयैवं प्रणामयामास तत्पदे च तया ।। ११

आसिष दीन्हि सखीं हरषानीं । निज समाज लै गईं सयानीं ।

आशीर्वचनं लब्ध्वा जनकसुता भार्गवात्सुसंहृष्टा ।
नीता पुनरपि गेहे चतुराभिः सा सखीभिरनुरागात् ।। १२

बिस्वामित्रु मिले पुनि आई । पद सरोज मेले दोउ भाई ।।

तदुपरि विश्वामित्रो विप्रवरं संमिमेल सानन्दम् ।
भ्रातृद्वयमपि चैवं पुनः समाहूय नामयाँश्चक्रे ।। १३

रामु लखनु दसरथ के ढोटा । दीन्हि असीस देखि भल ज़ोटा ।।

दशरथतनयावेतौ विद्धीत्याकर्ण्य गाधिसुतवचनम् ।
आशीर्वचममवोचत् भ्रात्रोर्युगलं निरीक्ष्य तत्सुभगम् ।। १४

रामहि चितइ रहे थकि लोचन। रूप अपार मार मद मोचन॥
— बहुरि बिलोकि बिदेह सन कहहु काह अति भीर।
पूँछत जानि अजान जिमि ब्यापेउ कोपु सरीर॥

रतिपतिमानहरं तद्रूपं रामस्य वीक्ष्य साश्चर्यम्।
अविजानन्निव किंचिन्मिथिलेशं भृगुपतिस्तदापृच्छत्॥ १५
"कथय किमर्थं राजन् जनसंमर्दोऽयमत्र समवेतः।"
पृच्छन्नित्यपि तीव्रादन्तर्जज्वाल भार्गवोऽमर्षात्॥ १६

समाचार कहि जनक सुनाए। जेहि कारन महीप सब आए॥
सुनत बचन फिरि अनत निहारे। देखे चापखंड महि डारे॥

वृत्तं मिथिलाधीशात्तदा विदित्वा स्वयंवरस्यैषः।
ऐक्षत कार्मुकखण्डौ यावत्परिचक्रमेऽन्यतो विप्रः॥ १७

अति रिस बोले बचन कठोरा। कहु जड़ जनक धनुष कै तोरा॥
बेगि देखाउ मूढ़ न त आजू। उलटउँ महि जहँ लहि तव राजू॥

"कथय कथं रे राजन् गुरुधनुरेतन्निखण्डितं केन।
दर्शय पातकिनं तं नोचेद्राज्यं न ते भवत्यद्य॥" १८

अति डरु उतरु देत नृपु नाहीं। कुटिल भूप हरषे मन माहीं॥
सुर मुनि नाग नगर नर नारी। सोचहिं सकल त्रास उर भारी॥

पृष्टोऽप्येवं जनको भृगुकुलपतिना सतर्जनं राजा।
प्रत्यूचे न हि किंचिद्भयपरिगतमानसस्तदा विप्रम्॥ १९
प्रीताः कुटिलनरेशा दृष्ट्वा जनकं तथा भयग्रस्तम्।
सुरमुनिकिन्नरनाग-प्रजाजनानां भयाकुलं चित्तम्॥ २०

मन पछिताति सीय महतारी। बिधि अब सँवरी बात बिगारी॥
भृगुपति कर सुभाउ सुनि सीता। अरध निमेष कलप सम बीता॥

'घटितो दुहितुर्मेऽयं महतायासेन योग्यवरलाभः।
अधुना विधिना मन्ये विघटयते विघ्नकारिणा नूनम्॥ २१
जननी मिथिलाराज्ञीत्यनुतापाविष्टमानसा दुःखात्।
ज्ञात्वा भृगुपति भावं मेने सीता क्षणं युगेन समम्॥ २२

—सभय बिलोके लोग सब जानि जानकी भीरु ।
हृदयँ न हरषु बिषादु कछु बोले श्रीरघुबीरु ।।

दृष्ट्वाखिलनरसङ्घं भयपरिगतमानसं वचोहीनम् ।
मत्वाप्यशरणभीरुं सीतामपि तामुवाच दाशरथिः ।। २३

हर्षविषादातीतं वचस्तदा भृगुपतिं सुगम्भीरम् ।
स्थिरहृदयो यो यातः सदैव सुखदुःखयोः परं पारम् ।। २४

नाथ संभुधनु भंजनिहारा । होइहि केउ एक दास तुम्हारा ।।
आयसु काह कहिअ किन मोही । सुनि रिसाइ बोले मुनि कोही ।।
सेवकु सो जो करै सेवकाई । अरि करनी करि करिअ लराई ।।

"तव हि नाथ पदानुचराद्विना शिवधनुर्विभनक्ति नु कोऽपरः ।
कथय मे किमथादिशसि प्रभो विनतदासमिमं भृगुनन्दन ।।" २५
रघुपतेर्वचनं च निशम्य तत् कुपित एवमुवाच भृगूद्वहः ।
उपचरत्यथ यः स हि सेवकः समरमेव वरं त्वपकारिणा ।।" २६

सुनहु राम जेहिं सिवधनु तोरा । सहसबाहु सम सो रिपु मोरा ।।
सो बिलगाउ बिहाइ समाजा । न त मारे जैहहिं सब राजा ।।

"पुररिपोरभनक् धनुरद्य यः
स मम हैहयवद्रिपुरग्रिमः ।
पृथगसाविह तिष्ठतु राजकात्
नृपतिभिश्च निहन्मि तमद्य वा ।।" २७

सुनि मुनि बचन लखन मुसुकाने । बोले परसुधरहि अपमाने ।।
बहु धनुहीं तोरीं लरिकाईं । कबहुँ न असि रिस कीन्हि गोसाईं ।।
एहि धनु पर ममता केहि हेतू । सुनि रिसाइ कह भृगुकुलकेतू ।।

निशम्येदं दृप्तं भृगुकुलपतेः क्रुद्धवचनम्
बली क्रोधी बालोऽप्यविदितभयः साहसपरः ।
सुमित्रापुत्रस्तं वचनमवदद्वीरसदृशम्
सहासं सावज्ञं परशुधररोषावहमिदम् ।। २८

"शतं भग्नं बाल्ये भृगुकुलपते क्षुद्र-धनुषाम्
मया रामेणैवं, मनसि न कृतं तत्तु सुतराम् ।
किमर्थं ते प्रीतिः शिवधनुषि चैवं दृढतमा
न जाने बालोऽहं कथयसि रहस्यं यदि न चेत् ॥" २९

–रे नृप बालक काल बस बोलत तोहि न सँमार ।
धनुही सम तिपुरारि धनु बिदित सकल संसार ॥

"यथा प्रज्ञाहीनं वदसि वचनं त्वं मम पुरस्
तथा मन्ये यातोऽस्ययि नृपज कालस्य नु वशम् ।
पिनाकं नैवेदं कथमपि 'धनुष्कं' पुररिपोर्
जगज्जानातीदं" भृगुपतिरुवाचेति नृपजम् ॥ ३०

लखन कहा हँसि हमरें जाना । सुनहु देव सब धनुष समाना ॥
का छति लाभु जून धनु तोरें । देखा राम नयन के भोरें ॥

"धनूंष्यस्मिन् लोके मुनिवर समान्येव सकला-
न्यथैवं नो बुद्धिर्न भवति विशेषोऽत्र सुतराम् ।
पुराणे चैवास्मिन् धनुषि न हि दोषो विघटिते
धृतं त्वार्येणेदं स्वकरकमले नूतनमिति ॥" ३१

छुअत टूट रघुपतिहु न दोसू । मुनि बिनु काज करिअ कत रोसू ॥

द्विधेदं विच्छिन्नं धनुरतिपुराणं पुररिपोर्
धृतं यावद् हस्ते, न भवति हि दोषो रघुपतेः ।
किमर्थं रोषोऽयं मुनिवर न जाने खलु वृथा"
प्रधृष्टं श्रुत्वैवं नृपसुतवचोऽकुप्यत मुनिः ॥ ३२

बोले चितइ परसु की ओरा । रे सठ सुनेहि सुभाउ न मोरा ॥
बालकु बोलि बधउँ नहिं तोही । केवल मुनि जड़ जानहि मोही ॥
बाल ब्रह्मचारी अति कोही । बिस्व बिदित छत्रियकुल द्रोही ॥
भुजबल भूमि भूप बिनु कीन्ही । बिपुल बारं महिदेवन्ह दीन्ही ॥

सकृत् दृष्ट्वा चासौ परशुमवदत् क्रुद्धवचनम्
न रे दुष्ट ज्ञातस्तव मम मनःक्षोभ-फलितम् ।

न हन्मि त्वां बालम्, मुनिरिति च मां किं गणयसे
जडस्त्वं जानीषे व्रतमकृतदारस्य न हि मे ॥ ३३

महाक्रोधी विप्रो भुवनविदितोऽहं भुजबलात्
महावैरस्थानं मम हि निखिलं क्षत्रियकुलम् ।
नृपैर्हीनं कृत्वासकृदिदमशेषं क्षितितलम्
प्रदत्तं विप्रेभ्यस्तदिह कतिवारं न च मया ॥ ३४

सहसबाहु भुज छेदनिहारा । परसु बिलोकु महीपकुमारा ॥
—मातु पितहि जनि सोचबस करसि महीसकिसोर ।
गर्भन्ह के अर्भक दलन परसु मोर अति घोर ॥

कुठारं पश्येमं दश-शत-भुजोत्पाटन-पटुम्
हता येन क्रूरं नृपज जननी-गर्भ-शिशवः ।
अरेरे मूढ त्वं दशरथसुमित्रासुत वृथा
कुरुष्वैवं धीरौ न निजपितरौ शोकवशगौ ॥" ३५

बिहँसि लखनु बोले मृदु बानी । अहो मुनीसु महा भटमानी ॥
पुनि पुनि मोहि देखाव कुठारू । चहत उड़ावन फूंकि पहारू ॥

इति श्रुत्वाऽवोचद् दशरथसुतस्तं स्मितयुतं
"तदेवं स्वात्मानं गणयसि मुने त्वं भटवरम् ।
अमुं वारं वारं किमिति परशुं दर्शयसि माम्
किमुत्क्षेप्तुं शैलं स्वमुखमरुतात्रेच्छसि तथा ॥ ३६

इहाँ कुम्हड़बतिया कोउ नाहीं । जे तरजनी देखि मरि जाहीं ॥
देखि कुठारु सरासन बाना । मैं कछु कहा सहित अभिमाना ॥

अपक्वं कूष्माण्डं किमिति च मुने मां गणयसे
प्रणश्येद् यो भीत्याऽङ्गुलिदलविलासादपि सुखम् ।
मया दृष्ट्वैवेमं परशुमथ चापं च भणितम्
सगर्वं वीराहं समर-भट-संमाननवशात् ॥ ३७

भृगुसुत समुझि जनेउ बिलोकी । जो कछु कहहु सहउँ रिस रोकी ।।
सुर महिसुर हरिजन अरु गाई । हमरें कुल इन्ह पर न सुराई ।।

अथेदानीं बुद्ध्वा भृगुकुलजमित्यग्रजवरम्
तथा वर्णस्येदं पिशुनमुपवीतं, मम रुषम् ।
सहे संयम्यैवं मनसि, न यथेक्ष्वाकुकुलजाः
स्वशौर्यं शंसन्ति द्विजविबुधगोभक्तपुरतः ।। ३८

बधें पापु अपकीरति हारें । मारतहूँ पा परिअ तुम्हारें ।।
कोटि कुलिस सम बचनु तुम्हारा । ब्यर्थ धरहु धनु बान कुठारा ।।

निहत्यैनान्पापं महदपयशोऽस्मत्परिभवात्
ध्रुवं वन्दे पादौ मुनिवर हतोऽप्यत्र ननु ते ।
वृथैवेदं शस्त्रं द्विजवर तवाभाति खलु मे
वचो ह्येकैकं ते शत-कुलिश-पात-द्युतिसमम् ।। ३९

–जो बिलोकि अनुचित कहेउँ छमहु महामुनि धीर ।
सुनि सरोष भृगुबंसमनि बोले गिरा गभीर ।।

मया यच्चाप्युक्तं परशु-धनुषी वीक्ष्य सहसा
क्षमस्वैतद् विप्रोत्तम, न सदृशं तत्तव वचः ।"
निशम्येदं विप्रोऽप्यतिपरुषमूचे तु वचनम्
मुनिं विश्वामित्रं भृगुपतिरिदं क्रोधसहितम् ।। ४०

कौसिक सुनहु मंद यहु बालकु । कुटिल कालबस निज कुल घालकु ।।
भानु बंस राकेस कलंकू । निपट निरंकुस अबुध असंकू ।।

"श्रुणुष्वर्षे बालः कुटिलमतिरेषोऽस्मि जडधीः
वशं यातो मृत्योः कुलविलयकारी खलमतिः ।
कलङ्कोऽयं नूनं रविकुलशशाङ्कस्य च मुने
महामूर्खश्चायं विनयभयलज्जाविरहितः ।। ४१

काल कवलु होइहि छन माहीं । कहउँ पुकारि खोरि मोहि नाहीं ।।
तुम्ह हटकहु जौं चहहु उबारा । कहि प्रतापु बलु रोषु हमारा ।।

क्षणान्मृत्योर्ग्रासः स हि भवति दोषोऽत्र न च मे
यदि त्वेनं मृत्योरवतुमभिलाषस्तव मुने ।

बलं वीर्यं क्रोधं सकलमपि चोक्त्वा मम पुनर्
निवार्यैनं धृष्टं परिहर मुनेऽकालमरणम् ।।" ४२

लखन कहेउ मुनि सुजसु तुम्हारा । तुम्हहि अछत को बरनै पारा ।।
अपने मुँह तुम्ह आपनि करनी । बार अनेक भाँति बहु सरनी ।।

इति श्रुत्वा वाक्यं पुनरपि तमूचे नृपसुतः
"यशस्ते को ब्रूयात् त्वयि सति मुने फेन-धवलम् ।
स्वयं नानारूपैः किमिति न मुने वर्णितमपि
त्वया वारं वारं ननु निजयशोऽत्रैव बहुधा ।। ४३

नहिं संतोषु त पुनि कछु कहहू । जनि रिस रोकि दुसह दुख सहहू ।।
बीरब्रती तुम्ह धीर अछोभा । गारी देत न पावहु सोभा ।।

न चेत् तृप्तोऽस्येवं पुनरपि च तद् वर्णय सुखम्
न चासह्यं दुःखं तव भवतु संहृत्य तु रुषम् ।
महाधीरो विप्रो व्रतमपि च ते वीरसदृशम्
विधत्ते नो शोभां तव वरमुखे शापवचनम् ।। ४४

–सूर समर करनी करहिं कहि न जनावहिं आपु ।
बिद्यमान रन पाइ रिपु कायर कथहिं प्रतापु ।।
तुम्ह तौ कालु हाँक जनु लावा । बार बार मोहि लागि बोलावा ।।

विकत्थन्ते शूरा मुनिवर न चैवं रणकराः
स्ववीर्यं श्लाघन्ते भयपरवशा वीक्ष्य तु रिपुम् ।
तथा वारं वारं भृगुवर समाहूय समरे
मदर्थं तं कालं किमभिलषसि त्वं रणजयम् ।। " ४५

सुनत लखन के बचन कठोरा । परसु सुधारि धरेउ कर घोरा ।।
अब जनि देइ दोस मोहि लोगू । कटुबादी बालकु बधजोगू ।।

इति श्रुत्वा वक्रं नृपसुतवचो भार्गवमुनिः
समुत्तोल्यात्मीयं परशुमतिघोरं निजकरे ।
उवाचैवं "संप्रत्यथ न जनता दूषयतु माम्
निहन्तव्यो बालः कटु-वचन-शीलोऽत्र नु मया ।। ४६

बाल बिलोकि बहुत मैं बाँचा । अब यहु मरनिहार भा साँचा ॥
कौसिक कहा छमिअ अपराधू । बाल दोष गुन गनहिं न साधू ॥

मया बालं मत्वा बहु यतितमत्रैनमवतुम्
स धृष्टस्तु प्राप्तुं निधनमिव सिद्धोऽत्र पुरतः ।"
मुनेः श्रुत्वा वाक्यं परुषमवदत् गाधितनयः
"क्षमस्वैनं साधुर्न शिशुगुणदोषान् गणयते ॥" ४७

खर कुठार मैं अकरुन कोही । आगें अपराधी गुरुद्रोही ॥
उतर देत छोड़उँ बिनु मारें । केवल कौसिक सील तुम्हारें ॥

"कुठारस्तीक्ष्णोऽयं न हि मनसि कारुण्यमपि मे
गुरुद्रोही बालः प्रतिवदति मेऽयं च पुरतः ।
अनादृत्येदं यत् सकलमपि मुञ्चामि नृपजम्
तदेतद् विश्वासाद् अनघ-शुचिशीले त्वयि मुने ॥ ४८

न त एहि काटि कुठार कठोरें । गुरहि उरिन होतेउँ श्रम थोरें ॥
–गाधिसूनु कह हृदयँ हँसि मुनिहि हरिअरइ सूझ ।

इमं नो चेत् छित्वा नृपतितनयं मे परशुना
गुरोर्यास्यानृण्यं श्रम-विरहितं कौशिक न किम् ।"
निशम्यैवं दृप्तं वचनमवदत् गाधितनयः
मनस्येवं किञ्चित् स्मितयुतमथैनं प्रति वचः ॥ ४९

अयमय खाँड़ न ऊखमय अजहुँ न बूझ अबूझ ॥

'बली क्रोधी नूनं भृगुकुलपतिर्मोहितमनाः
जगत्सर्वं गर्वात् परशुवशमित्याकलयते ।
अयःकाण्डं चासौ गणयति भ्रमादिक्षुशकलम्
प्रभावं जानीते न हि रघुपतेः खेद इति मे ॥' ५०

कहेउ लखन मुनि सीलु तुम्हारा । को नहिं जान बिदित संसारा ॥
माता पितहि उरिन भए नीकें । गुर रिनु रहा सोचु बड़ जीकें ॥

मुनौ मौनीभूते परशुधरमूचे नृपसुतः
"चरित्रं ते नूनं सकलजगतोऽप्यत्र विदितम् ।

ऋणं पित्रोर्दत्तं कथमिति न को वेत्ति मनुजः
गुरोर्देयं चैकं परशुधर ते शेषमधुना ॥ ५१

सो जनु हमरेहि माथे काढ़ा । दिन चलि गए ब्याज बड़ बाढ़ा ॥
अब आनिअ ब्यवहरिआ बोली । तुरत देउँ मैं थैली खोली ॥

तदत्रासीन्नूनं मम शिरसि निस्त्यार्यमिह ते
बहौ याते काले भृगुकुलपते वृद्धिसहितम् ।
समाहूय क्षिप्रं गणनपटुमावेदय च माम्
कियद् देयं, तूर्णं वद, ननु च ग्रन्थिः शिथिलिता ॥" ५२

सुनि कटु बचन कुठार सुधारा । हाय हाय सब सभा पुकारा ॥

कटु श्रुत्वा वाक्यं पुनरपि समुत्तोल्य परशुम्
मुनिः सिद्धो हन्तुं नृपति-तनयं क्रोध-विवशः ।
"अहो कष्टं हा" हेत्यवददखिलं तन्नृपकुलम्
सुमित्रासूनुस्तं विगतभय एवैवमवदत् ॥ ५३

भृगुबर परसु देखावहु मोही । बिप्र बिचारि बचउँ नृपद्रोही ॥
मिले न कबहुँ सुभट रन गाढे । द्विज देवता घरहि के बाढे ॥

"करे धृत्वा यत्त्वं परशुमभितो दर्शयसि माम्
न हन्मि त्वां मत्वा द्विजमिति नृपद्रोहिणमहम् ।
न योद्धारं वीरं ननु मिलितवाँस्त्वं क्षितितले
गृहे शूरं मन्ये तदिह नियतं त्वां भृगुपते ॥" ५४

अनुचित कहि सब लोग पुकारे । रघुपति सयनहिं लखनु नेवारे ॥

'अहो धृष्टो बालः कथमपि न चेदं समुचितम्"
सभायामित्यासीत् सकलनृपतीनां कलकलः ।
कटाक्षैरक्ष्णोस्तं रघुपतिरपि भ्रातरममुम्
निवार्योचे वाक्यं सकल-जन-संतापहरणम् ॥ ५५

–लखन उतर आहुति सरिस भृगुबर कोपु कृसानु ।
बढ़त देखि जल सम बचन बोले रघुकुलभानु ॥

भृगुपति-रोष-कृशानोर्हवींषि वचनानि लक्ष्मणोक्तानि ।
प्रशमनजलमिव वह्नेः रघुकुल-रवि-राम-धीर-वचनानि ॥ ५६

नाथ करहु बालक पर छोहू । सूध दूधमुख करिअ न कोहू ।।
"मैवं कुप्यतु नाथः शिशवे सरलात्मने कृपासिन्धुः ।
सत्वापरिणत-बुद्धि मर्षयतु च तत्कृतापराधं तम् ।। ५७

जौं पै प्रभु प्रभाउ कछु जाना । तौ कि बराबरि करत अयाना ।।
अज्ञास्यद्यदि तेऽसौ बलं शिशुः किं तथावदिष्यन्नु ।
अधरिष्यन्न च तुलया रघुकुलजोऽसौ त्वया तथात्मानम् ।। ५८

जौं लरिका कछु अचगरि करहीं । गुर पितु मातु मोद मन भरहीं ।।
मातापितरौ चैवं गुरुस्तथा नैव कुर्वते कोपम् ।
मुनिवर विदितमिदं ते दृष्ट्वा शिशु-चापलं तु मोदन्ते ।। ५९

करिअ कृपा सिसु सेवक जानी । तुम्ह सम सील धीर मुनि ग्यानी ।।
शिशुरिति चरणरतो वा किङ्कर इति नाथ पश्य मेऽवरजम् ।
ज्ञानी विप्रवरस्त्वं समदर्शी शील-सद्गुणैर्मुक्तः" ।। ६०

राम बचन सुनि कछुक जुड़ाने । कहि कछु लखनु बहुरि मुसुकाने ।।
श्रुत्वा रघुपतिवचनं प्रशान्त-कोपे स्थिते मुनौ किंचित् ।
उक्त्वा पुनरपि किंचिज्जहास रामानुजो य निर्भीकः ।। ६१

हँसत देखि नख सिख रिस ब्यापी । राम तोर भ्राता बड़ पापी ।।
भृगुपतिरपि तं दृष्ट्वा कोपानल-नख-शिखान्त-संदग्धः ।
ऊचे रघुपतिमेवं "दुर्मतिरेवास्ति तेऽनुजो राम ।। ६२

गौर सरीर स्याम मन माहीं । कालकूटमुख पयमुख नाहीं ।।
हिमगौरेऽस्मिन् काये कृष्ण-कुटिल-मानसं वसत्यस्य ।
दुग्धमुखो नु कुतोऽसौ जिह्वाग्रे धरति यो महागरलम् ।। ६३

सहज टेढ़ अनुहरइ न तोही । नीचु मीचु सम देख न मोही ।।
संवदति न तव बन्धुर्निसर्गवक्रस्त्वया किमप्येषः ।
मत्तः साहसिकोऽसौ बिभेति कालादिवापरान्न मनाक् ।।" ६४

—लखन कहेउ हँसि सुनहु मुनि क्रोधु पाप कर मूल ।
ऊचे रामावरजः पुनर्हसन् भृगुपतिं तथा रुष्टम् ।
" शृणु मुनिवर, मा कुप्यः क्रोधः पापाय कल्पते नित्यम् ॥ ६५

जेहि बस जन अनुचित करहिं चरहिं बिस्व प्रतिकूल ॥
क्रोधवशः कुरुतेऽसौ पापाचरणं नरः सदा घोरम् ।
क्रोधोद्दीपित-चित्तश्चरति प्रतिकूलमेव यद् जगतः ॥ ६६

मैं तुम्हार अनुचर मुनिराया । परिहरि कोपु करिअ अब दाया ॥
टूट चाप नहिं जुरिहि रिसाने । बैठिअ होइहिं पाय पिराने ॥
जौं अति प्रिय तौ करिअ उपाई । जोरिअ कोउ बड़ गुनी बोलाई ॥
मुनिवर किंकर इति मां मत्वा परिहर रुषं कृपासिन्धो ।
छिन्नं धनुरपि चेदं पुनर्न संधीयते त्वया क्रोधात् ॥ ६७
उपविश भृगुकुलकेतो तिष्ठसि कतिकालमेवमश्रान्तः ।
संधापयसि न किं तत्प्रियधनुराहूय शिल्पिनं शीघ्रम् ॥ " ६८

बोलत लखनहिं जनकु डेराहीं । मष्ट करहु अनुचित भल नाहीं ॥
श्रुत्वा नृपसुतवचनं जनको विनयातिगं तदा भीतः ।
" अलमतिसाहसवच "सेत्युच्चैस्तं तर्जयांश्चकारैवम् ॥ ६९

थर थर काँपहिं पुर नर नारी । छोट कुमार खोट बड़ भारी ॥
' बालोऽप्यतिधृष्टोऽसावित्यपि मिथिलाजनास्तदा सर्वे ।
मत्वा, मुनिभयभीताश्चकम्पिरे स्तिमित-मानसाः सर्वे ॥ ७०

भृगुपति सुनि सुनि निरभय बानी । रिस तन जरइ होइ बल हानी ॥
श्रावं श्रावं चैवं भृगपतिरपि निर्भयं वचस्तस्य ।
क्रोधानलदग्धाङ्गः क्रमेण बलहीनतां ययौ वीरः ॥ ७१

बोले रामहि देइ निहोरा । बचउँ बिचारि बंधु लघु तोरा ॥
ऊचे रघुपतिमेवं " सहे त्वदर्थं प्रगल्भतामेनाम् ।
अपराधिनमपि दुष्टं न हन्मि मत्वा तवानुजं चैनम् ॥ ७२

मनु मलीन तनु सुंदर कैसें । बिष रस भरा कनक घटु जैसें ।।

गौरः सन्नपि तन्वा कुटिल-मलिन-मानसस्तवावरजः ।
मन्ये रघकुलकेतो नूनं विषगर्भ-कनक-कुम्भोऽयम् ।। " ७३

—सुनि लछिमन बिहसे बहुरि नयन तरेरे राम ।
गुर समीप गवने सकुचि परिहरि बानी बाम ।।

श्रुत्वा भृगुपति-वाक्यं पुनरपि धृष्टो हसन् स सौमित्रिः ।
गुरुसंनिकटे यातः लोचन-संज्ञा-निवारितो भ्रात्रा ।। ७४

अति बिनीत मृदु सीतल बानी । बोले रामु जोरि जुग पानी ।।

याते भ्रातरि रामः सविनयमूचे तदा मुनिं क्रुद्धम् ।
बद्धाञ्जलिरतिनम्रं मृदु-मधुरं भार्गवं वचः सौम्यम् ।। ७५

सुनहु नाथ तुम्ह सहज सुजाना । बालक बचनु करिअ नहिं काना ।।
बररै बालकु एकु सुभाऊ । इन्हहि न संत बिदूषहिं काऊ ।।

"प्रकृत्यैव महाज्ञानी मुने त्वं शिशुरेव सः ।
वचनं हि शिशोरस्य न कार्यं मनसि प्रभो ।। ७६

स्वभावः स हि बालानां वरटाभिः समो मुने ।
दूष्येते न च तावत्र सद्भिर्भृगुकुलोद्वह ।। ७७

तेहिं नाहीं कछु काज बिगारा । अपराधी मैं नाथ तुम्हारा ।।

कृतानेनापि मे भ्रात्रा कार्यहानिर्न कापि ते ।
अपराध्यहमेवास्मिन् न दूष्यो लक्ष्मणस्त्वया ।। ७८

कृपा कोपु बध बँधब गोसाइँ । मो पर करिअ दास की नाइँ ।।

कृपां क्रोधं वधं वाऽपि बन्धनं वा मुने ततः ।
चिकीर्षसि च यत्किञ्चित् तन्मे कुरु यथासुखम् ।। ७९

कहिअ बेगि जेहि बिधि रिस जाई । मुनिनायक सोइ करौं उपाई ।।

उपायः कथ्यतामस्मिन् करिष्ये वचनं तव ।
मनस्तेऽत्र महाक्रोधाद्यथा शीघ्रं प्रमुच्यते ।। " ८०

कह मुनि राम जाइ रिस कैसें । अजहुँ अनुज तव चितव अनैसें ।।

" अनुजस्तव सोऽद्यापि वक्रं पश्यति मां यदा ।
तदत्र वद मे राम कथं क्रोधो विनश्यति ।। ८१

एहि कें कंठ कुठारु न दीन्हा । तौ मैं काह कोपु करि कीन्हा ।।

कोऽर्थः क्रोधेन मे राम यदा नैव प्रचालितः ।
कण्ठेऽस्य च कुठारोऽयं भ्रातुस्ते वद मे पुनः ।। ८२

–गर्भ स्रवहिं अवनिप रवनि सुनि कुठार गति घोर ।

घोर-कर्म-कुठारेण कीर्तितेनैव बालकाः ।
हताः पूर्वं यदा नैके नृपस्त्री-गर्भ-संस्थिताः ।। ८३

परसु अछत देखउँ जिअत बैरी भूपकिसोर ।।

सत्यप्यस्मिन् कुठारे यद् हस्ते मे रघुनन्दन ।
जीवन्तं राजपुत्रं तं पश्यामि मम वैरिणम् ।। ८४

बहइ न हाथु दहइ रिस छाती । भा कुठारु कुंठित नृपघाती ।।

न चलत्यपि यद् हस्तः रुषा संदह्यते मनः ।
कुठारोऽपि च मन्ये तत् कुण्ठितो नृपघातकः ।। ८५

भयउ बाम बिधि फिरेउ सुभाऊ । मोरे हृदयँ कृपा कसि काऊ ।।

दयाभावः कुतोऽयं मे विपर्यस्तं हि मे मनः ।
रघुनाथ तदा मन्ये विपरीतो विधिश्च मे ।। ८६

आजु दया दुखु दुसह सहावा । सुनि सौमित्रि बिहसि सिरु नावा ।।

पीडितोऽस्मि भृशं राम दयाभावेन संप्रति ।
किमिदं न हि तज्जाने कुतश्चिच्छरणं न मे ।। " ८७

इतीदं वचनं श्रुत्वा प्रत्युवाच मुनिं पुनः ।
लक्ष्मणः स्मयमानः सन् वक्रं वचनमीदृशम् ।। ८८

बाउ कृपा मूरति अनुकूला । बोलत बचन झरत जनु फूला ।।

"यथा मूर्तिस्तथैवेयं कृपारीतिर्मुने तव ।
वदतोऽपि कृपाशब्दान् अहो पारुष्यमत्र ते ।। ८९

क्रुपानिले वहत्यस्मात् हृदयात्ते मुनीश्वर ।
भ्रष्टा इव विभान्त्यत्र शब्द-पुष्पाणि ते मुखात् ।। ९०

जौं पै कृपाँ जरिहिं मुनि गाता । क्रोध भएँ तनु राख बिधाता ।।

कृपयैवं ज्वलत्येदच्छरीरं तव चेन्मुने ।
क्रोध-दाहात् विधातैव कुर्याद् रक्षां मुने तव ।।" ९१

देखु जनक हठि बालकु एहू । कीन्ह चहत जड़ जमपुर गेहू ।।

इति श्रुत्वा मुनिश्चैवं पुनरूचे वचो नृपम् ।
"पश्य राजन् हठाद् बालो विवत्सति यमालये ।। ९२

बेगि करहु किन आँखिन्ह ओटा । देखत छोट खोट नृप ढोटा ।।

अद्यापि किमसौ नैव परोक्षीक्रियतेऽथ भोः ।
बालः सन्नपि दुष्टात्मा धृष्टो नृपति-दारकः ।।" ९३

बिहसे लखनु कहा मन माहीं । मूदें आँखि कतहुँ कोउ नाहीं ।।

मनस्येव विहस्योचे भार्गवं लक्ष्मणस्तदा ।
" निमीलय स्वयं नेत्रे नेष्टं चेन्मम दर्शनम् ।।" ९४

—परसुरामु तब राम प्रति बोले उर अति क्रोधु ।
संभु सरासनु तोरि सठ करसि हमार प्रबोधु ।।
बंधु कहइ कटु संमत तोरें । तू छल बिनय करसि कर जोरें ।।

ततः स भार्गवः क्रुद्धः पुनरूचे रघूद्वहम् ।
"यथैवायं तथा नूनं शठस्त्वमपि राघव ।। ९५
उपदेशं करोष्येवं यन्मां भङ्क्त्वा शरासनम् ।
अनुमत्या तवैवायं बन्धुस्तत्कटु भाषते ।। ९६
अथैकतः स ते बन्धुर्वक्रं वक्ति पुनः पुनः ।
अन्यतस्त्वं करौ बद्ध्वा विनयादिव वर्तसे ।। ९७

करु परितोषु मोर संग्रामा । नाहिं त छाड़ कहाउब रामा ।।

प्रदर्शयात्र शौर्यं वा संग्रामे रघुनन्दन ।
त्यज वा नाम ते सद्यो रामेति क्षत्रियात्मज ।। ९८

छलु तजि करहि समरु सिवद्रोही । बंधु सहित न त मारउँ तोही ।।

छलं त्यक्त्वा बलं राम संग्रामे मां प्रदर्शय ।
नो चेत् भ्रात्रा सहैव त्वां निहन्मि शिववैरिणम् ।। " ९९

भृगुपति बकहिं कुठार उठाएँ । मन मुसुकाहिं रामु सिर नाएँ ।।

धृत्वा हस्ते कुठारं तं जल्पत्येवं भृगूद्वहे ।
नताननः पुरस्तस्थौ स्मयमानो रघूत्तमः ।। १००

गुनह लखन कर हम पर रोषू । कतहुँ सुधाइहु ते बड़ दोषू ।।
टेढ़ जानि सब बंदइ काहू । बक्र चंद्रमहि ग्रसइ न राहू ।।

स्वात्मन्येव च मेनेऽसौ श्रीरामो भक्तवत्सलः ।
'सौमित्रेः सति दोषेऽपि मह्यं क्रुध्यति भार्गवः ।। १०१
कल्पते ननु दोषाय क्वचित् सरल-वर्तनम् ।
यदत्रात्मानमीक्षेऽहं मुनेः क्रोधस्य भाजनम् ।। १०२
वन्दन्ते वक्रमेवात्र जनाः सर्वे भयादरात् ।
वक्रं न ग्रसते चन्द्रं राहुरप्यथ साध्वसात् ।।' १०३

राम कहेउ रिस तजिअ मुनीसा । कर कुठारु आगें यह सीसा ।।
जेंहि रिस जाइ करिअ सोइ स्वामी । मोहि जानिअ आपन अनुगामी ।।

प्रकाशं तु पुनर्वाक्यं मुनिमूचे रघूत्तमः ।
"त्यज रोषं मुने शीघ्रं दासोऽहं ते न वै रिपुः ।। १०४
तव हस्ते कुठारोऽयं प्रणतं मस्तकं च मे ।
तथा कुरु यथा क्रोधान्मुच्यसे भृगुनन्दन ।। १०५

–प्रभुहि सेवकहि समरु कस तजहु बिप्रबर रोसु ।
बेषु बिलोकें कहेसि कछु बालकहू नहिं दोसु ।।

स्वामिसेवकयोर्नाथ कथं युद्धं भविष्यति ।
त्यज रोषं न दोषार्हो वेषभ्रान्तो ममानुजः ।। १०६
वीरवेषं हि ते वीक्ष्य भ्रान्तो मेऽवरजो मुने ।
ऊचे किञ्चिन्न तत्कार्यं सर्वथा मनसि प्रभो ।। १०७

देखि कुठार बान धनु धारी । भै लरिकहि रिस बीरु बिचारी ।।

कुठारं धनुरप्येतद् वीक्ष्य मे वञ्चितोऽनुजः ।
वीरं मत्वा मुने क्रुद्धस्तथा त्वामवदद्वचः ।। १०८

नामु जान पै तुम्हहि न चीन्हा । बंस सुभायँ उतरु तेहिं दीन्हा ।।

नाम्ना ज्ञातमपि स्वामिन् प्रत्यभिज्ञातुमक्षमः ।
त्वामवोचद्वचो वक्रं सौमित्रिः कुलधर्मतः ।। १०९

जौं तुम्ह औतेहु मुनिकी नाईं । पद रज सिर सिसु धरत गोसाईं ।।

आगमिष्यस्त्वमद्यात्र मुनिवद् यदि भार्गव ।
न्यधास्यत् खलु मे बन्धुः पादधूलिं स्वमस्तके ।। ११०

छमहु चूक अनजानत केरी । चहिअ बिप्र उर कृपा घनेरी ।।

अज्ञानात्कृत इत्येकमपराधं दयानिधे ।
क्षमस्वास्य दयाशीलं मानसं हि द्विजन्मनाम् ।। १११

हमहि तुम्हहि सरिबरि कसि नाथा । कहहु न कहाँ चरन कहँ माथा ।।
राम मात्र लघु नाम हमारा । परसु सहित बड़ नाम तोहारा ।।

तुल्यत्वं नौ कथं नूनं क्व पादौ क्व च मस्तकम् ।
राममात्राभिधानोऽहं रामः सपरशुर्भवान् ।। ११२

देव एकु गुनु धनुष हमारें । नव गुन परम पुनीत तुम्हारें ।।

यश्चासौ कार्मुके तिष्ठत्येकः स च गुणो मम ।
शमादयस्तु धर्मज्ञ गुणा नव तवाग्रज ।। ११३

सब प्रकार हम तुम्ह सन हारे । छमहु बिप्र अपराध हमारे ।।

सर्वथैव प्रभो त्वत्तः सदाधःस्था वयं यदा ।
अपराधं द्विजश्रेष्ठ मर्षयास्मत्कृतं प्रभो ।। " ११४

–बार बार मुनि बिप्रबर कहा राम सन राम ।
बोले भृगुपति सरुष हसि तहूँ बंधु सम बाम ।।

संबोधितस्तथा चासौ भार्गवः परशुप्रियः ।
मुनिरित्यथ रामेण विप्र इत्यपि चासकृत् ।। ११५

सक्रोधं च हसित्वैनं मुनिरूचे वचस्तदा ।
"स्वानुजेन समो वामस्त्वं चापि रघुनन्दन ॥ ११६

निपटहिं द्विज करि जानहि मोही। मैं जस बिप्र सुनावउँ तोही ॥

द्विजमात्रं हि मत्वा मां जानासि न पराक्रमम् ।
श्रुणु ते कथयाम्येव प्रभावो मे स कीदृशः ॥ ११७

चाप स्रुवा सर आहुति जानू। कोपु मोर अति घोर कृसानू ॥

स्रुवां मे कार्मुकं विद्धि विद्धि बाणं तथाहुतिम् ।
मन्युं मे विद्धि चाप्यग्निं घोरं ज्वालाभिदीपितम् ॥ ११८

समिधि सेन चतुरंग सुहाई। महा महीप भए पसु आई ॥

चतुरङ्गबलं चैवं समिधो मे रघूद्वह ।
महानृपतयश्चैवं पशवः सर्व एव मे ॥ ११९

मैं एहिं परसु काटि बलि दीन्हे। समर जग्य जप कोटिन्ह कीन्हे ॥

हत्वैतान् रणयज्ञेऽस्मिन् कुठारेण महीधरान् ॥
प्रवर्तिता मया राम कोटियज्ञा जपैः सह ॥ १२०

मोर प्रभाउ बिदित नहिं तोरें। बोलसि निदरि बिप्र के भोरें ॥

जानासि न हि मे वीर्यं येन विप्रेति मां वदन् ।
अवजानासि रे राम भूयो भूयस्त्वमीदृशम् ॥ १२१

भंजेउ चापु दापु बड़ बाढ़ा। अहमिति मनहुँ जीति जगु ठाढ़ा

धनुर्भङ्गेण चाप्यद्य दर्पाध्मातोऽसि राघव ।
विजित्य हि जगत्सर्वं तिष्ठेत् कश्चिद्यथोद्धतः ॥" १२२

राम कहा मुनि कहहु बिचारी। रिस अति बड़ि लघु चूक हमारी

मुनिनाभिहितं चेदं श्रुत्वातिकुटिलं वचः ।
तमूचे रघुनाथोऽपि स्पष्टं सविनयं वचः ॥ १२३

"अविचार्य मुने नैवं सर्वथा वक्तुमर्हसि ।
क्व ते कोपस्तथा चण्डः क्व मे दोषोऽल्पमात्रकः ॥ १२४

छुअतहिं टूट पिनाक पुराना । मैं केहि हेतु करौं अभिमाना ।

स्पृष्टमात्रं मया ह्येतद् द्विधा भिन्नं शरासनम् ।
पुराणत्वाद् विनायासं किं मे दर्पस्य कारणम् ॥ १२५

—जौं हम निदरहिं बिप्र बदि सत्य सुनहु भृगुनाथ ।
तौ अस को जग सुभटु जेहि भय बस नावहिं माथ ॥

संबोधनं च विप्रेति प्रयुक्तं भृगुनन्दन ।
आवाभ्यां नोपहासाय सत्यं भाषे मुनीश्वर ॥ १२६

विप्रोऽसीति च नूनं हि विनीतौ त्वत्पुरस्तथा ।
नावयोः सुभटस्याग्रे भयान्नमति मस्तकम् ॥ १२७

देव दनुज भूपति भट नाना । समबल अधिक होउ बलवाना ॥

कोऽसौ वीरोऽस्ति लोकेऽस्मिन् वद मे भृगुनन्दन ।
येनेदं नामितं शीर्ष्णं भयाद् दाशरथे रणे ॥ १२८

सुरो वाप्यसुरो वासौ भूपालो वा भटोऽपि वा ।
सदृशो वाधिको वासौ यो वा को वा भवेन्मुने ॥ १२९

जौं रन हमहि पचारै कोऊ । लरहिं सुखेन कालु किन होऊ ॥

आह्वयेद् यदि नौ कश्चित् कालोऽप्यत्र रणाजिरे ।
सुखं योत्स्यावहे तेन विद्धीदं भृगुनन्दन ॥ १३०

छत्रिय तनु धरि समर सकाना । कुल कलंकु तेहिं पावँर आना ॥

विन्मुखः समरे योऽत्र क्षत्रियः सन्मुने ध्रुवम् ।
कलङ्कोऽत्र हि मन्तव्यः कुलकीर्ति-विघातकः ॥ १३१

कहउँ सुभाउ न कुलहि प्रसंसी । कालहु डरहिं न रन रघुबंसी ॥

कालादपि न वै सोऽयं बिभेति रघुवंशजः ।
भूतार्थं कथये तेऽहं नेयं कुल-विकत्थना ॥ १३२

बिप्रबंस कै असि प्रभुताई । अभय होइ जो तुम्हहि डेराई ॥

निर्भयोऽपि नमाम्येवं भयादिव पुरस्तव ।
विप्रबंशप्रभावोऽयं विद्धीति भृगुनन्दन ॥" १३३

सुनि मृदु गूढ़ बचन रघुपति के। उघरे पटल परसुधर मति के ॥

मृदु-गूढां गिरं चैवं श्रुत्वा रघुपतेर्मुखात् ।
व्यलीयन्त मुनेः सद्यः मोहावरणमन्तरात् ॥ १३४

राम रमापति कर धनु लेहू। खैंचहु मिटै मोर संदेहू ॥

"गृहाणेदं धनुर्हस्ते समाकर्षय शिञ्जिनीम् ।
निवारय च संदेहं रमानाथ रघूद्वह ॥" १३५

देत चापु आपुहिं चलि गयऊ। परसुराम मन बिसमय भयऊ ॥
—जाना राम प्रभाउ तब पुलक प्रफुल्लित गात ।
जोरि पानि बोले बचन हृदयँ न प्रेमु अमात ॥

इत्युक्त्वा यावदेवासौ दातुमैच्छत् निजं धनुः ।
तावत् तत् स्वयमेवागात् रामहस्ते शरासनम् ॥ १३६
वीक्ष्येदं भृगुनाथोऽपि विस्मय-स्तिमितोऽभवत् ।
प्रभावं रघुनाथस्य जज्ञे दिव्यं क्षणादसौ ॥ १३७
हर्षरोमाञ्चिताङ्गोऽसौ प्रेमभक्ति-प्रपूरितः ।
बद्धाञ्जलिरुवाचैवं सानन्दं रघुनायकम् ॥ १३८

जय रघुबंस बनज बन भानू। गहन दनुज कुल दहन कृसानू ॥
जय सुर बिप्र धेनु हितकारी। जय मद मोह कोह भ्रम हारी ॥

"जय जय रघुकुल-कमल-दिवाकर
गहन-दनुज-कुल-वन-दहनानल ।
जय जय भूसुर-गो-सुर-हितकर
षडरि-जनित-जन-दर-भव-भय-हर ॥ (१) १३९

बिनय सील करुना गुन सागर। जयति बचन रचना अति नागर ॥
सेवक सुखद सुभग सब अंगा। जय सरीर छबि कोटि अनंगा ॥

सेवक-सुखकर सुन्दर-तनुधर
शील-विनय-करुणा-गुणसागर ।
जय जय शत-शत-मन्मथ-दर्शन
चतुर-वचन-रचना-विधि-पेशल ॥ (२) १४०

करौं काह मुख एक प्रसंसा । जय महेस मन मानस हंसा ॥
अनुचित बहुत कहेउँ अग्याता । छमहु छमामंदिर दोउ भ्राता ॥

एकमुखेन कथं गुणगानम्
तव शिवमानसहंस रघूत्तम ।
अनुचितमपि बहु यदुदितमधुना
मोहतिमिरपटलावृत-मतिना ॥ ३ ॥ १४१

शुभ-गुण-सुन्दर-करुणा-मन्दिर
दशरथतनयौ मर्षयतं मम ।
जय जय रघुकुल-दीपक राघव
जय जय सदय सुदास-शुभंकर ॥ ४ ॥ १४२

कहि जय जय जय रघुकुलकेतू । भृगुपति गए बनहि तप हेतू ॥

एवं स्तुत्वा रमानाथं भूयो भूयः स भार्गवः ।
जगाम विजनं प्रीतस्तपस्तप्तुं महायशाः ॥ १४३

अपभयँ कुटिल महीप डेराने । जहँ तहँ कायर गवँहिं पराने ॥

प्रभावं रघुनाथस्य दृष्ट्वा भीताः पलायिताः ।
इतस्ततस्ततो राज्ञः कुटिला दुष्टबुद्धयः ॥ १४४

– देवन्ह दीन्हीं दुंदुभीं प्रभु पर बरषहिं फूल ।
हरषे पुर नर नारि सब मिटी मोहमय सूल ॥

प्रहता भेरयो देवैर्मुदितैः पुष्पवर्षिभिः ।
ध्वस्तमोहान्धकाराश्च पौराः प्रीतास्तदात्मनि ॥ १४५

अति गहगहे बाजने बाजे । सबहिं मनोहर मंगल साजे ॥

चारु-मङ्गल-वेषैश्च पुरनारीनरैस्तदा ।
शुशुभे नगरं सर्वं प्रोच्चैर्दुन्दुभिनिःस्वनैः ॥ १४६

जूथ जूथ मिलि सुमुखि सुनयनीं । करहिं गान कल कोकिलबयनीं ॥

जगुर्मङ्गलगीतानि मञ्जुलं च सुलोचनाः ।
पिकगायननिर्ह्लादं सुमुख्यः संघशस्तदा ॥ १४७

सुखु बिदेह कर बरनि न जाई । जन्मदरिद्र मनहुँ निधि पाई ।।

जनकस्य तु संतोषं को नु वर्णयितुं क्षमः ।
दरिद्रो लब्धवान् नूनं धनागारं विधेर्वशात् ।। १४८

बिगत त्रास भइ सीय सुखारी । जनु बिधु उदयँ चकोरकुमारी ।।

विदेहतनया चैवं प्राणेशहृतसाध्वसा ।
सुखितालोकनात्तस्य चकोरीवेन्दुदर्शनात् ।। १४९

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
परशुराम-गर्व-हरणं नाम पञ्चचत्वारिंशस्तरङ्गः ।

तरङ्गः ४६

जनक कीन्ह कौसिकहि प्रनामा । प्रभु प्रसाद धनु भंजेउ रामा ।।
मोहि कृतकृत्य कीन्ह दुहुँ भाईं । अब जो उचित सो कहिअ गोसाईं ।।

कृत्वा प्रणाममवदज्जनको मुनीन्द्रम्
"रामो बिभेद भवतः कृपयैव चापम् ।
तौ भ्रातरावकुरुतां कृतिनं मुने माम्
तद् ब्रूहि यत्समुचितं ननु तद् विधास्ये ।।" १

कह मुनि सुनु नरनाथ प्रबीना । रहा बिबाहु चाप आधीना ।।
टूटतहीं धनु भयउ बिबाहू । सुर नर नाग बिदित सब काहू ।।
—तदपि जाइ तुम्ह करहु अब जथा बंस ब्यवहारु ।
बूझि बिप्र कुलबृद्ध गुर बेद बिदित आचारु ।

तं प्रत्युवाच मुदितः कुशिकात्मजोऽपि
"प्राज्ञोऽसि रे नरपते ननु किं न वेत्सि ।
चापाश्रितः परिणयस्तव कन्यकायाः
छिन्ने तथा धनुषि चावसितो हि राजन् ।। २

तत्सर्वमेव विदितं विबुधादिकानाम्
मान्यं तथैव मिथिलाधिपते नराणाम् ।
त्वं त्वत्र वेदविहितं स्वकुलानुरूपम्
वर्तस्व विप्रगुरुभिश्च यथोपदिष्टः ।। ३

दूत अवधपुर पठवहु जाई । आनहिं नृप दसरथहि बोलाई ।।
मुदित राउ कहि भलेहिं कृपाला । पठए दूत बोलि तेहि काला ।।

वार्ताहरान् विसृज कोसल-राजधानीम्
राज्ञो द्रुतं दशरथस्य निमन्त्रणार्थम् ।"
उक्त्वा 'तथे'ति जनकोऽपि मुनिं सहर्षम्
दूतान् स्वयं नृपतये विससर्ज तूर्णम् ।। ४

बहुरि महाजन सकल बोलाए । आइ सबन्हि सादर सिर नाए ।।
हाट बाट मंदिर सुरबासा । नगरु सँवारहु चारिहुँ पासा ।।

आहूयापि महाजनवृन्दम्
ससुरालय स चतुष्पथ-मार्गम् ।
सविपणिकं सनिकेतनमेवम्
समादिशत्पुर-समलङ्करणम् ।। ५

हरषि चले निज निज गृह आए । पुनि परिचारक बोलि पठाए ।।
रचहु बिचित्र बितान बनाई । सिर धरि बचन चले सचु पाई ।।

तेऽपि च प्रणत-नरेश्वर-पादा
धृत-नत-मस्तक-नृपति-निदेशाः ।
नृपतनया-परिणय-परिमुदिता
जग्मुः पुनरपि निलयं सुखिताः ।। ६

तदुपरि परिजनमाहूयैवं
नरपतिरूचे 'कुरुत वितानम्' ।
धृत्वा शिरसा नरपतिवचनं
तेऽपि च याताः सुखिता निलयम् ।। ७

पठए बोलि गुनी तिन्ह नाना । जे बितान बिधि कुसल सुजाना ।।
बिधिहि बंदि तिन्ह कीन्ह अरंभा । बिरचे कनक कदलि के खंभा ।।

—हरित मनिन्ह के पत्र फल पदुमराग के फूल ।
रचना देखि बिचित्र अति मनु बिरंचि कर भूल ॥
बेनु हरित मनिमय सब कीन्हे । सरल सपरब परहिं नहिं चीन्हे ॥
कनक कलित अहिबेलि बनाई । लखि नहिं परइ सपरन सुहाई ॥
तेहि के रचि पचि बंध बनाए । बिच बिच मुकुता दाम सुहाए ॥
मानिक मरकत कुलिस पिरोजा । चीरिकोरि पचि रचे सरोजा ॥
किए भृंग बहुरंग बिहंगा । गुंजहिं कूजहिं पवन प्रसंगा ॥
सुर प्रतिमा खंभन गढ़ि काढ़ीं । मंगल द्रब्य लिएँ सब ठाढ़ीं ॥
चौकें भाँति अनेक पुराईं । सिंधुर मनिमय सहज सुहाईं ॥
—सौरभ पल्लव सुभग सुठि किए नीलमनि कोरि ।
हेम बौर मरकत घवरि लसत पाटमय डोरि ॥
रचे रुचिर बर बंदनिवारे । मनहुँ मनोभवँ फंद सँवारे ॥
मंगल कलस अनेक बनाए । ध्वज पताक पट चमर सुहाए ॥

परिणय-मण्डप-सुखमय-रचना—
चतुर-कुशल-जन-वृन्दं तूर्णम् ।
विधिना वन्दित-विधि-पद-कमलम्
समारभत शुभ-मण्डप-रचनाम् ॥ ८
विरचित-कनक-कदल-दल-काण्डं
सुरचित-मरकत-हरित-सुपत्रम् ।
पद्मराग-कृत-लोहित-कुसुमं
रेजे सुरुचिरमतुल-वितानम् ॥ ९
हरित-मणिमयाः सुघटित-वंशाः
वास्तविका इव पर्व-समेताः ।
कनक-कलित-पुन्नाग-लतापि
परमार्थेव सुरचिता पर्णैः ॥ १०
कनक-घटित-मणि-खचित-गुणोऽपि
मौक्तिक-दाम-सुमण्डित-बन्धः ।
पद्मराग-मरकत-मणि-खण्डैः
कमलान्यपि रचितानि सुरङ्गैः ॥ ११

नानारङ्ग-विहंगम-भृङ्गाः
पवन-विचलिताः कृत-मधु-रावाः ।
कर-धृत-विविध-सुमङ्गल-चिह्नाः
स्तम्भे स्तम्भे विबुधाकृतयः ॥ १२

नीलोल्लिखित-सुरम्य-दलाढ्याः
कनक-विरचित-प्रसवा रुचिराः ।
पट्ट-दाम-धृत-मरकत-सुफला
रचिताश्चूता बहुरमणीयाः ॥ १३

द्वारे द्वारे तोरण-माला
रुचिरा रतिपति-पाश-समानाः ।
स्थाने स्थाने मणिमय-पीठा
ध्वजाः पताकाः गगनोत्क्षिप्ताः ॥ १४

दीप मनोहर मनिमय नाना । जाइ न बरनि बिचित्र बिताना ॥
जेहिं मंडप दुलहिनि बैदेही । सो बरनै असि मति कबि केही ॥

मणिदीपक-कृत-रुचिर-मण्डना
विरेजिरे पुरि विविध-मण्डपाः ।
केन वर्ण्यते मण्डप-शोभा
वधूर्यत्र सा जनक-कन्यका ॥ १५

दूलहु रामु रूप गुन सागर । सो बितानु तिहुँ लोक उजागर ॥

वरश्च यत्र स्वयं रघुवरः
सद्गुणसिन्धुः सुन्दररूपः ।
त्रिभुवनसुन्दर-मण्डप-शोभां
वर्णयितुं कुशलोऽस्ति च कस्ताम् ॥ १६

जनक भवन कै सोभा जैसी । गृह गृह प्रति पुर देखिअ तैसी ॥
जेहिं तेरहुति तेहि समय निहारी । तेहि लघु लगहिं भुवन दस चारी ॥

यथा मण्डितं जनक-मन्दिरं
तथैव नगरे प्रतिजननिलयम् ।
चतुःपूर्वदशभुवनादधिका
रेजेऽपूर्वा 'तिरहुत'-शोभा ॥ १७

जो संपदा नीच गृह सोहा । सो बिलोकि सुरनायक मोहा ।।
—बसइ नगर जेहिं लच्छि करि नारि बर बेषु ।
तेहि पुर कै सोभा कहत सकुचहिं सारद सेषु ।।

नीचैरपि निज-निलय-मण्डने प्रदर्शितं धन-वैभवमग्र्यम् ।
वीक्ष्य विभूतिं विविध-रूपिणीं लुब्धं विबुध-पतेरपि चित्तम् ।।१८

उवास नारीरूपधारिणी – पुरे यत्र सा पद्मवासिनी ।
नैव शारदा न चापि शेषस्तत्पुरवैभवमीष्टे वक्तुम् ।। १९

पहुँचे दूत राम पुर पावन । हरषे नगर बिलोकि सुहावन ।।
भूप द्वार तिन्ह खबरि जनाई । दसरथ नृप सुनि लिए बोलाई ।।
करि प्रनामु तिन्ह पाती दीन्ही । मुदित महीप आपु उठि लीन्ही ।।
बार बिलोचन बाँचत पाती । पुलक गात आई भरि छाती ।।

प्रापुः पुरं ते परमं पवित्रं
दूता विदेहस्य रघूद्वहस्य ।
दृष्ट्वा पुरं तत्सविशेषशोभं
हृष्टा ययुः पङ्क्तिरथस्य हर्म्यम् ।। २०

आकर्ण्य वृत्तं नृपतिः स्वभृत्यात्
प्रावेशयत्तान् मिथिलेश-दूतान् ।
ते चापि नत्वा व्यतरन् नृपाय
लेखं विसृष्टं मिथिलाधिपेन ।। २१

हृष्टः समुत्थाय नृपः स्वयं तं
जग्राह हस्ते मिथिलेश-लेखम् ।
पठन् स जातः पुलकाङ्किताङ्गः
सास्रश्च मोदातिशयेन धीरः ।। २२

रामु लखनु उर कर बर चीठी । रहि गए कहत न खाटी मीठी ।।

दधार हस्तेन स लेखपत्रं
हृदा तु सौमित्रिमथापि रामम् ।
चिरं न चासीत् प्रियमप्रियं वा
वक्तुं समर्थो नृपतिः स हर्षात् ।। २३

पुनि धरि धीर पत्रिका बाँची । हरषी सभा बात सुनि साँची ।।

आस्थाय धैर्यं पुनरन्तरेऽसौ
पपाठ चोद्वाह-निमन्त्रणं तद् ।
ज्ञात्वा ततो राम-विवाह-वृत्तं
सभापि हृष्टा सह तेन राज्ञा ।। २४

खेलत रहे तहाँ सुधि पाई । आए भरतु सहित हित भाई ।।
पूछत अति सनेहँ सकुचाई । तात कहाँ तें पाती आई ।।
—कुसल प्रानप्रिय बंधु दोउ अहहिं कहहु केहिं देस ।
सुनि सनेह साने बचन बाचि बहुरि नरेस ।।
सुनि पाती पुलके दोउ भ्राता । अधिक सनेहु समात न गाता ।।

शत्रुघ्न-मित्रादिक-वेष्टितोऽपि
क्रीडां समुज्झित्य पितुः सकाशम् ।
विज्ञाय वृत्तं भरतोऽपि शीघ्रं
गत्वा ससंकोचमुवाच हृष्टः ।। २५

"किं तात पत्रं प्रहितं च केन
क्व वर्तते नो ननु बन्धुयुग्मम् ।
कच्चिन्नु सर्वं कुशलं तदीयं
सोत्कं परिज्ञातुमतीव चित्तम् ।।" २६

आकर्ण्य तत्स्नेहमयानुयोगं
पपाठ पत्रं जनकस्य भूपः ।
अमान्न हर्षातिशयः शरीरे
श्रुत्वा तयोर्वृत्तविशेषजातः ।। २७

प्रीति पुनीत भरत कै देखी । सकल सभाँ सुखु लहेउ बिसेषी ।।

रामानुरागं परमं पवित्रं
विलोभनीयं हृदयार्जवं च ।
उदाररम्यं भरतस्य भावं
वीक्ष्यातिहृष्टा नृपतेः सभा सा ।। २८

जो संपदा नीच गृह सोहा । सो बिलोकि सुरनायक मोहा ।।
—बसइ नगर जेहिं लच्छि करि नारि बर बेषु ।
तेहि पुर कै सोभा कहत सकुचहिं सारद सेषु ।।

नीचैरपि निज-निलय-मण्डने प्रदर्शितं धन-वैभवमग्र्यम् ।
वीक्ष्य विभूतिं विविध-रूपिणीं लुब्धं विबुध-पतेरपि चित्तम् ।।१८

उवास नारीरूपधारिणी — पुरे यत्र सा पद्मवासिनी ।
नैव शारदा न चापि शेषस्तत्पुरवैभवमीष्टे वक्तुम् ।। १९

पहुँचे दूत राम पुर पावन । हरषे नगर बिलोकि सुहावन ।।
भूप द्वार तिन्ह खबरि जनाई । दसरथ नृप सुनि लिए बोलाई ।।
करि प्रनामु तिन्ह पाती दीन्ही । मुदित महीप आपु उठि लीन्ही ।।
बार बिलोचन बाँचत पाती । पुलक गात आई भरि छाती ।।

प्रापुः पुरं ते परमं पवित्रं
दूता विदेहस्य रघूद्वहस्य ।
दृष्ट्वा पुरं तत्सविशेषशोभं
हृष्टा ययुः पङ्क्तिरथस्य हर्म्यम् ।। २०
आकर्ण्य वृत्तं नृपतिः स्वभृत्यात्
प्रावेशयत्तान् मिथिलेश-दूतान् ।
ते चापि नत्वा व्यतरन् नृपाय
लेखं विसृष्टं मिथिलाधिपेन ।। २१
हृष्टः समुत्थाय नृपः स्वयं तं
जग्राह हस्ते मिथिलेश-लेखम् ।
पठन् स जातः पुलकाङ्किताङ्गः
सास्रश्च मोदातिशयेन धीरः ।। २२

रामु लखनु उर कर बर चीठी । रहि गए कहत न खाटी मीठी ।।

दधार हस्तेन स लेखपत्रं
हृदा तु सौमित्रिमथापि रामम् ।
चिरं न चासीत् प्रियमप्रियं वा
वक्तुं समर्थो नृपतिः स हर्षात् ।। २३

पुनि धरि धीर पत्रिका बाँची । हरषी सभा बात सुनि साँची ।।

आस्थाय धैर्यं पुनरन्तरेऽसौ
पपाठ चोद्वाह-निमन्त्रणं तद् ।
ज्ञात्वा ततो राम-विवाह-वृत्तं
सभापि हृष्टा सह तेन राज्ञा ।। २४

खेलत रहे तहाँ सुधि पाई । आए भरतु सहित हित भाई ।।
पूछत अति सनेहँ सकुचाई । तात कहाँ तें पाती आई ।।
—कुसल प्रानप्रिय बंधु दोउ अहहिं कहहु केहिं देस ।
सुनि सनेह साने बचन बाचि बहुरि नरेस ।।
सुनि पाती पुलके दोउ भ्राता । अधिक सनेहु समात न गाता ।।

शत्रुघ्न-मित्रादिक-वेष्टितोऽपि
क्रीडां समुज्झित्य पितुः सकाशम् ।
विज्ञाय वृत्तं भरतोऽपि शीघ्रं
गत्वा ससंकोचमुवाच हृष्टः ।। २५

"किं तात पत्रं प्रहितं च केन
क्व वर्तते नो ननु बन्धुयुग्मम् ।
कच्चिन्नु सर्वं कुशलं तदीयं
सोत्कं परिज्ञातुमतीव चित्तम् ।।" २६

आकर्ण्य तत्स्नेहमयानुयोगं
पपाठ पत्रं जनकस्य भूपः ।
अमान्न हर्षातिशयः शरीरे
श्रुत्वा तयोर्वृत्तविशेषजातः ।। २७

प्रीति पुनीत भरत कै देखी । सकल सभाँ सुखु लहेउ बिसेषी ।।

रामानुरागं परमं पवित्रं
विलोभनीयं हृदयार्जवं च ।
उदाररम्यं भरतस्य भावं
वीक्ष्यातिहृष्टा नृपतेः सभा सा ।। २८

तब नृप दूत निकट बैठारे। मधुर मनोहर बचन उचारे॥
भैआ कहहु कुसल दोउ बारे। तुम्ह नीकें निज नयन निहारे॥

स्वसंनिधौ तानुपवेश्य दूतान्
उवाच राजा मधुरं मनोज्ञम्।
"किं क्षेमवन्तावथ सुस्थदेहौ
दृष्टौ स्वयं तौ भणतात्मजौ मे॥ २९

स्यामल गौर धरें धनु भाथा। बय किसोर कौसिक मुनि साथा॥

तौ श्यामगौरौ तनयौ प्रियौ मे
निषङ्गिणौ कार्मुकधारिणौ तौ।
सकौशिकौ तौ वयसा किशोरौ
जानीथ किं तौ वदतात्मजौ मे॥ ३०

पहिचानहु तुम्ह कहहु सुभाऊ। प्रेम बिबस पुनि पुनि कह राऊ॥

जानीथ यद्यत्र सुतौ ममैतौ
स्वभावमाख्यात न किं तयोर्मे।"
इत्यात्मजप्रेमवशीकृतात्मा
पुनः पुनस्तानवदन्नरेन्द्रः॥ ३१

जा दिन तें मुनि गए लवाई। तब तें आजु साँचि सुधि पाई॥
कहहु बिदेह कवन बिधि जाने। सुनि प्रिय बचन दूत मुसुकाने॥
सुनहु महीपति मुकुट मनि तुम्ह सम धन्य न कोउ।
रामु लखनु जिन्ह के तनय बिस्व बिभूषन दोउ॥

"यतः प्रभृत्येव मुनीश्वरेण
सहात्मना तौ प्रियपुत्रकौ मे।
नीतावितस्तद्दिवसान्न लब्धः
क्षेमाभिशंसी सुतयोरुदन्तः॥ ३२
ब्रूतात्र तन्मां कथमात्मजौ मे
यातौ विदेहं सह कौशिकेन।
ज्ञातौ कथं वा मिथिलाधिपेने-
त्येवं नृपस्तान् पुनराह दूतान॥ ३३

स्मित्वाथ किञ्चिन्मिथिलेशदूतास्
तं कोसलेशं प्रति वाक्यमूचुः ।
"धन्योऽसि राजेन्द्र महीतले त्वं
यस्यात्मजौ राघवलक्ष्मणौ तौ ।। ३४

पूछन जोगु न तनय तुम्हारे । पुरुषसिंघ तिहु पुर उजिआरे ।।

त्रैलोक्यदीपाविव ते सुपुत्रौ
राजन् नृसिंहौ बलवीर्यवन्तौ ।
विश्वं गुणैः स्वैरपि भूषयन्तौ
प्रष्टव्यमेतद्विषये नु किं वा ।। ३५

जिन्ह के जस प्रताप कें आगे । ससि मलीन रबि सीतल लागे ।।

ययोर्यशःश्रीपुरतः स पूर्णो-
प्याभाति मन्दद्युतिरौषधीशः ।
प्रतापवह्नेः पुरतस्तथासौ
सुशीतलश्चापि सहस्ररश्मिः ।। ३६

तिन्ह कहँ कहिअ नाथ किमि चीन्हे । देखिअ रबि कि दीप कर लीन्हे ।।

ज्ञाताविमौ मे कथमात्मजावि-
त्येवं पुनः पृच्छसि चात्र राजन् ।
पश्यन्ति लोके वद तिग्मरश्मि
धृत्वा करे किं नरनाथ दीपम् ।। ३७

सीय स्वयंबर भूप अनेका । समिटे सुभट एक तें एका ।।

स्वयंवरार्थं जनकात्मजायाः
नाना-स्थलेभ्यो मिलिता वरेण्याः ।
ख्यातास्त्रिलोके मिथिलापुरे ते
युयुत्सवो वीरवरा नरेन्द्राः ।। ३८

संभु सरासनु काहुँ न टारा । हारे सकल बीर बरिआरा ।।
तीनि लोक महँ जे भटमानी । सभ कै सकति संभु धनु भानी ।।

नैकोऽप्यलं तेषु नृपेषु राजन् भङ्क्तुं पुरारेस्तु शरासनं तद् ।
भग्नस्तु लोकत्रयवीर दर्पः शरासनेनैव तदा पुरारेः ।। ३९

सकइ उठाइ सरासुर मेरू । सोउ हियँ हारि गयउ करि फेरू ।।
जेहिं कौतुक सिव सैलु उठावा । सोउ तेहि सभाँ पराभउ पावा ।।

बाणः सुमेरूद्धरणेऽपि शक्तः
प्रदक्षिणीकृत्य पराजितोऽगात् ।
कैलासमभ्युद्धृतवान् य एकः
स रावणोऽप्यत्र पराजितोऽभूत् ।। ४०

—तहाँ राम रघुबंस मनि सुनिअ महा महिपाल ।
भंजेउ चाप प्रयास बिनु जिमि गज पंकज नाल ।।

तदेव चेदं शृणु लोकनाथ
शावं धनुस्ते व्यभनक् कुमारः ।
रामो रघूणां कुलरत्नदीपः
सलीलमब्जस्य करीव वृन्तम् ।। ४१

सुनि सरोष भृगुनायकु आए । बहुत भाँति तिन्ह आँखि देखाए ।।
देखि राम बलु निज धनु दीन्हा । करि बहु बिनय गवनु बन कीन्हा ।।

श्रुत्वा धनुर्भञ्जनवृत्तमेतत्
क्रुद्धो मुनीन्द्रो भृगुनायकोऽस्मै ।
बहु प्रयेते मिथिलासभायां
तवात्मजं तर्जयितुं नरेन्द्र ।। ४२

स भीषयित्वा परुषैर्वचोभिर्
दृशा तथा लोकतया रुषा च ।
विज्ञाय रामस्य बलं जगाम
संप्रार्थ्य दत्वा स्वधनुर्वनान्तम् ।। ४३

राजन रामु अतुलबल जैसें । तेज निधान लखनु पुनि तैसें ।।
कंपहिं भूप बिलोकत जाकें । जिमि गज हरि किसोर के ताकें ।।

यथा हि रामोऽतुलविक्रमौजास्
तथा द्वितीयोऽपि तवात्मजोऽसौ ।
दृष्ट्वा तमासन् सभया नृपाला
मतंगजा सिंहशिशुं यथैव ।। ४४

देव देखि तव बालक दोऊ । अब न आँखि तर आवत कोऊ ।।
दूत बचन रचना प्रिय लागी प्रेम प्रताप बीररस पागी ।।

नास्त्येव पारं सुतयोर्गुणानां स्वल्पा च धीर्नो बहुना किमत्र ।
दृष्ट्वैकदा ते नृपते कुमारौ नान्यत्र नेत्रे सुखमश्नुवाते ।।" ४५

इत्यात्मभावप्लुतमर्थयुक्तं प्रेष्योदितं वीररसोज्ज्वलं च ।
संतर्पयामास पितुर्नितान्तं तथा जनानां श्रवणेन्द्रियाणि ।। ४६

सभा समेत राउ अनुरागे । दूतन्ह देन निछावरि लागे ।।
कहि अनीति ते मर्दहिं काना । धरमु बिचारि सबहिं सुखु माना ।।

ददुस्तदा प्राभृतकानि तेभ्यः
सहैव राज्ञा सकला सभापि ।
पिधाय कर्णौ न च गृह्णतस्तान्
सुधार्मिकाँस्तुष्टुविरे च सर्वे ।। ४७

–तब उठि भूप बसिष्ट कहुँ दीन्हि पत्रिका जाइ ।
कथा सुनाई गुरहि सब सादर दूत बोलाइ ।।

उत्थाय भूपोऽथ विवाहपत्रं
ददौ वसिष्ठाय विदेह-लब्धम् ।
आह्लादकं दूतमुखैः पुनस्तद्
निशामयामास च सादरं तम् ।। ४८

सुनि बोले गुर अति सुखु पाई । पुन्य पुरुष कहुँ महि सुख छाई ।।

श्रुत्वातिहृष्टः स गुरुस्तदोचे
वचोऽर्थयुक्तं सुखितं नरेशम् ।
"नानासुखानां जननी सदेयं
पुण्यात्मनोऽर्थे वसुधा नृपाल ।। ४९

जिमि सरिता सागर महुँ जाहीं । जद्यपि ताहि कामना नाहीं ।।
तिमि सुख संपति बिनहिं बोलाएँ । धरमसील पहिं जाहिं सुभाएँ ।।

अनीहमानं हि यथाम्बुराशिं सर्वे समायान्ति सरित्प्रवाहाः ।
कल्याणसम्पच्च यथा स्वभावात् धर्मात्मनो यात्यनभीप्सितापि ।। ५०

तुम्ह गुर बिप्र धेनु सुर सेबी । तसि पुनीत कौसल्या देबी ।।
सुकृती तुम्ह समान जग माहीं । भयउ न है कोउ होनेउ नाहीं ।।
तुम्ह ते अधिक पुन्य बड़ काकें । राजन राम सरिस सुत जाकें ।।
बीर बिनीत धरम ब्रत धारी । गुन सागर बर बालक चारी ।।
तुम्ह कहुँ सर्ब काल कल्याना । सजहु बरात बजाइ निसाना ।।

गोब्राह्मणाचार्य-सुरादिकानां
त्वं सेवकः, साऽपि च तेऽथ राज्ञी ।
शुचिव्रता, यन्न महीपतेऽस्मिन्
त्वद्व्रतपरः पुण्यकरोऽस्ति लोके ।। ५१

जातो न कश्चित् सुकृती जगत्यां
न वा भविष्यत्यपरः समस्ते ।
त्वत्तोऽधिकः पुण्यकरोऽस्ति को वा
यस्यात्मजातो रघुनन्दनोऽसौ ।। ५२

वीरा विनम्रा व्रतधर्मशीला
पुत्रा हि सर्वे गुणसिन्धवस्ते ।
कल्याणमेवात्र सदा भविष्ये
पश्यामि राजन् तव वर्धमानम् ।। ५३

तद् घोषयाद्यैव सभेरि-नादं
शुभ-प्रयाणं मिथिलापुरार्थे ।
शुभस्य शीघ्रं कुरु संविधानं
कालातिपातासहवृत्तमेतद् ।।" ५४

–चलहु बेगि सुनि गुर बचन भलेहिं नाथ सिरु नाइ ।
भूपति गवने भवन तब दूतन्ह बासु देवाइ ।।

गुरूपदिष्टं तदतीव सार्थं
वचस्तथेत्यानतमस्तकेन
स्वीकृत्य राजापि ययौ स्ववासं
निवासयित्वा मिथिलेश-दूतान् ।। ५५

राजा सबु रनिवास बोलाई । जनक पत्रिका बाचि सुनाई ॥
सुनि संदेसु सकल हरषानीं । अपर कथा सब भूप बखानीं ॥

निशामयित्वा महिषी-निवासे
राज्ञीपुरस्तन्मिथिलेश-पत्रम् ।
आनन्दयत् ताः शुभवार्तयाऽसौ
निवेद्य चाशेष-विसृज्य-वृत्तम् ॥ ५६

प्रेम प्रफुल्लित राजहिं रानी । मनहुँ सिखिनि सुनि बारिद बानी ॥
मुदित असीस देहिं गुर नारीं । अति आनंद मगन महतारीं ॥

राज्ञ्यः सुवृत्तेन तथा प्रहृष्टा
यथा मयूरी घन-र्गजितेन ।
वृद्धाभिरासीदभिनन्दितोऽसौ
नानाशुभाशीर्वचनैर्नृपालः ॥ ५७

लेहिं परस्पर अति प्रिय पाती । हृदयँ लगाइ जुड़ावहिं छाती ॥
राम लखन कै कीरति करनी । बारहिं बार भूपबर बरनी ॥

पुनः पुनस्ताः प्रियवृत्तदं तत्
पत्रं निधायोरसि जातमोदाः ।
पुनः पुनः सोऽपि जगौ नरेशः
श्रीरामसौमित्रि-यशःप्रतापौ ॥ ५८

मुनि प्रसादु कहि द्वार सिधाए । रानिन्ह तब महिदेव बोलाए ॥
दिए दान आनंद समेता । चले बिप्रबर आसिष देता ॥

"कृपामिमां वित्त गुरोरुदाराम्
उक्त्वे"ति राजा बहिराजगाम ।
राज्ञ्यश्च दानानि ददुर्द्विजेभ्यः
प्रापुः शुभाशीर्वचनानि तेभ्यः ॥ ५९

–जाचक लिए हँकारि दीन्हि निछावरि कोटि बिधि ।
चिरु जीवहुँ सुत चारि चक्रवर्ति दसरत्थ के ॥

ततः समाहूय च याचकेभ्यो दानानि नाना वितताार भूपः ।
'जीवन्तु पुत्राश्चिरं'मित्यथैवं लेभे शुभाशीर्वचनं च तेभ्यः ॥ ६०

कहत चले पहिरे पट नाना । हरषि हने गहगहे निसाना ।।
समाचार सब लोगन्ह पाए । लागे घर घर होन बधाए ।।
भुवन चारि दस भरा उछाहू जनकसुता रघुबीर बिआहू ।।
सुनि सुभ कथा लोग अनुरागे । मग गृह गलीं सँवारन लागे ।।

उच्चैर्वदन्तश्च तथाशिषं ते
गृहीत-नाना-नव-चारु-वस्त्राः ।
जग्मुः पथा संपरितृप्त-चित्ताः
वृत्तं जनेभ्यः परिकीर्तयन्तः ।। ६१

श्रुत्वा तदानन्दकरं सुवृत्तं
भेर्यो नगर्यां ननदुस्तदोच्चैः ।
गृहे गृहे मोदितमानसानां
महोत्सवोऽभूत् नगरे जनानाम् ।। ६२

श्रीरामसीता-शुभ-मङ्गलार्थे
सोत्साहमासीन्ननु लोक-वृन्दम् ।
आरेभिरे मण्डयितुं समस्ता
लोकाः स्वगेहानि च वीथिकाश्च ।। ६३

जद्यपि अवध सदैव सुहावनि । राम पुरी मंगलमय पावनि ।।
तदपि प्रीति कै प्रीति सुहाई । मंगल रचना रची बनाई ।।

यद्यप्ययोध्या रघुनाथवासात् सदैव हृद्या शुचि-रम्य-रूपा ।
तथापि चाभूत् सविशेषमोदात् सुमण्डिता पौरजनैस्तदा सा ।। ६४

ध्वज पताक पट चामर चारू । छावा परम बिचित्र बजारू ।।
कनक कलस तोरन मनि जाला । हरद दूब दधि अच्छत माला ।।
—मंगलमय निज निज भवन लोगन्ह रचे बनाइ ।
बीथी सींचीं चतुरसम चौकें चारु पुराइ ।।

ध्वजा-पताका-पट-चामरैः सा
पुरी विरेजे सुविचित्र-पण्या ।
सुवर्ण-कुम्भैर्मणि-जाल-माला—
स्रग्भिर्जनानां च निवासराज्यः ।। ६५

दूर्वा-हरिद्राक्षत-पुष्पहार-
द्रप्सादि-माङ्गल्यकरैः पदार्थैः ।
अलङ्कृतान्यात्मगृहाणि सर्वैर्
आनन्दितैः पौरजनैस्तदैव ॥ ६६

कस्तूरिका-कुङ्कुम-चन्दनादि —
द्रव्यैः सुगन्धैरधिवासितोदैः ।
सिक्ताः समस्ता नगरेऽपि वीथ्य-
श्चतुष्पथान्यप्यतिशोभितानि ॥ ६७

जहँ तहँ जूथ जूथ मिलि भामिनि । सजि नव सप्त सकल दुति दामिनि ॥
बिधुबदनीं मृग सावक लोचनि । निज सरूप रति मानु बिमोचनि ॥

सुमङ्गलीभिर्मृगलोचनाभिः
सौदामिनी-वर्ण-विभूषिताभिः ।
चन्द्राननाभिर्नगरी विरेजे
जितात्मरूप-स्मर-वल्लभाभिः ॥ ६८

गावहिं मंगल मंजुल बानीं । सुनि कल रव कलकंठि लजानीं ॥

ताः संघशः षोडश-रूप-भूषा-
विभूषितास्तत्र सुचारुगात्र्यः ।
गीर्भिर्जगुर्मङ्गलमञ्जुगानं
माधुर्य-धिक्-कारित-कोकिलाभिः ॥ ६९

भूप भवन किमि जाइ बखाना । बिस्व बिमोहन रचेउ बिताना ॥
मंगल द्रब्य मनोहर नाना । राजत बाजत बिपुल निसाना ॥

रचित-विश्व-विमोहन-मण्डपं
निहित-माङ्गलिकं सुमनोहरम् ।
प्रहत-भेरिमृदङ्गजनिःस्वनै —
र्बहुतरं शुशुभे नृप-मन्दिरम् ॥ ७०

कतहुँ बिरिद बंदी उच्चरहीं । कतहुँ बेद धुनि भूसुर करहीं ॥

क्वचिदहो कुल-कीर्ति-कथापराः कलरवा नृप-सद्मनि बन्दिनः ।
क्वचिदपि श्रुति-मन्त्र-परायणाः पपठुरुच्चरवैरथ भूसुराः ॥ ७१

गावहिं सुंदरि मंगल गीता । लै लै नामु रामु अरु सीता ।।
बहुत उछाहु भवनु अति थोरा । मानहुँ उमगि चला चहु ओरा ।।

जनकजा-रघुनन्दन-गौरव-
प्रचुर-गान-परं युवती-कुलम् ।
परिमिते भवने न ममौ यतः
प्रसरति स्म पुरेऽपि स संमदः ।। ७२

—सोभा दसरथ भवन कइ को कबि बरनै पार ।
जहाँ सकल सुर सीस मनि राम लीन्ह अवतार ।।

दशरथस्य निवासमथाद्भुतं
क इह वर्णयितुं कविरस्त्यलम् ।
अधिजगाम जनिं रघुनन्दनः
सकलदेवकुलाधिपतिर्यतः ।। ७३

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
दूतप्रेषणं नाम षट्चत्वारिंशस्तरङ्गः ।



तरङ्गः ४७

भूप भरत पुनि लिए बोलाई । हय गय स्यंदन साजहु जाई ।।

समाहूय ततः शीघ्रं भरतं कोसलाधिपः ।
आदिदेश रथाश्वानां गजानां परिकल्पनम् ।। १

चलहु बेगि रघुबीर बराता । सुनत पुलक पूरे दोउ भ्राता ।।

'रामोद्वाह-सुयात्रायामायातं त्वरयेति च ।
वचः श्रुत्वा पितुर्बन्धू हर्षरोमाञ्चितावुभौ ।। २

भरत सकल साहनी बोलाए । आयसु दीन्ह मुदित उठि धाए ।।
रचि रुचि जीन तुरग तिन्ह साजे । बरन बरन बर बाजि बिराजे ।।

अश्वारोहान् ततः शीघ्रं भरतोऽपि समादिशत् ।
परिकल्पयितुं सर्वान् हयान् यात्रार्थमुत्तमान् ।। ३
प्रहृष्टास्तेऽपि तद्वाक्यं द्रुतं सर्वे हि चक्रिरे ।
यथारुचि तुरङ्गाणां कुर्वन्तः शुभ-मण्डनम् ।। ४

सुभग सकल सुठि चंचल करनी । अय इव जरत धरत पग धरनी ।।
नाना जाति न जाहिं बखाने । निदरि पवनु जनु चहत उड़ाने ।।

मण्डिता विधिना सर्वे नानावर्णा हयोत्तमाः ।
सुभगा जविनः सर्वे सुविनीता विरेजिरे ।। ५
तस्थौ न पदमेतेषां क्षितौ तप्तायसे यथा ।
सर्वे प्लवितुकामास्ते धिक्कुर्वन्त इवानिलम् ।। ६

तिन्ह सब छयल भए असवारा । भरत सरिस बय राजकुमारा ।।

आरूढास्तेषु चाश्वेषु सुभगाश्चारुदर्शनाः ।
वयसानुहरन्तश्च भरतं राजदारकाः ।। ७

सब सुंदर सब भूषनधारी । कर सर चाप तून कटि भारी ।

रूपवन्तश्च ते सर्वे भूषणैः सुविभूषिताः ।
शरकार्मुकहस्तास्ते बद्ध-तूणीर-मध्यमाः ।। ८

–छरे छबीले छयल सब सूर सुजान नबीन ।

शूरवीरा युवानश्च बुद्धिमन्तः समागताः ।
राजपुत्रवराः सर्वे हयारोहा विरेजिरे ॥ ९

जुग पदचर असकर प्रति जे असिकला प्रबीन ॥

खड्ग-विद्या-प्रवीणाभ्यां द्वाभ्यां द्वाभ्यामुपान्विताः ।
ययुस्ते राजतनया रामोद्वाह-समुत्सुकाः ॥ १०

बाँधे बिरद बीर रन गाढ़े । निकसि भए पुर बाहेर ठाढ़े ॥

रणधीरा महावीरा सर्वे ते लब्धकीर्तयः ।
निर्गता नगरात् तूर्णं शुभयात्रानुगा मुदा ॥ ११

फेरहिं चतुर तुरग गति नाना । हरषहिं सुनि सुनि पनव निसाना ॥

संचालनं तुरङ्गाणां नानागतिमनोहरम् ।
दर्शयामासुरप्येते प्रेरिता भेरि-निःस्वनैः ॥ १२

रथ सारथिन्ह बिचित्र बनाए । ध्वज पताक मनि भूषन लाए ॥
चवँर चारु किंकिनि धनि करहीं । भानु जान सोभा अपहरहीं ॥

मण्डिताः स्यन्दनाः सूतैः पताकाध्वजभूषणैः ।
किंकिणी-कल-निह्लादाः सन्नद्धाश्चारुचामरैः ॥ १३
सुशोभिताश्च ते सर्वे रथाः सारथिभिस्तथा ।
अपजह्रुर्यथा शोभां रथस्यापि विवस्वतः ॥ १४

सावँकरन अगनित हय होते । ते तिन्ह रथन्ह सारथिन्ह जोते ॥
सुंदर सकल अलंकृत सोहे । जिन्हहि बिलोकत मुनि मन मोहे ॥

श्यामकर्णा व्यराजन्त रथयुक्ता मनोहराः ।
भूषणैर्मण्डिताः सर्वे मुनि-मानस-मोहकाः ॥ १५

जे जल चलहिं थलहि की नाईं । टाप न बूड़ बेग अधिकाई ॥

यथा स्थले तथैवैते जलेऽप्यश्वाः सुशिक्षिताः ।
लीलया व्यचरन् वेगादनिमग्नपदाः जले ॥ १६

अस्त्र सस्त्र सबु साजु बनाई । रथी सारथिन्ह लिए बोलाई ।।

सिद्धेषु वरशस्त्रास्त्रैरथेषु रथचालकाः ।
समाह्वयन् प्रयाणार्थं रथिनः सादरं क्रमात् ।। १७

– चढ़ि चढ़ि रथ बाहेर नगर लागी जुरन बरात ।

रथारूढेषु सर्वेषु महाभागेषु सत्वरम् ।
विवाहयात्रिणः सर्वे मिलिताः नगराद् बहिः ।। १८

होत सगुन सुंदर सबहि जो जेहि कारज जात ।।

प्रस्थितः स्वगृहाद् यो यो यस्मिन् यस्मिश्च कर्मणि ।
तस्य तस्य तदा मार्गे शकुनाः शुभशंसिनः ।। १९

कलित करिबरन्हि परीं अँबारीं । कहि न जाहिं जेहि भाँति सँवारीं ।।

सवितानैर्व्यराजन्त पृष्ठदेशासनैर्गजाः ।
असंवृतैरसदृशैः शोभनाद्भुत-मण्डनैः ।। २०

चले मत्त गज घंट बिराजी । मनहुँ सुभग सावन घन राजी ।।

गच्छन्ती गजराजी सा सघण्टारवमध्वना ।
गर्जन्तीव तदा रेजे वर्षर्तु-घन-पद्धतिः ।। २१

बाहन अपर अनेक बिधाना । सिबिका सुभग सुखासन जाना ।।
तिन्ह चढ़ि चले बिप्रबर बृंदा । जनु तनु धरें सकल श्रुति छंदा ।।

सुखासनास्तथा चान्याः शिबिकाः सुमनोहराः ।
अधिरूढा ययुर्यासु मूर्ताश्छन्दा इवाग्रजाः ।। २२

मागध सूत बंदि गुनगायक । चले जान चढ़ि जो जेहि लायक ।।

गुणगान-प्रवीणाश्च सूत-मागध-बन्दिनः ।
संजग्मिरे समारुह्य स्वानुरूपं च वाहनम् ।। २३

बेसर ऊँट बृषभ बहु जाती । चले बस्तु भरि अगनित भाँती ।।

वेशराश्च तथोष्ट्राश्च वृषभा बहुजातिकाः ।
नाना-वस्तु-भराक्रान्ताः प्राचोद्यन्त सुयन्तृभिः ।। २४

कोटिन्ह काँवरि चले कहारा। बिबिध बस्तु को बरनै पारा॥
चले सकल सेवक समुदाई। निज निज साजु समाजु बनाई॥

स्कन्धैश्चाप्यवहन् भृत्याः कोटिद्रव्यभराँस्तथा।
सुस्थिताः स्वस्वसंघेषु यष्टि-प्रान्त-प्रलम्बितान्॥ २५

—सब कें उर निर्भर हरषु पूरित पुलक सरीर।

आनन्द-निर्भराण्यासन् मानसानि पुरौकसाम्।
हर्ष-रोमाञ्च-पूर्णानि गात्राणि च तदा सताम्॥ २६

कबहिं देखिबे नयन भरि रामु लखनु दोउ बीर॥

'पश्येम नु कदा चोभौ भ्रातरौ रामलक्ष्मणौ।'
इत्यासन् सर्व एवैते दर्शनोत्सुक-चेतसः॥ २७

गरजहिं गज घंटा धुनि घोरा। रथ रव बाजि हिंस चहु ओरा॥
निदरि घनहि घुर्म्मरहिं निसाना। निज पराइ कछु सुनिअ न काना॥

गर्जना गजराजानां घण्टानां घोरनिस्वनः।
हेषानादस्तुरङ्गाणां रथानां च रवो महान्॥ २८
निनादो दुन्दुभीनां च जित-जीमूत-गर्जनः।
कोलाहलः समुत्पन्नः प्रयाणावसरे महान्॥ २९
न कश्चित् कस्यचित् श्रोतुमलमासीद्वचस्तदा।
स्वस्य वान्यस्य वा किञ्चित् जाते कलकले तथा॥ ३०

महा भीर भूपति के द्वारें। रज होइ जाइ पषान पबारें॥

जनाकीर्णं तथा चासीत् राज-द्वारं पुरे तदा।
पिष्टो पद्‌भिर्यथा ग्रावा पांशुरूपोऽभवत् क्षणात्॥ ३१

चढ़ी अटारिन्ह देखहिं नारीं। लिएँ आरती मंगल थारीं॥
गावहिं गीत मनोहर नाना। अति आनंदु न जाइ बखाना॥

अट्टालिक-समारूढाः गायन्त्यश्च सुमञ्जुलम्।
मङ्गलार्तिक्यमादाय पश्यन्त्यस्तस्थुरङ्गनाः॥ ३२
आनन्दातिशयं तासां वनितानां मनोहरम्।
को नु वर्णयितुं धीमान् याथातथ्येन शक्नुयात्॥ ३३

तब सुमंत्र दुइ स्यंदन साजी । जोते रबि हय निंदक बाजी ॥
रथोत्तमौ तदा धीमान् सुमन्त्रः सूत-पुङ्गवः ।
त्रपितार्क-हयैर्वाहैर्युक्तौ सिद्धीचकार च ॥ ३४

दोउ रथ रुचिर भूप पहिं आने । नहिं सारद पहिं जाहिं बखाने ॥
सरस्वत्यपि यच्छोभां नालं वर्णयितुं ध्रुवम् ।
आनीतौ तौ रथौ दिव्यौ कोसलेश्वर-सन्निधौ ॥ ३५

राज समाजु एक रथ साजा । दूसर तेज पुंज अति भ्राजा ॥
तयोरेकं समारूढः परिवारो महीपतेः ।
तेजःपुञ्जं तथैवान्यं भ्राजमानं मनोहरम् ॥ ३६

— तेहि रथ रुचिर बसिष्ठ कहुँ हरषि चढ़ाइ नरेसु ।
सहर्षं स्वगुरू राज्ञा हस्तं दत्वाधिरोपितः ।
वसिष्ठः सादरं धीरः रघुवंश-पुरोहितः ॥ ३७

आपु चढ़ेउ स्यंदन सुमिरि हर गुर गौरि गनेसु ॥
ततः स्मृत्वा हरं गौरीं गुरुं विघ्नहरं तथा ।
समारूढस्तमेवासौ रथं दशरथः स्वयम् ॥ ३८

सहित बसिष्ठ सोह नृप कैसें । सुर गुर संग पुरंदर जैसें ॥
स-वसिष्ठस्तदा रेजे स्यन्दने नृपतिस्तथा ।
स बृहस्पतिना सार्धं यथा स्वर्गे पुरन्दरः ॥ ३९

करि कुल रीति बेद बिधि राऊ । देखि सबहि सब भाँति बनाऊ ॥
कुलरीत्यनुसारेण कृत्वा श्रौतविधींस्ततः ।
सज्जीभूतांस्तथा सर्वान् वीक्ष्य लोकान् समागतान् ॥ ४०

सुमिरि रामु गुर आयसु पाई । चले महीपति संख बजाई ॥
श्रीरामं हृदये स्मृत्वा लब्ध्वाज्ञां श्रीगुरोस्तथा ।
शुभ-यात्रा-प्रयाणाय शङ्खं दध्मौ महीपतिः ॥ ४१

हरषे बिबुध बिलोकि बराता । बरषहिं सुमन सुमंगल दाता ।।

प्रहृष्टैर्विबुधैः स्वर्गात् दृष्ट्वा यात्रां सुशोभनाम् ।
पुष्पवृष्टिः कृता भूमौ सर्व-मङ्गल-शंसिनी ।। ४२

भयउ कोलाहल हय गय गाजे । ब्योम बरात बाजने बाजे ।।
सुर नर नारि सुमंगल गाई । सरस राग बाजहिं सहनाई ।।

हयानां च गजानां च गर्जनैः समभून्महान् ।
कोलाहलस्तदा भूयः नभोव्यापी महीतले ।। ४३

आहताः पटहाः स्वर्गे सहर्षं भूतले तथा ।
वादिता मधुरा रागास्तथा सुषिर-वादकैः ।। ४४

प्रारेभिरे तथा गानं ललनाभिः सहैव ताः ।
सुराङ्गनास्तदा स्वर्गे मङ्गलं सुमनोहरम् ।। ४५

घंट घंटि धुनि बरनि न जाहीं । सरव करहिं पाइक फहराहीं ।।
करहिं बिदूषक कौतुक नाना । हास कुसल कल गान सुजाना ।।

घण्ट-घण्टी-महारावं को नु वर्णयितुं क्षमः ।
समुद्भूतो य एवास्यां यात्रायां समये शुभे ।। ४६

नाना-दुष्कर-खेलाभिर्दर्शयामासुरद्भुतम् ।
कलायनाश्च यात्रायां खड्गप्रावीण्यमात्मनः ।। ४७

उत्प्लुत्योत्प्लुत्य चाकाशे पतन्ति स्म पुनश्च ते ।
भूमावनक्षतैरङ्गैर्गच्छन्ति स्म पुनस्तथा ।। ४८

परिहास-कलाभिज्ञाः कुशला गानकर्मणि ।
विदूषकास्तदा चक्रुर्नानालीला विनोदने ।। ४९

– तुरग नचावहिं कुअँर बर अकनि मृदंग निसान ।
नागर नट चितवहिं चकित डगहिं न ताल बँधान ।।

तुरगान् नर्तयामासुस्तालैर्भेरी-मृदङ्गजैः ।
राजपुत्रा, यथा विज्ञाः साश्चर्यं ददृशुर्नटाः ।। ५०

बनइ न बरनत बनी बराता । होहिं सगुन सुंदर सुभदाता ॥
चारा चाषु बाम दिसि लेई । मनहुँ सकल मंगल कहि देई ॥

वर्णनं न यथा शक्यं यथार्थं कर्तुमक्षरैः ।
तथा सा शुशुभे यात्रा जनसंमोदकारणम् ॥ ५१
पदे पदेऽभवन् नाना शकुनाः शुभशंसिनः ।
तृणं खादन् शिखी वामेऽसूचयत् सर्वमङ्गलम् ॥ ५२

दाहिन काग सुखेत सुहावा । नकुल दरसु सब काहूँ पावा ॥

दक्षिणेन ययौ काकः क्षेत्रे सौभाग्य-सूचकः ।
कृतं सर्वैस्तथा मार्गे जनैर्नकुल-दर्शनम् ॥ ५३

सानुकूल बह त्रिबिध बयारी ! सघट सबाल आव बर नारी ॥

सानुकूलं ववौ वातो मन्द-शीतः सुगन्धितः ।
सुखावहं तथा शंसन् शुभ-यात्रा-प्रवर्तनम् ॥ ५४
गृहीत्वा बालकं हस्ते घटं च जल-पूरितम् ।
आययुः संमुखं नार्यः सुमङ्गल्यः स्थले स्थले ॥ ५५

लोवा फिरि फिरि दरसु देखावा । सुरभी सनमुख सिसुहि पिआवा ॥

याता दृष्टिपथं मार्गे शृगालाश्च पुनः पुनः ।
पाययत्यः पयो वत्सान् गावस्तस्थुश्च संमुखम् ॥ ५६

मृगमाला फिरि दाहिनि आई । मंगल गन जनु दीन्हि देखाई ॥

वामतः परिवृत्यैवं ययुर्दक्षिणतो मृगाः ।
दर्शयन्तस्तथा नूनं सर्वं शुभ-समुच्चयम् ॥ ५७

छेमकरी कह छेम बिसेषी । स्यामा बाम सुतरु पर देखी ॥

श्वेतशीर्ष्णा तथा चिल्लाकथयत् क्षेममक्षयम् ।
श्यामा चैव तथा दृष्टा वामतः शिखरे तरोः ॥ ५८

सनमुख आयउ दधि अरु मीना । कर पुस्तक दुइ बिप्र प्रबीना ॥

शुभ-संसूचकं दृष्टं दधि-मीनादिकं तथा ।
ग्रन्थ-हस्तौ पथा यातावग्रतश्च तथाग्रजाः ॥ ५९

—मंगलमय कल्यानमय अभिमत फल दातार ।
जनु सब साचे होन हित भए सगुन एक बार ।।

कल्याण-शकुनाः सर्वे यथेष्ट-फलशंसिनः ।
सममेव समायाताः सफलत्वाभिकाङ्क्षया ।। ६०

मंगल सगुन सुगम सब ताकें । सगुन ब्रह्म सुंदर सुत जाकें ।।

यत्सुतः सगुणं ब्रह्म स्वयं रामो रघूत्तमः ।
संभाव्यस्तस्य किं नायं शकुनानां समुच्चयः ।। ६१

राम सरिस बरु दुलहिनि सीता । समधी दसरथु जनकु पुनीता ।।

सीता यत्र वधूर्भव्या रामो यत्र वरः स्वयम् ।
मिथिलेशः स्वयं दाता ग्रहीता कोसलेश्वरः ।। ६२

सुनि अस ब्याहु सगुन सब नाचे । अब कीन्हे बिरंचि हम साँचे ।।

श्रुत्वा तं शुभ-संयोगं शकुनाः शुभशंसिनः ।
हेतुतस्तत्र संयुक्ताः सर्वे साफल्य-साधकाः ।। ६३
'अर्थवन्तः कृताः सर्वे विधिनाद्य वयं ध्रुवम् ।'
इति मत्वेव संयुक्ता नर्तयन्तस्तथा मुदा ।। ६४

एहि बिधि कीन्ह बरात पयाना । हय गय गाजहिं हने निसाना ।।

एवं सा प्रस्थिता यात्रा शुभ-काले शुभार्थिनी ।
हय-वारण-भेरीणां गर्जनेन सुघोषिता ।। ६५

इति श्रीतुलसीमानसनलिने श्रीरामचरितमानसभावानुवादे
दशरथ-यात्रा-प्रस्थानं नाम सप्तचत्वारिंशस्तरङ्गः ।।

तरङ्गः ४८

आवत जानि भानुकुल केतू । सरितन्हि जनक बँधाए सेतू ॥

श्रुत्वागमन-वृत्तान्तं रविवंशाग्रणेस्तथा ।
सेतुभिः सरितश्चक्रे सुतरा मिथिलाधिपः ॥ १

बीच बीच बर बास बनाए । सुरपुर सरिस संपदा छाए ॥

स्थले स्थले कृताश्चैवं निवेशाः सुमनोहराः ।
संपदा ये व्यराजन्त सुरलोक-समानया ॥ २

असन सयन बर बसन सुहाए । पावहिं सब निज निज मन भाए ॥

अशनं शयनं चैवं वसनं च यथेप्सितम् ।
अलभन्त जनाः सर्वे रामोद्वाहार्थमागताः ॥ ३

नित नूतन सुख लखि अनुकूले । सकल बरातिन्ह मंदिर भूले ॥

भुङ्क्त्वा तान् विविधान् भोगान् मनसापि न चिन्तितान् ।
वासानपि निजान् सर्वे व्यस्मरन् रामबान्धवाः ॥ ४

– आवत जानि बरात बर सुनि गहगहे निसान ।
सजि गज रथ पदचर तुरग लेन चले अगवान ॥

पुरोपान्ते तथायातान् ज्ञात्वा तान् भेरि-निःस्वनैः ।
पौरमुख्या ययुः पूर्वं गजाश्व-रथ-सैनिकैः ॥ ५

कनक कलस भरि कोपर थारा । भाजन ललित अनेक प्रकारा ॥
भरे सुधासम सब पकवाने । नाना भाँति न जाहिं बखाने ॥

सुवर्ण-कलशा नाना दुग्धादि-द्रव्य-पूरिताः ।
मिष्टान्न-परिपूर्णानि भाजनानि बहूनि च ॥ ६

फल अनेक बर बस्तु सुहाईं । हरषि भेंट हित भूप पठाईं ॥

फलानि विविधान्येव प्रेषितानि पुरस्तथा ।
उपाहारास्तथा नाना मिथिलापतिनार्पिताः ॥ ७

भूषन बसन महामनि नाना । खग मृग हय गय बहुबिधि जाना ॥

भूषणानि च वस्त्राणि महारत्नानि चैव हि ।
मृगाः खगास्तथा नाना तुरङ्गा वारणास्तथा ॥ ८

मंगल सगुन सुगंध सुहाए । बहुत भाँति महिपाल पठाए ॥
दधि चिउरा उपहार अपारा । भरि भरि काँवरि चले कहारा ॥

प्रदत्तः सगुण-द्रव्यैः सुगन्ध-द्रव्य-संग्रहः ।
दध्यादि-भोज्य-वस्तूनि नीतान्याजीवकैस्तथा ॥ ९

अगवानन्ह जब दीखि बराता । उर आनंदु पुलक भर गाता ॥
देखि बनाव सहित अगवाना । मुदित बरातिन्ह हने निसाना ॥

दृष्ट्वा यात्रां पुरोयाता हर्ष-रोमाञ्च-पूरिताः ।
प्रत्युद्यातांश्च तान् दृष्ट्वा मुदिता वरयात्रिणः ॥ १०

प्रहताः पटहाः प्रोच्चैर्दर्शनोत्साह-पूरितैः ।
यात्राभिश्च सुसंहृष्टैः पुर-प्रान्ते समुत्सुकैः ॥ ११

–हरषि परसपर मिलन हित कछुक चले बगमेल ।
जनु आनंद समुद्र दुइ मिलत बिहाइ सुबेल ॥

परस्परं प्रधावन्तः प्रेम्णा संमिलितुं पुरः ।
वेलातीता इवानन्दसिन्धवस्ते विरेजिरे ॥ १२

बरषि सुमन सुर सुंदरि गावहिं । मुदित देव दुंदुभीं बजावहिं ॥

गायन्तीभिः सुरस्त्रीभिः पुष्पवृष्टिः कृता दिवः ।
मुदितैर्देववृन्दैश्च प्रहताः पटहाश्चिरम् ॥ १३

बस्तु सकल राखीं नृप आगें । बिनय कीन्हि तिन्ह अति अनुरागें ॥

निधाय सर्व-वस्तूनि कोसलाधिपतेः पुरः ।
प्रार्थितः प्रणतैः पौरैः स्वीकर्तुं स महीपतिः ॥ १४

प्रेम समेत रायँ सबु लीन्हा । भै बकसीस जाचकन्हि दीन्हा ॥

प्रतिगृह्य ततः प्रेम्णा सर्ववस्तूनि सादरम् ।
याचकेभ्यो ददौ राजा दयालुर्दीनबान्धवः ॥ १५

करि पूजा मान्यता बड़ाई। जनवासे कहुँ चले लवाई॥

सीमान्त-पूजनं कृत्वा सत्कृत्य च यथाविधि।
निवेशं प्रति राजानं निन्युः पौराः पुरःसराः॥ १६

बसन बिचित्र पाँवड़े परहीं। देखि धनदु धन मदु परिहरहीं॥

वसनास्तरणान्यस्य पद-निक्षेपणाय च।
प्रसृतानि तदा ह्यासन् सुविचित्राणि भूतले॥ १७
वीक्ष्यैतान्यतिचित्राणि भूमि-प्रस्तरणानि च।
कुबेरस्यागलत् स्वर्गे द्रव्य-गर्वो न संशयः॥ १८

अति सुंदर दीन्हेउ जनवासा। जहँ सब कहुँ सब भाँति सुपासा॥

रचिताश्च मनोरम्याः सुखवासाः सुखस्थले।
निकामं वासिता येषु सर्वे ते वरयात्रिणः॥ १९

जानी सियँ बरात पुर आई। कछु निज महिमा प्रगटि जनाई॥

प्रविष्टाँश्च पुरे बुद्ध्वा मैथिली वरयात्रिणः।
चकार चेष्टितं किंचित् स्वमहिम्नोऽभिसूचकम्॥ २०

हृदयँ सुमिरि सब सिद्धि बोलाईं। भूप पहुनई करन पठाईं॥

न्यमन्त्रयद् हृदा ध्यात्वा सर्वसिद्धीः स्वमायया।
स्मृतमात्राश्च ताः सर्वाः समाजग्मुस्तदग्रतः॥ २१
प्रेषयामास ताः सर्वाः सीता दिव्य-प्रभावतः।
सेवार्थं कोसलेशस्य सुख-संतोषकारकाः॥ २२

सिधि सब सिय आयसु अकनि गईं जहाँ जनवास।
लिएँ संपदा सकल सुख सुरपुर भोग बिलास॥

जन्यवासेषु ताः सर्वाः समागत्य तदाज्ञया।
समुपस्थापयायासुः स्वर्ग-भोगानचिन्तितान्॥ २३

निज निज बास बिलोकि बराती। सुरसुख सकल सुलभ सब भाँती॥

स्वेषु स्वेषु निवेशेषु प्रापुस्ते वरयात्रिणः।
सुरालय-सुखान् भोगान् विलासानतिदुर्लभान्॥ २४

बिभव भेद कछु कोउ न जाना । सकल जनक कर करहिं बखाना ।।
दिव्य-भोग-रहस्यं तदज्ञात्वा बरयात्रिणः ।
कर्तारं जनकं मत्वा तुष्टुवुस्तं मुहुर्मुहुः ।। २५

सिय महिमा रघुनायक जानी । हरषे हृदयँ हेतु पहिचानी ।।
प्रभावज्ञस्तु सीतायाः स चैको रघुनन्दनः ।
अनुरागाशयं तस्या ज्ञात्वातुष्यत् स चात्मनि ।। २६

पितु आगमनु सुनत दोउ भाई । हृदयँ न अति आनंदु अमाई ।।
पित्रागमन-वृत्तान्तं श्रुत्वा श्रीरामलक्ष्मणौ ।
तथा प्रीतौ यथानन्दस्तयोर्नामान्निजान्तरे ।। २७

सकुचन्ह कहि न सकत गुरु पाहीं । पितु दरसन लालचु मन माहीं ।।
ऊचतुर्न गुरुं किंचित् संकोच-वश-मानसौ ।
विश्वामित्रं विनीतौ तौ पितृ-दर्शन-काङ्क्षिणौ ।। २८

बिस्वामित्र बिनय बड़ि देखी । उपजा उर संतोषु बिसेषी ।।
ज्ञात-तन्मानसः सोऽसौ विश्वामित्रस्तु वत्सलः ।
विनयाचार-संतुष्टो जहर्ष भृशमन्तरे ।। २९

हरषि बंधु दोउ हृदयँ लगाए । पुलक अंग अंबक जल छाए ।।
आनन्द-बाष्प-पूर्णाक्षो वक्षसा परिषस्वजे ।
श्रीरामलक्ष्मणौ प्रेम्णा गुरुः स पुलकाङ्कितः ।। ३०

चले जहाँ दसरथु जनवासे । मनहुँ सरोबर तकेउ पिआसे ।।
सकुमारस्ततस्तूर्णं स ययौ कोसलेश्वरम् ।
जन्यवासे सुसंतुष्टः पिपासार्तं यथा सरः ।। ३१

– भूप बिलोके जबहिं मुनि आवत सुतन्ह समेत ।
उठे हरषि सुखसिंधु महुँ चले थाह सी लेत ।।
दृष्ट्वायान्तं मुनिं राजा श्रीराम-लक्ष्मणान्वितम् ।
रभसा स्वयमुत्तस्थौ सुत-स्नेह-वशीकृतः ।। ३२

प्रीतः प्रदुद्रुवेऽधीरस्तद्दर्शन-समुत्सुकः ।
सुख-सिन्धोरगाधस्य तल-मूलमिवेक्षितुम् ॥ ३३

मुनिहि दंडवत कीन्ह महीसा । बार बार पद रज धरि सीसा ॥

प्राणिपत्य मुनिं पूर्वं निदधे निज-मस्तके ।
तत्-पदाब्ज-रजः प्रेम्णा भूयो भूयो महीपतिः ॥ ३४

कौसिक राउ लिए उर लाई । कहि असीस पूछी कुसलाई ॥

समाश्लिष्य मुनिश्चैनं व्याजहार शुभाशिषम् ।
पप्रच्छ कुशलं राज्ये स्वात्मन्यपि महामतिः ॥ ३५

पुनि दंडवत करत दोउ भाई । देखि नृपति उर सुखु न समाई ॥

प्रणति-प्रवणौ दृष्ट्वा ततः श्रीरामलक्ष्मणौ ।
जातो राजा सुतालोक-सौख्य-संप्लुत-मानसः ॥ ३६

सुत हियँ लाइ दुसह दुख मेटे । मृतक सरीर प्रान जनु भेंटे ॥

निरन्तरं समाश्लिष्य निजपुत्रौ महीभुजा ।
नीतं तद्-विरहोद्भूतं दुःखं लयमिव क्षणात् ॥ ३७

गत-क्लमस्य तस्यासीत् तथा चोल्लसितं मनः ।
यथा प्राणैर्वियुक्तस्य पुनः प्राण-समागमात् ॥ ३८

पुनि बसिष्ठ पद सिर तिन्ह नाए । प्रेम मुदित मुनिबर उर लाए ॥

ततः प्रणेमतुः पादौ वसिष्ठस्य नृपात्मजौ ।
प्रेम्णा सोऽपि समाश्लिष्य ददावाशिषमुत्तमम् ॥ ३९

बिप्र बृंद बंदे दुहुँ भाईं । मनभावती असीसें पाईं ॥

ततः क्रमेण तौ सर्वान् विप्रान् नत्वा समागतान् ।
मनसा वाञ्छिते तेभ्यः प्रापतुर्मङ्गलाशिषौ ॥ ४०

भरत सहानुज कीन्ह प्रनामा । लिए उठाइ लाइ उर रामा ॥

सहानुजं ततो रामः प्रणतं भरतं मुदा ।
रभसोत्थाय सावेगं प्रगाढं परिषस्वजे ॥ ४१

हरषे लखन देखि दोउ भ्राता । मिले प्रेम परिपूरित गाता ।।

भ्रातृ-दर्शन-संजात-सुख-रोमाञ्च-पूरितैः ।
सुमित्रातनयो गात्रैरालिलिङ्गः सहोदरौ ।। ४२

—पुरजन परिजन जातिजन जाचक मंत्री मीत ।
मिले जथाबिधि सबहि प्रभु परम कृपाल ब्रिनीत ।।

ततः पुरजनान् प्रीतान् परिवारजनाँस्तथा ।
स्वजनान् सचिवाँश्चैवं सुहृदो याचकाँस्तथा ।। ४३

यथाक्रमं यथाचारं संमिमेल रघूद्वहः ।
सविनीतं सदाचार-संसक्तः स कृपाकरः ।। ४४

रामहि देखि बरात जुड़ानी । प्रीति कि रीति न जाति बखानी ।।

श्रीराम-विरहोद्भूत-सर्व-हृच्छोक-शामकम् ।
श्रीराम-दर्शनं जातं सर्वानन्दकरं तदा ।। ४५

रामालोकनसंतृप्ति को नु तेषां यथार्थवत् ।
यदि वाधिपतिर्वाचो वचोभिर्गदितुं क्षमः ।। ४६

नृप समीप सोहहिं सुत चारी । जनु धन धरमादिक तनुधारी ।।

चतुर्भिः स तथा पुत्रैर्विरेजे गुणशालिभिः ।
शरीरिभिर्यथासन्नैः पुरुषार्थैर्नराधिपः ।। ४७

सुतन्ह समेत दसरथहि देखी । मुदित नगर नर नारि बिसेषी ।।
सुमन बरिसि सुर हनहिं निसाना । नाकनटीं नाचहिं करि गाना ।।

ससुतं वीक्ष्य राजेन्द्रं मिथिला-नर-नारिभिः ।
सहैव मुमुदे स्वर्गे समूहस्त्रिदिवौकसाम् ।। ४८

सुराः सुमन-वर्षेण भेरीनादैश्च संमदम् ।
सुरनार्योऽपि गानेन नर्तनेनाभ्यदर्शयन् ।। ४९

सतानंद अरु बिप्र सचिव गन । मागध सूत बिदुष बंदीजन ।।
सहित बरात राउ सनमाना । आयसु मागि फिरे अगवाना ।।

शतानन्दश्च विप्राश्च सचिवाः सूत-मागधाः ।
विद्वांसश्च तथैवान्ये प्रत्युद्याता महीपतिम् ।। ५०

सत्कृत्य विधिवद् भूपं परिवार-समन्वितम् ।
अनुज्ञाताश्च तेनेयुः स्वस्ववासं मुदान्विताः ॥ ५१

प्रथम बरात लगन तें आई । तातें पुर प्रमोदु अधिकाई ॥
ब्रह्मानंदु लोग सब लहहीं । बढ़हुँ दिवस निसि बिधि सन कहहीं ॥

संप्राप्तं सकलं यथा वरकुलं पूर्वं विवाहात् पुरे ।
पौराणामभवत् तथातिसुखदः सीता-विवाहोत्सवः ।
ब्रह्मानन्द-निमग्न-पौर-वनिता ऊचुर्विरिञ्चि तदा
"दीर्घा नो दिवसा भवन्तु हि विधे दीर्घाश्च सर्वा निशाः ॥" ५२

– रामु सीय सोभा अवधि सुकृत दोउ राज ।
जहँ तहँ पुरजन कहहिं अस मिलि नर नारि समाज ॥

"रूप-श्री-परमावधिर्वर-वधू-युग्मं विवाहोत्सवे ।
सीमा सा सुकृतस्य चात्र नृपती दाता ग्रहीता च तौ ।"
अन्योन्यं कथयन्त एव हि कथाः श्रीरामसीतागताः ।
स्तुन्वन्तः शुभ-योगमेवमखिला-स्तस्थुस्तदा नागराः ॥ ५३

जनक सुकृत मूरति बैदेही । दसरथ सुकृत रामु धरें देही ॥
इन्ह सम काहुँ न सिव अवराधे । काहुँ न इन्ह समान फल लाधे ॥

"मूर्तं पुण्यमियं नृपस्य तनया शोभामती जानकी
श्रीरामोऽपि च मूर्तमेव सुकृतं श्रीकोसलस्वामिनः ।
नैवात्रोभय-भूमिपाल-सदृशं दृष्टं शिवाराधनं
केनाप्यत्र महीतले न हि पुनः प्राप्तं फलं वेदृशम् ॥ ५४

इन्ह सम कोउ न भयउ जग माहीं । है नहिं कतहूँ होनेउ नाहीं ॥
हम सब सकल सुकृत कै रासी । भए जग जनमि जनकपुर बासी ॥

नैवास्त्यत्र न वा भविष्यति पुनर्भूतो न वैतत्समः
धन्याः स्मो यदिहात्र दर्शनमिदं राज्ञोर्द्वयोरस्ति नः ।
जन्मैवात्र पुराकृतस्य फलितं नूनं पुरे पावने
दृष्टो यत्र जगत्प्रियो रघुपतिर्दृष्टा च सा जानकी ॥ ५५

जिन्ह जानकी राम छबि देखी । को सुकृती हम सरिस बिसेषी ।।
पुनि देखब रघुबीर बिआहू । लेब भली बिधि लोचन लाहू ।।

नास्त्यस्मत्सदृशाश्च पुण्यकृतिनः केऽप्यत्र पृथ्वीतले
द्रक्ष्यामो यदिहात्र मङ्गलमिमं सीता-विवाहं पुरे ।
तद्यामः शुभमङ्गलं जनकजा-श्रीरामयोरीक्षितुम्
सार्थत्वं नरजन्मनः फलितमप्यक्ष्णोरवाप्तुं समम् ।। " ५६

कहहिं परसपर कोकिलबयनीं । एहि बिआहँ बड़ लाभु सुनयनीं ।।
बड़े भाग बिधि बात बनाई । नयन अतिथि होइहहिं दोउ भाई ।।

" भाग्यादेव विरिञ्चिनात्र रचितोऽस्माकं पुरे मङ्गलः
सीतोद्वाह-समुत्सवः सुनयनाः नाल्पोऽत्र लाभोऽस्ति नः ।
दृष्ट्वा दाशरथी वयं यदधुना लप्स्यामहेऽक्ष्णोः फलम्
तन्नो भाग्य "मिति स्त्रियः पिक-कलं प्रोचुर्मिथः सस्पृहम् ।। ५७

–बारहिं बार सनेह बस जनक बोलाउब सीय ।
लेन आइहहिं बंधु दोउ कोटि काम कमनीय ।।

" आनेष्यत्ययमात्मनो दुहितरं कन्यानुरागी नृपः
वारं वारमिहात्र कौतुकमहो निर्वर्णयिष्यामहे ।
श्रीरामः स च लक्ष्मणोऽपि नगरीमायास्यतः सत्वरम्
नेतुं तां गृहमित्यभीक्ष्णमिह नः कन्दर्प-संदर्शनम् ।। " ५८

बिबिध भाँति होइहि पहुनाई । प्रिय न काहि अस सासुर माई ।।
तब तब राम लखनहि निहारी । होइहहिं सब पुर लोग सुखारी ।।

" आतिथ्यं जनकोऽपि यद् बहुविधं कल्पिष्यते सादरम्
जामातुः सहबान्धवस्य सखि तत्कस्यात्र नास्ति प्रियम् ।
श्रीरामस्य च लक्ष्मणस्य च तदा तद्वीक्ष्य रूपं मुहुः
सर्वेऽप्यत्र पुनः पुनः पुरजनाः प्राप्स्यन्ति सौख्यं परम् ।। " ५९

सखि जस राम लखन कर जोटा । तैसेइ भूप संग दुइ ढोटा ।।
स्याम गौर सब अंग सुहाए । ते सब कहहिं देखि जे आए ।।

" सख्यस्तावपरावपि प्रियसुतौ भूपस्य रामानुजौ
श्रूयेते बत रामलक्ष्मणसमौ रामप्रियौ रूपिणौ ।

एकः श्याम-तनुः सुगौर-तनुरप्यन्यस्तयोः श्रूयते
तत्संदर्शन-पूत-पौर-वनितास्तत्कीर्तयन्ते पुरे ॥" ६०

कहा एक मैं आजु निहारे । जनु बिरंचि निज हाथ सँवारे ॥
भरतु रामही की अनुहारी । सहसा लखि न सकहिं नर नारी ॥
लखनु सत्रुसूदनु एकरूपा । नख सिख ते सब अंग अनूपा ॥

एकोवाच पुनस्तदा "सखि मया दृष्टौ हि तौ भ्रातरौ
हस्ताभ्यां ननु निर्मितौ सुनिपुणं धात्रा स्वयं सुन्दरौ ।
श्यामाङ्गो भरतः स राम-सदृशो भेदो न संलक्ष्यते
शत्रुघ्नः स च लक्ष्मणेन सदृशः सर्वाङ्ग-शोभा-युतः ॥" ६१

मन भावहिं मुख बरनि न जाहीं । उपमा कहुँ त्रिभुवन कोउ नाहीं ॥
– उपमा न कोउ कह दास तुलसी कतहुँ कबि कोबिद कहैं ।
बल बिनय बिद्या सील सोभा सिंधु इन्ह से एइ अहैं ॥

"सर्वे मानस-सौख्य-संमद-कराः किं वर्णये तान् गिरा
त्रैलोक्येऽपि च दृश्यते न हि तुला तेषां मनोहारिणाम् ।
विद्या-शील-बलार्जवागम-वपुःश्रीसिन्धवो बन्धवः
वर्ण्यन्ते न च कोविदेन कविना ते चैव तेषां तुला ॥" ६२

पुर नारि सकल पसारि अंचल बिधिहि बचन सुनावहीं ।
ब्याहिअहुँ चारिउ भाइ एहिं पुर हम सुमंगल गावहीं ॥

"रामोद्वाह-समुत्सवेन सममप्येतेऽत्र तद्-बन्धवः
हे ब्रह्मन् विवहन्तु दाशरथयः सर्वेऽपि चास्मिन् पुरे ।"
सर्वे पौर-जनाः पुरेऽतिसुखिता विस्तार्य वस्त्राञ्चलम्
इत्यासन् विमलात्मना बहुविधं संप्रार्थयन्तो विधिम् ॥ ६३

– कहहिं परस्पर नारि बारि बिलोचन पुलक तन ।
सखि सबु करब पुरारि पुन्य पयोनिधि भूप दोउ ॥

"सर्वं तच्च यथेप्सितं शिव-कृपा-लाभाद्धि संपत्स्यते
राज्ञोरप्युभयोस्तथा सुकृतिनोः पुण्य-प्रभावाद् ध्रुवम् ।"

इत्यूचुर् मिथिलापुरे युवतयो हर्षाश्रुपूर्णेक्षणाः
सीताराम-विवाह-वृत्त-जनित-प्रीत्याथ रोमाञ्चिताः ॥ ६४

एहि बिधि सकल मनोरथ करहीं । आनँद उमगि उमगि उर भरहीं ॥

एवं विवाहे जनकात्मजाया नानासुख-स्वप्न-रता पुरी सा ।
नासीत् तदान्तो नगरीजनानाम् उत्साह-संमोद-मनीषितानाम् ॥ ६५

जे नृप सीय स्वयंबर आए । देखि बंधु सब तिन्ह सुख पाए ॥

संदर्शनं तद् रघुनन्दनानां निर्वापणं सर्व-मनोव्यथानाम् ।
स्वयंवरार्थं समुपागतानां महत्-प्रमोदाय महीपतीनाम् ॥ ६६

कहत राम जसु बिसद बिसाला । निज निज भवन गए महिपाला ॥

यशस्तदीयं विशदं विशालं परस्परं ते बहु कीर्तयन्तः ।
तद्-दर्शनानन्द-परीत-चित्ताः स्वं स्वं ययुर्वासमनभ्यसूयाः ॥ ६७

गए बीति कछु दिन एहि भाँती । प्रमुदित पुरजन सकल बराती ॥

यातेषु चैवं कतिचिद्-दिनेषु पुरे महामोद-भरावनम्रे ।
महोत्सवोत्साहित-मानसानां वरातिथीनां पुर-वासिनां च ॥ ६८

मंगल मूल लगन दिनु आवा । हिम रितु अगहनु मासु सुहावा ॥
ग्रह तिथि नखतु जोगु बर बारू । लगन सोधि बिधि कीन्ह बिचारू ॥
पठै दीन्हि नारद सन सोई । गनी जनक के गनकन्ह जोई ॥
सुनी सकल लोगन्ह यह बाता । कहहिं जोतिषी आहिं बिधाता ॥

नक्षत्र-वारादिषु मङ्गलेषु
ग्रहेषु चैवं शुभ-संस्थितेषु ।
हेमन्त-शोभा-युत-मार्गशीर्षे
प्राप्तः शुभार्हः स विवाह-कालः ॥ ६९

विचार्य सम्यग्-विधिनैव सर्वम्
नियोजयित्वा शुभ-लग्नमर्हम् ।
निवेदनार्थं मिथिला-नरेशम्
स्वयं सुरर्षिः प्रहितस्तदूर्ध्वम् ॥ ७०

मौहूर्तिकैरप्यथ सैव राज्ञः
सङ्कल्पितासीत् शुभ-लग्न-वेला ।
"ज्योतिर्विदोऽप्यत्र नु धातृ-तुल्या"
इत्येवमूचुः सुखिताश्च पौराः ॥ ७१

—धेनुधूरि बेला बिमल सकल सुमंगल मूल ।
बिप्रन्ह कहेउ बिदेह सन जानि सगुन अनुकूल ॥

प्राप्तं तदानन्दकरं सुराणाम्
गो-धूलि-लग्नं शुभ-सौख्य-मूलम् ।
दृष्टानि सम्यक् शुभ-लक्षणानी-
त्यूचुर् नरेन्द्रं मिथिला द्विजेन्द्राः ॥ ७२

उपरोहितहि कहेउ नरनाहा । अब बिलंब कर कारनु काहा ॥
सतानंद तब सचिव बोलाए । मंगल सकल साजि सब ल्याए ॥

"चिरायते किं ननु संप्रती"ति
पृष्टे महीपेन पुरोहितोऽपि ।
आनाययामास सुमन्त्रि-वृन्दैः
सर्वं हि तन्मङ्गल-संविधानम् ॥ ७३

संख निसान पनव बहु बाजे । मंगल कलस सगुन सुभ साजे ॥

समुत्थितो मङ्गल-वाद्य-घोषः
संस्थापितं माङ्गलिकं समग्रम् ।
दृष्टानि चैवं शुभ-लक्षणानि
प्राप्ते मुहूर्ते नगरे विताने ॥ ७४

सुभग सुआसिनि गावहिं गीता । करहिं बेद धुनि बिप्र पुनीता ॥

सुमङ्गलीनां कल-कण्ठ-गीतैर्
आपूरितं तन्मिथिलान्तरिक्षम् ।
उच्चैश्चकारागम-मन्त्र-घोषम्
द्विजाति-संघः शुचि-शील-वृत्तः ॥ ७५

लेन चले सादर एहि भाँती । गए जहाँ जनवास बराती ॥
कोसलपति कर देखि समाजू । अति लघु लाग तिन्हहि सुरराजू ॥

यातं तदा सादरमार्यवृन्दम्
निमन्त्रणार्थं वर-पक्ष-वासम् ।
राज्ञः समालोक्य महत्-समाजम् ।
स्वल्पं हृदामंस्त सुरेश-संघम् ॥ ७६

भयउ समउ अब धारिअ पाऊ । यह सुनि परा निसानहिं घाऊ ॥

"प्राप्तं शुभं तन्नरनाथ लग्नम्
उत्तिष्ठतायात विवाह्-कक्षम् ।"
संप्रार्थितस्तैरिति कोसलेशः
गर्जत्यहो मङ्गल-वाद्य-घोषे ॥ ७७

गुरहि पूछि करि कुल बिधि राजा । चले संग मुनि साधु समाजा ॥

निर्वर्तयित्वा स च कोसलेशः
पृष्ट्वा वसिष्ठं कुल-संप्रदायान् ।
सभेरि-नादं मुदितः प्रतस्थे
ससाधु-संघो मुनिभिः समेतः ॥ ७८

–भाग्य बिभव अवधेस कर देखि देव ब्रह्मादि ।
लगे सराहन सहस मुख जानि जनम निज बादि ॥

दृष्ट्वा तदाजेयऽपुरेश-भाग्यम्
मत्वाऽमरत्वं विफलं स्वकीयम् ।
ब्रह्मादि-देवा वदनैः सहस्रैस्
तमस्तुवन् कोसल-राजमर्हम् ॥ ७९

सुरन्ह सुमंगल अवसरु जाना । बरषहिं सुमन बजाइ निसाना ॥
सिव ब्रह्मादिक बिबुध बरूथा । चढ़े बिमानन्हि नाना जूथा ॥

शुभावकाशे कृत-पुष्प-वर्षाः
सभेरि-नादं विबुधा दिवस्ते ।
आरूढयाना मुदिताः स्वसंघैः
प्रतस्थिरे भूतलमन्तरिक्षात् ॥ ८०

प्रेम पुलक तन हृदयँ उछाहू । चले बिलोकन राम बिआहू ॥

आनन्द-रोमाञ्चित-सर्व-गात्राः
सर्वे समुत्साहित-चित्त-वृत्त्या ।
समीक्षितुं तद् रघुवीर-लग्नम्
आजग्मुरन्ते मिथिलापुरं ते ॥ ८१

देखि जनकपुरु सुर अनुरागे । निज निज लोक सबहिं लघु लागे ॥
चितवहिं चकित बिचित्र बिताना । रचना सकल अलौकिक नाना ॥

वीक्ष्यातिरम्यां मिथिलापुरीं ते
स्वं स्वं निनिन्दुः सुर-लोक-वासम् ।
अलौकिकीं वीक्ष्य वितान-शोभां
तस्थुश्चिरं विस्मय-मूढ-चित्ताः ॥ ८२

नगर नारि नर रूप निधाना । सुघर सुधरम सुसील सुजाना ॥
तिन्हहि देखि सब सुर सुरनारीं । भए नखत जनु बिधु उजिआरीं ॥

धर्म-प्रियान् रूप-गुण-श्रियाढ्यान्
सर्वान् समुद्वीक्ष्य पुरौकसस्ते ।
गतप्रभास्तत्पुरतस्तथाऽसन्
यथोडवः शीतकरस्य चाग्रे ॥ ८३

बिधिहि भयउ आचरजु बिसेषी । निज करनी कछु कतहुँ न देखी ॥

आश्चर्यभावं सकलामराणां
चित्तेषु यद्यप्यतनोन्नितान्तम् ।
विधेस्तु सर्वाधिक-विस्मयाय
पुरं स्वसंकल्पित-सर्ग-भिन्नम् ८४

—सिवँ समुझाए देव सब जनि आचरज भुलाहु ।
हृदयँ बिचारहु धीर धरि सिय रघुबीर बिआहु ॥

जिन्ह कर नामु लेत जग माहीं । सकल अमंगल मूल नसाहीं ॥
करतल होहिं पदारथ चारी । तेइ सिय रामु कहेउ कामारी ॥

"वरः स्वयं यत्र जगन्नियन्ता
वधूश्च सीताऽदिम-शक्तिरेषा ।
किं तत्र चित्रं जहित भ्रमं वो
द्वयोरभिज्ञाय यथार्थ-रूपम् ॥ ८५

यन्नाम-संकीर्तनमत्र जातम्
सर्वाशिवोन्मूलन-मूल-बीजम् ।
सर्वार्थ-सिद्धिश्च यतः प्रहस्ते
तावेव चैतो पितरौ भवस्य ॥" ८६

एहि बिधि संभु सुरन्ह समुझावा । पुनि आगें बर बसह चलावा ॥

इत्थं सुरान् भ्रान्तमतीन् समस्तान्
स बोधयित्वा सकलार्थ-विज्ञः ।
नन्दीं समारुह्य पुरः सुराणाम्
श्रीराम-भक्तश्चलितः स्मरादिः ॥ ८७

देवन्ह देखे दसरथु जाता । महामोद मन पुलकित गाता ॥
साधु समाज संग महिदेवा । जनु तनु धरें करहिं सुख सेवा ॥

आनन्द-रोमाञ्चित-सर्वगात्रैर्-
देवैस्ततोऽदृश्यत कोसलेशः ।
सद्वृन्द-भूदेव-समूह-मध्यः
संसेवितो मूर्तसुखश्रियेव ॥ ८८

सोहत साथ सुभग सुत चारी । जनु अपबरग सकल तनुधारी ॥

रामादिकं सद्गुणरूपयुक्तं
चतुष्टयं तन्नृपतेः सुतानाम् ।
सालोक्य-सामीप्य-सरूपताभिस्
सायुज्यमासीन्ननु मूर्तमक्षणोः ॥ ८९

मरकत कनक बरन बर जोरी । देखि सुरन्ह भै प्रीति न थोरी ॥

द्वौ बिभ्रतौ मारकतौ कुमारौ
द्वौ चापि हैमीं द्युतिमादधानौ ।
वीक्ष्याखिलानामभवन् सुराणाम्
आनन्द-कल्लोलित-मानसानि ॥ ९०

पुनि रामहि बिलोकि हियँ हरषे । नृपहि सराहि सुमन तिन्ह बरषे ।

मुहुर्मुहुर्वीक्ष्य च रामचन्द्रं
तृप्तिं ययुर्नैव दिवौकसस्ते ।
स्तुत्वा नरेशं कृतिनं वचोभिश्
चक्रुश्च भूयः सुम-वर्षमभ्रात् ॥ ९१

—राम रूपु नख सिख सुभग बारहिं बार निहारि ।
पुलक गात लोचन सजल उमा समेत पुरारि ।।

आपाद-शीर्ष्णं रघुवीर-रूपं
चिरं निरीक्ष्यातिविलोभनीयम् ।
उमा-समेतस्त्रिपुरारिरासीत्
प्रेमाश्रु-नेत्रः पुलकाङ्कितांङ्गः ।। ९२

केकि कंठ दुति स्यामल अंगा । तड़ित बिनिंदक बसन सुरंगा ।।
ब्याह बिभूषन बिबिध बनाए । मंगल सब सब भाँति सुहाए ।।

तद् बर्हिकण्ठासित-चारु-रूपं
तत् पीत-वस्त्रं तडितोऽपि रम्यम् ।
विभूषितं तत् सुभगं शरीरं
रेजे विवाहोचित-भूषणैर् यत् ।। ९३

सरद बिमल बिधु बदनु सुहावन । नयन नवल राजीव लजावन ।।
सकल अलौकिक सुंदरताई । कहि न जाइ मनहीं मन भाई ।।

मुखं तदीयं ननु निष्कलङ्कम्
पूर्णेन्दु-बिम्बं शरदीव हृद्यम् ।
नेत्रे नवाम्भोज इवातिरम्ये
दिव्या वपुश्रीर् न वचोऽवगम्या ।। ९४

बंधु मनोहर सोहहिं संगा । जात नचावत चपल तुरंगा ।
राजकुअँर बर बाजि देखावहिं । बंस प्रसंसक बिरिद सुनावहिं ।।

व्यराजतासावनुजैः समेतस्
तथैव राज्ञां तनुजानुयातः ।
तन्नर्तिताश्वैश्चपलैस्तथैवम्
सूताभिगीतैः कुल-कीर्ति-गानैः ।। ९५

जेहि तुरंग पर रामु बिराजे । गति बिलोकि खगनायकु लाजे ।।
कहि न जाइ सब भाँति सुहावा । बाजि बेषु जनु काम बनावा ।।

समाधिरूढो रघुवंश-केतुर्
द्विजाधिराजाधिकवेगमश्वम् ।
रूपं यदीयं मनसाप्यगम्यम्
कामोऽश्वरूपो व्यचरन्नु भूमौ ।। ९६

–जनु बाजि बेषु बनाइ मनसिजु राम हित अति सोहई।
आपनें बय बल रूप गुन गति सकल भुवन बिमोहई।

स मन्मथो रामहिताभिलाषी
चकार रूपं तुरगस्य नूनम्।
शोभा-वयो-वेग-बलादिकैस्तैः
संमोहयन्नात्मगुणैस्त्रिलोकीम्॥ ९७

जगमगत जीनु जराव जोति सुमोति मनि मानिक लगे॥
किंकिनि ललाम लगामु ललित बिलोकि सुर नर मुनि ठगे॥

संमोहिता वीक्ष्य च वाजिराजम्
सद्-रत्न-पर्याण-विभूषितं तम्।
सुरम्य-रश्मि गल-किङ्किणीकम्
तदामराः साधुवरा नराश्च॥ ९८

–प्रभु मनसहिं लयलीन मनु चलत बाजि छबि पाव।
भूषित उड़गन तड़ित घनु जनु बर बरहि नचाव॥

श्रीरामचित्ते स विसर्जितात्मा
व्यराजतैवं प्रजवी तुरङ्गः।
ताराचिरांशुप्रविभासितेन
प्रनर्तितो वारिमुचेव बर्ही॥ ९९

जेहिं बर बाजि रामु असवारा। तेहि सारदउ न बरनै पारा॥

आरूढरामं न हि यं वराश्वं
स्तोतुं सरस्वत्यपि सा समर्था।
तन्नात्र चित्रं मनसावगम्यं
स्तोतुं कविश्चापि न तं समर्थः॥ १००

संकरु राम रूप अनुरागे। नयन पंचदस अति प्रिय लागे॥

वीक्ष्यातिहृद्यं रघुवीररूपं
तथानुरक्तः स महेश्वरोऽपि।
अपूर्वलाभाय यथा स्वकीयम्
मेने तदा पञ्चदशाक्षिपुञ्जम्॥ १०१

हरि हित सहित रामु जब जोहे । रमा रमेत रमापति मोहे ॥
निरखि राम छबि बिधि हरषाने । आठइ नयन जानि पछिताने ॥

श्रीराम-रूपेक्षण-मुग्ध-चित्तो
रमापतिश्चापि रमा-समेतः ।
'अष्टैव किं मे ननु लोचना'नी-
त्येवं विरिञ्चेरपि चानुतापः ॥ १०२

सुर सेनप उर बहुत उछाहू । बिधि ते डेवढ़ लोचन लाहू ॥

अपेक्ष्य लोकेश-विलोचनानि
दैवेन सार्धैकगुणानि तानि ।
स्व-द्वादशाक्षीणि वरं महान्तम्
मत्वातिमोदः शरजन्मनोऽपि ॥ १०३

रामहि चितव सुरेस सुजाना । गौतम श्रापु परम हित माना ॥

पिबन् मुदा तद् रघुवीर-रूपं
सहस्र-नेत्रैः सुर-नायकोऽपि ।
स्वदेह-लग्नं मुनिकोपजातम्
मेने महानुग्रहमेव शापम् ॥ १०४

देव सकल सुरपतिहि सिहाहीं । आजु पुरंदर सम कोउ नाहीं ॥

"नान्योऽस्ति धन्यः सदृशो मघोना
संप्रत्यहो मानव-देव-संघे ।"
इतीर्ष्ययासौ निवहः सुराणां
संभाषमाणः पुरतः प्रतस्थे ॥ १०५

मुदित देवगन रामहि देखी । नृपसमाज दुहुँ हरषु बिसेषी ॥
—अति हरषु राजसमाज दुहु दिसि दुंदुभीं बाजहिं घनी ।
बरषहिं सुमन सुर हरषि कहि जय जयति जय रघुकुलमनी ॥

प्रीता यमालोक्य दिवौकसोऽपि
तं वीक्ष्य हृष्टा ननु भूभृतोऽपि ।
नदत्सु वाद्येष्वमराः सुमानां
चक्रुः सुवृष्टिं जय-शब्द-घोषैः ॥ १०६

एहि भाँति जानि बरात आवत बाजने बहु बाजहीं ।
रानी सुआसिनि बोलि परिछनि हेतु मंगल साजहीं ।।

समुत्थिते मङ्गल-वाद्य-घोषे
संकल्पयामास च संप्रहृष्टा ।
सङ्घं समाहूय सुवासिनीनां
राज्ञी शुभार्तिक्य-विधिं विधिज्ञा ।। १०७

–सजि आरती अनेक बिधि मंगल सकल सँवारि ।
चलीं मुदित परिछनि करन गजगामिनि बर नारि ।।

बिधुबदनीं सब सब मृगलोचनि । सब निज तन छबि रति मदु मोचनि

सुमङ्गलार्तिक्यकराः समस्ताश्
चन्द्राननाश्चारु-मृगेक्षणास्ताः ।
निखण्डयन्त्यो रति-रूप-गर्वम्
प्रतस्थिरे वारण-तुल्य-यानाः ।। १०८

पहिरें बरन बरन बर चीरा । सकल बिभूषन सजें सरीरा ।।
सकल सुमंगल अंग बनाएँ । करहिं गान कलकंठि लजाएँ ।।

विचित्र-वर्णांशुक-चारु-वेषा
विभूषणालङ्कृत-सर्व-गात्राः ।
विलेपिताङ्गा मधुराङ्गरागैर्
लज्जापयन्त्यो पिकमात्मगानैः ।। १०९

कंकन किंकिनि नूपुर बाजहिं । चालि बिलोकि काम गज लाजहिं

पदक्रमो नूपुर-शिञ्ज-रम्यो
गुञ्जत् सुमञ्जु-ध्वनि-किङ्किणीकः ।
क्वणत्-करालङ्करणातिहृद्यो
मनोज-मातङ्गज-मान-हर्ता ।। ११०

बाजहिं बाजने बिबिध प्रकारा । नभ अरु नगर सुमंगलचारा ।।

प्राप्ते समुद्वाहमुहूर्तलग्ने
नदत्सु वाद्येषु महारवेषु ।
भूमौ शुभाचार-पवित्रितायां
स्वलङ्कृते माङ्गलिकैस्तथा खे ।। १११

सची सारदा रमा भवानी। जे सुरतिय सुचि सहज सयानी॥
कपट नारि बर बेष बनाई। मिलीं सकल रनिवासहिं जाई॥

उमा रमा चामरवल्लभास्ताः
शची सरस्वत्यपि बुद्धिमत्यः।
कृत्वा सुवेषान् मनुजाङ्गनानां
दिवोऽवतेरुर्महिषी-निवासे॥ ११२

करहिं गान कल मंगल बानीं। हरष बिबस सब काहुँ न जानीं॥

विवाह-मोदोत्सव-मग्न-चित्ते
राज्ञः कुले राजगृहे समस्ते।
सुमञ्जुलोद्गान-परायणानां
रहस्यमासां न तदाविरासीत्॥ ११३

—को जान केहि आनंद बस सब ब्रह्मु बर परिछन चली।
कल गान मधुर निसान बरषहिं सुमन सुर सोभा भली॥

सुमञ्जु-गानैः सुर-पुष्प-वर्षैः
हृतेषु चित्तेषु च वाद्य-घोषैः।
श्रीराम-नीराजन-सन्मुहूर्ते
कः कं समर्थः परिवेत्तुमन्यम्॥ ११४

आनंदकंदु बिलोकि दूलहु सकल हियँ हरषित भई।
अंभोज अंबक अंबु उमगि सुअंग पुलकावलि छई॥

आनन्द-कन्दं प्रभु-रामचन्द्रं
वीक्ष्यातिहृष्टा वनिताः समस्ताः।
आनन्द-बाष्पाकुलिताक्षि-पद्माः
प्रहर्ष-रोमाञ्चित-चारु-गात्राः॥ ११५

—जो सुखु भा सिय मातु मन देखि राम बर बेषु।
सो न सकहिं कहि कलप सत सहस सारदा सेषु॥

विलोक्य चैवं परिणेतृ-वेषं
श्रीरामचन्द्रं नयनामृताभम्।
सुखं यदासीन्मिथिला-महिष्याः
कस्तत् समावेदयितुं समर्थः॥ ११६

सहस्र-जिह्वो न च सर्प-राजः सरस्वतीनामपि वा सहस्रम् ।
कल्पैः सहस्रैरपि तद् वचोभिः सुखं महद् वक्तुमलं तदीयम् ॥ ११७

नयन नीरु हटि मंगल जानी । परिछनि करहिं मुदित मन रानी ॥
बेद बिहित अरु कुल आचारू । कीन्ह भली बिधि सब ब्यवहारू ॥

अवेत्य मोदावसरं सुरम्यं
निरुद्ध-नेत्राम्बुज-वारि-धारा ।
वेदानुसारं कुल-रीति-विज्ञा
राज्ञी शुभाचार-विधींश्चकार ॥ ११८

पंच सबद धुनि मंगल गाना । पट पाँवड़े परहिं बिधि नाना ॥
करि आवती अरघु तिन्ह दीन्हा । राम गमनु मंडप तब कीन्हा ॥
दसरथु सहित समाज बिराजे । बिभव बिलोकि लोकपति लाजे ॥

ननाद चोच्चैः शुभ-पञ्च-रूप-
ध्वनिस्तदानन्दकरः सुराणाम् ।
आर्तिक्य-पूर्वं विधिना पवित्रं
ददुस्तदार्घ्यं वनिता वराय ॥ ११९

कौर्णांशुक-न्यस्त-पदः प्रविष्टो
वरः स्वपित्रानुज-बान्धवैश्च ।
विलोक्य तद्वैभवमत्यपूर्वं
लज्जान्वितो लोकपतिः स्वचित्ते ॥ १२०

समयँ समयँ सर बरषहिं फूला । सांति पढ़हिं महिसुर अनुकूला ॥

पदे पदे तैर्मुदितैर्विताने
वृष्टिः सुमानाममरैः कृताभ्रात् ।
उदीरितः स्वस्ति-वचोभिरेवं
द्विजाति-वृन्दैरपि शान्ति-मन्त्रः ॥ १२१

नभ अरु नगर कोलाहल होई । आपनि पर कुछ सुनइ न कोई ॥

सहैव पूर्णे मिथिलापुरेण
कोलाहलैः सर्व-नभोविताने ।
स्वस्यापि नाश्रूयत किञ्चिदुक्तं
परस्य कः किं श्रवणे समर्थः ॥ १२२

एहि बिधि रामु मंडपहिं आए। अरघु देइ आसन बैठाए॥
-बैठारि आसन आरती करि निरखि बरु सुखु पावहीं।
मनि बसन भूषन भूरि वारहिं नारि मंगल गावहीं॥

एवं प्रविष्टं रघु-रामचन्द्रं
दत्तासनं दत्त-शुभार्घ्य-पाद्यम्।
निरीक्ष्य नीराजनराजितास्यं
सुवासिनीनां न हि तृप्तिरासीत्॥ १२३

विभूषणैराभरणैरनेकै
रत्नैरसंख्यैरपि चोपहारैः।
अभ्यर्चयित्वा वरपूजने तं
जगुर्मुदा मङ्गलमङ्गनास्ताः॥ १२४

ब्रह्मादि सुरबर बिप्र बेष बनाइ कौतुक देखहीं।
अवलोकि रघु कुल कमल रबि छबि सुफल जीवन लेखहीं॥

ब्रह्मादि-देवा धृत-विप्र-वेषा
व्यलोकयन् सस्पृहमग्रतस्तम्।
चण्डांशु-वंशाम्बुज-तिग्म-रश्मि
धन्यं स्वजन्मेति च मन्यमानाः॥ १२५

-नाऊ बारी भाट नट राम निछावरि पाइ।
मुदित असीसहिं नाइ सिर हरषु न हृदयँ समाइ॥

नटास्तथा नापित-बन्दिनोऽपि
संप्राप्त-रामोपहृत-प्रदेयाः।
ययुः प्रहर्षोल्लसितान्तरङ्गा
दत्वा शुभाशीर्वचनानि भूयः॥ १२६

मिले जनकु दसरथु अति प्रीतीं। करि बैदिक लौकिक सब रीतीं॥

आतिथ्यशीलो मिथिलाधिराजः
स कोसलानामधिपस्तथैव।
वेदानुसारं कुल-रीति-विज्ञौ
प्रीत्या मिथः संमिलितौ विताने॥ १२७

मिलत महा दोउ राज बिराजे। उपमा खोजि खोजि कबि लाजे॥
लही न कतहुँ हारि हियँ मानी। इन्ह सम एइ उपमा उर आनी॥

अलब्ध-तद्धर्ष-महोपमाना
लज्जाभिभूता भुवने कवीन्द्राः।
अङ्गीकृतात्मप्रतिभाभिभङ्गा-
स्ताभ्यां समौ ताविति चाभ्युपेयुः॥ १२८

सामध देखि देव अनुरागे। सुमन बरषि जसु गावन लागे॥

विलोक्य लोकाधिप-युग्मकं तत्
चक्रुः सुरौघाः सुम-वर्षमभ्रात्।
प्रहर्ष-फुल्लोपचितान्तरङ्गाः
परस्परं सत्यविदस्तदाहुः॥ १२९

जगु बिरंचि उपजावा जब तें। देखे सुने ब्याह बहु तब तें॥
सकल भाँति सम साजु समाजू। सम समधी देखे हम आजू॥

"यतः प्रभृत्यम्बुजयोनिनेदं
सृष्टं जगच्चित्र-विचित्र-रूपम्।
ततः प्रभृत्यत्र समानशीलौ
संबन्धभाजौ प्रथमं हि दृष्टौ॥" १३०

देव गिरा सुनि सुंदर साँची। प्रीति अलौकिक दुहु दिसि माची॥

प्रियं च सत्यं च वचः सुराणाम्
प्रच्छन्न-रूपाकृति-वेष-भाजाम्।
समुत्सवार्थं समुपागतानाम्
महत्प्रमोदाय महीपतीनाम्॥ १३१

देत पाँवड़े अरघु सुहाए। सादर जनकु मंडपहिं ल्याए॥

संछादयित्वातिमहार्हवस्त्रैः
संचारणार्थं पदयोर्धरित्रीम्।
संमानपूर्वं कृतपाद्यपूजम्
प्रावेशयत् कोसलपं विदेहः॥ १३२

–मंडपु बिलोकि बिचित्र रचनाँ रुचिरताँ मुनि मन हरे।
निज पानि जनक सुजान सब कहुँ आनि सिंघासन धरे॥

अलौकिका यत्सुषमा विचित्रा
सद्यो मुनीनामहरन् मनांसि।
चकार तस्मिन् जनको विताने
सर्वान् महार्हासन-संनिविष्टान्॥ १३३

कुल इष्ट सरिस बसिष्ट पूजे बिनय करि आसिष लही।
कौसिकहि पूजत परम प्रीति कि रीति तौ न परै कही॥

अभ्यर्च्य राजा कुलदैवतानि
गुरुं वसिष्ठं च ततः क्रमेण।
संपूज्य पादौ कुशिकात्मजस्य
प्रीतिं परां चानुबभूव भूयः॥ १३४

–बामदेव आदिक रिषय पूजे मुदित महीस।
दिए दिब्य आसन सबहि सब सन लही असीस॥

प्रसन्नचित्तेन च पूजयित्वा
स वामदेवादिमुनींस्तदूर्ध्वम्।
दिव्यासनैः संपरितर्पयित्वा
लेभे च तेभ्यः शुभशंसितानि॥ १३५

बहुरि कीन्हि कोसलपति पूजा। जानि ईस सम भाउ न दूजा॥
कीन्हि जोरि कर बिनय बड़ाई। कहि निज भाग्य बिभव बहुताई॥

मत्वा महेशं च स कोसलेशं
चकार पूजाविधिमागमोक्तम्।
"अपूर्व-भाग्योपचयो हि मेऽयम्
भवान् यदेवं दुहितुर्ग्रहीता॥ १३६

नान्तोऽस्ति राजेन्द्र ममाद्य नूनम्
भाग्यस्य हर्षस्य च संपदो वा॥"
इत्येवमुक्त्वाञ्जलिबद्ध-हस्तस्
तस्थौ विनीतः स विदेहनाथः॥ १३७

पूजे भूपति सकल बराती। समधी सम सादर सब भाँती ।।
आसन उचित दिए सब काहू। कहौं काह मुख एक उछाहू ।।

संमानयित्वा सममेव सर्वान्
संबन्धिनासौ वरयात्रिकाँश्च ।
कृत्वा च सर्वानुचितासनस्थान्
अपूर्वमानन्दमवाप भूपः ।। १३८

कस्तत् प्रमोदं कृतकृत्यतां वा
को वा तदुत्साहमभूतपूर्वम् ।
कवीश्वरो वागधिपोऽपि वा सन्
शब्दैः समुच्चारयितुं समर्थः ।। १३९

सकल बरात जनक सनमानी। दान मान बिनती बर बानी ।।

संपूज्य दानासन-सत्क्रियाभिः
सर्वान्नरेन्द्रो वरबन्धुवर्गान् ।
समन्ततश्चाप्यवलोक्य भूयः
सत्कर्तुमन्यानुपचक्रमेऽर्हान् ।। १४०

बिधि हरि हरु दिसिपति दिनराऊ। जे जानहिं रघुबीर प्रभाऊ ।।
कपट बिप्र बर बेष बनाएँ। कौतुक देखहिं अति सचु पाएँ ।।

ब्रह्मादिदेवा धृत-विप्र-वेषा
दिक्पाल-मुख्याश्च दिवाकरश्च ।
श्रीराम-दिव्याद्भुत-शक्ति-विज्ञा
लीलां तदीयामवलोकयन्तः ।। १४१

पूजे जनक देव सम जानें। दिए सुआसन बिन पहिचानें ।।

अजानताप्याकृतिभिः प्रभावं
संपूजितास्ते मिथिलाधिपेन ।
संभावनाभिः सममेव देवैः
सुचारु-शोभासन-दान-मानैः ।। १४२

–पहिचान को केहि जान सबहि अपान सुधि भोरी भई।
आनंद कंदु बिलोकि दूलहु उभय दिसि आनँदमई॥

आनन्द-कन्दं वरमीक्षणाभ्याम्
आलोकयित्वा प्रभु-रामचन्द्रम्।
आत्मापि नास्मर्यत यत्र नूनं
कस्तत्र कं वेत्तुमहो समर्थः॥ १४३

सुर लखे राम सुजान पूजे मानसिक आसन दए।

सर्वानभिज्ञाय तु सर्व-विज्ञः
श्रीरामचन्द्रः स सुरान् समेतान्।
पूजां व्यधान्मानसिकीं सुराणां
दिव्यासनं मानसिकं च दत्वा॥ १४४

अवलोकि सीलु सुभाउ प्रभु को बिबुध मन प्रमुदित भए॥
–रामचंद्र मुख चंद्र छबि लोचन चारु चकोर।
करत पान सादर सकल प्रेमु प्रमोदु न थोर॥

विज्ञाय भावं सरलं मनोज्ञं
श्रीरामचन्द्रस्य सुराः प्रहृष्टाः।
श्रीराम-वक्त्रेन्दु-करान् पिबन्तो
हृष्टाः समस्ता जन-दृक्-चकोराः॥ १४५

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानस-भावानुवादे
विवाह-मण्डप-प्रवेशो नाम अष्टाचत्वारिंशस्तरङ्गः।



तरङ्गः ४९

समउ बिलोकि बसिष्ठ बोलाए । सादर सतानंदु सुनि आए ॥
बेगि कुअँरि अब आनहु जाई । चले मुदित मुनि आयसु पाई ॥

मत्वोचितं तं समयं वसिष्ठः
सीतां समानाययितुं विताने ।
नियोजयामास नरेन्द्र-विप्रम्
पुरोहितं कर्मणि हृष्ट-चित्तम् ॥ १

रानी सुनि उपरोहित बानी । प्रमुदित सखिन्ह समेत सयानी ॥
बिप्र बधू कुलबृद्ध भोलाईं । करि कुल रीति सुमंगल गाईं ॥

पुरोहितस्यापि निशम्य वाचं
राज्ञी सखीभिः सह संप्रहृष्टा ।
समाह्वयद् विप्र-वधूः पुरन्ध्रीः
वृद्धाश्च सर्वाः कुल-रीति-विज्ञाः ॥ २

निर्वर्तयामास कुलोपचारैस्
ताभिः शुभाचार-विधीन् विधिज्ञा ।
कन्या-शुभाशंसन-तत्पराभिर्
गीतानि गेयानि शुभानि ताभिः ॥ ३

नारि बेष जे सुर बर बामा । सकल सुभायँ सुंदरी स्यामा ॥
तिन्हहि देखि सुखु पावहिं नारीं । बिनु पहचानि प्रानहु ते प्यारीं ॥
बार बार सनमानहिं रानी । उमा रमा सारद सम जानी ॥

धृताङ्गनाकार-महार्ह-वेषाः
श्यामाः सुराणां दयिता मनोज्ञाः ।
अज्ञात-तद्-रूप-बल-प्रभाव-
स्त्रीणां ययुः प्राण-सम-प्रियत्वम् ॥ ४

उमेति लक्ष्मीति च शारदेति
मत्वा महिष्या सुर-निर्विशेषैः ।
संपूजितास्ताः स्वयमेव भक्त्या
पुनः पुनः सत्कृतिदान-मानैः ॥ ५

सीय सँवारि समाजु बनाई । मुदित मंडपहिं चलीं लवाई ॥
– चलि ल्याइ सीतहि सखी सादर सजि सुमंगल भामिनी ।
नवसप्त साजें सुंदरीं सब मत्त कुंजर गामिनीं ॥
कल गान सुनि मुनि ध्यान त्यागहिं काम कोकिल लाजहीं ।
मंजीर नूपुर कलित कंकन ताल गति बर बाजहीं ॥
– सोहति बनिता बृंद महुँ सहज सुहावनि सीय ।
छबि ललना गन मध्य जनु सुषमा तिय कमनीय ॥

सीता सखी-विहित-मण्डन-रम्य-रूपा
सीता सखी-वलय-मध्य-गतातिमुग्धा ।
वेदीमनीयत सखीभिरलङ्कृताभिर्
गाढानुराग-रस-पूरित-मानसाभिः ॥ ६

तास्वङ्गनासु कृत-षोडश-मण्डनासु
सर्वासु मत्त-गज-तुल्य-पद-क्रमासु ।
कण्ठ-स्वनैर्विजित-मन्मथ-कोकिलासु
गीतैर्विचालित-मुनीश्वर-मानसासु ॥ ७

पाद-क्रमानुगत-कङ्कण-निक्वणासु
मञ्जीर-शिञ्जित-मनोहर-विक्रमासु
अव्याज-सुन्दर-तनुर्विरराज सीता
शोभामतीषु ननु मूर्तिमतीव शोभा ॥ ८

सिय सुंदरता बरनि न जाई । लघु मति बहुत मनोहरताई ॥
आवत दीखि बरातिन्ह सीता । रूप रासि सब भाँति पुनीता ॥

कस्तामतीत-सकलावगत-प्रमाणां
शोभां वधोर्गदितुमल्पधिया समर्थः ।
लावण्य-राशिरिव वा शुचितेव मूर्ता
दृष्टा जनैर्वर-समाज-गतैर्वधूः सा ॥ ९

सबहि मनहिं मन किए प्रनामा । देखि राम भए पूरनकामा ।।
हरषे दसरथ सुतन्ह समेता । कहि न जाइ उर आनँदु जेता ।।

दृष्ट्वा प्रणेमुरखिला मनसैव लोकाः
स्वात्मानमाप्तसकलार्थममन्यतेशः ।
पुत्रैः समं दशरथोऽपि जहर्ष दृष्ट्वा
कोऽलं हि वक्तुमिह तद्-हृदयानुरागम् ।। १०

सुर प्रनामु करि बरिसहिं फूला । मुनि असीस धनि मंगल मूला ।।
गान निसान कोलाहलु भारी । प्रेम प्रमोद मगन नर नारी ।।

वृष्टानि साञ्जलि सुरैः कुसुमानि हृष्टैः
प्रोक्तानि चापि मुनिभिः शुभ-शंसितानि ।
व्याप्तं नभः प्रहत-दुन्दुभि-गीत-शब्दैः
प्रेम-प्रमोद-निचितानि जनान्तराणि ।। ११

एहि बिधि सीय मंडपहिं आई । प्रमुदित सांति पढ़हिं मुनिराई ।।
तेहि अवसर कर बिधि ब्यवहारू । दुहुँ कुलगुर सब कीन्ह अचारू ।।

प्राप्ताथ सा जनकजापि विवाह-वेदीम्
प्रोदीरिता मुनिवरैरपि शान्ति-मन्त्राः ।
निर्वर्तिताश्च कुलरीत्यनुसारमग्रे
श्रुत्युक्त-सर्व-विधयोऽपि पुरोहिताभ्याम् ।। १२

–आचारु करि गुर गौरि गनपति मुदित बिप्र पुजावहीं ।
सुर प्रगटि पूजा लेहिं देहिं असीस अति सुखु पावहीं ।।

संपादितानि च ततः सकलोपचारैः
गौरी-गणेश-गुरु-विप्र-कुलार्चनानि ।
आविर्बभूवुरमराः स्वयमर्चनायाम्
आशीर्वचांसि च ददुः परितृप्त-कामाः ।। १३

मधुपर्क मंगल द्रब्य जो जेहि समय मनि मन महुँ चहैं ।
भरे कनक कोपर कलस सो तब लिएहिं परिचारक रहैं ।।

द्रव्याणि यानि मधुपर्क-विधौ मुनीन्द्रैः
पृष्टानि वाथ मनसापि च चिन्तितानि ।

आनीय सेवकगणैरपि तानि तानि
दत्तानि शीघ्रमथ काञ्चन-भाजनेषु ।। १४

कुल रीति प्रीति समेत रबि कहि देत सब सादर कियो ।

भानुः स्वयं स्वकुल-रीति-विधीन् समस्तान्
प्रेम्णा पुरोहितमुवाच हिताभिलाषी ।
संपादिताश्च सकला विधयस्तथैव
भक्त्या पुरोहितवरेण यथोपचारम् ।। १५

एहि भाँति देव पुजाइ सीतहि सुभग सिंघासनु दियो ।।
सिय राम अवलोकनि परस्पर प्रेमु काहु न लखि परै ।

देवार्चनोपरि ददुर्विधिना मुनीन्द्राः
सिंहासनं सुखकरं मिथिलेशजायै ।
सीता-रघूत्तम-परस्पर-दृष्टि-पात-
गाढानुराग-रस-मर्म न कोऽप्यजानात् ।। १६

मन बुद्धि बर बानी अगोचर प्रगट कबि कैसें करै ।।

वाचा धियाथ मनसापि च यद् रहस्यं
ज्ञातं पुरा बुधजनैर्न निगूढ-तत्त्वम् ।
किं तद् वचोभिरिह वर्णयितुं वराकैर्
व्यर्थं यतेत कविरप्यति-मन्द-बुद्धिः ।। १७

–होम समय तनु धरि अनलु अति सुख आहुति लेहिं ।
बिप्र बेष धरि बेद सब कहि बिबाह बिधि देहिं ।।

मन्त्रैर्विवाह-हवने मुनिभिः प्रहूतः
जग्राह हव्यमनलः स्वयमेव मूर्तः ।
आगम्य चापि निगमा धृत-विप्र-वेषाः
प्रादर्शयन् श्रुति-विधीन् स्वयमेव सर्वान् ।। १८

जनक पाटमहिषी जग जानी । सीय मातु किमि जाइ बखानी ।।
सुजसु सुकृत सुख सुंदरताई । सब समेटि बिधि रची बनाई ।।

समउ जानि मुनिबरन्ह बोलाईं। सुनत सुआसिनि सादर ल्याईं॥
जनक बाम दिसि सोह सुनयना। हिमगिरि संग बनी जनु मयना॥

सत्-कर्म-सार-सुख-सुन्दरता-यशोभिर्
या निर्मिता सुनिपुणं विधिना शुभाङ्गी।
सीता-जनी सुविदिता जनकस्य राज्ञी
संप्रार्थिता मुनिभिरेतुमथ क्रमेण। १९

आनीयताथ महिषी विधि-होम-वेदीम्
प्रेमादरोल्लसित-चित्त-सुमङ्गलीभिः।
या वामतो नरपतेः सुख-संनिविष्टा
मेना हिमाद्रि-सहितेव च राजते स्म॥ २०

कनक कलस मनि कोपर रूरे। सुचि सुगंध मंगल जल पूरे॥
निज कर मुदित रायँ अरु रानी। धरे राम के आगें आनी॥

न्यस्ताः सुमङ्गल-सुगन्धित-वारि-पूर्णा
नाना सुवर्ण-कलशा वर-पूजनार्थम्।
तूर्णं स्वहस्त-निहितानि च दम्पतीभ्याम्
प्रेम्णा वरस्य पुरतो मणिभाजनानि॥ २१

पढ़हिं बेद मुनि मंगल बानी। गगन सुमन झरि अवसरु जानी॥
बरु बिलोकि दंपति अनुरागे। पाय पुनीत पखारन लागे॥

विप्रैः कृतः शुचि-गिरा श्रुति-मन्त्र-घोषः
काले बभूव च तथा सुम-वृष्टिरभ्रात्।
तौ दम्पती च वर-दर्शन-संप्रहृष्टौ
प्रक्षालनं चरणयोरुपचक्रमाते॥ २२

—लागे पखारन पाय पंकज प्रेम तन पुलकावली।
नभ नगर गान निसान जय धुनि उमगि जनु चहुँ दिसि चली॥

श्रीराम-पुण्यचरणाविह संस्पृशन्तौ
जायापती पुलकितौ सुख-संनिकर्षात्।
संगीत-भेरि-निनदो जय-घोषणाभिर्
मन्द्रीकृतो व्यनुननाद दिगन्तरेषु॥ २३

जे पद सरोज मनोज अरि उर सर सदैव बिराजहीं ।
जे सकृत सुमिरत बिमलता मन सकल कलि मल भाजहीं ॥

यद्-राजते पद-सरोज-युगं सदैव
कन्दर्प-दर्प-दलनेश्वर-मानसान्ते ।
यन्मार्ष्टि मानस-मलं स्मृतमेकवारं
यत् पुण्यदं कलि-मलान्तकरं जनानाम् ॥ २४

जे परसि मुनिबनिता लही गति रही जो पातकमई ।
मकरंदु जिन्ह को संभु सिर सुचिता अवधि सुर बरनई ॥

स्पृष्टा च येन सकृदेव विमुक्त-दोषा
संप्राप धाम परमं मुनिराज-भार्या ।
प्रस्थापिता शिरसि यन्मकरन्द-धारा
गङ्गाधरेण विबुधैरपि वन्दनीया ॥ २५

करि मधुप मन मुनि जोगिजन जे सेइ अभिमत गति लहैं ।
ते पद पखारत भाग्य भाजनु जनकु जय जय सब कहैं ॥

यत्-सन्निधौ च मुनि-मानस-भृङ्ग-पङ्क्तिः
गुञ्जत्यभीप्सित-कृपा-मधु-सेवनार्थम् ।
तत् क्षालितं सुकृतिना जनकेन वीक्ष्य
सर्वैः सहर्षमुदितो जय-घोष-नादः ॥ २६

बर कुअँरि करतल जोरि साखोचारु दोउ कुलगुर करैं ।

शाखा-कुल-प्रवर-कीर्तन-पूर्वमग्रे
कन्या-प्रदानविषयेऽथ पुरोहिताभ्याम् ।
सीताकरः स सुकुमारतरः पवित्रः
पाणौ वरस्य निदधे श्रुति-मन्त्र-घोषैः ॥ २७

भयो पानिगहनु बिलोकि बिधि सुर मनुज मुनि आनँद भरैं ॥
सुखमूल दूलहु देखि दंपति पुलक तन हुलस्यो हियो ।

जातं करग्रहणमित्यवलोक्य पौराः
ब्रह्मादयः सुरगणा मुनयश्च हृष्टाः ।
तौ दम्पती सुख-समुद्भवमग्रतस्तं
दृष्ट्वा वरं पुलकितौ हृदि चोल्लसन्तौ ॥ २८

करि लोक बेद बिधानु कन्यादानु नृपभूषन कियो ।।

संपाद्य वेद-विधिना दुहितुः प्रदानम्
आचारमप्यनुसरन् स विदेह-राजा ।
संप्राप्य शोभन-तनुं सुख-सार-भूतं
जामातरं तमभवत् समवाप्तकामः ।। २९

हिमवंत जिमि गिरिजा महेसहि हरिहि श्री सागर दई ।
तिमि जनक रामहि सिय समरपी बिस्व कल कीरति नई ।।

दत्वा हराय गिरिजां तुहिनाचलेन
लक्ष्मीं यथैव च पुरा हरयेऽर्णवेन ।
दत्वा तथा रघुवराय सुतां नृपेण
संपादितं त्रिभुवनेषु यशो विशुद्धम् ।। ३०

क्यों करै बिनय बिदेहु कियो बिदेहु मूरति सावँरीं ।

यद्-दर्शनाद्-विगलितं निज-देह-भानं
सार्था च येन विहिताथ विदेह-संज्ञा ।
जामातरं स जनकः कथमर्थयेत् तं
रामं मनोहर-तनुं घन-नील-वर्णम् ।। ३१

करि होमु बिधिवत गाँठि जोरी होन लागीं भावँरीं ।।

लाजाध्वरं परिसमाप्य वधू-वराभ्याम्
प्रारभ्यते स्म च कृताञ्चल-बन्धनाभ्याम् ।
प्रक्रान्त-होम-हुतभुक्-परिमण्डलाभ्यां
वेदोदितं सपदि सप्तपदी-विधानम् ।। ३२

– जय धुनि बंदी बेद धुनि मंगल गान निसान ।
सुनि हरषहिं बरषहिं बिबुध सुरतरु सुमन सुजान ।।

नादं निशम्य पटहागम-चारणानां
गीतं रवं च तुमुलं जय-घोषणानाम् ।
वृष्टिः कृता सपदि कल्पतरु-प्रसूनैर्
भूमौ दिवः सुर-गणैरपि संप्रहृष्टैः ।। ३३

कुअँरु कुअँरि कल भावँरि देहीं । नयन लाभु सब सादर लेहीं ॥
जाइ न बरनि मनोहर जोरी । जो उपमा कछु कहौं सो थोरी ॥

" कुर्वत्-कृशानु-परिमण्डल-शोभनीयौ
वाचः परौ समनुरूप-वधू-वरौ तौ ।
वीक्ष्यालभन्त सकलाः फलमीक्षणानाम् "
इत्येव वच्मि न तयोरुपमा त्रिलोके ॥ ३४

राम सीय सुंदर प्रतिछाहीं । जगमगात मनि खंभन माहीं ॥
मनहुँ मदन रति धरि बहु रूपा । देखत राम बिआहु अनूपा ॥

दृष्टं तदा पुर-जनैः प्रतिबिम्बितं तत्
स्तम्भेषु रत्न-खचितेषु मनोज्ञ-युग्मम् ।
रामस्य वीक्षितुमिवाप्रतिमं विवाहं
प्रेम्णा युगं नु रति-मन्मथयोः प्रपन्नम् ॥ ३५

दरस लालसा सकुच न थोरी । प्रगटत दुरत बहोरि बहोरी ॥
भए मगन सब देखनिहारे । जनक समान अपान बिसारे ॥
प्रमुदित मुनिन्ह भावँरीं फेरीं । नेगसहित सब रीति निबेरीं ॥

सीता-रघूत्तम-मनोहरता-दिदृक्षू
यातौ क्वचिन्नयनगोचरतां जनानाम् ।
वीक्ष्यात्मनोऽप्यधिक-शोभनरूपवन्तौ
यातावदर्शनमिव त्रपयाभिभूतौ ॥ ३६

आलोक्य विस्मय-सुखाकुलिता जनौघाः
राज्ञा सहैव गलितात्म-शरीर-भानाः ।
सोपायनं परिसमापित-होम-कार्यः
प्रीतिं परां मुनिगणः समवाप सर्वः ॥ ३७

राम सीय सिर सेंदुर देहीं । सोभा कहि न जाति बिधि केहीं ॥

यद्वा कृतं जनकजाऽलक-भङ्ग-देशे
सिन्दूर-दानमथ राम-कराम्बुजेन ।
कः पारयत्यतिमनोहरमक्षरैस्तत्
सर्वं च वर्णयितुमत्र कविः प्रगल्भः ॥ ३८

अरुन पराग जलजु भरि नीकें । ससिहि भूष अहि लोभ अमी कें ।।

रम्यं नवाब्जमिव रक्त-पराग-पूर्णं
सिन्दूर-मण्डितमभूत् कर-संपुटं तत् ।
सर्पः सुधाकरमिवामृत-पान-लोभात्
सीता-मुखं वर-करः समलंचकार ।। ३९

बहुरि बसिष्ठ दीन्हि अनुसासन । बरु दुलहिनि बैठे एक आसन ।।

यावद् वसिष्ठ-वचनान्नव-दम्पती तौ
एकासनं सकलशर्मणि संनिविष्टौ ।
तावत् प्रहृष्ट-हृदयः स च कोसलेशः
रोमाञ्च-पूरित-तनुः समभून्महीशः ।। ४०

— बैठे बरासन रामु जानकि मुदित मन दसरथु भए ।
तनु पुलक पुनि पुनि देखि अपनें सुकृत सुरतरु फल नए ।।

मूर्तं यथा सुकृत-कल्पतरोः फलं तद्
वीक्ष्याप्यभीक्षणमभितः परिणीत-युग्मम् ।
तृप्तिं ययौ न हि स रामपितात्पमात्रं
संपादिताखिल-नृजन्म-चिकीर्षितार्थः ।। ४१

भरि भुवन रहा उछाहु राम बिबाहु भा सबहीं कहा ।
केहि भाँति बरनि सिरात रसना एक यहु मंगलु महा ।।

"सीता-रघूत्तम-विवाह-महोत्सवोऽयं
संपादितोऽद्य भुवि सर्व-सुमङ्गलाय ।"
आनन्द-घोष-निनदैरिति विश्व-गोलः
लोकैश्चतुर्दशभिरप्यखिलोऽनुकीर्णः ।। ४२

किं वैकया रसनया महदुत्सवं तं
व्यर्थं यते गदितुमत्र यथार्थरूपम् ।
शेषः सहस्ररसनोऽपि न पारयेत् ताम्
वक्तुं विवाह-सुषमाम् इति मे वितर्कः ।। ४३

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानसभावानुवादे
श्रीराम-सीता-विवाह-विधि-वर्णनं नाम नवचत्वारिंशस्तरङ्गः ।।

तरङ्गः ५०

तब जनक पाइ बसिष्ठ आयसु ब्याह साज संवारि कै।
मांडवी श्रुतकीरति उरमिला कुअँरि लईं हँकारि कै ॥

सज्जीचकार मुनिनानुमतः समस्तं
भूयो विवाह-विधि-माङ्गलिकं विदेहः।
तां माण्डवीमुपवरां श्रुतकीर्तिमेवम्
आनाययद् दुहितरं पुनरूर्मिलां च ॥ १

कुसकेतु कन्या प्रथम जो गुन सील सुख सोभामई।
सब रीति प्रीति समेत करि सो ब्याहि नृप भरतहि दई ॥

प्रेम्णा कुश-ध्वज-सुतामथ माण्डवीं तां
सौन्दर्य-शील-गुण-रूपवतीमतुल्याम्।
वेदानुसारमपि संमत-लोक-रीत्या
राजा यथाविधि ददौ भरताय भार्याम् ॥ २

जानकी लघु भगिनी सकल सुंदरि सिरोमनि जानि कै।
सो तनय दीन्ही ब्याहि लखनहि सकल बिधि सनमानि कै ॥
जेहि नामु श्रुतकीरति सुलोचनि सुमुखि सब गुन आगरी।
सो दई रिपुसूदनहि भूपति रूप सील उजागरी

स्त्री-भूषणं जनकजावरजां तथैव
संपूज्य सर्वविधमेव च लक्ष्मणाय।
राजा ददौ गुणवतीमरिसूदनाय
चन्द्राननां सुनयनां श्रुतकीर्तिमेवम् ॥ ३

अनुरूप बर दुलहिनि परस्पर लखि सकुच हियँ हरषहीं।
सब मुदित सुंदरता सराहहिं सुमन सुर गन बरषहीं ॥

रूप-श्रिया च गुण-शील-वयोभिरेवं
सर्वाणि तानि मिथुनानि मिथः समानि।
लज्जानुराग-भय-संमद-संकुलानि
संपातयन्ति च मिथोऽक्षि-कटाक्ष-पातान् ॥ ४

प्रेम्णा पुरः समवलोक्य विलोभनीया-
न्यानन्दिताथ मिथिला-नगरी समस्ता ।
शंसद्भिरेव च मिथः समुदार-शोभां
हृष्टैः कृता सुरगणैः सुम-वृष्टिरभ्रात् ॥ ५

सुंदरीं सुंदर बरन्ह सह सब एक मंडप राजहीं ॥
जनु जीव उर चारिउ अवस्था बिभुन सहित बिराजही ॥

चत्वारि तानि सममेव सम-द्वयानि
शोभां दधुः परिणयोत्सव-मण्डपेऽग्र्याम् ।
स्वस्वामिभिः सह दशा इव ताश्चतस्रः
जीवस्य मानस-विहायसि शोभमानाः ॥ ६

मुदित अवधपति सकल सुत बधुन्ह समेत निहारि ।

भूयो भूयस्तदालोक्य स्वपुत्राणां चतुष्टयम् ।
अनुरूपाभिरन्वेतं वधूभिः कोसलाधिपः ॥ ७

जनु पाए महिपाल मनि क्रियन्ह सहित फल चारि ॥

तथा प्रीतो यथा कश्चिन्महीधर-शिरोमणिः ।
समासाद्य क्रिया-सार्धं पुरुषार्थ-चतुष्टयम् ॥ ८

जसि रघुबीर ब्याह बिधि बरनी । सकल कुअँर ब्याहे तेहिं करनी ॥

त्रयाणामपि पुत्राणां शुभोद्वाह-विधिस्तदा ।
तथैवासीत् कृतः प्रेम्णा यथा रामस्य वर्णितः ॥ ९

कहि न जाइ कछु दाइज भूरी । रहा कनक मनि मंडपु पूरी ॥

यौतकं बहुरूपं यद् दत्तं कन्यानुरागिणा ।
विदेहेन तदा कस्तत् पारयेद् गदितुं गिरा ॥ १०
पूर्णः स रत्नभाण्डारैः सुवर्णाभूषणैस्तदा ।
प्रदत्तैर्मिथिलेशेन सुविशालोऽपि मण्डपः ॥ ११

कंबल बसन बिचित्र पटोरे । भाँति भाँति बहु मोल न थोरे ॥
गज रथ तुरग दास अरु दासी । धेनु अलंकृत कामदुहा सी ॥

बस्तु अनेक करिअ किमि लेखा । कहि न जाइ जानहिं जिन्ह देखा ॥

क्षौमाणि विविधान्येव कम्बलानि बहूनि च ।
गजाश्व-स्यन्दनाश्चैवं दासी-दासास्तथैव च ॥ १२
सुरधेनु-समा गावो दत्ताः सालङ्कृतास्तथा
विविधानि च दत्तानि वस्तून्यन्यानि यौतके ॥ १३
असंख्यातानि वस्तूनि कस्तानि गदितुं क्षमः ।
येन दृष्टानि चक्षुर्भ्यां सैव जानाति नापरः ॥ १४

लोकपाल अवलोकि सिहाने । लीन्ह अवधपति सबु सुखु माने ॥

विस्मिता लोकपालाश्च दृष्ट्वा संपदमद्भुताम् ।
स्वीचकार च सुप्रीतो राजा दशरथोऽपि ताम् ॥ १५

दीन्ह जाचकन्हि जो जेहि भावा । उबरा सो जनवासेहिं आवा ॥

याचकेभ्यश्च यस्मै यत् तेष्वरोचत वस्तुषु ।
संविभज्य ददौ तस्मै तत्तत् प्रेम्णा महीपतिः ॥ १६
अवशिष्टानि सर्वाणि प्राहिणोन्निजसेवकैः ।
जनवासं निरीहोऽसौ कोसलाधिपतिस्ततः ॥ १७

तब कर जोरि जनकु मृदु बानी । बोले सब बरात सनमानी ॥
— सनमानि सकल बरात आदर दान बिनय बड़ाइ कैं ।
प्रमुदित महा मुनि बृंद बंदे पूजि प्रेम लड़ाइ कै ।
सिरु नाइ देव मनाइ सब सन कहत कर संपुट किएँ ।
सुर साधु चाहत भाउ सिंधु कि तोष जल अंजलि दिएँ ॥

प्रेम्णा निराकृत-मुनि-प्रतिबन्ध-शब्दः
संपूजयन् प्रमुदितो बहुधा समस्तान् ।
सत्कारयन् वर-कुलं जनको वदान्यः
भक्त्याभिवन्द्य विबुधान्नत-मस्तकः सन् ॥ १८
बद्धाञ्जलिर्मृदुगिरा वचनं तदोचे
"भावप्रिया हि नियतं सुर-साधु-संघाः ।
नो चेत्कथं नु मनुजा वदतात्र यूयं
तुष्यत्यथाञ्जलि-जलेन स वारिराशिः ॥" १९

कर जोरि जनकु बहोरि बंधु समेत कोसलराय सों ।
बोले मनोहर बयन सानि सनेह सील सुभाय सों ।।
संबंध राजन रावरें हम बडे अब सब बिधि भए ।
एंहि राज साज समेत सेवक जानिबे बिनु गथ लए ।।

भ्रात्रा सहापि जनको रचिताञ्जलिः सन्
ऊचे पुनः सकुल-बान्धव-कोसलेशम् ।
स्निग्धं वचः प्रणय-नम्रमतीव-हृद्यम्
राजन्नुभावपि हि संप्रति लब्ध-कामौ ।। २०

राजंस्त्वया सह च नौ कुल-बन्धुतेयं
नूनं हि सर्वविधमप्यतिगौरवाय ।
अद्य प्रभृत्यथ सहैव च संपदा नौ
आवामुभावपि तवानुचरौ निरीहौ ।। २१

ए दारिका परिचारिका करि पालिबीं करुना नई ।
अपराधु छमिबो बोलि पठए बहुत हौं ढीटचो कई ।

मत्वात्मजाश्च सदृशं परिचारिकाभिः
राजंस्त्वया प्रणयिना परिपालनीयाः ।
आयासितोऽसि च मया यदिह प्रहूतः
क्षन्तव्य एष नर-नाथ ममापराधः ।। " २२

पुनि भानुकुलभूषन सकल सनमान निधि समधी किए ।
कहि जाति नहिं बिनती परस्पर प्रेम परिपूरन हिए ।।

आश्वास्य भानु-कुल-भूषण-भूत-राज्ञा
संमानितः स जनको बहुधोपहारैः ।
कस्तौ परस्पर-विनम्र-वचोऽनुरागौ
वक्तुं तयोरलमिहामित-शब्द-ग्रन्थैः ।। २३

बृंदारका गन सुमन बरिसहिं राउ जनवासेहि चले ।
दुंदुभी जय धुनि बेद धुनि नभ नगर कौतूहल भले ।।

तं प्रस्थितं दशरथं बत जन्य-वासं
वृन्दारकाः प्रमुदिता ववृषुः प्रसूनैः ।
आनन्द-दुन्दुभि-जयोच्चरण-प्रवृद्धैर्
व्याप्तं नभः सपुरमागम-मन्त्र-घोषैः ।। २४

तब सखीं मंगल गान करत मुनीस आयसु पाइ कै।
दूलह दुलहिनिन्ह सहित सुंदरि चलीं कोहबर ल्याइ कै।

ताः संमता मुनिवरेण सखी-सुमुख्यः
तत्कालसङ्गत-सुमङ्गल-गान-मग्नाः।
सर्वैर्ययुः सह वधू-वर-युग्मकैस्तैर्
देवालयं प्रणमितुं कुल-दैवतानि ॥ २५

–पुनि पुनि रामहि चितव सिय सकुचति मनु सकुचै न।
हरत मनोहर मीन छबि प्रेम पिआसे नैन ॥

सा लज्जितापि च पुनः पुनरीक्षमाणा
श्रीराम-वक्त्र-शशिनं सुख-सार-भूतम्।
लक्ष्मीमुवाह मिथिलेश-सुता झषाणां
लज्जानुराग-रस-लोल-विलोचनाभ्याम् ॥ २६

स्याम सरीरु सुभायँ सुहावन। सोभा कोटि मनोज लजावन ॥
जावक जुत पद कमल सुहाए। मुनि मन मधुप रहत जिन्ह छाए ॥
पीत पुनीत मनोहर धोती। हरति बाल रबि दामिनि जोती ॥
कल किंकिनि कटि सूत्र मनोहर। बाहु बिसाल बिभूषन सुंदर ॥
पीत जनेउ महाछबि देई। कर मुद्रिका चोरि चितु लेई ॥
सोहत ब्याह साज सब साजे। उर आयत उरभूषन राजे ॥
पिअर उपरना काखासोती। दुहुँ आँचरन्हि लगे मनि मोती ॥
नयन कमल कल कुंडल काना। बदनु सकल सौंदर्ज निधाना ॥
सुंदर भृकुटि मनोहर नासा। भाल तिलकु रुचिरता निवासा ॥
सोहत मौरु मनोहर माथे। मंगलमय मुकुता मनि गाथे ॥
–गाथे महामनि मौर मंजुल अंग सब चित चोरहीं।

वीक्ष्य मनोज्ञं रघुवररूपं
याति न तृप्तिं जनक-सुता।
सहज-सुरम्यं श्याम-शरीरं
जित-शत-कोटि-कुसुम-विशिखम् ॥ २७

रचितालक्तक-चरण-सरोजम्
मुनि-मानस-मधुकर-निचितम् ।
मञ्जुल-पीतं सुरुचिर-वसनं
नव-रवि-चपला-द्युति-रम्यम् ।। २८

कलरव-किंकिणिकं मधु-मधुरं
रुचिरं मञ्जुल-कटि-सूत्रम् ।
भूषण-मण्डित-दीर्घ-विशालं
बाहु-युगलमपि बहु-रम्यम् ।। २९

उपवीतं बहु-रुचिरं पीतं
चेतोहरमङ्गुलि-वलयम् ।
शुशुभे परिणय-समुचित-मण्डन-
मायत-वक्षसि मणि-हारः ।। ३०

उत्तर-वसनं पीत-सुरम्यं
मणि-रत्नाञ्चित-पर्यन्तम् ।
कमल-दलायत-नेत्रे मधुरे
कुण्डल-मण्डित-कर्ण-समे ।। ३२

रूप-निधानं शशि-सम-वदनं
भ्रुकुटि-युगं बहु रमणीयम् ।
मधुरा नासा मधुरो हासो
भाल-तिलक-सुषमा मधुरा ।। ३२

शिरसि सुरम्यो मुकुट-मयूरो
मुक्ताफल-मणिगण-खचितः ।
ललित-सुरम्यं श्यामल-रूपं
पुर-नर-वनिता-चित्त-हरम् ।। ३३

पुर नारि सुर सुंदरीं बरहि बिलोकि सब तिन तोरहीं ।।

वीक्ष्याभीक्ष्णं रघुवर-रूपं
सुर-नर-वनिता-जन-वृन्दम् ।
हन्तुं दुरितं व्यधित विधेयं
तृण-दल-खण्डन-महित-भिया ।। ३४

मनि बसन भूषन वारि आरति करहिं मंगल गावहीं ॥
सुर सुमन बरिसहिं सूत मागध बंदि सुजसु सुनावहीं ॥

समर्प्य नाना प्रीत्युपहारं वसन-विभूषण-भूयिष्ठम् ।
रघुवर-चरण-सरोरुह-युगले व्यधित सुमङ्गलमार्तिक्यम् ॥ ३५
विलसति मधुरं मङ्गल-गीतं सुर-नर-वर-वनिता-गीतम् ।
वर्षति सततं सुख-सुम-निचयं प्रमुदित-विबुध-मुखर-वृन्दम् ॥ ३६
गायति रघुकुल-सुयशोगानं सूत-बन्दि-मागध-वृन्दम् ।
जातं सर्वं मिथिला-नगरं पुर-जन-जय-नादाकीर्णम् ॥ ३७

कोहबरहिं आने कुअँर कुअँरि सुआसिनिन्ह सुख पाइ कै ।

वधूवरास्ते सममेव सर्वे सीमन्तिनीभिः सुखिताभिरन्ते ।
नीता कुल-स्वामि-गृहान्तरङ्गे कुलोपचाराननुसर्तुमग्रे ॥ ३८

अति प्रीति लौकिक रीति लागीं करन मंगल गाइ कै ॥

गायन्तीभिर्मङ्गलं गीतबन्धम् प्रेम्णार्तिक्यं तत्र निर्वर्तयित्वा ।
प्रारेभेऽसौ सर्वसीमन्तिनीभिर् लोकाचारः सर्व-संतोष-हेतुः ॥ ३९

लहकौरि गौरि सिखाव रामहि सीय सन सारद कहैं ।

प्रेम्णा गौरी निर्दिदेशोपचारं श्रीरामस्य प्राङमिथः ग्रासदानम् ।
सीतायै सा शारदा शर्म-दात्री सर्वां सम्यग्दर्शयामास रीतिम् ॥ ४०

रनिवासु हास बिलास रस बस जन्म को फलु सब लहैं ॥

वामानां सा सर्वतो नर्मवाक्यैः राज्ञी-कक्षा पूरिता सौख्य-हासैः ।
भूयो भूयो वीक्ष्य रामं सभार्यं सर्वाः सार्थं मेनिरे जन्म मर्त्यम् ॥

निज पानि मनि महुँ देखिअति मूरति सुरूपनिधान की ।
चालति न भुजबल्ली बिलोकनि बिरह भय बस जानकी ॥

दृष्ट्वा रामं रत्न-संक्रान्त-मूर्तिम् प्रीता सीता कङ्कणे रूपवन्तम् ।
बिम्बोच्छेदं शङ्कमाना स्वहस्तं धृत्वा स्तब्धं संनिधत्ते स्म दृष्टिम् ॥

कौतुक बिनोद प्रमोदु प्रेमु न जाइ कहि जानहिं अलीं ।

बोधन्तीभिस्तद्रहस्यं सखीभिः प्रेम्णा सीता पीडिता नर्महासैः ।
कस्तं हासं कौतुकं संमदं वा ज्ञातुं शक्तस्तत्सखीमन्तरेण ॥ ४३

बर कुअँरि सुंदर सकल सखीं लवाइ जनवासेहि चलीं ॥
तेहि समय सुनिअ असीस जहँ तहँ नगर नभ आनँदु महा ।

प्रोत्फुल्लाभिर्जन्यवासं सखीभिर् नीता भूयः सर्वकन्यावरास्ते ।
आशीर्वादैः पूरितं खं समस्तं हर्षोत्साहैः पट्टणेनैव सार्धम् ॥ ४४

चिरु जिअहुँ जोरीं चारु चार्‌यो मुदित मन सबहीं कहा ॥

"जायापत्योर्लोभनीयं चतुष्कं जीवत्वेतद् हे विधातश्चिराय ।"
आशंसन्तः सर्व एवैवमुच्चैर् आशीर्वादैर् वर्धयामासुरर्हम् ॥ ४५

जोगींद्र सिद्ध मुनीस देव बिलोकि प्रभु दुंदुभि हनी ।
चले हरषि बरषि प्रसून निज निज लोक जय जय जय भनी ॥

दृष्ट्वा रामं परम-परेशं सिद्ध-विबुध-मुनि-योगि-जनौघः ।
हर्षोत्फुल्लाः पटह-निनादैश् चक्रुर्वृष्टिं दिव्य-सुमानाम् ॥ ४६

"जय जय रघुवर जय जय राम जय जय जनकसुता सुखधाम ।"
जय-जय-घोषं रामस्यैवं कुर्वन्तो जग्मुर्निज-गेहम् ॥ ४७

सहित बधूटिन्ह कुअँर सब तब आए पितु पास ।
सोभा मंगल मोद भरि उमगेउ जनु जनवास ॥

कन्या-सहिताः सकल-वरास्ते संप्राप्ता जनवासमथाग्रे ।
शोभा-मङ्गल-मोदा नूनं समुपायाता इव निज-सदनम् ॥ ४८

पुनि जेवनार भई बहु भाँती । पठए जनक बोलाइ बराती ॥
परत पाँवड़े बसन अनूपा । सुतन्ह समेत गवन कियो भूपा ।
सादर सब के पाय पखारे । जथाजोगु पीढ़न्ह बैठारे ॥

परिकल्प्यैवं बहु-विध-भोज्यं निमन्त्रयित्वा वर-कुल-वृन्दम् ।
रचितं राज्ञा भुवि पट-वसनं दशरथ-कुल-पद-संचरणार्थम् ॥ ४९
प्रेम्णा चरण-क्षालन-पूर्वं दत्वोचित-सुखकर-वर-पीठम् ।
सविनयमादृतमखिलं राज्ञा मिथिलापतिना वर-कुल-वृन्दम् ॥ ५०

धोए जनक अवधपति चरना । सीलु सनेहु जाइ नहिं बरना ॥

कोसल-पति-पद-पङ्कज-युगलं क्षालितमतिविनयेन समेतम् ।
मधुर-मनोज्ञं स्नेहं शीलं नहि नहि नहि गदितुं निपुणोऽहम् ॥ ५१

बहुरि राम पद पंकज धोए । जे हर हृदय कमल महुँ गोए ।।

शशिधर-हृदय-सरोज-निलीनं राम-चरण-वर-वारिज-युग्मम् ।
प्रक्षालितमथ भव-सुख-सारं मिथिलापतिना विनय-समेतम् ।। ५२

तीनिउ भाइ राम सम जानी । धोए चरन जनक निज पानी ।।

तदनु समस्ता रामावरजाः निज-कर-धावित-चरण-सरोजाः ।
मिथिलापतिना महिता प्रीत्या दत्वा समुचितमासनमर्हम् ।। ५३

आसन उचित सबहि नृप दीन्हे । बोलि सूपकारी सब लीन्हे ।।
सादर लगे परन पनवारे । कनक कील मनि पान सँवारे ।।

आहूयापि च बल्लव-वृन्दम् मिथिलापतिना भोजन-पूर्वम् ।
रचितं प्रति-जनपुरतः प्रीत्या कनक-कील-युत-मणिमय-पात्रम् ।।

–सूपोदन सुरभी रसपि सुंदर स्वादु पुनीत ।
छन महुँ सब कें परुसि गे चतुर सुआर बिनीत ।।

चतुर-विनीतैर्बल्लव-वृन्दैर्विना विलम्बं स्वादु पवित्रम् ।
सूपोदनमथ गो-घृत-सिक्तं समुपस्थापितमति-परिमृष्टम् ।। ५५

पंच कवल करि जेवन लागे । गारि गान सुनि अति अनुरागे ।।

दत्वा भोजनपूर्वं सकलैः प्राणाहुतयः स्वाहाकारैः ।
गालि-गान-परिहास-विजल्पं श्रुत्वा प्रीत्या कृतं भोजनम् ।। ५६

भाँति अनेक परे पकवाने । सुधा सरिस नहिं जाहिं बखाने ।।

सुरस-मनोज्ञं बहुविध-रूपम् परिवेषितमथ चामृतमधुरम् ।
षड्-रस-रुचिरं भोजनमर्हं नहि मे वदनं गदितुं निपुणम् ।। ५७

परुसन लगे सुआर सुजाना । बिंजन बिबिध नाम को जाना ।।
चारि भाँति भोजन बिधि गाई । एक एक बिधि बरनि न जाई ।।

चतुर-सूद-कृत-चतुर्विधान्नं प्रतिविध-नाना-व्यञ्जन-पूर्णम् ।
अश्रुतपूर्वं नव-रुचि-मधुरं कुतोऽस्ति गदितुं मम मति-विभवम् ।।

छरस रुचिर बिंजन बहु जाती । एक एक रस अगनित भाँती ।।

षड्-रस-सुन्दर-दिव्य-भोजनं प्रति-रस-नाना-व्यञ्जन-गुणितम् ।
सेवितमतिथि-जनैरतिहृद्यं वनिता-जन-कृतनर्म-समेतम् ।। ५९

जेवँत देहिं मधुर धुनि गारी । लै लै नाम पुरुष अरु नारी ।।

नाम-ग्राहं नरनारीणां गीतं कृतकं निन्दा-गानम् ।
वनिताभिः परिहास-पेशलं लोक-रीति-समयोचित-रूपम् ।। ६०

समय सुहावनि गारि बिराजा । हँसत राउ सुनि सहित समाजा ।।
एहि बिधि सबहीं भोजनु कीन्हा । आदर सहित आचमनु दीन्हा ।।
देइ पान पूजे जनक दसरथु सहित समाज ।

निशम्य सर्वं नर्मालापं समयोचितमथ दशरथ-नृपतिः ।
प्रीतश्चक्रे नर्म-विधिज्ञः स्वजन-समेतं भोजनमग्र्यम् ।। ६१
दत्वाचमनं प्रीत्या राज्ञा ताम्बूलं बहु-रुचिकरमन्ते ।
कुल-जन-सहितः कोसल-नृपतिः सभाजितोऽभून्मिथिलापतिना ।।

जनवासेहि गवने मुदित सकल भूप सिरताज ।।

सकल-महीधर-मुकुट-शेखरः सोऽपि च दशरथ-महिपतिरेवम् ।
मिथिलापति-संमानन-तुष्टः समाययौ सकुलं जनवासम् ।। ६३

नित नूतन मंगल पुर माहीं । निमिष सरिस दिन जामिनि जाहीं ।

प्रतिदिन-नूतन-शुभमहलग्नं हर्षोत्सव-रत-मिथिला-नगरम् ।
क्षण-सम-रजनी क्षण-सम-दिवसो कालगणनमपि विलयं यातम् ।।

बड़े भोर भूपतिमनि जागे । जाचक गुन गन गावन लागे ।।
देखि कुअँर बर बधुन्ह समेता । किमि कहि जात मोदु मन जेता ।।

अथ प्रभाते मिथिला-नगरे बन्दि-गीत-सद्गुण-गण-महिमा ।
पुत्र-चतुष्टय-परिणय-तुष्टः प्रबोधितोऽसौ दशरथराजा ।। ६५

प्रातक्रिया करि गे गुरु पाहीं । महाप्रमोदु प्रेमु मन माहीं ।।
करि प्रनामु पूजा कर जोरी । बोले गिरा अमिअँ जनु बोरी ।।
तुम्हरी कृपाँ सुनहु मुनिराजा । भयउँ आजु मैं पूरनकाजा ।।

निर्वर्तित-मुख-मार्जन-कार्यः निर्मल-कायः प्रमुदित-चित्तः ।
समुपागम्य स्वगुरु-सकाशं प्रणम्य भक्त्या कृत-परिचर्यः ।। ६६
बद्धाञ्जलिरूचे नत-शीर्षः सुधा-सिक्तमिव वचनमुदारम् ।
"आशीर्वचनैर्मुनिवर तेऽहं संपरितृप्तः सफलित-कामः ।। ६७

अब सब विप्र बोलाइ गोसाई । देहु धेनु सब भाँति बनाई ।।
सुनि गुर करि महिपाल बड़ाई । पुनि पठए मुनि बृंद बोलाई ।।

निमन्त्रयित्वा मानसमेतं संप्रति सकलं द्विज-वर-वृन्दम् ।
वसन-विभूषण-मण्डित-गावः देहि गुरो तेभ्यो बहुसंख्याः ।।" ६८

श्लाघ्यं दशरथ-वचनं श्रुत्वा तुतोष सोऽपि च मनसि वसिष्ठः ।
प्रशस्य भूपं विप्र-वल्लभं न्यमन्त्रयत् तं द्विज-वर-वृन्दम् ।। ६९

—बामदेउ अरु देवरिषि बालमीकि जाबालि ।
आए मुनिबर निकर तब कौसिकादि तपसालि ।।

वामदेवमथ नारदमेवं जाबालिं मुनि-पुङ्गवमेवम् ।
विश्व-विदितमथ विश्वामित्रं वाल्मीक्यादि-सकल-गुरु-वृन्दम् ।।७०

दंड प्रनाम सबहि नृप कीन्हे । पूजि सप्रेम बरासन दीन्हे ।।

प्रणत-सकल-चरणाम्बुज-युग्मः कृतार्चनः कोसल-नर-नाथः ।
प्रीतश्चक्रे विनय-समेतं भक्त्या समुचितमासन-दानम् ।। ७१

चारि लच्छ बर धेनु मगाईं । कामसुरभि सम सील सुहाई ।।
सब बिधि सकल अलंकृत कीन्हीं । मुदित महिप महिदेवन्ह दीन्हीं ।।
करत बिनय बहु बिधि नरनाहू । लहेउँ आजु जग जीवन लाहू ।।
पाइ असीस महीसु अनंदा । लिए बोलि पुनि जाचक बृंदा ।।
कनक बसन मनि हय गय स्यंदन । दिए बूझि रुचि रबिकुलनंदन ।।

आनाययदथ लक्ष-चतुष्कं कामसुरभि-सम-सुभग-मनोज्ञम् ।
धेनूनाम् अति-शुचि-गुण-शीलं वसन-विभूषण-मण्डित-रूपम् ।। ७२

महीधरोऽसौ महीसुरेभ्यः प्रमुदित-चित्तः प्रददौ प्रेम्णा ।
"अधिगत-कामः सफलित-जन्मा धन्यः संप्रति नास्ति मदन्यः ।।"

सविनयमेवं वारं वारं नरपतिरूचे द्विजवर-वृन्दम् ।
आशीर्वचनैरवर्धयत् तं द्विज-जन-संघो भूयो भूयः ।। ७४

संतृप्तः सन्नवदातोऽसौ समाह्वयद् याचक-जन-वृन्दम् ।
अभीप्सितं यद् यस्य ददौ तत् प्रीत्या तस्मै रविकुल-नाथः ।। ७५

हयं गजं वा स्यन्दनमेवं मणि-काञ्चन-वसनादिकमग्र्याम् ।
रुच्यनुसारं संप्राप्यार्थं संपरितुष्टं याचक-वृन्दम् ।। ७६

चले पढ़त गावत गुन गाथा । जय जय जय दिनकर कुल नाथा ।।
राज्ञः सद्गुण-गण-महिमानं गायन्तस्ते ययुः सहर्षम् ।
'जय जय रवि-कुल-पालक-राजन्' इत्यभिशंसन्तो निजवासम् ।।

एहि बिधि राम बिआह उछाहू । सकइ न बरनि सहस मुख जाहू ।।
एवं रघुपति-परिणय-पर्वं नालं वर्णयितुं यत्सर्वम् ।
सहस्रजिह्वोऽप्यहि-कुल-नाथो निर्वर्तितमति-हर्ष-समेतम् ।। ७८

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानसभावानुवादे
श्रीरामादि-विवाह-महोत्सव-वर्णनं नाम पञ्चाशस्तरङ्गः ।।

तरङ्गः ५१

—बार बार कौसिक चरन सीसु नाइ कह राउ ।
यह सबु सुखु मुनिराज तव कृपा कटाच्छ पसाउ ॥

विन्यस्य कौशिक-मुनेः पदयोः स्वशीर्षं
प्रेम्णा स कोसलपतिस्तमुवाच भूयः ।
सौख्यं परं यदनुभूतमिदं मयाद्य
मन्ये मुनीश्वर कृपा-फलितं तवैव ॥ १

जनक सनेहु सीलु करतूती । नृपु सब भाँति सराह बिभूती ॥
दिन उठि बिदा अवधपति मागा । राखहिं जनकु सहित अनुरागा ॥
नित नूतन आदरु अधिकाई । दिन प्रति सहस भाँति पहुनाई ॥

भूयः प्रशस्य बहुधा मिथिलेश्वरस्य
सौहार्दशील-विभवादिगुणान् गुणज्ञः ।
आज्ञामयाचत पुनः पुनरेव भूपः
प्रत्येतुमात्मविषयं स महोत्सवान्ते ॥ २

श्रुत्वापि तत्प्रतिदिनं न तथानुमेने
प्रेम्णा स कोसलपतेर्जनकः प्रयाणम् ।
नित्यं चकार विविधैः सुख-संविधानैः
राज्ञो विशेष-सुखदं मिथिला-निवासम् ॥ ३

नित नव नगर अनंद उछाहू । दसरथ गवनु सोहाइ न काहू ॥

नाना-नवोत्सव-सुखानुभवाभिभूते
तस्मिन् पुरे प्रतिदिनं मिथिलेश्वरस्य ।
कस्यापि कोसल-पतेः स्व-पुर-प्रयाणं
पौरेषु नाभिमतमत्यनुरागवत्सु ॥ ४

बहुत दिवस बीते एहि भाँती । जनु सनेह रजु बँधे बराती ॥

उभयोः कुलयोरेवं स्नेह-रज्जु-प्रबद्धयोः ।
यातानि कतिचिद्-भूयो दिनानि मिथिलापुरे ॥ ५

कौसिक सतानंद तब जाई। कहा बिदेह नृपहि समुझाई ।।

विश्वामित्रो मुनिर्ज्येष्ठः शतानन्दस्तथैव च ।
ऊचतुर्मिथिलेशस्य गत्वा संनिकटं वचः ।। ६

अब दसरथ कहँ आयसु देहू। जद्यपि छाडि न सकहु सनेहू ।।

अनुराग-वशोऽस्येवं यद्यप्यत्र महीपते ।
अनुज्ञां कोसलेशाय दातुमर्हसि सांप्रतम् ।। ७

भलेहिं नाथ कहि सचिव बोलाए। कहि जय जीव सीस तिन्ह नाए।

तथेत्युक्त्वा विदेहोऽपि सादरं मुनि-पुंगवौ ।
समाह्वयदथामात्यान् सर्वान् स्वस्यान्तिके नृपः ।। ८
जय जीवेति शब्दैस्ते समुपागम्य सत्वरम् ।
प्रणता मिथिलेशस्य तस्थुः सादरमग्रतः ।। ९

—अवधनाथु चाहत चलन भीतर करहु जनाउ ।

"ईहतेऽसौ पुनर्गन्तुम् अयोध्यां कोसलेश्वरः ।
तच्चास्तु विदितं संप्रत्यन्तःपुर-जनस्य भोः ।।" १०

भए प्रेमबस सचिव सुनि बिप्र सभासद राउ ।

श्रुत्वेदं सचिवाः सर्वे विप्राश्चैवं सभा-जनाः ।
सहैव मिथिलेशेन बभूवुः प्रेम-कातराः ।। ११

पुरबासी सुनि चलिहि बराता। बूझत बिकल परस्पर बाता ।

'यास्यत्यद्य पुरीं स्वीयां वर-यात्रि-कुलं किल ।'
इत्यन्योन्यं पुरे पौराः पृच्छन्तो व्याकुलास्तदा ।। १२

सत्य गवनु सुनि सब बिलखाने। मनहुँ साँझ सरसिज सकुचाने ।

विदितार्थाः ययुः खेदं पुर-नारी-नरास्तथा ।
संकुचन्ति यथा सायं पद्मानि विरहाद् रवेः ।। १३

जहँ जहँ आवत बसे बराती। तहँ तहँ सिद्ध चला बहु भाँती ।

आगच्छन्तो निवेशेषु येषु जन्या विशश्रमुः ।
तेषु तेषु महीपालश्चक्रे भोजन-कल्पनम् ।। १४

बिबिध भाँति मेवा पकवाना। भोजन साजु न जाइ बखाना॥

नाना-मिष्टान्न-संपन्नं भोजनं तत्र योजितम्।
कुतः शक्यं समग्रं तद् गदितुं प्रमिताक्षरैः॥ १५

भरि भरि बसहँ अपार कहारा। पठईं जनक अनेक सुसारा॥
तुरग लाख रथ सहस पचीसा। सकल सँवारे नख अरु सीसा॥

असङ्ख्य-वृषभैरूढं सेवक-स्कन्ध-रोपितम्।
प्राहिणोज्जनकः प्रीत्या तत्राहारोपपादनम्॥ १६
पर्यङ्का विविधाश्चैवं सहस्रैः स्यन्दनास्तथा।
स्वलंकृतानामश्वानां लक्षं चैवं विसर्जितम्॥ १७

मत्त सहस दस सिंधुर साजे। जिन्हहि देखि दिसि कुंजर लाजे।

अयुतं सिन्धुराश्चैवं मदोन्मत्ता विसर्जिताः।
दिग्गजाश्च ययुर्लज्जां दृष्ट्वा यान् बलशालिनः॥

कनक बसन मनि भरि भरि जाना। महिषीं धेनु वस्तु बिधि नाना॥

वसनानि च रत्नानि कनकाभरणानि च।
महिष्यो धेनवश्चैवं नानावस्तून्यथापि च॥ १९

–दाइज अमित न सकिअ कहि दीन्ह बिदेहँ बहोरि।
जो अवलोकत लोकपति लोक संपदा थोरि॥

यौतकं च पुनर्दत्तं मात्रातीतं महीभृता।
क्षुद्रो यस्य पुरः सर्वो लोकपालार्थसंचयः॥ २०

सबु समाजु एहि भाँति बनाई। जनक अवधपुर दीन्ह पठाई॥

सामग्री विविधा चैवं पूर्वमेव विसर्जिता।
अयोध्या-नगरीं प्रेम्णा मिथिला-पतिना स्वयम्॥ २१

चलिहि बरात सुनत सब रानीं। बिकल मीनगन जनु लघु पानीं॥

यास्यत्यवश्यं वर-बन्धु-वर्गः
संप्रत्ययोध्यामिति ता निशम्य।
राज्ञ्यो बभूवुर्विकलान्तरङ्गाः
स्वल्पेषु मीना इव चोदकेषु॥ २२

पुनि पुनि सीय गोद करि लेहीं। देइ असीस सिखावनु देहीं ॥

पुनः पुनस्ता मिथिलेशकन्यां कृत्वा निजाङ्केष्वनुरागवत्यः।
ददुः शुभाशीर्वचनानि भूयः संबोधयन्त्यो हित-बोध-पूर्वम् ॥ २३

होएहु संतत पियहि पिआरी। चिरु अहिबात असीस हमारी ॥
सासु ससुर गुर सेवा करेहू। पति रुख लखि आयसु अनुसरेहू ॥

"भूयाः सीते बहु-मत-तरा त्वं स्वभर्तुः सदैव
सौभाग्यं ते वितरतु विधिर्नित्यमक्षय्यमेव।
श्वश्रूं नित्यं श्वशुरसहितं सादरं सेवमाना
शुश्रूषस्व प्रणिहित-धिया माननीयान् गुरूंश्च ॥ २४

पत्युः सीते यदभिलषितं यच्च नास्तीति सर्वं
वाचा यद्यप्ययि न कथितं साधुशीलेन तेन।
वीक्ष्याकारं वदनकमलात् सर्वमेवावगम्यं
कार्यं चैवं भवसि नियतं प्रीति-पात्रं तदीयम् ॥" २५

अति सनेह बस सखीं सयानी। नारिधरम सिखवहिं मृदु बानी ॥
सादर सकल कुअँरि समुझाई। रानिन्ह बार बार उर लाईं ॥

सख्यश्चासन् मृदुतर-गिरा स्निग्ध-गम्भीर-धीराः
नारी-धर्मं जनक-तनयां बोधयन्त्योऽतिमुग्धाम्।
राज्ञ्यश्चैवं पुनरपि पुनस्ताः समाश्लिष्य कन्याः
ऊचुः प्रेम्णा हितकरवचः सादरं नूतनोढाः ॥ २६

बहुरि बहुरि भेटहिं महतारीं। कहहिं बिरंचि रचीं कत नारीं ॥

वारं वारं मातरौ कन्यके स्वे प्रेम्णाश्लिष्य प्रोचुरेवं विरिञ्चिम्।
"सोढव्योऽयं यद्यवश्यं वियोगः किं तन्नारी निर्मितेयं विधातः ॥२७

–तेहि अवसर भाइन्ह सहित रामु भानु कुल केतु।
चले जनक मंदिर मुदित बिदा करावन हेतु ॥

अत्रान्तरेऽसौ रवि-वंश-केतुः सभ्रातृकः प्रीत-मनाः प्रतस्थे।
आप्रष्टुमत्यूर्जित-शील-वृत्तो विदेहराजं निज-वासकस्थम् ॥ २८

चारिउ भाइ सुभायँ सुहाए। नगर नारि नर देखन धाए ।।

तद् वीक्षितुं वीक्षण-लोभनीयं चतुष्टयं भास्कर-वंशजानाम् ।
समुत्सुकान्तःकरणाः समेताः पौराः सनारी-जन-बाल-वृद्धाः ।। २९

कोउ कह चलन चहत हहिं आजू। कीन्ह बिदेह बिदा कर साजू ।।

"श्रुतं मयाद्यैव सखि स्वगेहं गन्तुं किलेच्छन्ति वराः सगोत्रम् ।
प्रयाण-सिद्धिश्च तथैव तेषां संकल्पिता प्रीतिमता नृपेण ।। ३०

लेहु नयन भरि रूप निहारी। प्रिय पाहुने भूप सुत चारी ।।
को जानै केहिं सुकृत सयानी। नयन अतिथि कीन्हे बिधि आनी ।।

प्रियातिथींस्तान् नृपतेः कुमारान् दृष्ट्वाथ संतर्पयताक्षियुग्मम् ।
किं तन्न जाने सुकृतं भवेन्नो नेत्रातिथीन् यत्कृतवान् विधिस्तान् ।।

मरनसीलु जिमि पाव पिऊषा। सुरतरु लहै जनम कर भूखा ।।
पाव नारकी हरिपदु जैसें। इन्ह कर दरसनु हम कहँ तैसें ।।

आसन्नमृत्योरमृतं यथैव क्षुधावसन्नस्य च कल्पवृक्षः ।
पदं हरेर्वा निरय-स्थितस्य तथैव चैतत् सुखदर्शनं नः ।। ३२

निरखि राम सोभा उर धरहू। निज मन फनि मूरति मनि करहू ।।

सख्यस्तदेतत्-सुख-संनिधानं विलोक्य रामं बत निर्निमेषम् ।
निधाय शोभां हृदयेऽप्रमत्तं चित्ताहिना रक्षत मूर्ति-रत्नम् ।।" ३३

एहि बिधि सबहि नयन फलु देता। गए कुअँर सब राज निकेता ।।

एवं मिथस्ता मिथिला-पुरन्ध्र्यः संभाषमाणाः पथि संनिपेतुः ।
कुर्वन्त एवं नयनोत्सवं ते ययुर्निवासं नृपतेः कुमाराः ।। ३४

—रूप सिंधु सब बंधु लखि हरषि उठा रनिवासु।
करहिं निछावरि आरती महा मुदित मन सासु ।।

सौन्दर्य-सिन्धूनिव राजपुत्रान् दृष्ट्वातिहृष्टो महिषी-निवासः ।
प्रत्युद्ययुस्ता मुदिता महिष्यो द्वारेषु नीराजन-पात्र-हस्ताः ।। ३५

देखि राम छबि अति अनुरागीं। प्रेमबिबस पुनि पुनि पद लागीं॥
रही न लाज प्रीति उर छाई। सहज सनेहु बरनि किमि जाई॥

वीक्ष्यातिरम्यं रघुवीर-रूपं निपेतुरङ्घ्य्रम्बुजयोरभीक्ष्णम्।
गाढानुरागोर्मि-निरस्त-लज्जः स्नेहस्तदीयो न वचोऽवगम्यः॥ ३६

भाइन्ह सहित उबटि अन्हवाए। छरस असन अति हेतु जेवाँए॥

संमानिताः स्नान-विलेपनैस्ते राज्ञीभिरत्यादर-पूर्वमग्रे।
संपूरिताः षड्-रस-भोजनान्नैर् आनन्द-पूर्वं सकलाः स्वहस्तैः॥ ३७

बोले रामु सुअवसरु जानी। सील सनेह सकुचमय बानी॥
राउ अवधपुर चहत सिधाए। बिदा होन हम इहाँ पठाए॥
मातु मुदित मन आयसु देहू। बालक जानि करब नित नेहू॥

रामस्तदा ताः समयानुरोधं सस्नेहमूचे वचनं विनीतम्।
"प्रत्येतुमद्येच्छति कोसलान्नः तातः स नूनं कुल-रीति-विज्ञः॥ ३८
प्राप्ता वयं तद्-वचनादथैवं सर्वाः समामन्त्रयितुं, महिष्यः।
तच्चानुजानीत मुदा प्रयाणं स्नेहः सदास्मासु च यातु वृद्धिम्॥"

सुनत बचन बिलखेउ रनिवासू। बोलि न सकहिं प्रेमबस सासू॥

निशम्य सर्वो महिषी-निवासः सद्यः प्रपेदे विरहातुरत्वम्।
प्रेमार्ति-बाष्प-प्रतिरुद्ध-कण्ठः श्वश्रू-जनश्चापि न किञ्चिदूचे॥ ४०

हृदयँ लगाइ कुअँरि सब लीन्ही। पतिन्ह सौंपि बिनती अति कीन्ही॥

आश्लिष्य भूयोऽपि च ते महिष्यौ समर्पयामासतुरात्मजाः स्वाः।
प्रेम्णा स्वजामातृषु रीति-विज्ञे विज्ञापयामासतुरेवमग्रे॥ ४१

—करि बिनय सिय रामहि समरपी जोरि कर पुनि पुनि कहै।
बलि जाउँ तात सुजान तुम्ह कहुँ बिदित गति सब की अहै॥
परिवार पुरजन मोहि राजहि प्रानप्रिय सिय जानिबी।

सीतां समर्प्य रघुवंश-विभूषणाय
बद्धाञ्जलिर्बहुविधं तमुवाच माता।
"स्वात्माप्ययं रघुपते निहितो मया ते
पादाब्जयोः, किमुत सा दुहिता प्रिया मे॥ ४२

जानासि सर्वजनमानसवास नूनं
सीतापते रघुपते न कथं मनो मे ।
प्राणप्रियां नरपतेर्मम चापि सीताम्
जानीहि पौरजनसेवकवल्लभां च ।। ४३

तुलसीस सीलु सनेहु लखि निज किंकरी करि मानिबी ।।
—तुम्ह परिपूरन काम जान सिरोमनि भावप्रिय ।
जन गुन गाहक राम दोष दलन करुनायतन ।।

स्निग्धामवेत्य तदिमां गुणशीलयुक्तां
दासीति नाथ सदयं परिपालनीया ।
संपूर्णकाम सकलज्ञ दयानिधान
भावप्रियोऽसि किल दोषहरो गुणज्ञः ।।" ४४

अस कहि रही चरन गहि रानी । प्रेम पंक जनु गिरा समानी ।।

उक्त्वा चैवं रामभद्रस्य राज्ञी भेजे मौनं तत्पदाब्जे गृहीत्वा ।
तद्वाग्धेनुः प्रेमपङ्कप्रसक्ता निर्गन्तुं चाप्याननान्नैव शक्ता ।। ४५

सुनि सनेहसानी बर बानी । बहुबिधि राम सासु सनमानी ।।

श्रुत्वा रामः स्निग्धगंभीरधीरं वाक्यं श्वश्र्वाः संप्रहृष्टस्तदाभूत् ।
वाक्यैर्धीरैस्तां समाश्वस्य साध्वीं वारं वारं सच्चकारातिधीराम् ।।

राम बिदा मागत कर जोरी । कीन्ह प्रनामु बहोरि बहोरी ।।
पाइ असीस बहुरि सिरु नाई । भाइन्ह सहित चले रघुराई ।।

भूयो भूयः साञ्जलिस्तां ययाचे प्रत्येतुं सत्संमतिं प्रह्वशीर्षः ।
आशीर्वादैः संप्रहृष्टः प्रतस्थे यातुं रामो धैर्यसिन्धुः सबन्धुः ।। ४७

मंजु मधुर मूरति उर आनी । भईं सनेह सिथिल सब रानी ।।
पुनि धीरजु धरि कुअँरि हँकारीं । बार बार भेटहिं महतारीं ।।
पहुँचावहिं फिरि मिलहिं बहोरी । बढ़ी परस्पर प्रीति न थोरी ।।
पुनि पुनि मिलत सखिन्ह बिलगाई । बाल बच्छ जिमि धेनु लवाई ।।

तामेव रम्यमधुरां रघुनाथमूर्तिं
ध्यात्वा तदा हृदयसंनिहितां महिष्यौ ।
रामानुरागवशगे विकलान्तरङ्गे
धैर्यं निधाय हृदये कथमप्यथार्ये ।। ४८

आहूय संनिकट मात्मसुते प्रयासात्
प्रेम्णोरसाथ परिरभ्य पुनः पुनश्च ।
आमन्त्र्य चापि पुनरेत्य पुनः प्रगाढं
प्रेमातिरेकविकले परिषस्वजाते ॥ ४९

स्नेहो मिथः स जननीसुतयोः प्रगाढः
कोऽलं हि सोढुमभितोऽपि तयोर्वियोगम् ।
सख्यः सुते कथमपि व्ययुजुः स्वमातुर्
धेनोर्यथा मृतुतरं नवजातवत्सम् ॥ ५०

–प्रेमबिबस नर नारि सब सखिन्ह सहित रनिवासु ।
मानहुँ कीन्ह बिदेहपुर करुनाँ बिरहँ निवासु ॥

पौराः सबालवनिता मिथिलापुरान्ते
सख्यस्तथातिविकला महिषी-निवासे ।
सीतानुरागविवशं मिथिलापुरं तत्
जातं वियोग-करुणा-निलयं नु सर्वम् ॥ ५१

सुक सारिका जानकी ज्याए । कनक पिंजरन्हि राखि पढ़ाए ॥
ब्याकुल कहहिं कहाँ बैदेही । सुनि धीरजु परिहरइ न केही ॥
भए बिकल खग मृग एहि भाँती । मनुज दसा कैसें कहि जाती ॥

जनकजा कर-पल्लव-वर्धिता कनक-पञ्जरगाः शुक-सारिकाः ।
'क्व नु गता खलु सा मिथिलात्मजे'-त्युदगिरन् करुणं वचनं शुचा ॥
सकल-धैर्य-विलोपनमीदृशम् अहह तद् वचनं खलु दारुणम् ।
खग-मृगेष्वपि शोक-वशेषु वा किमु नरां मनसां परिदेवनम् ॥ ५३

बंधु समेत जनकु तब आए । प्रेम उमगि लोचन जल छाए ॥
सीय बिलोकि धीरता भागी । रहे कहावत परम बिरागी ॥
लीन्हि रायँ उर लाइ जानकी । मिटी महामरजाद ग्यान की ॥

संप्राप्तो जनकोऽपि बन्धु-सहितस्तत्राश्रु-पूर्णेक्षणः
धैर्यं यस्य विरागिणोऽपि विलयं यातं सुता-दर्शनात् ।
वैक्लव्यात् परिरभ्य भूपतिवरः प्राण-प्रियां जानकीं
वेलां प्रेम-वशो व्यलङ्घत तदा ज्ञानाम्बुधेरात्मनः ॥ ५४

समुझावत सब सचिव सयाने। कीन्ह बिचारु न अवसर जाने ॥
बारहिं बार सुता उर लाईं। सजि सुंदर पालकीं मगाईं ॥
-प्रेमबिबस परिवारु सबु जानि सुलगन नरेस।
कुअँरि चढ़ाई पालकिन्ह सुमिरे सिद्धि गनेस ॥

यत्नैः सोऽपि च सादरं स्वसचिवैराश्वासितो भूपतिः
'कालोऽयं न विषादनस्य नियतं' मत्वेति चक्रे धृतिम्।
ज्ञात्वा तच्छुभलग्नमार्तविवशोऽप्यन्तःपुरे भूपतिर्
भूयश्चाप्युपगूह्य ताः प्रियसुताश्चक्रे मतिं प्रेषितुम् ॥ ५५
समानाय्य ततः शीघ्रं शिबिकाः परिमण्डिताः।
आरोपयन् सुताः प्रेम्णा स्मृत्वा भक्त्या गजाननम् ॥ ५६

बहुबिधि भूप सुता समुझाईं। नारिधरमु कुलरीति सिखाईं ॥
बोधयामास ताः सर्वाः नरनाथ पुनः पुनः।
नारी-धर्मेषु वात्सल्यात् कुलरीतिषु चात्मजाः ॥ ५७

दासीं दास दिए बहुतेरे। सुचि सेवक जे प्रिय सिय केरे ॥
दासी-दास-गणाँश्चैवं विश्वासार्हान् गुणान्वितान्।
भेजे स मिथिलानाथः सीतया सह वत्सलः ॥ ५८

सीय चलत ब्याकुल पुरबासी। होहिं सगुन सुभ मंगल रासी ॥
भूसुर सचिव समेत समाजा। संग चले पहुँचावन राजा ॥
प्रतस्थे यावदेवैषा कन्या-यात्रा ततः पुरात्।
व्याकुला मिथिला सर्वा सीता-विरह-कातरा ॥ ५९
ओदकान्तं ययौ राजा सपौर-सचिवः स्वयम्।
शकुना मङ्गलाः सर्वे तदासन् शुभशंसिनः ॥ ६०

समय बिलोकि बाजने बाजे। रथ गज बाजि बरातिन्ह साजे ॥
समये वाद्यनिर्घोषः समभूत् शुभसूचकः।
अलंचक्रुर्गजानश्वान् रथाँश्च वरयात्रिणः ॥ ६१

दसरथ बिप्र बोलि सब लीन्हे। दान मान परिपूरन कीन्हे ॥
विप्र-वृन्दं समाहूय सादरं कोसलेश्वरः।
सच्चकार पुनः सर्वान् दान-मानादिभिः स्वयम् ॥ ६२

चरण सरोज धूरि धरि सीसा । मुदित महीपति पाइ असीसा ।।

निधाय मस्तके धूलिं द्विजपादाम्बुजन्मनाम् ।
तल्लब्धाशीरयोध्येशः प्रतस्थे हर्ष-निर्भरः ।। ६३

सुमिरि गजाननु कीन्ह पयाना । मंगलमूल सगुन भए नाना ।।

स्मृत्वा विनायकं भक्त्या प्रस्थिते नरनायके ।
बभूवुः शकुना नाना भावि-मङ्गल-सूचकाः ।। ६४

–सुर प्रसून बरषहिं हरषि करहिं अपछरा गान ।
चले अवधपति अवधपुर मुदित बजाइ निसान ।।

चक्रुः सुरालयाद् देवाः पुष्प-वृष्टिं सुमङ्गलाम् ।
ननृतुः स्वर्गसुन्दर्यो नदुः पटहास्तथा ।। ६५

नृप करि बिनय महाजन फेरे । सादर सकल मागने टेरे ।।
भूषन बसन बाजि गज दीन्हे । प्रेम पोषि ठाढे सब कीन्हे ।।

न्यवर्तयत् प्रयत्नेन प्रार्थयित्वा पुनः पुनः ।
मिथिलावासिनो राजा समाश्वास्य च नैकधा ।। ६६

समाहूय स्वयं प्रेम्णा याचकान् कोसलेश्वरः ।
वस्त्रैः रत्नैर्गजैरश्वैः पूरयामास तान् पुनः ।। ६७

बार बार बिरिदावलि भाषी । फिरे सकल रामहि उर राखी ।।

प्रशस्य बहुधा भूपं भानु-वंशं च याचकाः ।
निधाय हृदये रामं न्यवर्तन्त मुदा पुरीम् ।। ६८

बहुरि बहुरि कोसलपति कहहीं । जनकु प्रेमबस फिरै न चहहीं ।।

प्रार्थितोऽप्यसकृद् राज्ञा कोसलेशेन सादरम् ।
इयेष न पुनर्गन्तुं विदेहः प्रेम-विह्वलः ।। ६९

पुनि कह भूपति बचन सुहाए । फिरिअ महीस दूरि बड़ि आए ।।

"आयास्यसि कियद् दूरं निवर्तस्व महीपते ।"
सादरं पुनरप्येवं प्रार्थयत् कोसलेश्वरः ।। ७०

राउ बहोरि उतरि भए ठाढे । प्रेम प्रबाह बिलोचन बाढे ।।

अवतीर्य रथाद् राजा तिष्ठन् भूमौ ददर्श तम् ।
प्रेमाश्रु-कलुषाक्षिभ्यां विदेहं विवशं पुरः ।। ७१

तब बिदेह बोले कर जोरी । बचन सनेह सुधाँ जनु बोरी ।।

ततः स मिथिला-नाथः साञ्जलिः पुनरब्रवीत् ।
प्रेमाश्रु-गद्गदं वाक्यं स्नेहामृत-परिप्लुतम् ।। ७२

करौं कवन बिधि बिनय बनाई । महाराज मोहि दीन्हि बड़ाई ।।
–कोसलपति समधी सजन सनमाने सब भाँति ।

"किं वच्मि कोसलपते विनतिश्च का ते
संमानितोऽस्मि खलु ते कृपयानयाहम् ।"
संबधिनं स्वजनमादरपूर्वमहँ
भूयः स कोसलपतिः समपूजयत् तम् ।। ७३

मिलनि परसपर बिनय अति प्रीति न हृदयँ समाति ।

प्रीत्या संबन्धिनौ भूयो मिलन्तौ तौ परस्परम् ।
न समर्थौ तदाधातुं हृदये स्नेह-सागरम् ।। ७४

मुनि मंडलिहि जनक सिरु नावा । आसिरबादु सबहि सन पावा ।।
सादर पुनि भेंटे जामाता । रूप सील गुन निधि सब भ्राता ।।
जोरि पकरुह पानि सुहाए । बोले बचन प्रेम जनु जाए ।।

प्रणिपत्य मुनीन् सर्वान् लब्धाशीर्वचनः पुनः ।
जामातॄन् जनकः प्रेम्णा संमिमेल गुणान्वितान् ।। ७५
रूप-शील-निधानं तं श्रीरामं भ्रातृभिर्युतम् ।
बद्धाञ्जलिर्वचोऽवोचन्मूर्तिमत् स्नेह-सुन्दरम् ।। ७६

राम करौं केहि भाँति प्रसंसा । मुनि महेस मन मानस हंसा ।।

"कथयस्व महादेव-मुनि-मानस-हंस ते ।
स्तवीमि किमहं वाचा त्वद्-गुणौघं सतां पते ।। ७७

करहिं जोग जोगी जेहि लागी । कोहु मोहु ममता मदु त्यागी ॥

त्यक्त्वा मोहं मदं क्रोधं ममतां च मुनीश्वराः ।
त्वदर्थं हि सदा राम तपस्तप्यन्ति दुश्चरम् ॥ ७८

ब्यापकु ब्रह्मु अलखु अबिनासी । चिदानंदु निरगुन गुनरासी ॥
मन समेत जेहि जान न बानी । तरकि न सकहिं सकल अनुमानी
महिमा निगमु नेति कहि कहई । जो तिहुँ काल एकरस रहई ॥

अव्यक्तं व्यापकं ब्रह्म त्वमेव रघुनायक ।
अविनाशि चिदानन्द-स्वरूपं निर्गुणात्मकम् ॥ ७९

निर्गुणोऽपि गुणानां त्वं महाराशिर्दयाघन ।
यं न वेत्ति मनः सूक्ष्मं वाचा वर्ण्यस्त्वमीश्वरः ॥ ८०

नानुमन्योऽपि यस्तर्कैस्त्रिकालैक-रसात्मकः ।
नेति नेति च यं वेदा वर्णयन्ति परात्परम् ॥ ८१

नयन बिषय मो कहुँ भयउ सो समस्त सुख मूल ।
सबइ लाभु जग जीव कहँ भएँ ईसु अनुकूल ॥

सैवाक्षि-विषयस्त्वं मे सर्व-सौख्य-समुद्भव ।
आसाद्यं वा न किं जीवैरनुकूले त्वयि प्रभो ॥ ८२

सबहि भाँति मोहि दीन्हि बड़ाई । निज जन जानि लीन्ह अपनाई ॥

यशोवानद्य जातोऽहं त्वत्-संपर्काज्जगत्-प्रिय ।
स्वजनत्वेन यन्नाथ स्वीकृतोऽहं त्वया प्रभो ॥ ८३

होहिं सहस दस सारद सेषा । करहिं कलप कोटिक भरि लेखा ॥
मोर भाग्य राउर गुन गाथा । कहि न सिराहिं सुनहु रघुनाथा ॥

दशशतरसनो वा शारदा वा सहस्रैर्
गणयति यदि भक्त्या कोटि-कल्पानि नित्यम् ।
तदपि तव गुणानां भाग्य-लाभस्य वा मे
न हि रघुवर पारं याति नूनं मतिर्मे ॥ ८४

मैं कछु कहउँ एक बल मोरें। तुम्ह रीझहु सनेह सुठि थोरें ॥
बार बार मागउँ कर जोरें मनु परिहरै चरन जनि भोरें ॥

परिमित-परितुष्टस्त्वं सदा सेवकानां
गदितमिति मयैतन्नाथ सर्वं तवाग्रे ।
पुनरपि पुनरेवं प्रार्थये यन्मनो मे
भवतु निरतमेतत् त्वत्-पदाम्भोज-युग्मे ॥" ८५

सुनि बर बचन प्रेम जनु पोषे। पूरनकाम रामु परितोषे ॥

निशम्य मिथिलेशस्य वर-वाक्यं रघूद्वहः ।
सौहार्द-रस-संपृक्तं प्रीतः पूर्ण-मनोरथः ॥ ८६

करि बर बिनय ससुर सनमाने । पितु कौसिक बसिष्ठ सम जाने ॥

अपूजयद् रघुश्रेष्ठः प्रार्थयित्वा पुनः पुनः ।
श्वशुरं तं समाश्वास्य सादरं बहुधा ततः ॥ ८७

स्वपित्रा सदृशं पूज्यं वसिष्ठेन पुरोधसा ।
गुरुणा कौशिकेनाथ समानं सच्चकार तम् ॥ ८८

बिनती बहुरि भरत सन कीन्ही । मिलि सप्रेमु पुनि आसिष दीन्ही ॥

ततः स जनकः प्रीत्या प्रार्थयद् भरतं पुनः ।
मिलित्वा पुनरप्येवं स्नेहादाशीर्वचो ददौ ॥ ८९

–मिले लखन रिपुसूदनहि दीन्हि असीस महीस ।

लक्ष्मणं च तथैवासौ मिलित्वा शत्रु-सूदनम् ।
मिथिलेशस्ततः स्नेहादाशीर्वादान् ददौ पुनः ॥ ९०

भए परसपर प्रेमबस फिरि फिरि नावहिं सीसा ॥

मिथः प्रेमवशाः सर्वे संमिलन्तः पुनः पुनः ।
प्रणेमुः सादरं चैवं वारं वारं परस्परम् ॥ ९१

बार बार करि बिनय बड़ाई । रघुपति चले संग सब भाई ॥

प्रार्थयित्वा पुनश्चैवं मिथिलेशं रघूत्तमः ।
सत्कृत्य पुनरप्येव प्रतस्थे सह बन्धुभिः ॥ ९२

जनक गहे कौसिक पद जाई। चरन रेनु सिर नयनन्ह लाई ।।

गत्वा ततः कुशिक-नन्दन-संनिधेऽसौ
जग्राह पाद-युगलं नृपतिः कराभ्याम् ।
धृत्वा च तत्-पद-सरोज-रजः स्वशीर्षे
पस्पर्श लोचन-युगं रजसैव भक्त्या ।। ९३

सुनु मुनीस बर दरसन तोरें। अगमु न कछु प्रतीति मन मोरें ।।
जो सुखु सुजसु लोकपति चहहीं। करत मनोरथ सकुचत अहहीं ।।
सो सुखु सुजसु सुलभ मोहि स्वामी। सब सिधि तव दरसन अनुगामी
कीन्हि बिनय पुनि पुनि सिरु नाई। फिरे महीसु आसिषा पाई ।।

"यत्सौख्यमत्र विततं सुयशोऽपि लोके
वाञ्छन्ति लोकपतयोऽप्यथ मानसान्ते ।
प्रष्टुं सुदुर्लभतया बहु लज्जमानाः
तिष्ठन्ति नूनमनवाप्त-मनोऽभिलाषाः ।। ९४

तन्मे सुखं तदिह मे सुयशोऽद्य लोके
प्राप्तं मुने नियतमेव तव प्रसादात् ।
नूनं मुनीश्वर भवद्-वर-दर्शनेन
मन्ये न किंचिदपि दुर्लभमस्ति लोके ।। ९५

त्वद्दर्शनानुपदमेव च सर्वसिद्धीर्
लोके मुनीश्वर जना नियतं लभन्ते ।"
एवं प्रशस्य बहुधा विनयेन भक्त्या
नत्वा न्यवर्तत पुरीं शुभशंसनर्द्धः ।। ९६

चली बरात निसान बजाई। मुदित छोट बड़ सब समुदाई ।।
रामहि निरखि ग्राम नर नारी। पाइ नयन फलु होहिं सुखारी ।।

आबालवृद्धान् परितोषयित्वा
ततः प्रतस्थे वर-यात्रि-वृन्दम् ।
ग्रामेषु लब्धं फलितं तदाक्ष्णोर्
मार्गे जनैः राममभीक्ष्माणैः ।। ९७

इति श्रीतुलसी-मानस-नलिने श्रीरामचरित-मानस-भावानुवादे
वरयात्रि-संप्रस्थानं नाम एकपञ्चाशस्तरङ्गः ।

तरङ्गः ५२

—बीच बीच बर बास करि मग लोगन्ह सुख देत ।
अवध समीप पुनीत दिन पहुँची आइ जनेत ।।

प्रयाणे जन्ययात्रा सा प्रीणयन्ती जनान् पथि ।
शुभ-लग्ने सुविश्रामान् कृत्वायोध्यामुपागमत् ।। १

हने निसान पनव बर बाजे । भेरि संख धुनि हय गय गाजे ।।
झाँझि बिरव डिंडिमीं सुहाई । सरस राग बाजहिं सहनाई ।।

पणवाः पटहाश्चैवं शङ्ख-डिण्डिम-झिल्लयः ।
ननदुश्च शुभं प्रोच्चैः काहलाः कल-निःस्वनाः ।। २

पुर जन आवत अकनि बराता । मुदित सकल पुलकावलि गाता ।।

जन्य-यात्रां समायातां श्रुत्वायोध्या-निवासिनः ।
हर्ष-रोमाञ्च-पूर्णाङ्गाः संदर्शन-समुत्सुकाः ।। ३

निज निज सुंदर सदन सँवारे । हाट बाट चौहट पुर द्वारे ।।
गलीं सकल अरगजाँ सिंचाईं । जहँ तहँ चौकें चारु पुराईं ।।
बना बजारु न जाइ बखाना । तोरन केतु पताक बिताना ।।

परिचस्क्रुर्मुदा सर्वे स्व-स्व-वेश्मानि नागराः ।
पुरद्वाराणि सर्वाणि चतुष्का वीथयस्तथा ।। ४
आपणाश्च तथा सर्वे राजमार्गाः सुशोभिताः ।
सुगन्धित-जलासेकैर्ध्वजा-तोरण-मण्डपैः ।। ५
स्थाने स्थाने तथा चैवं रचिताश्चारु-वेदिकाः ।
पताकाभिर्वितानैश्च तदायोध्या व्यराजत ।। ६

सफल पूगफल कदलि रसाला । रोपे बकुल कदंब तमाला ।।
लगे सुभग तरु परसत धरनी । मनिमय आलबाल कल करनी ।।

रसाल-कदली-पूगी-तमाल-बकुलादिकैः ।
कदम्बैश्च तथा रेजे फल-भार-नतैः पुरी ।। ७

सुभगैस्तरुभिश्चैवं कृतरत्नालवालकैः ।
कलाविद्भिः सुरचितैरयोध्या शुशुभे भृशम् ।। ८

–विविध भाँति मंगल कलस गृह गृह रचे सँवारि ।
सुर ब्रह्मादि सिहाहिं सब रघुबर पुरी निहारि ।।

गृहे गृहे सुविन्यस्ताः कलशाश्च सुमङ्गलाः ।
अपूर्वां नगरी-शोभां प्रशशंसुः सुरादिकाः ।। ९

भूप भवनु तेहि अवसर सोहा । रचना देखि मदन मनु मोहा ।।
मंगल सगुन मनोहरताई । रिधि सिधि सुख संपदा सुहाई ।।
जनु उछाह सब सहज सुहाए । तनु धरि धरि दसरथ गृहँ छाए ।।

वीक्ष्यैवं विस्मितः कामः प्रासाद-परिमण्डनम् ।
ऋद्धि-सिद्धि-समापूर्णं सुख-सम्पन्मनोरमम् ।। १०

मङ्गलाशंसिनश्चैवं यत्रासन् शकुनाः शुभाः ।
मूर्तरूपैश्च सर्वत्र यत्रोत्साहो व्यराजत ।। ११

देखन हेतु राम बैदेही । कहहु लालसा होहि न केही ।।

असंख्यातास्तदायाताः सर्वतो नर-योषितः ।
जानकीं रघुवीरं च द्रष्टुं वा कस्य न स्पृहा ।। १२

जूथ जूथ मिलि चलीं सुआसिनि । निज छबि निदरहिं मदन बिलासिनि
सकल सुमंगल सजें आरती । गावहिं जनु बनु बहु बेष भारती ।।

रतिमपि निज-रूपैः ह्रीपदं प्रापयन्त्यः
सरभसमतिहृष्टाः सर्व-सौभाग्यवत्यः ।
सकल-शुभ-पदार्थैर्मङ्गलार्तिक्य-हस्ताः
अगणित-वर-वेषैः शारदेवाभ्युपेयुः ।। १३

भूपति भवन कोलाहलु होई । जाइ न बरनि समउ सुखु सोई ।

संमोद-कोलाहल-संकुलस्य शब्दैरयोध्यापति-मन्दिरस्य ।
शोभामपूर्वां भणितुं यथार्थं वाक्-चातुरी कस्य कवीश्वरस्य ।। १४

कौसल्यादि राम महतारीं। प्रेमबिबस तन दसा बिसारीं।।

वात्सल्य-मोदाकुल-मानसस्य राज्ञी-जनस्यापि निवास-कक्षे।
समुत्सुकस्यात्मज-दर्शनार्थं यातं लयं नु स्व-शरीर-भानम्।। १५

–दिए दान बिप्रन्ह बिपुल पूजि गनेस पुरारि।
प्रमुदित परम दरिद्र जनु पाइ पदारथ चारि।।

स्मृत्वा गणेशं विपदां विरामं संपूज्य शंभुं च यथोपचारम्।
प्रीतास्तथासन् कृत-विप्र-दानाः यथा दरिद्रश्चतुरर्थ-लाभात्।। १६

मोद प्रमोद बिबस सब माता। चलहिं न चरन सिथिल भए गाता

सुखातिरेकाद्विवशा जनन्यः स्वेषामनीशा वपुषामिवासन्।
समुत्सुका यद्यपि चान्तरङ्गे गन्तुं न शेकुः पदमेकमग्रे।। १७

राम दरस हित अति अनुरागीं। परिछनि साजु सजन सब लागीं।।

श्रीराम-संदर्शन-साभिलाषाः गाढानुरागाकुलितान्तरङगाः।
प्रारेभिरे माङगलिकैः समस्तैरार्तिक्यमायोजयितुं सहर्षम्।। १८

बिबिध बिधान बाजने बाजे। मंगल मुदित सुमित्राँ साजे।।

समुद्भूते शुभ-ध्वाने नाना-वाद्य-समाकुले।
मङ्गल-द्रव्य-सम्भारः समानीतः सुमित्रया।। १९

हरद दूब दधि पल्लव फूला। पान पूगफल मंगल मूला।।

हरिद्रा-पर्ण-पुष्पाणि दूर्वाः पूगी-फलानि च।
दध्यादि-शुभ-मूलानि पूर्वं सज्जीकृतान्यथ।। २०

अच्छत अंकुर लोचन लाजा। मंजुल मंजरि तुलसि बिराजा।।

अक्षताश्च तथा लाजाः प्ररोहा नवनिर्गताः।
गोरोचना तथानीता तुलसी-मञ्जरीस्तथा।। २१

छुहे पुरट घट सहज सुहाए। मदन सकुन जनु नीड़ बनाए।।

शात-कुम्भ-घटा नाना शुभ-वर्ण-विभूषिताः।
स्मर-पक्षि-निलायाभा व्यराजन्त गृहे गृहे।। २२

सगुन सुगंध न जाहिं बखानी। मंगल सकल सजहिं सब रानी ।।

शकुन-सुगन्धित-वस्तु-विशेषाः वर्णयितुं न हि शक्या वाचा ।
मङ्गल-मण्डन-भूषित-वेषाः राज्ञ्यः सर्वाः प्रमुदित-चित्ताः ।। २३

रचीं आरतीं बहुत बिधाना। मुदित करहिं कल मंगल गाना ।।
—कनक थार भरि मंगलन्हि कमल करन्हि लिएँ मात।
चलीं मुदित परिछनि करन पुलक पल्लवित गात ।।

विरचित-नानार्तिक्य-विधानाः कर-सरसिज-धृत-कनक-भाजनाः ।
गायन्त्यः सुख-पुलकित-गात्रा नीराजयितुं ययुः पुरन्ध्र्यः ।। २४

धूप धूम नभु मेचक भयऊ। सावन घन घमंडु जनु ठयऊ ।।
सुरतरु सुमन माल सुर बरषहिं। मनहुँ बलाक अवलि मनु करषहिं ।।

धूप-धूम-नीलायित-गगनं जलधर-संछादितामिव रम्यम् ।
सुर-वर्षित-सुरतरु-सुममालाः सारस-ततिरिव गगने लोलाः ।। २५

मंजुल मनिमय बंदनिवारे। मनहुँ पाकरिपु चाप सँवारे ।।
प्रगटहिं दुरहिं अटन्ह पर भामिनि। चारु चपल जनु दमकहिं दामिनि ।।

मणिमय-सुन्दर-तोरण-मालाः सुरपति-चापानामिव मालाः ।
क्वचिदपि दृष्टाः क्वचिदपि नष्टाः प्रासादाग्रे तडिदिव ललनाः ।।

दुंदुभि धुनि घन गरजनि घोरा। जाचक चातक दादुर मोरा ।।
घन-गर्जित-सम-पटह-निनादं श्रुत्वा नगरे याचक-वृन्दम् ।
चातक-दर्दुर-बर्हि-समानं चक्रे याच्ञा-शब्दममोघम् ।। २७

सुर सुगंध सुचि बरषहिं बारी। सुखी सकल ससि पुर नर नारी ।।

सुरवर-वर्षित-शुभ-समयार्हो गन्धित-मङ्गल-जल-सुख-सेकः ।
कृषिफल-संपद इव हित-मूलं पुर-जन-मनसामपि सुख-बीजम् ।।

समउ जानि गुर आयसु दीन्हा। पुर प्रबेसु रघुकुलमनि कीन्हा ।।
सुमिरि संभु गिरिजा गनराजा। मुदित महीपति सहित समाजा ।।

शुभं सन्मुहूर्तं तमावेद्य भूपम्
प्रवेष्टुं पुरं सोऽनुमेने वसिष्ठः ।
शिवं विघ्नहर्तारमद्रेश्च कन्यां
हृदा सस्मरन् प्राविशत् कोसलेशः ।। २९

–होंहि सगुन बरषहिं सुमन सुर दुंदुभीं बजाइ।
विबुध बधू नाचहिं मुदित मजुल मंगल गाइ॥

निमित्तान्यखिलान्यासन् शुभशंसीनि सर्वतः।
पुष्प-वृष्टिस्तथा हृष्टैः कृता देवैः सुरालयात्॥ ३०
समुद्भूतो महानासीत् भेरी-नादः सुरालयात्।
देवाङ्गनासु हृष्टासु नृत्य-गान-परासु च॥ ३१

मागध सूत बंदि नट नागर। गावहिं जसु तिहु लोक उजागर॥

मागधा बन्दिनश्चैवं चतुरा नट-नागराः।
रघुवीर-यशोगानं जगुस्त्रैलोक्यदीपकम्॥ ३२

जय धुनि बिमल बेद बर बानी। दस दिसि सुनिअ सुमंगल सानी॥

अश्रूयत महाघोषः सर्वतो दश-दिक्षु च।
जय-जीवेति शब्दानां वेद-मन्त्रोपबृंहितः॥ ३३

बिपुल बाजने बाजन लागे। नभ सुर नगर लोग अनुरागे॥

नाना-वाद्य-विनिर्घोषः समुद्भूतः समन्ततः।
मोद-हेतुः सुराणां खे पौराणां च तथा पुरे॥ ३४

बने बराती बरनि न जाहीं। महा मुदित मन सुख न समाहीं॥

दृष्ट्वा जन्यान् जनाः सर्वे तथा सुभग-दर्शनान्।
तथा हृष्टा यथा नामात् तदानन्दो हृदालये॥ ३५

पुरबासिन्ह तब राय जोहारे। देखत रामहि भए सुखारे॥

दृष्ट्वायोध्या-पतिं सर्वे प्रणताः पुरवासिनः।
सुखिताश्च पुनः सर्वे दृष्ट्वा रामं रघूत्तमम्॥ ३६

करहिं निछावरि मनिगन चीरा। बारि बिलोचन पुलक सरीरा॥

सभाजितस्तदा सर्वैर्मणिवस्त्रादिभिर्जनैः।
हर्ष-रोमाञ्च-भृद्-गात्रैः श्रीरामः साश्रुलोचनैः॥ ३७

आरति करहिं मुदित पुर नारी। हरषहिं निरखि कुअँर बर चारी॥

संप्रहृष्टाः समं दृष्ट्वा राजपुत्र-चतुष्टयम्।
मुदिताः पुरनार्योऽपि चक्रुरार्तिक्य-मङ्गलम्॥ ३८

सिबिका सुभग ओहार उघारी। देखि दुलहिनिन्ह होहिं सुखारी॥

शिबिका-पट-वस्त्राणि समुद्धृत्य कुतूहलात्।
दृष्ट्वा वधूः सुसंहृष्टाः सर्वा नगर-योषितः॥ ३९

—एहि बिधि सबही देत सुखु आए राजदुआर।

संप्राप्ताथ क्रमेणैवं जन्य-यात्रा सवैभवम्।
राजद्वारं महद्भव्यं सर्वानन्द-प्रदायिनी॥ ४०

मुदित मातु परिछनि करहिं बधुन्ह समेत कुमार।

मुदिता मातरो यत्र वधूभिः सह चात्मजान्।
सभाजयन् कृतार्तिक्या नेत्र-नीराजितान् पुनः॥ ४१

करहिं आरती बारहिं बारा। प्रेमु प्रमोदु कहै को पारा॥

पुनः पुनस्तथा सर्वान् कृत्वार्तिक्यं निरीक्ष्य च।
समवापुः सुखं यत्ताः कस्तं वर्णयितुं क्षमः॥ ४२

भूषन मनि पट नाना जाती। करहिं निछावरि अगनित भाँती॥
बधुन्ह समेत देखि सुत चारी। परमानंद मगन महतारी॥

नाना-भूषण-वस्त्राणि प्रददुस्ताः सकौतुकम्।
दृष्ट्वा पुत्रान् वधूभिः स्वान् परमानन्द-निर्भराः॥ ४३

पुनि पुनि सीय राम छबि देखी। मुदित सफल जग जीवन लेखी॥

भूयो भूयः समुद्वीक्ष्य सीतारामौ विशेषतः।
मेनिरे सफलं स्वीयं जीवितं जगतीतले॥ ४४

सखीं सीय मुख पुनि पुनि चाही। गान करहिं निज सुकृत सराही॥

वारं वारं तथा वीक्ष्य सीता-वदन-वारिजम्।
मत्वात्मानं सखी-वृन्दं धन्यं गीतं जगौ मुदा॥ ४५

बरषहिं सुमन छनहिं छन देवा। नाचहिं गावहिं लावहिं सेवा॥

क्षणे क्षणे तथैवाभ्रात् वृष्टा देवैः सुम-स्रजः।
गान-नृत्यादिभिः सर्वैः कृता सेवा सगौरवम्॥ ४६

देखि मनोहर चारिउ जोरीं। सारद उपमा सकल ढँढोरीं ।।
देत न बनहिं निपट लघु लागीं। एकटक रहीं रूप अनुरागीं ।।

चतुर्युग्मानि दृष्ट्वैवं समं प्रीता सरस्वती ।
न तेषामुपमानानि लेभेऽन्विष्यापि सर्वतः ।। ४७
मत्वा सर्वोपमानानि तृणवत् तदपेक्षया ।
त्यक्ताशा वीक्षमाणैव तस्थौ राममुखाम्बुजम् ।। ४८

—निगम नीति कुल रीति करि अरघ पाँवडे देत ।
बधुन्ह सहित सुत परिछि सब चलीं लवाइ निकेत ।।

यथाविधि यथारीति कृत्वा कौतुक-मङ्गलम् ।
आनाययन् क्रमेणाथ मातरस्तान् निकेतनम् ।। ४९
समास्तीर्णानि सर्वत्र सद्वस्त्राणि च सादरम् ।
पद-निक्षेपणे तेषां सुख-संचार-हेतुना ।। ५०

चारि सिंघासन सहज सुहाए। जनु मनोज निज हाथ बनाए ।।

घटितेष्विव निर्दोषं स्वकराभ्यां मनोभुवा ।
समुपावेशयन् सर्वान् सुख-सिंहासनेष्वथ ।। ५१

तिन्ह पर कुअँरि कुअँर बैठारे। सादर पाय पुनीत पखारे।

सर्वेषां च ततः सर्वाः शुचि-पादाब्ज-धावनम्।
पुत्राणां सवधूकानां कृत्वामोदन्त मातरः ।। ५२

धूप दीप नैवेद बेद बिधि। पूजे बर दुलहिनि मंगलनिधि ।।

वेदोदित-विधानेन कृत्वा दाम्पत्य-पूजनम् ।
धूप-दीपादिभिश्चैवं नैवेद्यार्तिक्य-मङ्गलैः ।। ५३

बारहिं बार आरती करहीं। ब्यजन चारु चामर सिर ढरहीं ।।

बहुकृत्वः कृतार्चास्तास्तृप्तेः पारं न चागमन् ।
वीजयन्त्यः स्थिता प्रेम्णा चारुभिश्चामरैः स्वयम् ।। ५४

बस्तु अनेक निछावरि होहीं। भरीं प्रमोद मातु सब सोहीं ।।
पावा परम तत्व जनु जोगीं। अमृतु लहेउ जनु संतत रोगीं ।।

जनम रंक जनु पारस पावा। अंधहि लोचन लाभु सुहावा ॥
मूक बदन जनु सारद छाई। मानहुँ समर सूर जय पाई ॥

प्रदत्तानि महार्हाणि नानावस्तूनि चादरात् !
को नु तं गदितुं शक्तस्तासां सुख-महोत्सवम् ॥ ५५
विरेजिरे तदा सर्वा मातरः सुख-संभृताः ।
पर-तत्त्वार्थ-लाभेन यथा योगि-महर्षयः ॥ ५६
यथा वामृतलाभेन संतृप्ता रोग-जर्जराः ।
यथा जन्म-दरिद्रो वा दिव्य-स्पर्शोपलेन च ॥ ५७
यथा नेत्र-विहीना वा तृप्ताः स्युः सुभगाक्षिभिः ।
वाग्देवी-कृपया मूकाः शूरा वा विजय-श्रिया ॥ ५८

—एहि सुख ते सत कोटि गुन पावहिं मातु अनंदु ।
भाइन्ह सहित बिआहि घर आए रघुकुलचंदु ॥

सर्वेभ्योऽपि सुखेभ्यस्तत् शतकोटि-गुणं सुखम् ।
प्राप्नुवन् मातरो दृष्ट्वा राजपुत्रान् वधू-युतान् ॥ ५९
बन्धुभिः समुपायातं सवधूकैः रघूद्वहम् ।
रवि-वंश-विधुं गेहं वीक्ष्यामोदन्त मातरः ॥ ६०

लोक रीति जननीं करहिं बर दुलहिनि सकुचाहिं ।
मोदु बिनोदु बिलोकि बड़ रामु मनहिं मुसुकाहिं ॥

लोक-रीत्यनुसारं ताश्चक्रिरे विविधान् विधीन् ।
स्वीचक्रुः सादरं सर्वे ससंकोचं वधूवराः ॥ ६१
ददर्श कौतुकं सर्वं स्मयमानो रघूत्तमः ।
पूर्ण-कामस्तदा प्रेम्णा सर्व-मङ्गल-संभवः ॥ ६२

देव पितर पूजे बिधि नीकी। पूजीं सकल बासना जी की ॥

संपूजितास्ततः सर्वे विबुधाः पितरस्तथा ।
महिषीभिः प्रहृष्टाभिः सर्व-सौख्य-प्रदायिनः ॥ ६३

सबहि बंदि मागहिं बरदाना। भाइन्ह सहित राम कल्याना ॥

"सभ्रातृकस्य रामस्य कुरुतात्र शिवं सदा।"
अभिवन्द्येति तान् सर्वा वर-दानं ययाचिरे ॥ ६४

अंतरहित सुर आसिष देहीं । मुदित मातु अंचल भरि लेहीं ।।

अंतर्हिता ददुः सर्वा देवताः शुभ-शंसनम् ।
पूर्ण-वस्त्राञ्चलं सर्वा जगृहुर्मातरो मुदा ।। ६५

भूपति बोलि बराती लीन्हे । जान बसन मनि भूषन दीन्हे ।।

समाहूय ततः सर्वानतिथीन् कोसलेश्वरः ।
प्रीणयामास सद्-वस्त्र-यान-रत्न-विभूषणैः ।। ६६

आयसु पाइ राखि उर रामहि । मुदित गए सब निज निज धामहि ।।

निधाय हृदये रम्यां राममूर्तिं ततः सुखम् ।
अनुज्ञाता नृपेणेयुः स्वं स्वं वासं जनास्तदा ।। ६७

पुर नर नारि सकल पहिराए । घर घर बाजन लगे बधाए ।।

संमानिताश्च सर्वेऽपि पुर-नारी-नरास्तदा ।
वस्त्रालंकरणैः राज्ञा जग्मुर्गेहं मुदान्विताः ।। ६८
गृहे गृहे समारब्धः कल्याण-वचनान्वितः ।
भेरी-नादो महान् सर्वैः राज्ञः श्रेयोऽर्थिभिर्जनैः ।। ६९

जाचक जन जाचहिं जोइ जोई । प्रमुदित राउ देहिं सोइ सोई ।।

येन येन तदा पृष्टं यद् यद् द्रव्यं नरेश्वरम् ।
तस्मै तस्मै तदा तत् तद् दत्तं प्रेम्णा महीभृता ।। ७०

सेवक सकल बजनिआ नाना । पूरन किए दान सनमाना ।।

सेवकाः सकलाः स्वीया वादकाश्च तथेतरे ।
प्रीतिदानैस्तदानेकैः राज्ञा संपरितोषिताः ।। ७१

—देहिं असीस जोहारि सब गावहिं गुन गन गाथ ।

कृताभिवन्दनाः सर्वे नृपाय ददुराशिषः ।
गायन्तः सद्गुणाँस्तस्य ययुः स्वं स्वं निकेतनम् ।। ७२

तब गुर भूसुर सहित गृहँ गवनु कीन्ह नरनाथ ।

ततः स गुरुणा सार्धं द्विज-वृन्दैश्च भूपतिः ।
प्रविवेश निजावासं समवाप्त-मनोरथः ।। ७३

जो बसिष्ट अनुसासन दीन्ही। लोक बेद बिधि सादर कीन्ही॥

यथादिष्टो वसिष्ठेन गुरुणा तद्धितैषिणा।
तथा सर्वं चकारासौ विधिना नृपतिर्मुदा॥ ७४

भूसुर भीर देखि सब रानी। सादर उठीं भाग्य बड़ जानी॥
पाय पखारि सकल अन्हवाए। पूजि भली बिधि भूप जेवाँए॥
आदर दान प्रेम परिपोषे। देत असीस चले मन तोषे॥

द्विजाति-संकुलं दृष्ट्वा सर्वं तन्नृप-मन्दिरम्।
निज-भाग्य-फलं मत्वा मुमुदे महिषीकुलम्॥ ७५
उत्थाय सादरं राज्ञ्यः सर्वान् प्रत्युद्ययुर्मुदा।
स्नानादिभिः समानर्चुः पाद-प्रक्षालनोत्तरम्॥ ७६
संपूज्य सकलान् भूयः सर्वलोक-प्रभुः स्वयम्।
भोजनैर्दान-सन्मानैः प्रीणयामास भूसुरान्॥ ७७
संतुष्टास्ते ददुः सर्वे भूपालाय शुभाशिषः।
प्रसन्न-मनसश्चेयुः स्वं स्वं वासं द्विजोत्तमाः॥ ७८

बहु बिधि कीन्हि गाधिसुत पूजा। नाथ मोहि सम धन्य न दूजा॥
कीन्हि प्रसंसा भूपति भूरी। रानिन्ह सहित लीन्हि पग धूरी॥

संपूज्य बहुधा चैवं सादरं गाधि-नन्दनम्।
विश्वामित्रं नृपः प्रेम्णा मधुरं वाक्यमादधे॥ ७९
"को नु नाथ मदन्योऽस्ति धन्योऽस्मिन् जगतीतले।
यस्य त्वं सद्गुरुः श्रेष्ठः सर्व-सौख्य-हित-प्रदः॥" ८०
संस्तुत्य बहुधा चैवं राज्ञीभिः सह भूपतिः।
प्रणिपत्य च जग्राह तत्-पदाब्ज-रजो मुदा॥ ८१

भीतर भवन दीन्ह बर बासू। मन जोगवत रह नृपु रनिवासू॥

स्वमन्दिरे ददौ तस्मै सुख-वासमनुत्तमम्।
स्वयं प्रेम्णा स राज्ञीभिः यत्रासेवत सादरम्॥ ८२

पूजे गुर पद कमल बहोरी। कीन्हि बिनय उर प्रीति न थोरी॥

गुरुं वसिष्ठं च ततो नृपालः संपूज्य भक्त्या विनयातिनम्रः।
संप्रार्थयामास च सादरं तं स्वीकर्तुमातिथ्यमथात्मवासे॥ ८३

—बधुन्ह समेत कुमार सब रानिन्ह सहित महीसु ।
पुनि पुनि बंदत गुर चरन देत असीस मुनीसु ।।

तथा स राज्ञा महिषी-समेतं नृपात्मजैश्चापि वधू-समेतम् ।
पुनः पुनः पूजित-पाद-पद्मः श्रेयो-विधानं विदधे वसिष्ठः ।। ८४

बिनय कीन्हि उर अति अनुरागें । सुत संपदा राखि सब आगें ।

गुरोः स सर्वान् तनयान् पुरस्तात् निधाय भक्त्याखिलसंपदं च ।
संप्रार्थयामास पुनः पुनस्तं स्वीकर्तुमिष्टं नृपतिर्यदस्य ।। ८५

नेगु मागि मुनिनायक लीन्हा । आसिरबादु बहुत बिधि दीन्हा ।।
उर धरि रामहि सीय समेता । हरषि कीन्ह गुर गवनु निकेता ।।

नादाय किंचिन्नृपतेर्वसिष्ठः प्रेम्णा निरीहो मुनिपुंगवोऽसौ ।
आदीयतेऽन्यत्र पुरोधसा यत् तदेव जग्राह स दक्षिणार्थम् ।। ८६
आशीर्वादैर्वर्धयन् भूमिपालं सीतारामौ मानसे संनिधाय ।
प्रीतः स्वान्ते योगिराजो वसिष्ठः यातः स्वीयं धाम धर्मार्थविज्ञः ।।

बिप्रबधू सब भूप बोलाईं । चैल चारु भूषन पहिराईं ।।
बहुरि बोलाइ सुआसिनि लीन्हीं । रुचि बिचारि पहिरावनि दीन्हीं

समाहूय सर्वास्ततो विप्रनारीर्ददौ भूमिपालः सुवस्त्राणि भूयः ।
ततः सादरं पौर-नारीः समस्ताः समाहूय संतोषयामास दानैः ।।

नेगी नेग जोग सब लेहीं । रुचि अनुरूप भूपमनि देहीं ।।

अतोषयत्तथैवासौ प्राभृतैरधिकारिणः ।
समीप्सितैर्यथायोग्यैर्महीपाल-शिरोमणिः ।। ८९

प्रिय पाहुने पूज्य जे जाने । भूपति भली भाँति समनानें ।।

आद्रियन्त ततो राज्ञा पूजनीया महाजनाः ।
इष्टदानादिभिः सर्वे समुद्वाहार्थमागताः ।। ९०

देव देखि रघुबीर बिबाहू । बरषि प्रसून प्रसंसि उछाहू ।।
—चले निसान बजाइ सुर निज निज पुर सुख पाइ ।
कहत परसपर राम जसु प्रेम न हृदयँ समाइ ।।

वीक्ष्य तं रघुवीरस्य समुद्वाह महोत्सवम् ।
प्रीताः सुरगणाः सर्वे प्रशशंसुर्महोपतिम् ।। ९१

वर्षन्तो दिव्य-पुष्पाणि कुर्वन्तः पटह-स्वनम् ।
श्रीरामस्य यशः सर्वे कथयन्तः परस्परम् ॥ ९२

रघुवीर-पदाम्भोज-भक्ति-भाव-प्रपूरिताः ।
सुरालयं ययुः सर्वे समवाप्त-मनोरथाः ॥ ९३

सब बिधि सबहि समदि नरनाहू । रहा हृदयँ भरि पूरि उछाहू ॥

सत्कृत्य सकलाँश्चैवं दान-संमाननैर्नृपः ।
समवाप महानन्दं मानसोत्साह-वर्धनम् ॥ ९४

जहँ रनिवासु तहाँ पगु धारे । सहित बहूटिन्ह कुअँर निहारे ॥

ततः संप्राप्य संतुष्टः राज्ञी-कक्षं महीपतिः ।
सवधूकान् समुद्वीक्ष्य तनयानतिहर्षितः ॥ ९५

लिए गोद करि मोद समेता । को कहि सकइ भयउ सुखु जेता ॥

कृत्वोत्सङ्गे सुतान् सर्वान् यच्चाभूत् सुखमद्भुतम् ।
महीपालस्य तत्सर्वं वक्तुं कः पारयेत् गिरा ॥ ९६

बधू सप्रेम गोद बैठारीं । बार बार हियँ हरषि दुलारीं ॥

क्रोडे कृत्वा तथैवासौ वधूरप्यतिहर्षितः ।
तृप्तिं नैव ययौ प्रेम्णा लालयित्वा पुनः पुनः ॥ ९७

देखि समाजु मुदित रनिवासू । सब कें उर अनंद कियो बासू ॥

मनोहारि वचोहारि दृष्ट्वा तद् दृश्यमग्रतः ।
कस्य नासीत् कृतं वेश्म स्वान्तं संतोष-संपदा ॥ ९८

कहेउ भूप जिमि भयउ बिबाहू । सुनि सुनि हरषु होत सब काहू ॥

विवाहस्य तदामूलं श्रुत्वा वृत्तान्तमद्भुतम् ।
मुखाम्बुजन्मनो राज्ञः सर्वे रोमाञ्चिता मुदा ॥ ९९

जनक राज गुन सीलु बड़ाई । प्रीति रीति संपदा सुहाई ॥
बहुबिधि भूप भाट जिमि बरनी । रानीं सब प्रमुदित सुनि करनी ॥

वर्णयामास साद्यन्तं वृत्तं यन्मिथिलापुरे ।
स्नेहं शीलं गुणं चैवं मिथिलाधिपतेस्ततः ॥ १००

प्रीतिं रीतिं च तस्यैवं संपदं विपुलां तथा ।
सूतवत् स महीपालः प्रशशंस पुनः पुनः ॥ १०१

श्रुत्वा सर्वं महिष्यस्ता महीपाल-मुखाम्बुजात् ।
संजात-हर्ष-रोमाञ्चाः सुखमापुरनुत्तमम् ॥ १०२

—सुतन्ह समेत नहाइ नृप बोलि बिप्र गुर ग्याति ।
भोजन कीन्ह अनेक बिधि घरी पंच गइ राति ॥

स्नात्वा सतनयं चासौ मुदितः कोसलेश्वरः ।
समाहूय पुनः सर्वान् गुरु-विप्र-कुटुम्बिनः ॥ १०३

नाना-रस-समायुक्तं चक्रे भोजनमुत्तमम् ।
यावत् तैः सह राजेन्द्रस्तावत् प्राप्ता विभावरी ॥ १०४

मंगलगान करहिं बर भामिनि । भै सुखमूल मनोहर जामिनि ॥

मङ्गलं ललनाः गानं कुर्वत्यो मृदु-मञ्जुलम् ।
चक्रिरे रजनीं राज्ञः मनोरम्यां सुख-प्रदाम् ॥ १०५

अँचइ पान सब काहूँ पाए । स्रग सुगंध भूषित छबि छाए ॥

आचम्य च ततः सर्वे ताम्बूल-परिसेवनैः ।
पुष्प-मालादिभिश्चैवं गन्ध-द्रव्यैर्विभूषिताः ॥ १०६

रामहि देखि रजायसु पाई । निज निज भवन चले सिर नाई ॥

वारं वारं समालोक्य श्रीरामं सौख्य-संभवम् ।
अनुज्ञाता नृपेणेयुः सर्वे नत्वा निकेतनम् ॥ १०७

प्रेमु प्रमोदु बिनोदु बड़ाई । समउ समाजु मनोहरताई ॥

तच्च संमेलनं तेषां विनोदानन्दनं च तत् ।
तं चापि मधुरालापं परिहास-सुपेशलम् ॥ १०८

सुजनानां समाजं तं तथैव सुमनोहरम् ।
स्मारं स्मारं न कस्याभूत् सुखमत्यद्भुतं तदा ॥ १०९

कहि न सकहिं सत सारद सेसू। बेद बिरंचि महेस गनेसू ॥
सो मैं कहौं कवन बिधि बरनी। भूमिनागु सिर धरइ कि धरनी ॥

शारदानां शतं नूनं शेषाणामपि वा शतम् ।
स्वयं ब्रह्माथवा वेदा गणेशो वा महेश्वरः ॥ ११०
मन्ये न पारयेद् वक्तुं यथार्थं तं महोत्सवम् ।
का कथा तत्र मे नूनं वराकस्य कवेः पुनः ॥ १११
किमर्थं नु यते व्यर्थं वक्तुं तद् गिरयानया ।
शीर्ष्णा भारं भुवः सोऽसौ वोढा किञ्चुलकः कथम् ॥ ११२

नृप सब भाँति सबहि सनमानी। कहि मृदु बचन बोलाईं रानी ॥

संतोषयित्वा सकलान्नृपालः समाह्वयत् सन्निधमात्मजायाः ।
उवाच चैतन्मृदु-मन्द-धीरं स्नेह-प्रदिग्धं वचनं समस्ताः ॥ ११३

बधू लरिकनीं पर घर आईं। राखेहु नयन पलक की नाईं ॥

"इमा हि वध्वो गृहमागता नो जानीत बालाः मृदुलाः समस्ताः ।
प्रेम्णाऽप्रमत्तं परिपालनीया नेत्रच्छदाभ्यामिव नेत्र-युग्मम् ॥ ११४

—लरिका श्रमित उनीद बस सयन करावहु जाइ।
अस कहि गे बिश्रामगृहँ राम चरन चितु लाइ ॥

श्रान्तांस्तथैतान् तनयान् समस्तान् विश्रामयध्वं शयनेषु शीघ्रम् ।"
उक्त्वेति सर्वाः स्वयमप्यगच्छत् विश्राम-कक्षं वसुधाधिराजः ॥
श्रीरामपादाम्बुज-युग्म-लग्नं कृत्वात्मचित्तं स च भूमिपालः
श्रान्तः सुदान्तः समवाप्त-कामो निद्रावशोऽभूदचिरान्महीशः ॥

भूप बचन सुनि सहज सुहाए। जरित कनक मनि पलँग डसाए ॥
सुभग सुरभि पय फेन समाना। कोमल कलित सुपेतीं नाना ॥
उपबरहन बर बरनि न जाहीं। स्रग सुगंध मनिमंदिर माहीं ॥
रतनदीप सुठि चारु चँदोवा। कहत न बनइ जान जेहिं जोवा ॥

निशम्य चैवं सहजातिरम्यं सुशोभनं तद् वचनं स्वभर्तुः ।
प्राकल्पयंस्ता मणिमन्दिरेषु प्रेम्णा सुतेभ्यो मणि-हेम-मञ्चान् ॥
आस्तीर्य शय्यासु सुख-प्रदासु गो-दुग्ध-फेनोपम-निर्मलानि ।
मृदूनि चारूणि लघूनि चैवं प्रच्छादनानि स्वयमेव राज्ञ्यः ॥

सुरम्यशोभैर्विमलोपधानैः शय्या-विधानं समपादयंस्ताः ।
स्रग्भिः सुगन्धैर्मणि-रत्न-दीपैः शोभां वितानैर्विदधुर्विचित्रैः ॥ ११९
नैवाक्षरैस्तां प्रमितैरपूर्वां शोभामलं वर्णयितुं कवीन्द्रः ।
स जातु सर्वं भणितुं समर्थः साक्षात्कृतं तत् सुभगेन येन ॥ १२०

सेज रुचिर रचि रामु उठाए । प्रेम समेत पलँग पौढ़ाए ॥
अग्या पुनि पुनि भाइन्ह दीन्ही । निज निज सेज सयन तिन्ह कीन्ही ॥

राज्ञ्यः स्वयं सुखकरीं विरचय्य शय्याम्
अस्वापयत् रघुपतिं स्वयमेव तस्याम् ।
शुश्रूषवोऽपि रघुनन्दनमीयुरन्ते
रामाज्ञया स्वशयनं सकलानुजास्ते ॥ १२१

देखि स्याम मृदु मंजुल गाता । कहहिं सप्रेम बचन सब माता ॥
मारग जात भयावनि भारी । केहि बिधि तात ताड़का मारी ॥

दर्शं दर्शं पुनरपि पुनः श्यामलं चारुगात्रं
रामं प्रोचुर्मृदुल-वचनं मातरः सानुरागम् ।
"घोरारण्ये कथमभिहता राक्षसी ताटका सा
वत्स ब्रूहि श्रुति-सुख-करं नस्त्वदीयं चरित्रम् ॥ १२२

–घोर निसाचर बिकट भट समर गनहिं नहिं काहु ।
मारे सहित सहाय किमि खल मारीच सुबाहु ।
मुनि प्रसाद बलि तात तुम्हारी । ईस अनेक करवरें टारी ॥

क्रूराश्चैवं विकट-वदना दुर्जया दैत्यवीराः
मारीचाद्याः सुभुज-सहितं ध्वंसितास्ते कथं वा ।
नूनं सेयं मुनि-वर-कृपा तात निःसंशयं ते
हत्वानर्थान् यदिह विधिना प्राण-रक्षा कृता ते ॥ १२३

मख रखवारी करि दुहुँ भाईं । गुरु प्रसाद सब बिद्या पाईं ॥
मुनितिय तरी लगत पग धूरी । कीरति रही भुवन भरि पूरी ॥

कृत्वा रक्षां मुनि-वर-मखानां त्वया सानुजेन
प्राप्ता विद्या गुरु-वर-कृपा-लाभ-योगस्तवायम् ।
नीतोद्धारं स्व-पद-रजसा स्पृष्ट-मात्रा मुनेः स्त्रीः
त्रैलोक्ये ते तुहिन-धवलां तन्वता दिव्यकीर्तिम् ॥ १२४

कमठ पीठि पबि कूट कठोरा । नृप समाज महुँ सिव धनु तोरा ।।
बिस्व बिजय जसु जानकि पाई । आए भवन ब्याहि सब भाई ।।

यच्चाप्यद्रेः यदपि कुलिशात् कूर्म-पीठात् कठोरम्
छिन्नं शार्वं धनुरपि महद्यन्महीपालसङ्घे ।
जित्वा चैवं जनकतनयां व्यूढमासीत् त्वया यद्
यच्चाप्यन्यैः रघुकुल-सुतैर्विश्व-वन्द्यं यशस्तत् ।। १२५

सकल अमानुष करम तुम्हारे । केवल कौसिक कृपाँ सुधारे ।।

स्मारं स्मारं सकलमपि तन्मानवेभ्यः परं ते
दिव्यं कार्यं न हि रघुपते तृप्तिरस्माकमद्य ।
तीर्णः सर्व-व्यसन-निवहं प्रापितोऽस्यत्र गेहं
दिष्टया यत् त्वं मुनिवर-कृपा सापि ते तात नूनम् ।। १२६

आजु सुफल जग जनमु हमारा । देखि तात बिधुबदन तुम्हारा ।।
जे दिन गए तुम्हहि बिनु देखें । ते बिरंचि जनि पारहिं लेखें ।।

दर्शं दर्शं नयन-सुखदं तन्मुखेन्दुं तवैनं
प्राप्तं नूनं जनन-फलितं भूतलेऽस्माभिरेवम् ।
न त्वां दृष्ट्वा कथमपि दिनान्यत्र यातानि यानि
मास्मत्-कालावधिषु गणयत्वत्र तानि प्रजेशः ।।" १२७

—राम प्रतोषीं मातु सब कहि बिनीत बर बैन ।
सुमिरि संभु गुर बिप्र पद किए नीदबस नैन ।।

श्रुत्वा तासां वचनमिति ता धीर-नम्रं मनोज्ञम्
स्मित्वा किंचिद् वचनमवदद् रामचन्द्रो दयालुः ।
आश्वास्यैवं पुनरपि पुनर्मातृवर्गं स धीरः
स्मृत्वा शम्भुं गुरुपदयुगं चापि निद्रावशोऽभूत् ।। १२८

नीदउँ बदन सोह सुठि लोना । मनहुँ साँझ सरसीरुह सोना ।।

सुप्तस्य चैवं रघुनन्दनस्य विलोभनीयं वदनं विरेजे ।
सायंतने संवृत-पत्र-वृन्दं रम्यं यथा लोहित-वारिजातम् ।। १२९

घर घर करहिं जागरन नारीं । देहिं परसपर मंगल गारीं ॥
विस्मृत्य निद्रां वनिता नगर्यां गृहे गृहे जागरणैक-शीलाः ।
कथा-प्रलापैः परिहास-रम्यैर्निन्युस्त्रियामामखिलां प्रमोदैः ॥ १३०

पुरी बिराजति राजति रजनी । रानीं कहहिं बिलोकहु सजनी ॥
"अपूर्वशोभा खलु यामिनीयं विराजतेऽस्यां नगरी तथेयम् ।"
मिथोऽभिधायेति पुनः पुनस्ताः राज्ञ्यो बभूवुः सुखिता विशेषम् ॥

सुंदर बधुन्ह सासु लै सोईं । फनिकन्ह जनु सिरमनि उर गोईं ॥
स्नुषाः सुगात्रीः परिरभ्य सर्वाः प्रेम्णा ययुस्ताः शयनं तदूर्ध्वम् ।
निलीय नूनं हृदयेऽप्रमत्तं शिरोर्मणिं स्वं भुजगाः प्रसुप्ताः ॥ १३२

प्रात पुनीत काल प्रभु जागे । अरुनचूड़ बर बोलन लागे ॥
ब्राह्मे मुहूर्ते परमे पवित्रे प्रबोधमीयाय स रामचन्द्रः ।
चक्रुर्विरावं परिघोषयन्तः प्रभात-संज्ञामिव ताम्रचूडाः ॥ १३३

बंदि मागधन्हि गुनगन गाए । पुरजन द्वार जोहारन आए ॥
आरेभिरे सद्गुणगानमेवं श्रीरामचन्द्रस्य च बन्दिनोऽपि ।
पौरा ययुः राजगृहं प्रभाते कर्तुं प्रणामं प्रभुपाद-पद्मे ॥ १३४

बंदि बिप्र सुर गुर पितु माता । पाइ असीस मुदित सब भ्राता ॥
द्विजातिवर्गान् विबुधान् समस्तान् भक्त्याथ मातापितरौ गुरूंश्च ।
प्रणम्य सर्वे विनयातिनम्राः प्राप्ताशिषस्ते सुखिताः कुमाराः ॥

जननिन्ह सादर बदन निहारे । भूपति संग द्वार पगु धारे ॥
—कीन्ह सौच सब सहज सुचि सरित पुनीत नहाइ ।
प्रातक्रिया करि तात पहिं आए चारिउ भाइ ॥
प्रेम्णाथ दृष्ट्वा जननीभिरेते निर्जग्मुरग्रे जनकेन सार्धम् ।
निसर्ग-पूताः पुनरप्यकुर्वन् यथाक्रमं ते मुख-मार्जनादीन् ॥ १३६
स्नात्वा तदूर्ध्वं शरयू-प्रवाहे संपेदिरे नित्य-विधींस्ततस्ते ।
एवं शरीरैरथ मानसैश्च सुनिर्मला भूपतिमीयुरन्ते ॥ १३७

भूप बिलोकि लिए उर लाई । बैठे हरषि रजायसु पाई ॥
आज्ञापिता भूपतिना ततस्ते पुत्रेक्षणालिङ्गन-मोदितेन ।
आशीर्वचोभिः परिवर्धमानाः उपाविशन् स्वेषु सुखासनेषु ॥ १३८

देखि रामु सब सभा जुड़ानी। लोचन लाभ अवधि अनुमानी ।।

'संदर्शनं तद् रघुवंशकेतोः परा हि काष्ठा नयनोत्सवस्य।'
मत्वेति सर्वे सुखिताः सभायां संसार-तापत्रय-मुक्ति-भाजः ।।

पुनि बसिष्टु मुनि कौसिकु आए। सुभग आसनन्हि मुनि बैठाए ।।
सुतन्ह समेत पूजि पद लागे। निरखि रामु दोउ गुर अनुरागे ।।
कहहिं बसिष्टु धरम इतिहासा। सुनहिं महीसु सहित रनिवासा ।।
मुनि मन अगम गाधिसुत करनी। मुदित बसिष्ट बिपुल बिधि बरनी ।।

संप्रापतुस्तौ नृपतेः सभायां गुरुर्वसिष्ठः कुशिकात्मजश्च।
कृत्वा स्वयं तौ सुखसंनिविष्टौ संपूज्य पुत्रैः प्रणनाम राजा ।।

निरीक्ष्य रामं नयनाभिरामं बभूवतुस्तौ सुख-मुग्ध-चित्तौ।
संकीर्तयामास ततः सभायां धर्मेतिहासं सकलं वसिष्ठः ।। १४१

मुनिभिरनवगम्यं चित्ररूपं समस्तं
कुशिकसुतचरित्रं वर्णयामास रम्यम्।
प्रमुदितमनसासौ धीरविज्ञो वसिष्ठः
सुखमधिकमवापुः सर्व-लोका निशम्य ।। १४२

बोले बामदेउ सब साँची। कीरति कलित लोक तिहुँ माची ।।
सुनि आनंदु भयउ सब काहू। राम लखन उर अधिक उछाहू ।।

ततश्चोचे मुनिर्ज्येष्ठो वामदेवः सभाजनान्।
"यथा प्रियं तथैवेदं सत्यं कुलगुरोर्वचः ।। १४३
प्रसृतं तद्यशः शुभ्रं त्रैलोक्येऽपि मुनेर्महत्।"
तन्निशम्य वचः सार्थं हृष्टाः सर्वे सभाजनाः ।। १४४
राम-लक्ष्मणयोरासीत् विशेषं सुखं तदा।
तन्निशम्य मुखात् तस्य विश्वामित्र-प्रशंसनम् ।। १४५

—मंगल मोद उछाह नित जाहिं दिवस एहि भाँति।
उमगी अवध अनंद भरि अधिक अधिक अधिकाति ।।

नित्य-नूतन-संमोदैर्नाना-शुभ-महोत्सवैः।
अधिकाधिक-संवृद्धैरयोध्या सा व्यराजत ।। १४६

सुदिन सोधि कल कंकन छोरे। मंगल मोद बिनोद न थोरे॥

विवाह-कङ्कणान्यासन् सुमुहूर्ते शुभे दिने।
मोचितानि च सर्वाणि शुभ-मोद-विनोदनैः॥ १४७

नित नव सुखु सुर देखि सिहाहीं। अवध जन्म जाचहिं बिधि पाहीं॥

नित्य-नूत्न-सुखां वीक्ष्य सदायोध्यां दिवौकसः।
अयोध्यायां स्वयं जाता जनितुं स्पृहयालवः॥ १४८

बिस्वामित्रु चलन नित चहहीं। राम सप्रेम बिनय बस रहहीं।

इच्छन्नपि पुनर्गन्तुं स्वाश्रमं कुशिकात्मजः।
न शशाक तथा गन्तुं श्रीराम-स्नेह-मार्दवात्॥ १४९

दिन दिन सयगुन भूपति भाऊ। देखि सराह महामुनिराऊ॥

स्नेहं तं नृपतेर्वीक्ष्य वर्धमानं दिने दिने।
प्रशशंस च तं भूयो विश्वामित्रो महामुनिः॥ १५०

मागत बिदा राउ अनुरागे। सुतन्ह समेत ठाढ़ भे आगे॥

ययाचेऽसौ नृपानुज्ञां सानुरागोऽपि गाधिजः।
प्रेमार्तो नृपतिश्चैवं तस्थावग्रे सपुत्रकः॥ १५१

नाथ सकल संपदा तुम्हारी। मैं सेवकु समेत सुत नारी॥

"मुनिराय तवैवेयं सर्वसम्पन्न मे प्रभो।
किङ्करस्तेऽत्र तिष्ठामि सभार्या-पुत्रकः सदा॥ १५२

करब सदा लरिकन्ह पर छोहू। दरसनु देत रहब मुनि मोहू॥

स्नेहस्तेऽस्तु सदा नाथ वर्धिष्णुर्मे सुतेषु च।
संदर्शन-कृपा-लाभो मम चास्तु सदानघ॥" १५३

अस कहि राउ सहित सुत रानी। परेउ चरन मुख आव न बानी॥

उक्त्वैवं नृपतिर्वाक्यं दारपुत्रैः सहाग्रहीत्।
रुद्ध-कण्ठो मुनेः पादौ भाराक्रान्ताशयस्ततः॥ १५४

दीन्हि असीस बिप्र बहु भाँती। चले न प्रीति रीति कहि जाती॥

समाश्वास्य ततो भूपं दत्वाशीर्वचनानि च।
प्रतस्थे स्वाश्रमं विप्रो विश्वामित्रो महामुनिः॥ १५५

शब्दातीता नु सा नित्यं प्रीति-रीतिरसंशयम् ।
यथायोध्यापतिर्मूकस्तथैवासौ महामुनिः ॥ १५६

रामु सप्रेम संग सब भाई । आयसु पाइ फिरे पहुँचाई ॥

सादरं मुनिना सार्धं ययौ रामः सहानुजः ।
आज्ञापितस्तु तेनासौ न्यवर्तत पुरीं पुनः ॥ १५७

राम रूपु भूपति भगति ब्याहु उछाहु अनंदु ।
जात सराहत मनहिं मन मुदित गाधिकुलचंदु ॥

राम-रूपं नृप-स्नेहं विवाहोत्सव-संमदम् ।
स्मारं स्मारं प्रतस्थेऽसौ गाधि-वंश-विधुः पथा ॥ १५८

बामदेव रघुकुल गुर ग्यानी । बहुरि गाधिसुत कथा बखानी ॥

वामदेवो वसिष्ठश्च रघुवंश-गुरुस्ततः ।
विश्वामित्र-कथां भूयो वर्णयामासतुर्मुदा ॥ १५९

सुनि मुनि सुजसु मनहिं मन राऊ । बरनत आपन पुन्य प्रभाऊ ॥

श्रावं श्रावं यशोगानं कौशिकस्य तथाद्भुतम् ।
आत्मानं कृतिनं मेने भाग्यवन्तं च भूपतिः ॥ १६०

बहुरे लोग रजायसु भयऊ । सुतन्ह समेत नृपति गृहँ गयऊ ॥

कृतानुज्ञास्ततो राज्ञा ययुः सर्वे गृहं निजम् ।
प्रविवेश सुतैः सार्धं राजा नृपति-मन्दिरम् ॥ १६१

जहँ तहँ राम ब्याहु सबु गावा । सुजसु पुनीत लोक तिहुँ छावा ॥

स्मारं स्मारं जनाः सर्वे विवाहोत्सवमद्भुतम् ।
सर्वत्र सुख-संतुष्टा जगुः श्रीराम-गौरवम् ॥ १६२

पवित्रं तद् यशो दिव्यं व्याप्तं त्रिभुवनेष्वथ ।
श्रोतारं न परं तं तं वक्तारमपि पावयत् ॥ १६३

आए ब्याहि रामु घर जब तें । बसइ अनंद अवध सब तब तें ॥

यतः प्रभृति रामोऽसौ परिणीयागतः पुरीम् ।
ततः प्रभृति सायोध्या जाता सुख-निकेतनम् ॥ १६४

प्रभु बिबाहँ जस भयउ उछाहू । सकहिं न बरनि गिरा अहिनाहू ।।

तमानन्दं तमुत्साहं रघुवीर-विवाहजम् ।
नालं वर्णयितुं शेषो गिरा नैवं सरस्वती ।। १६५

कबिकुल जीवनु पावन जानी । राम सीय जसु मंगल खानी ।।
तेहि ते मैं कछु कहा बखानी । करन पुनीत हेतु निज बानी ।।
निज गिरा पावनि करन कारन राम जसु तुलसी कह्यो ।

सीता-राम-यशो दिव्यं कवि-जीवन-पावनम् ।
सुख-मङ्गल-धामेति मत्वा तुलसिना मया ।। १६६
काव्येऽस्मिन् यतितं किञ्चित् शुचीकर्तुं निजां गिरम् ।
शब्दैर्वर्णयितुं चैवं सीता-राम-महद्-यशः ।। १६७

रघुबीर चरित अपार बारिधि पारु कबि कौनें लह्यो ।।
उपबीत ब्याह उछाह मंगल सुनि जे सादर गावहीं ।
बैदेहि राम प्रसाद ते जन सर्बदा सुखु पावहीं ।।

अपारः सागरः सोऽयं रघुवीर-यशोऽद्भुतम् ।
को नु याति कविः पारं श्रीराम-चरिताम्बुधेः ।। १६८
ये तु भक्त्या निशम्यैतन्मुदा गायन्ति सादरम् ।
रघुवीर-विवाहस्य वर्णनं सर्व-मङ्गलम् ।। १६९
सीता-राम-कृपा-पात्रं ते तु लोके सदा जनाः ।
भव-दुःख-परित्राताः प्राप्नुवन्ति सुखं महत् ।। १७०

—सिय रघुबीर बिबाहु जे सप्रेम गावहिं सुनहिं ।।
तिन्ह कहुँ सदा उछाहु मंगलायतन राम जसु ।।

श्रीरामस्य यशो दिव्यं सर्व-मङ्गल-धाम ये ।
गायन्ति शृण्वते चैवं नान्तस्तेषां सुखाम्बुधेः ।। १७१

इति श्रीतुलसी-मानस-नलिने श्रीरामचरितमानसभावानुवादे
'अयोध्याप्रत्यागमनं' नाम द्विपञ्चाशस्तरङ्गः ।।
समाप्तं चेदं बालकाण्डम् ।



* *

शुद्धि-रचनान्तर-पत्रम्

अस्मिन् शुद्धि-रचनान्तर-पत्रे मुद्रणदोषैः सहैव केचित् रचना-दोषाः अपि शुद्धीकृताः काव्य-सौन्दर्याधानकत्व-हेतुना यावच्छक्यं दोष-वर्जन-हेतुना च। इतःपरमपि नैके दोषाः काव्येऽस्मिन् सन्त्येव। रसिक-मतल्लिकोपच्छन्दनमेव तत्र मे शरणम्। —**नलिनी साधले (पराडकर)**

* *

शुद्धि-पत्रम्

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
११	२७	पाणिनः	पणिनः
१६	३८	विनाशायव	विनाशायैव
१७	४४	प्रकाशानुभयोः	प्रकाशावुभयोः
२०	६६	शृण्वति	शृण्वन्ति
२३	२०	जाल्यं	जाल्मं
२६	३	मत्वाहं	नत्वाहं
३८	२७	विरहन्ति	विहरन्ति
३८	३१	यदेमं	यदेकं
३८	३१	ेऽयं	सोऽयं
३९		...तृतीयस्तरङ्गः ॥	...षष्ठस्तरङ्गः ॥
४५	१०	जन्तुजंडधी	जन्तुर्जडधी
५६	२४	यद्विश्वमेतद्	यद्विधमेतद्
५७	११	कासारेऽमिन्	कासारेऽस्मिन्
५८	१४	गुञ्जन-मधुकर	गुञ्जन-मञ्जुल-मधुकर
६०	२७	श्रद्धापाथे येन	श्रद्धापाथेयेन
७८	८	शिवजयाभिनपरा	शिवजयाभिधानपरा
८२	१२	मत्प्रियसुता	यत्प्रियसुता
८६	३४	मयैकं	मयैवं

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
८७	८	दृष्टः	हृष्टः
८८	१७	निःशङ्क	निःशङ्कं
८९	२२	मत्वा युक्तं	मत्वायुक्तं
८९	२४	अस्थाय	आस्थाय
९१	३७	सिन्धः	सिन्धुः
९२	१	उवाचाय	उवाचार्यं
९२	३	सादृढमद्रि	सा दृढमद्रि
९५	२१	यथा भवन्नित्य	यथाभवन्नित्य
९९	१७	हृदयं जाड्यं	हृदयं, दृष्ट्वा जाड्यं
१००	२४	कपालिने	कपालिनं
१०१	३२	वचनैः	वचने
१०२	४२	तपाद्रिकन्यां	ततोऽद्रिकन्यां
१०२	४२	प्रति ते...	प्रति ते मुनीन्द्राः ।
१०४	९	प्रीतिस्तदा	प्रीतस्तदा
१०७	३७	संसारिणस्तथा	संसारिणस्तदा
११६	३७	कार्शिताङ्गाः	कर्शिताङ्गाः
१२३	४४	विब्रुधर्षिरूपे	विबुधर्षिरूचे
१३१	३१	सत्कत्वेः	सत्कवेः
१३३	८	शङ्कर	शङ्करः
१३४	२१	तरुरैकश्चामिन्	तरुरेकश्चास्मिन्
१३८	४१	कुरुमा	कुरु मा
१३९	५०	सिंहासस्थ	सिंहासनस्थ
१४०	५१	निजधाम स प्रजाभिः	निजधाम सह प्रजाभिः
१४१	२	दाशरथे दाशरथेस्तथा	दाशरथेस्तथा
१४२	७	अत्यन्य	अत्यन्त
१४२	१०	विशेषषम्	विशेषम्
१४३	१२	समुतलं	समतुलं
१४४	१८	यताश्रुत	यथाश्रुत

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
१६२	२१	चराचरपातक	चराचरपालक
१६६	३९	वरिष्यतीहि	वरिष्यतीह
१६७	५०	तथा परंपारम्	तथापरंपारम्
१७९	१४	महिषीनृपो	महिषीनृपौ
१८०	१८	दम्पतीं	दम्पती
१८३	३१	अति-लोभनीयम्	मति-लोभनीयम्
१९२	१३	ससंतुष्टा	सुसंतुष्टा
२०८	१५२	कूटोपाचस्य	कूटोपायस्य
२१०	१६६	बुद्धिश्रमम्	बुद्धिभ्रमम्
२३८	१४	सुतो	सुतौ
२३९	१९	दृष्टोत्सवं	दृष्ट्वोत्सवं
२५५	१३	मत्समोऽन्योद्य	मत्समोऽन्योऽद्य
२५९	४८	विध्वस्तः	विश्वस्तः
२६८	३७	रंजा	राजा
२६८	४१	गदिदं	गदितं
२७८	५९	सुरम्यापि	सुरम्याणि
२८५	३३	प्रज्वलित	प्रज्वालित
२९१	१३	सीताचित्रम्	सीताचित्तम्
२९२	२	तस्थतुर्तौ	तस्थतुस्तौ
३२३	८२	रवे	खे
३३९	४१	मतिरेषोऽस्मि	मतिरेषोऽस्ति
३४३	६०	सद्गुणैर्मुक्तः	सद्गुणैर्युक्तः
३५७	१३	सचिराः	रुचिराः
३६२	४३	लोकतया	लोहितया
३७६	६३	मुभशंसिनः	शुभशंसिनः
३७८	११	यात्राभिश्च	यात्रिभिश्च
३७९	२३	समुपस्थापयायासुः	समुपस्थापयामासुः
३८२	५०	तथैवान्यै	तथैवान्ये

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
३८७	७२	मिथिला द्विजेन्द्राः	मिथिला-द्विजेन्द्राः
३८८	७९	तदाजेयऽपुरेश	तदाजेयपुरेश
३९०	८७	स्मरादिः	स्मराग्निः
४२१	७४	भयः	भूयः
४२२	७६	मग्न्याम्	मग्न्यम्
४२९	४६	समाश्वस्य	समाश्वास्य
४२९	४७	सत्संमति	तत्संमति
४३०	५०	मृतुतरं	मृदुतरं
४३४	८०	वाचा वर्ण्य	वाचावर्ण्य
४३७	४	परिचस्क्रु	परिश्चक्रु
४४०	२५	संछादिता	संछादित
४४२	३९	समृद्धृत्य	समुद्धृत्य
४५४	१४५	रासीत् विशेषं	रासीत् सविशेषं

रचनान्तर-पत्रम्

पृष्ठम्	श्लोकः	मूलम्	रचनान्तरम्
६	५	निबिडध्वान्त	घनतमिस्त्र
६	५	तिमिरमेव	तम इवात्र
७	१२	त्रिदोषाँश्चैव	त्रिदोषाँश्चापि
११	२८	हिताहितद्वये	हिताहितयुगे
१६	३१	सतां हि हंसाः	हि सन्मरालाः
१६	३३	सद्भिरेव	सद्भिश्चापि
१६	३७	सन्ताः	सन्तो
१८	५१	याचनममृतार्थे	चामृतमर्थयेऽहम् ।
२०	६३	श्रुत्वैव प्रेम्णा	श्रुत्वैव भक्त्या
२५	२९	नैकां लीलां	नैका लीला
२५	३०	लोककल्याणरूपां	लोककल्याणहेतौ
३३	५८	प्रणत-व्यसन	प्रणत-दुरित
३३	५९	परमार्थतस्तद्	परमार्थतो यत्
३३	५९	सीतारघूत्तमद्वयं	सीतारघूत्तमयुगं
३८	३०	सगुणं न ब्रह्म	सगुणं तथाऽन्यम्
४६	१९	तस्मिन्नेव तु सुग्रीवे	बिभीषणेन वा तस्मिन्
		पुनर्वापि बिभीषणे	सुग्रीवेण च वा पुनः ।
४६	२१	गणयन्नात्मसदृशम्	गणयन्नात्मसन्निभम्
५५	१८	मत्वा	नत्वा
६०	२६	संशय-भ्रम	संशय-भय
७२	२०	शंभुरथम्	शंभुरयम्
७५	४४	ब्रह्मा-विष्णु	विष्णु-विरिञ्चि
७७	५	विलय	विलयं
९१	३५	साधना	साधनां
९१	३८	व्यतर दाशिरथाद्रि	व्यतरदाशिषमद्रि
१०२	५	जनिश्चापि	जनिं चापि
१०७	३४	रघुनाथरक्षितस्त्वेषु	रक्षितो रघुनाथेन
		एक एव सुरक्षितः	स तु एकः सुरक्षितः

पृष्ठम्	श्लोकः	मूलम्	रचनान्तरम्
११०	५९	न मे वचनमनृतम्	नानृतं वचनं मम
११०	६०	स्मरभार्या निवबृते	स्मरभार्या पुनर्गता
११२	९	सपुष्पवृष्टि	सुपुष्पवृष्ट्या
११५	२९	ब्रह्मारमेशादि च	विरिञ्चि-विष्णवादिक-
११५	३२	सिस्माय	स्मित्वाथ
१३४	१९	मुनिवृन्दास्	मुनिसंघास्
१३८	४३	हे शेषमण्डन सुरेश्वर सर्वशक्ते रामस्य मे शुभकरं कथयस्व वृत्तम् ॥	नानाविधं समुपदिष्टमपि प्रमुग्धम् । चित्तं मदीयमिति मा कुरु कोपमुग्रम् ॥
१४०	५३	मद्-ऋतार्थम्	मद्-यथार्थम्
१४३	१५	वृन्दः	वृन्दं
१४८	३४	पञ्चेन्द्रियाधिमतय	पञ्चेन्द्रियाधिपतय
१५१	१	युगलाञ्जलिरद्रि	युगलाञ्जलिमद्रि
१६३	२८	प्रवृद्धदर्प	प्रध्मातदर्प
१६५	३३	राज्ञाप्यपूजयत	राज्ञाप्यपूजयत स
१६७	४४	सदृशस्तु संप्रत्यन्यः	सदृशस्तु च संप्रत्यन्यः
१७०	६८	वृन्दाः	संघाः
१७५	१०८	विज्ञः	वेत्तुम्
१७५	११०	वृन्दः	संघः
१८३	३१	मद्-वीक्षणं	यद्-वीक्षणं
१८७	५१	प्रत्युवाच प्रभु	प्रत्युवाच हरि
१९२	१९	कीर्तितानि मखानि च ।	कीर्तिता ये मखास्तथा ।
१९२	१९	सर्वाणि	सर्वास्तान्
१९९	७३	ब्रह्माहरौ च	ब्रह्मा हरश्च
२०३	११०	ब्रह्माविष्णु	विधिविष्णु
२०४	११७	रहस्यं तद् याते चात्र	रहस्येऽत्र याते तस्मिन्

पृष्ठम्	श्लोकः	मूलम्	रचनान्तरम्
२०५	१३०	जन्मनो हि मे	जन्मनो न मे
२१३	१८१	निववृते	निरागतः
२२५	२२५	विनाशकः प्रभु!	विनाशको देवः
२२८	९९	जयसुखधाम हरे	जय सुखधामन् रे
२२९	११०	निववृते	पुनर्गता
२३३	२२	पवनश्चैवाववुः	पवनश्चाप्याववौ
२५४	२	वनेकस्मिन्	वने यस्मिन्
२५४	३	मारिचेन	मारीचेन
२५४	३	सदैवायं	सदा तस्मिन्
२५९	४९	मारिचः	मारीचः
२६१	८	प्रतिपालयती सती	प्रतीच्छन्ती ततः सती
२६९	४८	संकेतमिवैवं	स्वसंकेतमिवैवं
२८४	२६	दृश्यम्	हृद्यम्
३०९	९	गमयिता	विगमिता
३२९	११	पादस्पर्शान्निववृते	पाद-स्पर्श-विशङ्किता
३३९	४२	मृत्योरवतुमभि	मृत्योरवितुमभि
३४१	४७	मत्रैनमवतुम्	मत्रैनमवितुम्
३४१	५०	भ्रमादिक्षु	मदादिक्षु
३५२	१३४	व्यलीयन्त	व्यलीयत
३६५	५७	मयूरी	मयूर्यो
३७५	५९	तथाग्रजाः	तथाग्रजौ
३८१	३९	मुत्तमम्	मुत्तमाम्
३९४	११०	मनोजमातङ्गजमानहर्ता	मनोभवेभक्रममानहर्ता
४०३	९	शोभां वधोः	सीताश्रियं
४२१	७४	रवर्धयत् तं	रवर्धयत तं
४३१	५७	नरनाथ	नरनाथः
४४२	४१	सभाजयन्	अपूजयन्
४५२	१२६	स्यत्र	स्यद्य

* * *